अत्रिगोत्रीयश्रीदेवराजयज्वविरचितम्

निघण्टु-निर्वचनम्

डॉ० सुद्युम्नाचार्यः
विजयपालो विद्यावारिधिः

2233 | [illegible]
5-7-99

डा. चन्द्रकान्त
[signature]

निदेशक
2/7/99

प्र[illegible]
[illegible]
वि[illegible]
उ.[illegible]
ले[illegible]

3. प्र[illegible]
स्ले[illegible]

प्रस्[illegible]
प्र[illegible]
प्रक[illegible]

किस[illegible]

तथा[illegible]
व[illegible]
अ[illegible]
सं[illegible]

दि. [illegible]

2233 / [illegible] 5.7.99

प्रमाण-पत्र

पुस्तक का नाम - निघण्टु-निर्वचनम्

लेखक का नाम - श्री देवराज यज्वा

टिप्पणी भूमिकादि लेखक-सम्पादक - डा. सुद्युम्न आचार्य

जन्म-स्थान सतना (म.प्र.)

लेखक का पता (पत्र व्यवहार हेतु) रीडर-संस्कृत विभाग
मु.म. टाउन P.G. कालेज
बलिया (उ.प्र.) Ballia (U.P.) 277001

उ.प्र. में पिछले 10 वर्षों से रहने का प्रमाणपत्र - मैं प्रमाणित करता हूँ कि मैं 28 जनवरी 1975 से संस्कृत विभाग मु.म. टाउन P.G. कालेज बलिया में प्राध्यापक पद पर निरन्तर कार्यरत हूँ।

पुस्तक की विधा/विषय - निघण्टु के प्रत्येक शब्दों का निर्वचन

प्रकाशन-वर्ष 1998

प्रकाशक का नाम एवं पता - रामलाल कपूर ट्रस्ट, बहालगढ़
जि. सोनीपत (हरियाणा) 131021

किस पुरस्कार के लिये प्रस्तुत है - पाणिनि/सायण पुरस्कार

प्रमाणित करता हूँ कि मेरे द्वारा भूमिकादि रचित तथा सम्पादित निघण्टु-निर्वचनम् शीर्षक ग्रन्थ का प्रथम संस्करण वर्ष 1998 में प्रकाशित हुआ है तथा इस पुस्तक का 60% या उससे अधिक भाग इसके पूर्व प्रकाशित नहीं हुआ है। यह कृति उ.प्र. संस्कृत संस्थान द्वारा पूर्व वर्ष में किसी भी पुरस्कार से पुरस्कृत नहीं है।

डा. चन्द्रकान्त [signature]

निदेशक 2/7/99

भूमिकादि लेखक तथा सम्पादक का नाम
सुद्युम्न आचार्य
रीडर-संस्कृत विभाग
मु.म. टाउन P.G. कालेज
बलिया (उ.प्र.) 277001
Ballia (U.P.)

दि. 2.7.99

अत्रिगोत्रीयश्रीदेवराजयज्वविरचितम्

निघण्टु-निर्वचनम्

सम्पादकः

डॉ० सुद्युम्नाचार्यः

एम०ए०, डी०फिल०, प्रवाचकः,

एम०एम० स्नातकोत्तर महाविद्यालय, बलिया (उ०प्र०)

संशोधक :

विजयपालो विद्यावारिधिः

आचार्यः, पाणिनिमहाविद्यालयस्य, बहालगढस्थस्य

प्रकाशक : रामलाल कपूर ट्रस्ट
बहालगढ़, जि० सोनीपत,
हरियाणा—१३१०२१

प्रथमसंस्करणम् : ११००
संवत् : २०५५ वि०
सन् : १९९८ ई०

उत्तर प्रदेश संस्कृत संस्थान
ग्रन्थ परि० सं० 13529
संस्कृत भवन लखनऊ

मूल्य : १५०.००

संगणकाक्षरयोजक : भगवती लेज़र प्रिंट्स

मुद्रक : राधा प्रेस
कैलाशनगर, दिल्ली-३१

संशोधकीयम्

मन्त्रार्थप्रतिपादनेन यदुपकरोति वेदस्य तच्छास्त्रं निरुक्तमित्यभिधीयते। प्राचीनवाङ्मये बहव आचार्या निरुक्तशास्त्रस्य प्रवक्तारः स्मर्यन्ते, परन्तु सम्प्रति तेषां प्रवचनानि नोपलभ्यन्ते। अद्यत्वे तु यास्कीयेन निरुक्तशास्त्रेणैकाकिना प्राणितीयं सुमहती निर्वचनविद्या कथञ्चित्। निर्वचनशास्त्रस्यास्य द्वाववयवौ—प्रथमोऽध्यायपञ्चतयात्मकः सूत्ररूपो व्याख्येयः समाम्नायो निघण्टुरिति प्रख्यायते, द्वितीयश्च द्वादशध्यायात्मकं सपरिशिष्टं व्याख्यानं निरुक्तमिति व्याह्रियते। तदेवं सप्तदशाध्यायी सपरिशिष्टा निरुक्तमित्यभिधीयते। तत्र निघण्टुस्वरूपम् अर्धपञ्चमैः श्लोकैः प्रविभागपुरःसरं प्रदर्शयामास ऋक्सर्वानुक्रमणीभाष्यकारः षड्गुरुशिष्यो वेदार्थदीपिकायाम् (ऋक्सर्वा० परिभाषा २.१२)। तथा हि—

आद्यं नैघण्टुकं काण्डं द्वितीयं नैगमं तथा।
तृतीयं दैवतं चेति समाम्नायस्त्रिधा मतः॥ १॥
गौराद्यपारपर्यन्तमाद्यं नैघण्टुकं मतम्।
जहाद्युल्बमृबीसान्तं नैगमं संप्रचक्षते॥ २॥
अग्न्यादिदेवपत्न्यन्तं देवताकाण्डमुच्यते।
तत्राग्न्यादिदेव्यूर्जाहुत्यन्तः क्षितिगतो गणः॥ ३॥
वाय्वादयो भगान्ताः स्युरन्तरिक्षस्थदेवताः।
सूर्यादिदेवपत्न्यन्ता द्युस्थानदेवता इति॥ ४॥
गौरादिदेवपत्न्यन्तं समाम्नायमधीयते[1]॥ ४ $^1/_2$॥

यास्को यथा द्वितीयतृतीये काण्डे प्रतिपदं निर्वचननिगमप्रदर्शनपुरःसरं व्याचख्यौ, न तथा प्रथमं काण्डम्। आद्यस्य तु काण्डस्य कानिचिदेव पदानि निरुच्य निगमांश्च प्रदर्श्य तूष्णीमासाञ्चक्रे स तत्र भवान्, बहुशस्तु 'एतावन्त्यस्य सत्त्वस्य नामानि' इत्यादिवाक्यमुदीर्याग्रे ससार। दुर्गस्कन्दस्वामिनावपि निरुक्तवचनान्येव व्याचख्यतुः। तदेवं नैघण्टुककाण्डस्याधिक-

---

१. इमे श्लोकाः सायणाचार्येण ऋग्वेदभाष्योपोद्घात उद्धृताः। प्रथमश्लोकश्च पाठभेदेन नीलकण्ठकृते निरुक्तश्लोकवार्त्तिके (१.६.२५७) पठ्यते। मुद्रितेषु निघण्टुनिर्वचनसंस्करणेषु च ग्रन्थान्ते स्थूलाक्षरैर्मुद्रिताः सर्व इमे श्लोकाः।

संख्यानि पदानि निर्वचननिगमरहितानि समतिष्ठन्त। अतः प्राधान्येन नैघण्टुकपदान्युद्दिश्य देवराजयज्वा प्रावर्त्तत। अत एव च स विस्तरेण नैघण्टुकपदानां निर्वचनानि, प्रकृतिप्रत्ययादिविभागपुरःसरां व्याकरणप्रक्रियां सूत्रोपोद्बलिकां निगमांश्च प्रदर्शयामास। ग्रन्थारम्भे ह्यातिष्ठते सः—'विरचयति देवराजो नैघण्टुककाण्डनिर्वचनम्' इति। नैघण्टुककाण्डं व्याख्यायायं ग्रन्थकारो यास्कस्कन्दस्वामिभ्यां कृतं व्याख्यानं विशदप्रत्ययाभावग्रस्तं मन्यमानः परिशिष्टरूपेण प्रकरणत्रयम्[१], नैगमदेवताकाण्डे च क्रमेण विशदयति।

देवराजयज्वनः कृतिरियं संकलनप्रायत्वाद् मौलिकीति न शक्यते वक्तुम्, तथापि निघण्टुपाठसंशोधने, पदार्थानां संयोजने विशदीकरणे च विहितस्तस्य प्रयासः सुतरां प्रशस्यते। स प्राधान्येन स्कन्दस्वामिनमुपजीवति। स्कन्दटीकातः शतशः सन्दर्भा नामग्राहमत्र ग्रन्थ उद्ध्रियन्ते, ततोऽप्यधिकाः खलु नामोल्लेखं विनैव शब्दशोऽनुक्रियन्ते। 'इदं च स्वमनीषया न क्रियते' (भूमिकायाम्) इति तस्योक्तिर्यथार्थैव। सा हि वेङ्कटमाधवकृतम् ऋग्वेदभाष्यं तदन्तर्गतानुक्रमणीश्च पर्यालोच्य, विविधप्रदेशाहृतकोशांश्च निरीक्ष्य, स्वकुलपरम्परयाध्ययनमालम्ब्य, यास्कीयनिरुक्तं स्कन्दस्वामिकृततट्टीकां चाधृत्य निघण्टुपदानि समशोधयत्। ततो निरुक्तं स्कन्दटीकाम्, स्कन्द-राहदेव-श्रीनिवास-माधव-उवट-भट्टभास्कर-भरतस्वाम्यादिकृतानि वेद-भाष्याणि, पाणिनीयाष्टाध्यायीम्, उणादिसूत्राणि (पञ्चपादीम्, दशपादीं च), उणादिसूत्रवृत्ती (श्वेतवनवासिनो माणिक्यदेवस्य च), क्षीरस्वामिकृतामर-कोषोद्घाटनं नाम टीकाम्, तथैवानन्ताचार्यकृतां कोषटीकां कमलनयनीय-पदसंस्कारग्रन्थं च निपुणमभिसमीक्ष्य निर्वचनानि व्यवास्थापयत्। ततश्च दक्षिणापथे प्रथिताभ्यो वेदसंहिताभ्य उदाहरणानि समकलयत्। एतत् सर्वं स स्वभूमिकायां स्फुटतया न्यवेदयत्। देवराजः स्वप्रदर्शितानि निर्वचनानि उदाहरणानि च प्रामाणिकपुरुषव्याहृत्यनुकृतिमात्रत्वात् शुकभाषितानीव ब्रुवाणो यथार्थं स्वयमेवोरीकरोति।

बङ्गदेशीयो विद्वद्वरः सत्यव्रतसामश्रमिमहोदयो देवराजस्य प्रादुर्भाव-कालादिकं निपुणं विविच्यास्य कृतेरेतस्या नीरक्षीरविवेचिनीं समीक्षां प्रास्तावीत् स्वकीयस्य प्रख्यातग्रन्थस्य 'निरुक्तालोचनम्'-इति-नामधेयस्य द्वादशे प्रकरणे। वयमपि तामनुमोदामहे प्रायेणेति सा तस्यैवानूचानस्य वचोभिरत्रानूद्यते—

---

१. षट्साधारणानि दिवसश्चादित्यस्य च (निघ० १.४), द्वादशोपमानामानि (निघ० ३.१३), षड्विंशतिर्द्विशनामानि (३.२९)।

"अथास्य देवराजयवज्वनो व्याख्यानशैली त्वजटिलेति प्रशस्यैव विपश्चिताम्। परं पौराणिकमतप्रबलकालप्रभवत्वादस्य बहुत्रैव पौराणिक-मतानुसृता अपि व्याख्याः सन्दृश्यन्ते। तद्यथा–'पञ्चाशत्कोटियोजनविस्तीर्णेति पृथिवी' (नि०नि० १.१.११) इति, 'पर्वतोऽपि पक्षच्छेदात् पूर्वमन्तरिक्षे व्रजति स्म' (नि०नि० १.१०.११) इति, 'पक्षच्छेदात् पूर्वं पर्वतश्च' (नि०नि० १.१०१५) इति, 'उभयत्रापि छेद्यच्छेदकभावेन सम्बन्धः...... तेषामिन्द्रः पक्षानच्छिनत्' (नि०नि० १.१०.१) इति, 'पिनाकम्......दण्डाकारं धनुरुच्यते; तच्च रूढितो महादेवीयमेव सामान्येन' (नि०नि० ३.२९.१६) इति च। नैरुक्तविज्ञानभावावगमे चासमर्थ एवासीत् स इति च गम्यतेऽत्रानेकत्र। तथाहि–'विकृतत्वं ज्योतिषः शीतत्वाद् ह्रासवृद्धिभ्यां वा' (नि०नि० ४.२.६५) इत्येवमादीनि समालोच्यानि।"

"नैरुक्तशासनात् तस्य क्वचित् क्वचिद् ज्ञाननेत्रोन्मीलनञ्च प्रतीयतेऽत्र। तद्यथा–'यमः=मध्यस्थानवायुः' (नि०नि० ५.४.१२) इति, 'यमः...= अस्तमयावस्थ आदित्य उच्यते' (नि०नि० ५.६.१७) इति, 'विष्णुः=तीव्ररश्मि-द्वारेण सर्वत्र ह्याविशति' (नि०नि० ५.६.११) इति, अदितिः...=ऐतिहासिकानां मते देवमाता, नैरुक्तानां मते अदीनादिगुणा, आत्मपक्षे प्रकृतिः' (नि०नि० ४.१.४९) इति च। 'पञ्चजनाः' इति पदस्य व्याख्यानावसरे शूद्रस्य च यज्ञाङ्गकार्याधिकारित्वं निर्णीतम् (नि०नि० २.३.२३)। 'यत्रैकार्थानां पदानां सन्निपातः, तत्रैकं तस्य वाचकं भवति; अन्येषां नैरुक्त्या योजनं कर्त्तव्यमिति मर्यादा' (नि०नि० १.१.११) इत्यादिर्व्याख्योपदेशश्च तस्य नूनं मूल्यवानेव। 'रलयोरभेदः' (नि०नि० १.१.१३) इति, 'डळयोरेकत्वस्मरणात्' (नि०नि० १.१.१५) इति, 'बवयोरभेदः' (नि०नि० ४.३.१२८) इत्येवमादयश्च तत्प्रदर्शितविधय औणादिकशब्दसाधने भवन्त्येव बहुत्र सहायकाः।"

"निघण्टुसमाम्नायविरुद्धा अपि भवन्ति पदपाठा इति चेह ध्वनितम्। तद्यथा–'सतीकम्......अत्र सशब्दे अवग्रहकरणं पदकाराणामभिप्रायस्य वैचित्र्यात्' (नि०नि० १.१२.५८) इति। अस्मन्मते तु सतीकमित्यस्य तथैव निर्वचनं कार्यम्, यतो नैव विरुध्येत 'स। तीकम्' इति पदग्रन्थः[१] तस्यापि संहितावत्त्वेन व्यपदेशात् तद्विरोधस्यानुपेक्षणीयत्वात्। वस्तुतः 'स्वृतीकम्' इत्येवात्र नैघण्टुकम्, न पुनः 'सतीकम्' इति। एवं हिकमित्यादेर्निर्वचनावसरे यदुक्तम् 'एते निपाताः' (नि०नि० ३.१२.१-९) इत्येवम्, तदपि

१. महाभाष्यकारः पतञ्जलिस्त्वाह–'न लक्षणेन पदकारा अनुवर्त्याः, पदकारैर्नाम लक्षणमनुवर्त्यम्। यथालक्षणं पदं कर्तव्यम्' (म०भा० ३.१.१०९ अन्यत्र च) इति।

पदग्रन्थविरोधान्निन्दनीयमेव। तत्र त्वस्मन्मते 'एते नव निपातसमुदायाः' इत्येव वक्तुं युक्तम्, अन्यत्राप्येवं समुदितपदद्वयस्य पदत्वेन परिगणनं दृश्यत एव हि निघण्टाविति। सायणाचार्यस्तु ऋग्भाष्यादौ हिकमित्यादीनां पदपाठरीत्यैव व्याख्यानमलिखत्, न तु निर्वचनरीत्येति पश्यत्विदं स्वग्रन्थापमानं किल देवराजः।"

"व्योमशब्दनिर्वचनावसरे त्वेकत्र पदग्रन्थमर्यादाभङ्गभिया उणादिसूत्रस्य यास्कीयनिर्वचनस्यापि ध्वनितोऽनादरः। तथा हि–'उणादौ तु·····वीयते तद्वायुना व्योम। तथा च निरुक्तम्–योनिरन्तरिक्षं महानवयवः परिवीतो वायुना (निरु० २.२.४) इति, इदं निर्वचनमेतत्पदकारयोः शाकल्यात्रेययोरनभिमतम्, वीत्यस्मिन् अवगृहीतत्वात्' (नि०नि० १.३.३) इति। वस्तुतो यास्केनापि पदकाराभिमतमेव निरुक्तम्–व्योम व्यवनम् (निरु० ११.४.६) इति द्रष्टव्यम्, परिवीत इति तु नैव व्योमनिर्वचनम्, अपि तु तत्र प्रदर्शितनिगममन्त्रश्रुतं पदमेव, स एष महान् भ्रमो लक्ष्यतेऽत्रास्य देवराजस्येति।"

"इहानेकत्र निगमस्यान्वेषणीयता च प्रतिपादिता स्वकण्ठरवेणैव। तदिदमन्वेषणीयत्वप्रतिपादनं नैव दूषणीयं मन्यतेऽस्माभिः, 'न हि सर्वः सर्वं वेत्ति' इति प्रज्ञावत्सिद्धान्तात्, लुप्तशाखीयनिगमानां लाभासम्भवाच्च, परं यदत्र ब्राह्मणवादा अपि निगमा इति प्रदर्शिताः 'बेकुरानामासि जुष्टा इति निगमः' (नि०नि० १.११.५७) इति, तदिदं न रोचतेऽस्मभ्यम्, निरुक्तमूलरूपस्य निघण्टुसमाम्नायस्य ब्राह्मणपूर्वभवत्वेन ब्राह्मणग्रन्थीयपदेषु लक्ष्यासम्भवात्, द्वादशाध्याय्यां निरुक्ते क्वापि तथाविधनिगमास्मरणाच्चेति। अपि वा ब्राह्मणग्रन्थेषु ये केचन मन्त्रा विद्यमानसंहितास्वश्रुताः श्रूयन्ते तेऽपि प्रायो विलुप्तशाखीया एव स्युरिति सर्वमवदातमिति।" इति।

(निरुक्तालोचनम्, द्वि० सं० पृ० २७७-२७९)

सोऽयं महत्त्वपूर्णो ग्रन्थः प्रथमतो रडल्फराथमहाशयेन यूरोपे प्रकाशं नीतः। भारते तु पण्डितवरः श्रीसत्यव्रतसामश्रमिभट्टाचार्यः कलिकातानगरे शकाब्दे १८०४ (ई० १८८२) महता श्रमेण सम्पाद्य "निरुक्तम् (निघण्टु) अत्रिगोत्रश्रीदेवराजयज्वकृत'-'निर्वचन'-नामटीकासहितम्" इति शीर्षकेणेमं ग्रन्थं प्राकाशयत्। ततः श्रीजीवानन्दविद्यासागरभट्टाचार्यः कलिकातानगरे ई० १८९१ सामश्रमिसंस्करणमेव पुनः प्राकाशयत्, कमपि नूतनं संस्कारं न व्यधात्। ई० १९५२ संवत्सरे कलिकातानगर एव तृतीयं वारमयं ग्रन्थो गुरुमण्डलाभिधया संस्थया प्राकाश्यत, परं संस्कारस्तत्रापि न कश्चिद् विहितः। एवं च वास्तविकं संस्करणं सामश्रमिमहाभागस्यैवासीत्, तच्च

बहुदोषदूषितमिति सुविदितं विदुषाम्। सामश्रमी महाशयः स्कन्दस्वामिकृतनिरुक्तटीकया सहास्य ग्रन्थस्य तुलनां चेद् व्यधास्यत्, तर्हि नैकसन्दर्भान् समशोधयिष्यत्। भोजदेवीयसरस्वतीकण्ठाभरणस्य सूत्राण्यस्मिन् ग्रन्थे बहुश उद्ध्रियन्ते, परं तेषां पाठाः प्रायेणाशुद्धाः स्थलसंकेतरहिताश्च मुद्रिताः। देवराज उणादिसूत्राणां पञ्चपाद्याः श्वेतवनवासिकृतां टीकां दशपाद्याश्च माणिक्यदेवकृतां टीकामपि यत्र तत्र समाश्रयति, परमेषा टीकाद्वयी नोपायोजि। बहुत्रामुष्मिन् संस्करणेऽसम्बद्धानि वाक्यानि, मुद्रणजन्यदोषाश्च दरीदृश्यन्ते। तदेवमस्य वेदार्थोपयोगिन उत्कृष्टग्रन्थस्य नवीनसंस्करणावश्यकतामन्वभवमहं कतिपयेभ्यो वर्षेभ्यः पूर्वम्। ततः पूर्वसंस्करणत्रयं संगृह्य राथसंस्करणं हस्तलिखितमातृकाश्चाप्यनवलोक्य स्वमनीषयैव संशोधनकर्मणि प्रावर्त्ते देवराजनिर्दिष्टग्रन्थान् यथोपलब्धमाश्रित्य। स्वल्प एव कर्मणि संजाते कार्यान्तरेषु व्यासक्तत्वात् संशोधनकर्मात्याक्षम्। अतीते वत्सरे ममानुजसमः सतीर्थ्यो डॉ० सुद्युम्नाचार्यो यदृच्छया कदाचिद् बहालगढाश्रम उपातिष्ठत। तस्य पुरतोऽहमेतद्ग्रन्थसम्पादनस्य प्रस्तावम् उपातिष्ठिपम्। स च तत्क्षणमेव सहर्षमूरीकृत्य, स्वस्थानं गत्वा मनोयोगेन सम्पादनकर्म विधाय मुद्रणप्रतिकां प्रैषयद् मां प्रति। ततः कार्यं त्वरया विहितमिति मन्यमानोऽहं पुनः संशोधनकर्मणि प्रावर्त्ते। तदेवं सम्पादनं तस्यैव विदुषोऽत्र विद्यते, पादटिप्पण्यश्च तत्कृताः '(सु०)' इति संक्षेपेण निर्दिश्यन्ते। मत्कृतास्तु टिप्पण्यः संक्षेपनिर्देशरहिताः। यदत्र मया व्यधायि तत् समासतोऽधस्ताद् उपन्यस्यते—

१—अस्य ग्रन्थस्य पूर्वमुद्रितसंस्करणेषु मूलपाठो बहुधा विकृतो व्यस्तोऽसम्बद्धो मुद्रणदोषग्रस्तश्चोपलभ्यते। इदंप्रथमतया स्कन्दकृतनिरुक्तटीकादिग्रन्थेभ्यः साहाय्यमादाय स यथामति समशोधि, सुसम्बद्धश्च व्यधायि।

२—ग्रन्थान्तरेभ्य उद्धृताः सन्दर्भा मूलस्रोतोभिः समन्वित्य यथायथम् उपन्यस्यन्ते।

३—उद्धृतसन्दर्भाणां समेषां स्थलसंकेताः पुनरुत्सविशेषैः सम्मेल्य संशोध्य चेह मुद्र्यन्ते।

४—भोजराजादिकृतिभ्य उद्धृतानां सन्दर्भाणां मूलान्यन्विष्य, पाठान् संशोध्य प्रकाशनमत्र विधीयते।

५—सर्वत्र धातुसूत्रनिर्देशो विधीयते, उणादित्रयोपयोगः क्रियते, ऋग्वेदस्याष्टकादिविभागं विहाय मण्डलादिविभागश्च प्रदर्श्यते।

६—नूतनाः खल्वपि निगमाः, विशेषतो दयानन्दसरस्वतीकृतभाष्यतः,

प्रस्तूयन्ते।

७–पादटिप्पणीषु पाठभेदाः, अपपाठाः, स्थलसंकेताः, स्पष्टीकरणम् इत्येवमादयो विषया निर्दिश्यन्ते।

अस्य ग्रन्थस्य संशोधनकर्मणि प्राचीनाचार्याणां कृतयो बहुधा परामृश्यन्त। तत्रापि स्कन्दस्वामिकृता निरुक्तटीका विशेषत उल्लिख्यते। समेत आचार्याः कृतज्ञतया विनम्यन्ते। वैदिक-वाङ्मय-प्रकाशने तत्पराः श्रीरामलालकपूरन्यासस्याधिकारिणः कृतज्ञतया स्मर्यन्ते ये ग्रन्थमिमं न्यासप्रकाशनेषु समावेशयन्। स्वान्तेवासिनो ब्र० प्रदीपकुमारशास्त्री, ब्र० देवदत्तार्यः, ब्र० वेदमुनिः, ब्र० धर्मेशश्च शुभाशीर्वचोभिः संवर्ध्यन्ते यैः मुद्रणपत्रसंशोधनकर्मणि महत् साहाय्यं प्रादायि। ते हि यथाकालमनूचानाः भूयासुरिति शुभाशंसनं नः। अस्माकं चिरसहयोगी श्रीजीवनराममहाभागः कृतज्ञताभाग् भवति नो यो मुद्रणकर्मणि महान्तं क्लेशमविगणय्य तत्परोऽभवत्। संशोधनकर्मणि मुद्रणपत्रशोधने च महति प्रयासे विहितेऽपि दृष्टिदोषाद् अज्ञानाद् वा त्रुटयः संजाताः स्युः, ताः क्षाम्यन्तु सुधिय इति विनिवेद्य विरमति संशोधकः–

बहालगढ़ विजयपालो विद्यावारिधिः

१५.१.१९९७

सम्पादकीयम्

महर्षि-यास्कस्य देवराजयज्वनश्च परम्परायां निर्वचनशास्त्र-सिद्धान्ताः

महर्षियास्केन विरचितं निघण्टु-निरुक्तं कोशशास्त्रे भाषाविज्ञानक्षेत्रे चाद्यापि प्रकाशस्तम्भ इव परं चकास्तीति नास्ति परोक्षं प्रेक्षावताम्। निघण्टुनाम्नि ग्रन्थे पर्यायशब्दानां प्राचीनतमं संग्रथनमेकत्र समुपलभ्यते। निरुक्ते तु शब्दानाममीषां विविधाधारकं विविधौपयिकं च वर्गीकरणम्, अथ च विविधनिगमोद्धरणपुरःसरं निर्वचनं सम्प्राप्यते। एवञ्च क्षेत्रयोरेतयोः प्रथमं प्रतमं च ग्रन्थद्वयं समं विदुषां चेतसि चमत्कारमाविष्करोति।

यास्कस्य कालः–महर्षियास्केनापि ऋषिभिरन्यैस्तुल्यं स्वस्थानविषये स्थितिकालविषये च न किमपि प्रोक्तम्। अतस्तस्य कालविषये विद्वांसो नैकमत्यं भजन्ते। तथापि तस्य स्थितिः ई० पू० ५०० शताब्दतः परवर्ती न शक्यते भवितुमिति तु सर्वानुमतः समाचारः। अस्मात् कालात् पूर्वमेव तस्य स्थितिः स्यात्।

डॉ० लक्ष्मणस्वरूपमहोदयानां मतमिदं यद् 'यास्कः प्लेटोमहाशयाद् न्यूनातिन्यूनम् एकशताब्दपूर्वम् अवश्यं वर्तमान आसीत्। यास्को निरुक्तेऽथ च प्लेटोमहाश्यः क्रैटिलस (Cratylus) नाम्नि ग्रन्थे भाषाविज्ञानविषयिणीं निर्वचनसम्बन्धिनीमवधारणां चैकत्र समुपस्थापयतः।

निघण्टोः टीकाकाराः–निघण्टोः टीकाकृतो यास्कापेक्षया सन्ति सुबह्वौत्तरकालिकाः। तस्मिन् समये मूलग्रन्थसंरक्षण एव विदुषां समयोऽवसितः स्यात्, न स्याट्टीकायाः कृते समयः। अथवा 'मूलग्रन्थ एव मनः प्रदेयम्, किं वा स्याट्टीकयानया' इति मतिरेव टीकां व्यवारीत्। स्यात् किमपि। परं स्थितिरियं वेदविषयेऽपि समुपलभ्यते। अतिप्राचीनकालात् सन्ततमविच्छिन्नं प्रवर्तमानस्य वेदस्य सर्वथा क्रमबद्धं सर्वाङ्गसम्पूर्णं वेदभाष्यं सर्वप्रथमं सायणाचार्यकृतं समुपलभ्यते। एवं यास्कात् सुबहूत्तरकालं स्कन्दस्वामिदुर्गाचार्यविरचितं निरुक्तभाष्यम्, देवराजयज्वविरचितं च निघण्टुभाष्यं वयं प्राप्नुमः।

देवराजयज्वनः परिचयः कालश्च–देवराजयज्वना निघण्टुभाष्यं

महत्सुविहितम्। अस्ति ह्यस्य सर्वातिशायि महत्त्वम्। यतो हि भाष्यकारोऽसौ सर्वेषां निघण्टुशब्दानां क्रमबद्धं निर्वचनं तेषां निगमं चोदाजहार। निर्वचनक्रमेऽसौ अष्टाध्यायीम्, वार्त्तिकम्, उणादिसूत्रादिकञ्च भृशमुपायुङ्क्त, ब्राह्मणग्रन्थ-महाभारतपुराणाद्युद्धरणप्रदानैर्यथायथं तत् पर्यपुषच्च। एवं च सर्वप्रथमं क्रमबद्धं साङ्गोपाङ्गमिदं निघण्टुभाष्यमिति व्याहर्तुं वयं शक्नुमः।

देवराजयज्वनः पिताभिगोत्रवंश्यो 'यज्ञेश्वर'-नामधेय आसीत्। महाविद्वानसौ ज्ञानभास्वन्मयूखैरज्ञानान्धकारं प्रत्यहन्निति भाष्यकारस्यास्य प्रारम्भिकेन मङ्गलाचरणेन स्पष्टं व्यज्यते।

देवराजयज्वनापि स्वस्थितिकालविषये न किमपि लिखितम्। अतस्संवर्ततेऽत्र कश्चन मतभेदः। डा० लक्ष्मणस्वरूपमहोदयोऽनेकानि प्रमाणानि पुरस्कृत्य देवराजस्य सायणात् पूर्ववर्तितां साधयति। समासतस्तेषां महोदयानां मतमिदं यद् 'देवराजोऽसौ पदमञ्जरीम्, दैवम्, भोजञ्च वारंवारमुद्धरति। धातुवृत्तिमपि द्विधा उद्धरन्नसौ प्रतीयते। परं नोपलभ्यते तस्योद्धरणं धातुवृत्तौ। अतस्तदुद्धरणं वर्तते पुरुषकारस्येत्यस्माभिः स्वीकार्यम्।'

डॉ० स्वरूपमहाशयानामिदमपि मतं यत् "सायणो देवराजमुद्धरति। तथा हि ऋग्वेदे १.६२.३ मन्त्रे सायणाचार्येण प्रोक्तम् 'उस्राशब्दात् स्वार्थे पृषोदरादित्वेन घप्रत्ययः' इति निघण्टुभाष्यम्।" निघण्टुभाष्यमिति वचनं नान्यत् किमपि संकेतयति ऋते देवराजयज्वनो भाष्यात्। उद्धरणमिदं द्योतयति यत् सायणात् पूर्ववर्ती देवराजः। तं सायणो वेत्ति च। सायणाचार्यो वीरबुक्कराज्ञः प्रधानामात्य आसीत्। अयं राजा प्रायशः १४०० संवत्समये राज्यमधितिष्ठति स्म। अतस्तस्मात् किञ्चित् पूर्वम् अर्थात् प्रायशः १३७० संवत्समय अथवा चतुर्दशस्य ख्रीष्टशताब्दस्य प्रारम्भे देवराजेन भाव्यम्।

निर्वचन-शास्त्र-सिद्धान्ताः

महर्षियास्कोऽनेकेषां शास्त्राणां पारदृश्वा पण्डित आसीत्। तेन हि शब्दनिर्वचनप्रसङ्गे चतुर्णां वेदानाम्, पदपाठानाम्, तैत्तिरीय-मैत्रायणी-काठकादिशाखानाम् ऐतरेयगोपथकौषीतकीशतपथादिब्राह्मणग्रन्थानाम्, प्रातिशाख्यानाम् अथ च विविधोपनिषदाम् उद्धरणं प्रादायि। अपि च तेन नैरुक्तसम्प्रदाय-वैयाकरणसम्प्रदाय-याज्ञिकसम्प्रदाय-ऐतिहासिकसम्प्रदाय-नैदानसम्प्रदायाद्याचार्याणां नामग्राहम् उल्लेखो व्यधायि। सर्वमेतद् यास्कस्य महद्वैदुष्यम् अवद्योतयति।

एतेषां ग्रन्थानामालोके महर्षिरसौ शब्दनिर्वचनसिद्धान्तान् सविस्तरं प्रत्यपादयत् प्रश्नांश्चानेकान् समादधात्। शब्दनिर्वचनक्रमे तान् सिद्धान्तान्

यथाविधि न्ययोजयत्। यानपि सिद्धान्तान् महर्षिरसौ साक्षान्न निरदिशत् तानपि सर्वान् स यथाविधि वेत्ति स्मेति स्पष्टं परिज्ञायते। इदमत्रावधेयम्-शास्त्रेऽस्मिन् सन्ति बहूनि स्थानानि येषां विशिष्टनामकरणं परिभाषाख्यानं च परवर्तिपण्डितैराधुनिकभाषाविज्ञानविद्भिर्वा निरमायि। परमिदमस्ति सुखावहं चित्रं यद् यास्केन परिभाषा अप्रख्यायापि परिभाषातत्त्वानां समम् अनुपालनं विहितम्। एतद् अनिर्दिष्टसिद्धान्तान् प्रत्यपि तस्याभिज्ञतां द्योतयति। सर्वमेतदत्रानुपदं प्रकाशयिष्यते।

ध्वनिविज्ञानविषयकास्सिद्धान्ताः

भाषाया लघुतमोंऽशः, य एकस्मिन् काले, एकेन स्थानप्रयत्नसमाहारेण उच्चार्यते, स ध्वनिर्वा वर्णो वा प्रोच्यते। भाषाया विभिन्नशब्दाः कालक्रमानुसारं ध्वनिपरिवर्तनं भजन्ते। प्रथमे वैयाकरणा आधुनिका भाषावैज्ञानिकाश्च यानपि ध्वनिपरिवर्तनप्रकारान् प्रतिजानते तान् सर्वानपि यास्को नामभेदेन समामनत्। यथा–

ध्वनिपरिवर्तनस्य उपभेदाः

१. **लोपः**–याचामि–यामि।

अत्र आदिलोप-अन्तलोप-उपधालोप-द्विवर्णलोपादि-लोपभेदानपि यास्कः सोदाहरणं पर्यजीगणत्।

२. **वर्णोपजनः**–अस्–आस्थत्, वृ–द्वारः।

उपभेदोऽयम् अद्यत्वे 'आगम' नाम्ना प्रथते।

३. **आदिविपर्ययः**–हन्–घनः, भिद्–बिन्दुः।

४. **अन्तव्यापत्तिः**–वह्–ओघः, मिह्–मेघः।

मध्यवर्तिनाम् अक्षराणामपि विपर्याससंग्रहार्थम् उपभेदाविमौ केवलम् 'आदेश' नाम्ना प्रसिद्धौ।

५. **आद्यन्तविपर्ययः**–श्चुत्–स्तोकः, कृत्–तर्कुः।

उपभेदोऽयं प्रायशो वर्णविपर्ययनाम्ना व्यवह्रियते।

डॉ० लक्ष्मणस्वरूपमहोदयानां मतं यद् यास्कः समीकरणमपि यथायथं वेत्ति स्म। यद्यपि न तेनास्य समर्थने किमप्युदाहरणं प्रदत्तम्। आस्माकीना मतिर्यद् आद्यन्तविपर्ययप्रसङ्गे 'रज्जु' शब्दोऽस्य उदाहरणं स्यात्। निरुक्तकारः शब्दममुं सृज्धातोर्वर्णविपर्ययद्वारा व्याचष्टे। तथात्वे सति सृज्, सर्ज्, रस्ज् इति रूपं सम्पद्यते। इदानीं रस्ज् रज्ज् इति रूपाय समीकरणमावश्यकम्। एवञ्च 'सृज् धातोः रज्जुशब्दसिद्धिरिति प्रतिजानता समीकरणं न ब्रुवतापि

यास्केन समीकरणं स्वीक्रियत इत्यनुमातुं शक्नुमः।

ध्वनिपरिवर्तनप्रसङ्गे प्राकृत-प्रभावः

डॉ० स्वरूपमहोदयानामिदमपि मतं यन्निरुक्तकारः प्राकृतप्रभावमपि यथायथं वेत्ति। इदं ५.२४ मध्ये निरुक्ते 'कुटस्य' इति शब्दस्य 'कृतस्य' इति व्याख्यया ध्वन्यते।

अन्यत्रापि प्रभावोऽयं शक्यते परिलक्षितुम्। यथा—'विकट'शब्दं 'विक्रान्तगतिः' इति रूपेण व्याचष्टे निरुक्तकारः (६.३०)। व्याख्यानमिदम् अजर्यं तर्कसङ्गतम्! पाणिनिस्तु व्युपसर्गात् कटच्प्रत्ययेन साधयत्यमुं शब्दम्। परम् उपसर्गात् प्रत्ययाः प्रायशो नोत्पद्यन्त इत्यपूर्वेयं सिद्धिः। कटच्प्रत्ययोऽप्यन्यत्रादृष्टचरः। अभिमतार्थसाधनेऽपि द्रविडप्राणायामः कर्तव्यो भवति। एवञ्च निरुक्तप्रोक्तं व्याख्यानं समीचीनतरं भाति।

निघण्टौ २.१४ मध्ये गतिकर्मसु 'कण्टति' क्रियायामपि व्याप्नोत्येष प्रभावः। महर्षियास्क एनं समर्थयन् भाति। यतो हि ९.३२ मध्ये निरुक्ते महर्षिः कण्टकशब्दं कण्टतिधातुना सार्धं कृन्ततिधातोरपि साधयति। एवञ्च कृन्त्धातोः प्राकृत-प्रभाव-प्रभावितः 'कण्टति'धातुः पश्चाद्वर्तीति प्रतीमः।

अमीषामुदाहरणानामालोके 'केवट'शब्दोऽपि शक्यते यथायथं व्याख्यातुम्। महर्षिः ३.२३ मध्ये निघण्टौ कूपनामसु शब्दममुं परिपठति। शब्दोऽयं 'क' उपपदपूर्वकाद् वृत्धातोः के+वर्त इति रूपेण साधयितुं शक्यते। तथात्वे सति 'जले वर्तमान आवर्त' इति मौलिकोऽर्थः। पश्चात्तु लक्षणया शब्दोऽयं कूपार्थकः प्रतिपन्नः।

एवं रलयोर्विपर्यासः प्राकृते प्रकामं सन्दृश्यते। संस्कृतभाषायाम-प्रतिपन्नास्सामान्यजना असुराश्चैनं विपर्यासं विदधति स्म। महाभाष्यकारः सूचयति यत् 'तेऽसुरा हेऽलयो हेऽलय इति कुर्वन्तः पराबभूवुः'। एष विपर्यासक्रमो मागधीप्राकृते परां काष्ठामुपागात्।

संस्कृतभाषायान्तु विपर्यास एष प्रायशो न सन्दृश्यते। परं यत्र क्वचन प्राकृतप्रभावस्समागत एव। पश्चाच्च बालमूलादिवार्त्तिकेन कपिलकादिवचनेन (अ० ८.२.१८ वा०) च यत्र क्वचन स्वीकृतिरप्यस्य प्राप्यते। एषा स्वीकृतिः शब्दस्य स्वाभाविकं विकासं स्वाभाविकमर्थञ्च पुष्णाति।

देवराजेन प्राकृत-प्रभावस्योपेक्षा

परं देवराजयज्वा प्राकृतप्रभावमुपेक्षते। यथा निघण्टौ ३.२ मध्ये ह्रस्वनामसु 'क्षुल्लक'शब्दः परिगण्यते। आचार्यो देवराजः 'क्षुधं लाति' इति

विग्रहेण 'क्षुध्+ला' इति पदच्छेदेन शब्दममुं साधयति। परम् इदं तावदयं प्रष्टव्यः—ह्रस्ववस्तुनः कोऽस्ति क्षुधा सह सम्बन्धः? किं दीर्घविपरीतं ह्रस्वं जडजातं क्षुधा परिपीडितं भवति ? स्थितिरियं यत् 'क्षुल्लकश्च वैश्वदेवे' (अ० ६.२.३९) सूत्रे काशिकाकारोऽपि विग्रहमेनं प्रदर्शयामास।

परं प्राकृतप्रभावमाश्रित्य शब्दोऽयं सरलतया शक्यते साधयितुम्। यतो हि 'क्षुद्र'शब्दस्य रेफस्थाने लकारादेशेन पुरोगामिसमीकरणेन च सिद्ध्यत्ययं शब्दः। प्रक्रिययानया प्राकृते 'क्षुल्ल'शब्दः प्रकामं प्रयुज्यते। इदमस्ति तथैव यथा भद्रशब्दात् प्राकृते सम्पन्नो भल्लाशब्दः, हिन्दीभाषायां 'भला' शब्दश्च प्रभूतं व्यवह्रियते। एवं स्वाभाविकश्शब्दार्थविकासः परिज्ञातो भवति।

महावैयाकरणः पाणिनिरपि पूर्वोक्ते सूत्रे महद्विपरीतं क्षुल्लकशब्दं परिगणयन् ह्रस्वार्थमवद्योतयति, क्षुद्रकशब्दाच्च क्षुल्लकशब्दव्युत्पत्तिं ध्वनयति। 'क्षुल्लकवैश्वदेवम्' इति शब्देन सोमपानार्थं क्षुद्रकं पात्रम्, क्षुद्रको ग्रहो वा प्रोच्यते। (द्र०—का० श्रौ० सू० ९.४.१)।

एवम् 'अल्प'शब्दः 'अर्भ'शब्दाद् विकासं प्राप्नोद् इति सम्भाव्यते। अर्भशब्दो लघ्वर्थे प्रयुज्यते। निघण्टौ ३.२ मध्येऽर्भकाल्पशब्दद्वयमपि ह्रस्वार्थे परिगण्यते। रॉथमहोदयोऽपि विकासमेनं समुचितां सम्भावनां ब्रवीति।

नीरशब्दस्य, नीलशब्दस्य चापि रोचक इतिहासः। नीरशब्दो निघण्टौ १.१२.७२ मध्य उदकनामसु परिपठितोऽपि वैदिकवाङ्मये नोपलभ्यते। आचार्यदेवराजोऽपि अस्य निगममन्वेषणीयं ब्रवीति। परं निघण्टौ परिगणनेन परिज्ञायते यद् वाङ्मये विरलोऽपि, व्यवहारे सुतरां शब्दोऽयं प्रयुज्यते स्म। एनं व्यवहारमनुसृत्य लौकिकसंस्कृतेऽपि सुतमां प्रयोगः प्रचलितः। यथा— (नि+ईर इति) व्युत्पत्तिरस्य ब्रवीति तथा मूलत ईरणशीलस्य गतिशीलस्य जलस्य कृते शब्दोऽयं प्रयुज्यते स्म। अयं प्रमुखतो गतिशीलं कालमेघम्, यामुनं श्यामं जलं वा सन्दिशति स्म। अत एव प्राकृतप्रभावेण नीरशब्दान्निःसृतो 'नील'शब्दः कृष्णं श्यामं वा वर्णम् अभिदधाति। र्-ल् इत्यादिविपर्यये सति किञ्चिदर्थोऽपि परिवर्तत एव। यथा दृष्टम्-ज्वरो ज्वलः, नाडी नाली इत्यादौ। एवं मूलतस्संज्ञाशब्दोऽपि 'नीलमेघ' इत्यादिष्वयं कृष्णार्थको विशेषण-शब्दस्सम्पन्नः। संस्कृतसाहित्ये नीलशब्दः कृष्णार्थक एव। अत एव न्यायशास्त्रे रूपभेदगणनाप्रसङ्गे नीलं प्रोच्यते, न तु तद्भिन्नं कृष्णवर्णं व्यवस्थाप्यते। एवमत्र प्राकृतप्रभावस्वीकारेण शब्दार्थयोर्मौलिकं स्वरूपं पश्चाद्वर्ती विकासश्च सर्वथा परिज्ञायते।

एवं प्राकृतप्रभावमाश्रित्य संस्कृते डलयोर्विपर्यासोऽपि सन्दृश्यते। अत एव संस्कृते 'डलयोरभेदः' इति प्रवादोऽपि श्रूयते। निघण्टावप्यस्य कतिचनोदाहरणानि द्रष्टुं शक्यन्ते यथायथम्—निघण्टौ १.२.९९ मध्य उदकनामसु 'जल'शब्दः परिगण्यते। वेदे नास्य प्रयोग उपलभ्यते साम्प्रतम्। तथापि निघण्टुपाठेन, ऋग्वेदे 'जलाषभेषजम्' इत्यादिप्रयोगेण च वैदिके युगेऽस्य प्रयोगोऽनुमीयते।

महावैयाकरणो देवराजः शब्दममुं 'जल घातने' धातोस्साधयति। परन्तु परं सुखम्, परं प्रियम्, जीवनं जलं कथं स्याद् घातकम् ? अत्र केषाञ्चिन्मतं यत् पिपासाया विघातकत्वादिदमस्ति घातकम्। परं नेदमस्त्यस्य मौलिकं प्रवृत्तिनिमित्तम्। एवन्तु विश्वस्मिन्निह सकलं वस्तुजातं स्थानभेदेन कालभेदेन विषयभेदेन वा सर्वप्रकारकं भवत्येव। तथापि यद्यस्य प्रमुखं कार्यं तदेव नामाभिधाने हेतुर्भवति। जलस्य जीवनं प्रमुखं कार्यम्। इदं कथं ददाति जीवनमिति पिपासितोऽयं तावत् प्रष्टव्यः। पिपासितायापि तु वारिधारा स्वादुः सुगन्धिः स्वदते तुषारा!! एवं सिद्ध्यतीदं यद् घातनं नास्य मौलिकं प्रवृत्तिनिमित्तम्।

अन्यत्र शीतलकरणार्थकाज्जलधातोः शब्दोऽयं साध्यते। (जलति शीतं भवति)। परमस्मिन्नर्थे जल्धातोः प्रयोगो न क्वाप्युपलभ्यते। एतेन प्रतीयते यत् केवलं जलशब्दसिद्धये धातोरस्य धातुपाठे पाठः। व्याख्याकारैः प्रयुक्तं 'जलयति' रूपं सर्वथा नामधातुरूपम्। एवं जलधातुश्च धात्वर्थश्च नास्ति साम्प्रतम्।

दशायामस्यां शब्दोऽयं जडशब्दात् प्राकृत-वर्ण-विपर्यय-प्रभावेण साधयितुं शक्यते। अतश्च तडागादिस्थं स्थिरम् उदकं मूलतो जलम्। नदीप्रवाहपतितम् उदकन्तु नीरम्। अत एव जलं जडं जलधिं च जडधिं मन्वाना अनेके कवयः सर्वथा मनोहारि चात्यन्तं चमत्कारि च रचनं कृतवन्तः[१]।

प्राकृतप्रभावस्यान्यदुदाहरणम्—द्योतते—ज्योतत इति। निघण्टौ १.१६ मध्ये ज्वलतिकर्मसु क्रियाद्वयं परिपठितम्। प्राकृते प्रायशस्सर्वत्र दकार-पश्चाद्वर्तियकारस्य स्थाने जकारादेशो भवति। यथा अद्य—अज्ज—आज इत्यादीनि सन्ति बहून्युदाहरणानि। एवमत्रापि जकारादेशेन 'ज्योतते' रूपं

---

१. यथा—महाकविविजयवर्धनविरचितो दर्शनीयोऽसौ श्लोकः—
'लावण्यकान्तिपरिपूरितदिङ्मुखेऽस्मिन्, स्मेरेऽधुना तव मुखे तरलायताक्षि!
क्षोभं यदेति न मनागपि तेन मन्ये, सुव्यक्तमेव जलराशिरयं पयोधिः'!!
अत्र पयोधिर्जडधिरूपेण प्रोच्यते।

निष्पन्नमिति शक्यते वक्तुम्।

आचार्यो देवराजस्तु 'जुतृ भासने' धातोरिदं रूपं साधयति। परमस्य रूपाणि साहित्ये न क्वाप्युपलभ्यन्ते। अतः काल्पनिकोऽयं धातुरिति क्रमते बुद्धिः। जुतृधातोः स्वीकारेऽपि न भवति सर्वथा कण्टकानाकीर्णः पन्थाः। यतो ह्यत्र यकारागमोऽपि विधेयः। अपि च ज्योतिः, ज्योत्स्नेत्यादिशब्दानां कृते पुनः वाचनिको नियमो विधेयः। अतस्समुचितमिदं यल् लोकात् प्राकृतप्रभावादस्य सिद्धिः स्यात्। यदीदं लोकाद् भिद्येत ततो यत्नार्हं स्यात्। एवमत्र वाचनिकं कार्यं तिष्ठतु तावत् सांन्यासिकम्!!

सघोषमहाप्राणस्य हकारस्य च विपर्ययः—प्राकृतभाषासु सघोष-महाप्राणाक्षराणां हकारस्य च बहुधा विपर्ययस्सन्दृश्यते। मेघः—मेह, वधूः—बहू इत्यादीनि सन्ति बहून्यस्य निदर्शनानि। शब्दानां तुलनाभिः परिज्ञायते यदेषा प्रवृत्तिरस्ति प्राचीनतमा। आधुनिका भाषावैज्ञानिकाः संस्कृतशब्दानां ग्रीकादिभाषाशब्दैस्तुलनया पर्यज्ञासिषुर्यत् सघोषमहाप्राणवन्तः शब्दाः प्राचीनतमाः, हकारवन्तस्तु तदपेक्षया पश्चाद्वर्तिनः। एवञ्च 'गाध्'धातुः, ग्रभ्धातुः, अथ च गभीर-गम्भीर-गभस्तिसदृशाः शब्दाश्च प्राचीनतमाः। परं गाह्धातुः, ग्रह्धातुः, बाध्—बाहुरित्यादयश्शब्दाः सापेक्षदृष्ट्या नवीनाः।

पाणिनिराचार्यः परिस्थितिमेनामनुपालयन् गाध्धातुम्, बाध्धातुं च प्राचीनतमं ब्रवीति। परं तस्मिन् समय उपलब्धं साक्ष्यं पुरस्कृत्य ग्रह्धातुं मौलिकं समाचष्टे। वार्त्तिककारस्तमनुपालयन् वैदिकान् 'ग्रभाय' इत्यादिशब्दान् साधयितुं हकारस्य स्थाने भकारादेशं विधत्ते। आधुनिकभाषावैज्ञानिकमतानुसारेण इदमस्ति वस्तुतो विपरीतकृत्रिमविकासप्रदर्शनम्। 'ग्रभाय' इति प्राचीनतमः प्रयोगः। अतः पश्चाद् भकारस्य स्थाने हकारत्वमापन्नम्, न तु विपरीतम्। महर्षिर्यास्कस्तु सर्वथा वास्तविकम्, न्यायादनपेतम् आधुनिकप्रतिभाशालि-परिशीलितं मार्गं परस्सहस्राब्दपूर्वं प्रतिपालयामासेत्यहो सुखमहो प्रियम्। स 'बाहु'शब्दनिर्वचनप्रसङ्गे 'बाध्'धातुं मौलिकम्, हकारादेशं च समुचितं सम्मनुते[१]। अथ च 'गर्भ'शब्दसिद्धये 'गृभ्' इति मौलिकं धातुं परिकल्पयति।[२] स ग्रह्धातुं प्रचलितं वीक्ष्य तस्य स्थाने भकारादेशं नैव कुरुते। एतेन प्रबन्धेन सिद्ध्यत्येवं यन्महर्षिरत्र सघोषमहाप्राणाक्षरं प्राचीनतमं प्रतिजानीते। परम् अन्येषु कतिपयेषूदाहरणेषु यास्कोऽपि उपलब्धसाक्ष्यं विलोडयन् हकारवन्तं रूपं मौलिकं ब्रवीति। यथा—अन्तव्यापत्तिनिरूपणावसर ओघः, मेघः, नाधः,

---

१. बाहू कस्मात् प्रबाधत आभ्यां कर्माणि—निरुक्तम् ३.८।

२. गर्भो गृभेः—निरुक्तम् १०.२३।

गाधः, वधूः, मधु, इत्युदाहरणानि प्रदत्तानि। अत्र प्रायशस्सर्वत्र हकारस्य स्थाने सघोषमहाप्राणाक्षरादेशस्सम्पद्यते।

एवं सिद्ध्यतीदं यद् भाषायां स्थान्यादेशभावस्तु सम्पद्यत एव। कस्या अपि भाषाया ध्वनिपरिवर्तनं व्याख्यातुकामेनानूचानेन पूर्वं तस्याः स्थान्यादेशभावप्रकृतिर्निपुणं निरीक्षणीया। सा भाषा किम्प्रकारकम् आदेशं सहते, इति विचारणीयम्। तस्योदाहरणं सङ्ग्राह्यम्। उदाहरणालोके कोऽप्यादेशो विधेयः। अथ चादेशविधाने सति स्थान्यर्थेन सहादिष्टशब्दस्यार्थः सङ्गच्छते वा न वेत्यपि समन्ताच् चिन्तनीयम्। तथैव ध्वनिविज्ञानं साधुतरं स्यात्।

एतस्मिन्नालोके यत्र क्वचन देवराजद्वारा निर्मितमादेशकरणं नास्ति साम्प्रतम्। यथा स जलार्थकं 'गभीर'शब्दं गम्धातोर्मकारस्य स्थाने भकारादेशं विधाय साधयितुं समीहते। परं संस्कृते मकारस्य भकारो न विहितः क्वापि। अतोऽकामेनाप्यच्छमतिना नाभ्युपेतव्योऽयमादेश इति मे मतिः। अपितु ग्रभ्-धातोर्गभीरशब्दसिद्धिः समीचीनतरा। यतो हि महर्षियास्कप्रोक्तेन गृभ्धातुना तस्य यण्परम् अथवा ह्रसितं रूपं (short form) ग्रभ् इत्येवं शक्यतेऽनुमातुम्।

निघण्टौ १.११ मध्ये वाङ्नामसु गभीरा गम्भीरा इति शब्दौ पठ्येते। अत्र स्कन्दस्वामी शब्दाननेकान् लाक्षणिकान् सम्मनुते। गभीरशब्दो मूलतो जलस्यागाधत्वं प्राह। पश्चात्तु वाण्या अगाधत्वमपि गभीरशब्देन प्रोच्यते। आचार्यो देवराजोऽत्र गभीराशब्दं गाध्धातोस्समाचष्टे। परं तदा तु शब्दोऽयं वाण्या गाधतां ब्रूयान्न त्वगाधताम्। न हि गाध्धातुरगाधमर्थं कदापि प्रकाशयितुं क्षमते।

अतोऽत्र वाण्यर्थको 'गभीरा'शब्दो गाह्धातोर्निर्मित इति मतमास्थेयम्। यस्माद् 'गहनम्' इति शब्दोऽपि निर्मीयते।

ध्वनि-परिवर्तनस्य कारणानि

आधुनिका भाषावैज्ञानिका ध्वनिपरिवर्तनस्य सुबहूनि कारणानि निर्दिशन्ति। तत्रास्त्यन्यतमं 'सादृश्यम्'। अस्यार्थः—एकशब्दस्यापरसहयोगि-शब्देन तुल्यस्याकारस्य निर्माणाय प्रवृत्तिर्भवति। निदर्शनं यथा-पाणिनिराचार्यः कोः स्थाने कदादेशं विधाय 'कदाचार'शब्दं व्याचष्टे। परं किन्निमित्तकोऽय-मादेशः? अस्योत्तरं सादृश्यमेव। 'सदाचार'शब्दसादृश्यं स्थापयितुकामा जनाः 'कदाचार'शब्दं व्याजह्रुः। एवञ्च यदेवात्र प्रतीयते वाचनिकं तद्वस्तुतस्सर्वथा लोकसिद्धं स्वाभाविकमेव।

निघण्टुप्रोक्ता अनेके शब्दा अपि सरण्यानया शक्यन्ते यथायथं

व्याख्यातुम्। यथा निघण्टौ १.८.१५ मध्ये 'सूनृता'शब्द उषोनामसु परिगण्यते। आचार्यो देवराजः सुपूर्वाद् 'ऊण्'धातोः क्विप्प्रत्ययेन 'सून्'शब्दम्, तस्य ऋताशब्देन सह समासेन 'सूनृता'शब्दं साधयति। परं सून्शब्दस्य प्रयोगो न क्वाप्युपलभ्यते। यदि शब्दोऽयं पृथङ् नाभिधीयते, तर्हि केवलम् एकस्मिन्नुत्तरपदे कथमयं प्रयुज्यताम्? अतः केवलं शब्दसिद्धये परिकल्पिता, स्वाभाविकं विकासमप्रदर्शयन्ती व्युत्पत्तिर्न मानोज्ञकं बिभर्ति। परम् अनृताशब्दसादृश्येन सुवचमस्य व्याख्यानम्। तथा च 'अनृता'शब्देन तुल्यं समानाकारतां विधातुमत्र नकारागमः। 'सूनरी' शब्दसदृशञ्चात्रोकारदीर्घत्वम्। एषा स्वाभाविकी परिस्थितिः क्वचन वचनविधिना विविधैरुपायैर्व्याख्यायते।

ध्वनि-परिवर्तनं परम्परागतं सकारणञ्च—भाषासु ध्वनिपरिवर्तनं तत्तद्भाषापरम्परानुकूलं कारणसहितञ्च सम्पद्यते। परिवर्तनेऽस्मिन् 'किमपि', 'कथमपि' सदृशाणां प्रयोगाणाम् अल्पीयानवकाशः। कोऽपि भाषावैज्ञानिक-स्तस्याः परम्परां निपुणं निरीक्ष्य नियमानवधारयति।

प्रसङ्गेऽस्मिन् दृश्यत एवं यन्निरुक्तकारो नियमानवधार्य शब्दान्निर्ब्रवीति। परं यत्र क्वचन व्याख्याकारा न तथा ध्यानं विदधते, यथास्माभिरपेक्ष्यते। अत्र निदर्शनम्—निघण्टौ १.१० मध्ये मेघनामसु परिपठितः 'कोश'शब्दः। आचार्यो देवराजः कुप्धातोः पकारस्य स्थाने शकारमादिश्य शब्दमेनं साधायमास।

अत्रास्तीयं विचारणा—किं कोपः कोशस्य संवर्तति मौलिकं प्रवृत्तिनिमित्तम्? अपि च संस्कृतभाषायाः कृते पकारस्थाने शकारादेशविधानं परम्परागतम्? सर्वथा नेत्येवास्योत्तरम्। व्यवहारे व्याकरणेऽपि न क्वचन पकारस्य शकारादेशो विहितः।

विमलमतिर्निरुक्तकारस्त्वत्र सर्वथा समीचीनं निर्वचनं प्रोवाच। तस्य मतम्—कोशशब्दः 'कुष्'धातोर्निर्मीयते। अयं द्रव्यनिधानार्थकः कोशशब्दोऽप्ये-तस्मादेव कुष्धातोः। यतः कोऽपि कुशलः कोशं निर्मातुकामो द्रव्यं मध्यतः कुष्णाति। इदमस्ति सर्वं सर्वथा समञ्जसम्। एतेनेदमपि ज्ञायते यत् प्राचि युगे द्रव्यनिधाननिर्माणाय द्रव्यं गृहमध्यभागो वा कुष्यते स्म।

आचार्यदेवराजेन वैदिकप्रमाणाधृतमतिसमीचीनं ध्वनिपरिवर्तनम्—निर्वचनानि प्राचीनप्रमाणैः पुष्टिं प्राप्य शोभनानि भवन्ति। यतो हि तानि प्रमाणानि प्राचीनध्वनिपरिवर्तनपरम्परासन्निकटानि भवन्ति। एतत्तथ्यमनुभवता देवराजेन स्थाने-स्थाने प्राचीनप्रमाणानि प्रदत्तानि।

उदाहरणं यथा—निघण्टौ १.१२.३६ मध्ये परिपठित 'उदक'शब्दः। अत्र

देवराज 'उदानिषुर्महीरिति तस्मादुदकमुच्यते' इति प्रमाणं पुरस्कृत्य 'उदन्'शब्दादुदकं व्याचष्टे। इदमस्ति समीचीनतरम्। 'एतेन' 'उदन्' प्रकृत्यन्तरं च ज्ञायते। अनेन प्रकृत्यन्तरेण 'उदन्या', 'उदन्वान्' इत्यादिशब्दाः स्वभावतस्सिद्धा भवन्ति। आचार्यपाणिनिरेषां सिद्धय उदकस्य स्थाने उदन्नादेशं निपातनेन विधत्ते। (अ. ८.२.१३)। अथ च शस्प्रभृतिविभक्तिष्वपि आदेशोऽयं विधीयते (अ. ६.१.६३)। प्रकृत्यन्तरस्वीकारे तु सर्वं स्वाभाविकम्, नास्ति वाचनिकं किमपि।

एवं निघण्टौ १.१२.९८ मध्ये वारिशब्दप्रसङ्ग आचार्यो यजुर्वेदमुद्धरति। अनेन तस्यार्थस्सर्वथा सुसङ्गतो भवति। एतेन सिद्धमेतद् यद् विभिन्न-निर्वचनायार्थपरिपोषाय च विभिन्नोद्धरणप्रदानमतीव प्रशंसनीयम्।

प्रकृति-प्रत्यय-विज्ञानम्

भाषायां वर्णान्महीयानंशः प्रकृतिः प्रत्ययो वा भवति। आधुनिका भाषावैज्ञानिका अस्य 'रूपिम' इति वा (Morpheme) इति वा नामान्तरं विदधते। इह भारते प्राचीनकालाद् मुख्यतो निरुक्तात् प्रभृति 'रूपिम' इत्येतस्य यावत्सुदीर्घम्, यावत्सुसूक्ष्मं विवेचनं समुपलभ्यते न तावद् विश्वस्य क्वापि भागे, इत्यत्र नास्ति सन्देहसन्दोहः। इदं व्युत्पत्तिशास्त्रं वस्तुतः प्रकृतिप्रत्ययविज्ञानस्यैव विस्तरः। एवञ्च शब्दमात्रं न्यूनातिन्यूनं द्विधा विभज्यते। तयोरेका प्रकृतिरपरश्च प्रत्यय इत्येवं प्रोच्यते। विभाजनमिदं सर्वथा सुनिश्चितनियमानवलम्ब्य सम्पद्यते। अत एवान्यूनानतिरेकोऽयं विभागो न कदापि परिवर्तनं सहते। महर्षियास्कपाणिन्यादय आचार्या अस्य विभाजननियमान् न मुक्तकण्ठं प्रत्यपादयन्त। तथापि ते सर्वथा सुविज्ञाता आसन् आचार्यैः। यतो हि तैर्महति शब्दौघव्यूहे तेषां नियमानां सर्वथा समनुपालनं विहितम्।

आधुनिका भाषावैज्ञानिका भाषाया लघुतमः सार्थकोंऽशो 'रूपिम' इत्येवं परिभाषन्ते। अस्य सार्थक्यं प्रत्यक्षविधिना परिज्ञायेतानुमानविधिना वा। परस्सहस्राब्दपूर्वं महर्षिपतञ्जलिनास्य सार्थक्यपरिज्ञानायानुमान-विधिर्व्यव्रियत। अष्टाध्याय्याः १.२.४५ सूत्रे 'सिद्धं त्वन्वयव्यतिरेकाभ्याम्' इति वार्त्तिकं व्याचक्षाणो महाभाष्यकार एवं प्राह-'वृक्षः' इत्येतस्य पश्चाद् 'वृक्षौ' इत्युक्ते कश्चिदंश उपजायते, कश्चिद्धीयते, कश्चिदन्वयी। 'औ' इत्यंश उपजायते, विसर्गो हीयते, वृक्ष इत्यंशोऽन्वयी, तत्र योंऽश उपजायते तस्यासावर्थो योंऽश उपजायते। यो हीयते तस्यासावर्थो योंऽशः हीयते, योऽन्वयी तस्यासावर्थो योंऽशोऽन्वयी। एवम् अंशोऽयं लोकेऽप्रयुक्तोऽप्यने-

नान्वयव्यतिरेकविधिना सार्थक इति वयं मन्महे। अत एवायं प्रकृतिर्वा प्रत्यय इति वा, आधुनिकसरण्या (Morpheme) पदवाच्यो वा सम्बोभूयते। ब्लूमफील्ड-महोदयस्तु ब्रवीति यद् विशिष्टांशधारका अनेके शब्दाः समानं ध्वनिम्, समानमर्थं चाभिरक्षन्ति। अतस्तस्य सोऽर्थस्तदंशकृत इति तस्यांशस्य सार्थक्यं वयमनुमिनुमः। एवञ्च तदंशं पृथक् (Morpheme) रूपेणावधारयामः।

प्रकृतिप्रत्ययनिर्धारणायायं सिद्धान्तः परस्सहस्राब्दात् सन्ततं प्रवर्तमानो दरीदृश्यते। अतिसमुचितस्सिद्धान्तोऽयं निर्वचनप्रसङ्गे प्रत्यक्षरं परिपाल्यते। अत एव पठति इत्यस्य पठ्+अति इत्येवास्ति विग्रहः। न हि कोऽपि कदापि कथमपि 'प+ठति' इति विग्रहं कर्तुं क्षमते। इदं नास्त्युचितम्, नापि चानेन शब्दार्थैतिह्यपरिज्ञाने कोऽपि लाभो लभ्यते।

अत्र दृश्यते यद् महर्षिर्यास्कः कठिनप्रसङ्गेष्वपि नियमानाममीषां परिपालनाय सञ्चेष्टते। अत्र निदर्शनम्—'अद्भुत' शब्दः। महर्षिर्निरुक्ते १.१६ मध्ये 'अभूतम्' इत्यर्थं प्रोवाच। एवञ्च 'अ+द्भुतम्' इत्यस्ति पदच्छेदः। एतच्चातिसमीचीनम्। अस्य प्रमाणीकरणम् ऋग्वेदे ८.७९.३ मन्त्रे वर्तमानेन 'अनतिद्भुत'शब्देन सम्पद्यते। अत्र 'अ'शब्दस्य स्थाने 'अनति'भाग उपजायते, द्भुतभागश्चान्वयी। अपि च 'अ'शब्दस्य 'अब्राह्मणः'आदिशब्दस्थेन 'अ'भागेन सह समानता विधातुं शक्यते। अत एवास्य विग्रहः—अ+द्भू+त अथवा अथर्व० १२.३.३१ मन्त्रे वर्तमानम् 'अमन्युत' शब्दम् आधारीकृत्य अ+द्भ्+उत इत्येवं कर्तुं शक्यते।

परम् एवंविधेषु कतिपयेषूदाहरणेषु देवराजो निरुक्तकारपरामर्शमतिक्रामति। प्रकृतिप्रत्ययसिद्धान्ताँश्चोल्लङ्घ्य यथाकथञ्चिन्निर्वचनं प्रदत्ते। तत्तु नास्ति स्वीकर्तुं योग्यम्। शब्देऽस्मिन् देवराजप्रोक्तो विग्रहः—अद्+भू+डुतच् अथवा सम्+भृ+डुतन् एवमस्ति। अत्रास्य समाधानाय नास्ति किञ्चिद् यत् कथमेकस्मिन् शब्दे धातुद्वयस्य युगपत् प्रयोगः? अथवा 'सम्' इत्यस्य स्थाने अदादेशः किमाधारकः? अथवा अत्रैतत्प्रकृतिप्रत्ययस्वीकारे किं मानम्? वस्तुतस्त्वेषा शब्दसिद्धये शब्दसिद्धिः। नैषा कमपि नियममवलम्बते।

सम्यक् कालक्रमनिर्धारणेन सम्यक् प्रकृति-प्रत्यय-निर्धारणम्—कालक्रमेण शब्दार्थविकासपरिज्ञानं निर्वचनशास्त्रस्यान्यतमं प्रयोजनम्। अत एव प्रकृतिप्रत्ययाकारनिर्धारणप्रसङ्गे कालक्रमपरिज्ञानमतीवावश्यकम्। इदमस्ति तथ्यं विवादविरहितं यद् निघण्टुप्रोक्ता धातवः प्राचीनाः। धातुपाठे प्रोक्तो

धात्वाकारस्तु तदपेक्षया नवीनः। एवञ्च वेदनिघण्टुनिरुक्तप्रोक्तधात्वाकारं मौलिकं मत्वा तत्स्थाने धातुपाठप्रोक्तधात्वाकार आदेष्टव्यः। न तु विपरीतं कर्तव्यम्।

परम् आचार्यो देवराजस्तु पाणिनीयव्याकरणे लब्धवर्णः। अतस्स पाणिनीयधातुपाठस्य प्रामुख्यसिद्धये धातुपाठप्रोक्तधात्वाकारस्य स्थान आदेशं विधत्ते। परं कथं शब्दार्थविकासमधीषिषुः कश्चन प्रेक्षावान् धातुपाठोक्तं धातुरूपं मौलिकमाचक्षीत ?

अस्य निदर्शनम्-निघण्टौ २.१४.५२ मध्ये 'ऋण्वति' क्रियारूपं गतिकर्मसु परिपठितम्। अत्राचार्यो देवराजो धातुपाठप्रोक्तस्य 'रिवि'धातोः स्थाने 'रयेर्मतौ बहुलम्' इति वार्त्तिकेन बाहुलकबलेन सम्प्रसारणं कृत्वा रूपमिदं साधयते। अत्रेदं ध्येयम्-इदं वार्त्तिकं रयेः स्थाने मतौ परतः सम्प्रसारणं विधत्ते। अत्र तु नास्ति रयिः, नापि च मतुप्। परमहो धन्यं बाहुलकमाहात्म्यं यत् सम्प्रसारणं तदापि सम्पन्नम्!!

वस्तुतस्त्वस्थान इदं क्लिष्टकल्पनम्। यतो हि निघण्टुपाठाद् वेदप्रयोगाच्च 'ऋविः' प्राचीनतमो धातुः। यदि लोके रिविधातुप्रयुक्तानि रूपाण्युपलभ्यन्ते तर्हि ऋवेः स्थान आदेशो विधेयः। यतो हि लोके ऋवेः कदाचिद् रिविरूपं सम्बभूव। न तु विपरीतम्। स्थान्यादेशभावस्तथा विधेयः, यस्मिन् लौकिको वास्तविकशब्दविकासः प्रतिफलनं विदधीत। एवञ्च 'ऋण्वति' प्रयोग-व्याख्यानाय कोऽप्यादेशो नापेक्ष्यते। वैदिकधातोर्नैरुक्तऋविधातोर्वा सिद्धम् ऋण्वति-इत्येवात्र पर्याप्तम्। अतश्चात्र रिवेः स्थाने सम्प्रसारणमकिञ्चित्करम्।

२. एवं निघण्टौ ३.८.३ मध्ये प्रशस्यनामसु 'अनेद्यः' इति परिगण्यते। आचार्यो देवराजोऽमुं शब्दं नञ्पूर्वान्निन्द्धातोस्साधयति। नुम्निषेधं च विदधाति। परम् 'उत ब्रुवन्तो नो निदः' (ऋ.१.४.५) इत्यादिवैदिकप्रमाणैर्वेदे निद्धातोरस्तित्वं परिज्ञायते। एवञ्च वैदिकनिद्धातोः 'अनेद्यः' शब्दसिद्धौ नुम्निषेधोऽपि नापेक्ष्यते। परवर्तियुगे निद्धातोः स्थाने निन्द्धातोः प्रयोगः सम्प्रावर्तत, इत्यप्यनेन विधिना ज्ञायते।

क्वचन विशिष्टप्रयोजनवशान्नैरुक्तधातूनामुपेक्षा-नैरुक्ता धातवस्सर्वथा मौलिकाः परं प्रामाणिकाश्चेत्यत्र नास्ति कोऽपि सन्देहः। तथापि क्वचन विशिष्टं प्रयोजनमालक्ष्य तेभ्यो विचलनं सन्दृश्यते।

अस्योदाहरणम्-नक्षत्रशब्दः। महर्षियास्को निघण्टौ २.१४ मध्ये गत्यर्थे 'नक्षति' क्रियां परिगणयामास। निरुक्ते ३.२० मध्ये च नक्षत्रशब्दं नक्षधातोस्साधयामास। इदमस्ति सर्वथा महत्त्वपूर्णम् अत एव तैत्तिरीय-

ब्राह्मणेऽप्यस्मादेव धातोर्नक्षत्रशब्दस्य व्युत्पत्तिः प्रोच्यते[१] उणादावपि णक्षधातोर्निर्मितं नक्षरूपं स्वीक्रियते।

परं शतपथब्राह्मणे तैत्तिरीयब्राह्मणस्य चान्यस्मिन् प्रसङ्गे न+क्षत्र इत्येवं विग्रहोऽस्य स्वीक्रियते। शतपथब्राह्मणस्येदं मतं यदुद्यन्नेव सूर्यदेवो नक्षत्राणां बलं वा गतिं वा ज्योतिर्वा परिच्छिनत्ति। अत एव तानि नक्षत्राणि वस्तुतो न क्षत्राणि भवन्ति[२]। 'नेमानि क्षत्राणीति च ब्राह्मणम्' इत्येवम् उद्धरता यास्केनापि विग्रहोऽयं सम्मन्यते। दर्भपवित्रपाणिः पाणिनिरपि विग्रहममुं स्वीकृत्य नञ्पूर्वात् क्षत्रशब्दान् नक्षत्रशब्दमनुशास्ति। अत एव काशिकाकारप्रभृतयो वैयाकरणा 'न क्षरति, न क्षीयते' एवं व्युत्पादयन्तः क्षर्-धातोर्वा, क्षिधातोर्वा शब्दममुं साधयितुं क्रमन्ते।

अत्र नक्ष्धातुमुपेक्ष्य क्षर्धातोस्स्वीकरणं वस्तुतो विशिष्टार्थावद्योतनाय। वेदे नक्षत्रशब्दोऽयं तारकसामान्यार्थेऽपि प्रयुज्यते। एकस्मिन् मनोहारिमन्त्रे प्रोक्तं यत्ते हि नक्षत्रास्तारकास्समागते सूर्ये चौरा इव सत्वरं विलुम्पन्ति[३]। अत्र तेषां सगतिकत्वान्नैघण्टुकगत्यर्थकनक्ष्धातोर्नक्षत्रशब्दसिद्धिस्समुचिता।

परं विशिष्टेऽर्थे नक्षत्रशब्दोऽयं चन्द्रसमीपस्थतारकार्थे प्रयुज्यते। वेदस्यैकस्मिन् मन्त्र एवम्भूततारकाणां=नक्षत्राणां समीपे चन्द्रमसो वर्णनं विहितम्।[४] अमी नक्षत्रपदवाच्यास्तारकास्सप्तविंशतिराशिष्वन्यतमे सन्तिष्ठमाना अतिलघुवृत्ते भ्रमणं कुर्वाणास्सामान्यतोऽगतिका इत्येवं वक्तुमर्हाः। अमुं विशिष्टमर्थं व्यञ्जयन्ती 'न क्षरति' इत्यादिव्युत्पत्तिस्सर्वथा साध्वी। अस्य विशिष्टार्थस्यावद्योतनप्रसङ्गे पाणिन्यादिभिर्नैरुक्तधातोरुपेक्षणं संवर्तते सर्वथा समञ्जसम्॥

नैरुक्तधातुप्रोक्तानामर्थानामुपेक्षा—एवं धातूनां निरुक्तप्रोक्ता अर्थाः सर्वथा मौलिकाः प्राचीनाश्च। पश्चात्तु तेषामर्थाः पर्यवर्तन्त। तदा वैयाकरणा नवीनैरर्थैः प्राचीननैरुक्तशब्दान् व्युत्पादयितुमचेष्टन्त। अर्थासङ्गत्यामपि लक्ष्यैकधनास्ते वैयाकरणाः कथं कथमपि "घटं भित्त्वापि, पटं छित्त्वापि" शब्दांस्तान् साधयितुं समैहन्त। अस्य सन्त्यत्र कानिचन निदर्शनानि—

---

१. यो वा इह यजते अमुं लोकं नक्षते तन्नक्षत्राणां नक्षत्रत्वम्।
—तैत्तिरीयब्राह्मणम् १.५.२.१०

२. यानि वै तानि क्षत्राण्यभूवन्न वै तानि क्षत्राण्यभूवन्निति तद्वै नक्षत्राणां नक्षत्रत्वम्।
—शतपथब्राह्मणम् २.१.२.१९

३. अप त्ये तायवो यथा नक्षत्रा यन्त्यक्तुभिः। सूराय विश्वचक्षसे। —ऋग्वेद १.५०.२

४. अथो नक्षत्राणामेषामुपस्थे सोम आहितः। —ऋग्वेद १०.८५.२

१. महर्षिर्यास्को निघण्टौ २.१४ मध्ये गतिकर्मसु 'मार्ष्टि' इति क्रियापदं परिगणयति। अपि च स स्वयं निरुक्ते १.२० मध्ये 'मृग'शब्दम् अस्मादेव मृज्धातोः साधयति। इदमस्ति सर्वथा समीचीनम्। यतो हि वेदेऽपि 'मृगो न भीमः कुचरो गिरिष्ठाः' इत्यादिमन्त्रे भीमो मृग उद्घातिन्यां भूम्यां विचरणशीलः प्रोच्यते। एवमत्र गत्यर्थकमृज्धातोः प्रयोगस्सर्वथा सङ्गच्छते।

परमाचार्यो देवराजस्तु अर्थमेतं प्रति चक्षुषी निमील्य प्रचलितात् शुद्ध्यर्थकान्मृज्धातोर्मृगशब्दं व्याचष्टे। दशायामस्याम् अङ्ग भवानेवं पृष्टो व्याचष्टाम्-किम्प्रकारकाय शोधनाय प्रसिद्धोऽयं मृगो वनभूमिषु। स्पष्टतो नास्त्यस्य किमपि समाधानम्। अतो मन्तव्यमस्माभिर्यद् 'मृगः, मार्जारः' सदृक्षाः शब्दा निरुक्तोक्तविचरणार्थकाद् धातोर्निर्मिताः, न तु शुद्ध्यर्थकात्। अत्र निघण्टुव्याख्याकारो निघण्टुप्रोक्तमर्थं व्यस्मार्षीदित्यहो कष्टम्!! हिन्दीभाषाया माँजना-आदिक्रियास्तु शुद्ध्यर्थकान्मृज्धातोः। निरुक्तकारेण स्वयमेव निर्वचनप्रसङ्ग एवमुक्तम्-'तानि चेत् समानकर्माणि समाननिर्वचनानि, नानाकर्माणि चेन्नानानिर्वचनानि' इति (निरुक्तम् २.७)।

२. निघण्टौ २.१४ मध्ये गतिकर्मसु 'तकति' इति क्रियापदं पठ्यते। अस्मादेव धातोर्ज्वरार्थकः 'तक्मन्'शब्दो निर्मीयते। निरुक्ते ११.२५ मध्येऽस्य कारणं प्रोक्तमिदं यद् ज्वरो वा उष्णता वा सर्वस्मिन् शरीरे प्रगता परिव्याप्ता वा भवति। स्पष्टतोऽस्मिन् शब्दे क्रियापदार्थोऽयं सर्वथा सुसङ्गतो भवति।

आचार्यो देवराजस्तु हसनार्थकात्तक्धातोश्शब्दं व्याचष्टे। परं स्पष्टतो हसनार्थेन नास्त्यस्य कोऽपि सम्बन्धः। धातुपाठे 'हस्'धातुना तुल्यं तक्, कख्, घघ् इत्याद्यनेके धातवोऽनुकरणसिद्धान्तेन निर्मिता इत्याधुनिकाः। परमस्य निरुक्तप्रोक्तेन 'तकति'क्रियापदेन सह नास्ति कोऽपि सम्बन्धः।

३. निघण्टौ २.१४.५९ मध्ये गतिकर्मसु 'रीयते' इति क्रियापदमपि परिगण्यते। स्पष्टतोऽस्य प्रतिरूपं धातुपाठे दैवादिको 'रीङ्'धातुः। क्षीरतरङ्गिण्यां धातुरयं स्रवणार्थे परिपठ्यते। एतेनात्र गतिः स्रवणरूपेति परिज्ञायते। वेदेऽस्मिन्नर्थेऽतिशोभनो मन्त्र एवम्-

अश्मन्वती रीयते संरभध्वम् उत्तिष्ठत प्रतरता सखायः।
अत्रा जहाम ये असन्नशेवाः शिवान् वयमुत्तरेमाभिवाजान्॥

-ऋग्वेदः १०.५३.८।

अर्थः-(जगद्रूपा) अश्मन्वती नदी रीयते=स्रवति। मित्राणि! उत्तिष्ठत, प्रतरत। ये अशेवा असन् ते वयमत्र जहामः। शिवान् अभिवाजान् वयमुत्तरेम।

अत्र स्पष्टतो 'रीयते' इत्यस्य स्रवतीत्येवार्थः। पश्चात्तु कदापि लेखक-

प्रमादेन 'स्रवणे' इत्यस्य स्थाने 'श्रवणे' इति लिखितम्। यथालिखितशब्देषु प्रतिपन्नचेता देवराजोऽपि तं तथैव स्वीचकार! एवञ्च गतिकर्म 'रीयते'-क्रियापदं श्रवणकर्म सम्पन्नम्। एतादृशं तथ्यमधिकृत्य प्रवर्तते महाभाष्य आभाणकः—'क्वास्ताः क्व निपतिताः' इति!!

४. एषैव दशा परिलक्ष्यते भस्धातोः। निघण्टौ २.८.३ मध्ये अत्तिकर्मसु 'बभस्ति' इति क्रियापदं पठ्यते। आचार्यो देवराजो धातुपाठमनुगम्य 'भस भर्त्सनदीप्त्योः' इति भर्त्सनार्थकाद् भस्धातोः पदं साधयति। परं भोजनार्थस्य निन्दार्थेन सह कथं स्याद् दूराद् दूरतरोऽपि सम्बन्धः? अतः सिद्धमेतद् यदत्र 'भक्षण'स्थाने 'भर्त्सनम्' इति लेखकप्रमादेन लिखितम्। तदेव देवराजेन स्वीकृतमपि। सायणाचार्यस्तु ऋग्वेदे सर्वत्रैवम्भूते प्रयोगे भक्षणमर्थं निर्दिशति।

वस्तुतो भर्त्सनार्थे नास्ति भस्, अपितु भष्धातुः। इदं हि भाष्धातोर्ह्रसितं रूपम्। इदं हि वैशिष्ट्यं संस्कृतस्य यद् एकस्यार्थस्य लघुभेदं द्योतयितुं मात्रा-परिवर्तनं विधीयते। यथा दृष्टं-समजः समाज इत्यादौ। एवमेवात्र भाष्-भष् इति युग्मम्। महाभारते भष्-धातोर्निन्दापूर्वककथनार्थे, शुनो बुक्कनार्थे वा सन्ति प्रयोगाः—

यथा च स्वगृहस्थः श्वा व्याघ्रं वनगतं भषेत्।
तथा त्वं भषसे कर्ण नरव्याघ्रं धनञ्जयम्॥

दीप्त्यर्थे भास्धातुः प्रसिद्धः। परं नैव लोके नापि च वेदे भस्धातोर्भर्त्सनार्थे दीप्त्यर्थे वा प्रयोगो दृश्यते। अतोऽनुमीयते यदत्र विशिष्टार्थकाणां मात्राभेदवताम् अनेकेषां धातूनाम् अर्था विपर्यस्ताः परस्परमित्यर्थे देवाः प्रमाणम्!! अत्र सुबहुमूल्यसूचनाम् आहरमाणो निघण्टुरेव। तेन ज्ञायते यद् भस्धातुरस्ति भक्षणार्थे। अतो धातुपाठप्रोक्तेऽर्थे भक्षणार्थो योजनीयः, दशपाद्युणादिवृत्तिः ८.८७ इत्यादिकं पुरस्कृत्य भर्त्सनार्थो विलोप्य इति प्रतीमः।

५. क्षिधातोरर्थविषयेऽप्येषा दशा सन्दृश्यते। निरुक्तकारो निघण्टौ २.२१ मध्ये 'क्षयति' इत्यस्य ऐश्वर्यकर्मार्थम्, २.१४.४९ मध्ये तु 'क्षियति' इत्यस्य गतिकर्मार्थं ब्रवीति।

धातुपाठे तु भौवादिकः क्षिधातुः क्षयार्थकः परिगण्यते। बोपदेवस्त्वस्य 'क्षयः', 'ऐश्वर्यम्' चेत्यर्थद्वयं प्रत्यपादयत्। धातुपाठे तौदादिकः क्षिधातुस्तु निवासार्थे गत्यर्थे च। आचार्यो देवराज इमं धातुपाठप्रोक्तमर्थं सर्वथानुसरति।

एवञ्च धातुपाठानुसारिणौ क्षिधातोरर्थौ—

क्षयति=क्षयं विनाशं करोति, ऐश्वर्यं करोति।

क्षियति=निवासं करोति, गतिं करोति।

परं धातुपाठो नैतस्य समाधानं कर्तुं क्षमते यत् कथं परस्परं विरुन्धानावर्थावेकस्मिन् धातौ सह युङ्क्तः। क्षयार्थकः क्षयतिः कथम् ऐश्वर्यार्थम्, निवासार्थकः स्थित्यर्थकः क्षियतिश्च कथं गत्यर्थं प्रकाशयेत् ? शब्दार्थयोरेषा परिस्थितिरासाधारण्यं भजते।

परं निघण्टुप्रोक्तोऽर्थस्तु सर्वथा मौलिकः, स्वाभाविको विरोधविरहितश्च। स चैवम्–क्षयतिरैश्वर्यकर्मार्थकः। ऐश्वर्यकर्म चात्र निवाससम्बन्धि। यतो हि निरुक्ते ५.९ मध्ये 'क्षयन्तम्' इत्यस्य 'निवसन्तम्' इत्यर्थः क्रियते। एवञ्च प्रसादपूर्णे प्रासादे, धौते सौध ऐश्वर्यपूर्णो निवासः 'क्षयति'पदेन प्रोच्यते। 'क्षियति' पदं तु गत्यर्थकम्। गतिरियं विनाशपूर्विका। यतो ह्यस्माद् धातोरेव 'क्षय'शब्दो निष्पाद्यते। धातुवृत्तौ 'क्षीणः'शब्दोऽस्मादेव निर्मीयते। प्राकृते 'छीजना' आदिप्रयोगा अस्मादेव।

एवं निरुक्तानुसारिणौ क्षिधातोरर्थौ–

क्षयति=ऐश्वर्यं करोति, निवासं करोति।

क्षियति=गतिं करोति, विनाशं करोति।

इदमस्ति दुःखावहं यत् काशिकाकृता आचार्यदेवराजेन चात्र निघण्टुप्रोक्तोऽर्थो नावाधीयत।

नामधातूनां प्रकृतिप्रत्ययविभाजनम्–निघण्टावनेके नामधातवः परिपठिता दृश्यन्ते। तेषां न्यूनातिन्यूनं द्विधा विभाजनं शक्यते विधातुम्। विभाजनमिदं शब्दस्य विकासम्, अन्तर्वर्तिनम् अर्थं च प्रकाशयितुं क्षमते।

अस्योदाहरणम्–निघण्टौ २.१४ मध्ये गत्यर्थकर्मसु 'तुरीयति' इति क्रियापदं पठ्यते। आचार्यो देवराज इमं नैरुक्तधातुं मन्यते। परमस्य विभाजनत्रयं सम्भवति। 'रूपिम'परिज्ञानाय तावत्पर्यन्तं विभाजनं कर्तुं शक्यते यावदसौ भागः सार्थक्यं न विजहाति। एवमस्य तुर+य+ति इत्येवं भागत्रयं प्राप्यते। संस्कृते त्वर् धातुः प्रसिद्धः। अस्य सम्प्रसारणं कृत्वा 'तुर' संज्ञारूपं वेदे नाविज्ञातम्। यतो हि तुरः-तुरण् शब्दौ वेदे श्रूयेते। यद्यपि संस्कृते 'तुर'शब्दो नास्ति प्रसिद्धः। तथापि तुरगः, तुरङ्गम इत्यादिशब्देष्वसौ जीवत्येव। एवं 'तुर'शब्दादिच्छार्थे यप्रत्यये सति 'तुरीय'रूपान्नामधातोः स्वभावतस्सिद्धं 'तुरीयति' इति। अत्र नैरुक्तधातुरूपेणान्वाख्यानं नावश्यकम्।

एवम् इरस्यति, इरज्यति इति क्रियारूपसिद्धय इरस्-इरज्-शब्दयोः कण्ड्वादिगणे पाठ एवानयोर्नामधातुत्वे मानम्। यतो हि कण्ड्वादिगणे

परिपठितानि सर्वाणि प्रातिपदिकानि, पश्चात्तु यक्प्रत्ययान्ता नामधातवः। अत्र इरस्-इरज्-शब्दौ धनार्थकाद् इरशब्दात्, इराशब्दाद् वा विकसिते रूपे प्रतीयेते। पाणिनिराचार्योऽपि ३.१.२७ सूत्र इरशब्दं स्वीचकार। एवम् अस्य नामधातोः 'धनविषयिणीम् इच्छां करोति' इति मौलिकोऽर्थः। यतो हि परस्य धनस्य वाञ्छा ईर्ष्यातो नातिभिद्यते, अत 'इरस्यति' शब्दः परस्ताद् ईर्ष्याक्रियकः सम्पन्नः। एवम् उपायेनानेन सर्वे प्रकृतिप्रत्यया अपि, अर्थविकासक्रमश्च परिज्ञायते। एवं 'इषूयते' शब्द ऋग्वेदस्य १.१२८.४ मन्त्रे, याच्ञाकर्मसु 'इषुध्यति' शब्दश्च परिपठ्यते निघण्टौ। शब्दाविमौ नामधातुना व्याख्येयौ। 'इषुधि' शब्दस्य कण्ड्वादिगणे पाठेनापि निष्कर्षोऽयम् अभिव्यज्यते। तथा इषुम्, इषुधिं वार्थाद् बाणं वा तूणं वेच्छति इति हि तस्य मौलिकोऽर्थः। पश्चात्तु अर्थविस्तारनियमेन इच्छामात्रमर्थं शब्दाविमौ प्रकाशयतः।

निघण्टौ २.१४ मध्ये 'श्वात्रति' इति क्रियापदं पठ्यते। आचार्यो देवराजः शब्दमिमं नैरुक्तधातोर्निर्मितं मन्यते। परं स्पष्टमसौ वर्तते नामधातुः। अष्टाध्याय्याः ३.१.११ सूत्रे 'सर्वप्रातिपदिकेभ्य आचारे क्विब्वा वक्तव्यः' इति वार्त्तिकं व्याचक्षाणो महाभाष्यकार 'अश्वति' इत्यादिप्रयोगं स्वीचकार। अनेन ज्ञायते यत् क्वचन प्रातिपदिकं नामधातुं कृत्वा तन्निर्मितानि क्रियापदानि प्रयुज्यन्ते स्म। तस्यैवैकमत्रोदाहरणं-श्वात्रति इति। निघण्टौ २.९ मध्ये 'श्वात्र'शब्दो धननामसु पठ्यते। शब्दोऽयं 'श्वभिस्त्रायते' इति विग्रहेण ब्रवीति यत् तस्मिन्नपि युगे धनं श्वभिस्संरक्ष्यते स्म। 'तत्संरक्षण-कर्म आचरति' इत्यर्थं 'श्वात्रति' इति क्रियापदं ब्रवीति! एवमत्र गतिकर्म मूलतस्संरक्षणकर्मेति 'श्वात्रति' शब्दस्य विग्रहेण वयमनुजानीमः।

अनेन सम्पूर्णप्रकृतिप्रत्ययविभाजनेन शब्दोत्पत्तेः पूर्वोत्तरता च ज्ञायते। अपि चोत्तरवर्तिशब्दार्थस्य कारणं किम्-इत्यपि ज्ञातुं शक्यते। एवं हिन्दीभाषायां लात, बात-शब्दाः पूर्वं विनिर्मिताः। पश्चात्तु तस्य नामधातुरूपं 'लतियाना', 'बतियाना' इति। एवमेव 'मिट्टी' शब्दानन्तरम् अस्य विभिन्नवैशिष्ट्यानुसारेण 'मिटना', 'मटियाना' इति पृथक् पृथग्धातुरूपं विनिर्मितम्। एवं स्पष्टमेतद् यत् सर्वासु भाषास्वपि समग्ररूपिमविभाजनमत्यावश्यकम्।

प्रत्ययानां विवेचनम्–शब्दानामुत्तरवर्तिस्थाने योऽसौ प्रतीयते विधीयते स प्रत्ययः। महावैयाकरणः पाणिनिरष्टाध्याय्यां प्रत्ययानां निरूपणे महान्तं कौशलं प्रदर्शयामास। यद्यप्युणादिसूत्रे किञ्चित् शैथिल्यं प्राप्यते। महर्षियास्कोऽप्यनवगतसंस्कारान्तर्गतान् कतिपयान् शब्दान् हित्वा महता

वैदुष्येण प्रत्ययान्निरूपयामास।

अष्टाध्यायाम् उणादिसूत्रादिषु च लब्धवर्ण आचार्यो देवराजोऽप्यनु-व्याकरणनियमं निघण्टुस्थशब्दानां प्रत्ययान् वर्णयामास। परं यदि कोऽपि शब्दो नियमं न समगंस्त तं येन केनापि प्रकारेण साधयितुमीहाञ्चक्रे। अस्य निदर्शनं यथा 'ऋभुक्षिन्'शब्दः विपन्युशब्दो वा। आचार्य इमौ क्रमशो भुक्षिनक्प्रत्ययेन, कन्युच्प्रत्ययेन च साधयितुं समीहते। परं कल्पनमेतद् रूपिमसिद्धान्तं सर्वथा विपर्येति। वस्तुतः प्रकृति-प्रत्यय-सिद्धान्तानां या प्रक्रिया समारब्धा तस्माद् विचलनस्य परां काष्ठां प्राप्तमिदं निदर्शनम्। एकं प्रचलितमाभाणकम्-माधातोः डियाँ डौलवी, डौलानाप्रत्ययेन सिद्धं मियाँ, मौलवी, मौलाना इति!! परं यदि रूपिमसिद्धान्तानपलप्य 'भुक्षिनक्'प्रत्यये भवतामाग्रहः, तर्हि किमपराद्धमनेन डियाँप्रत्ययेन!!

वस्तुतस्तु 'ऋभुक्षिन्' शब्दोऽयं 'ऋभु' शब्दोपपदात् क्षिधातोः ('क्षिणोति' इति प्रयोगेणानुमानित-'क्षिन्'-धातोर्वा) क्विप्प्रत्ययेन वृत्रहन्-शब्देन तुल्यं साधयितुं शक्यते यथायथम्। निरुक्त ऋभुशब्दस्य व्याख्यानमप्युपलभ्यते।

'विपन्यु'शब्दस्तु—'वि' उपसर्गपूर्वकात् पन्धातोः क्विप्प्रत्ययेन विपन् प्रातिपदिकम्, तस्मादिच्छायामर्थे क्यच्प्रत्ययेन नामधातुं निर्मीय तस्माच्च उप्रत्ययेन शक्यते साधयितुम्। वेदे विपन् शब्दः क्विबन्तः प्रातिपदिकरूपेण स्वीकृत इति प्रतीयते। यतो हि तत्र पनिष्ठः पनीयान् इत्यादिरूपाण्युपलभ्यन्ते।

परं यदि कन्युच्प्रत्यय एव भवतामाग्रहः, तदा तु 'विपन्या'शब्द-सिद्धये पुनः पृथग्वचनं निर्मातव्यम्। परमुपरितनस्वाभाविकसिद्धौ न तथा किमप्यपेक्ष्यते।

निघण्टुशब्दास्सुसूक्ष्मं परिशीलिताश्चेद् उणादिप्रक्रियां विभिद्य निर्दुष्टशब्दसिद्धौ समुपकरणानि भवन्तीत्यत्र नास्ति संशीतिः। यथा—उणादिसूत्रे 'जीरदानु'शब्दो जीव्धातो रदानुक्प्रत्ययेन साध्यते। काशिका-कारोऽपि सिद्धिमेनां स्वीकृत्य 'लोपो व्योर्वलि' इति सूत्रेण वकारलोपं विधत्ते। परम् इदं प्रत्ययविधानमसाधारणं रूपिमसिद्धान्ताद्विपरीतं च।

निघण्टुस्त्वस्य स्वाभाविकसिद्धौ साहाय्यं प्रदातुं क्षमते। यतो हि निघण्टौ २.१५ मध्ये क्षिप्रनामसु 'जीर'शब्दः पठ्यते। दानुशब्दोऽपि नास्त्यप्रसिद्धः। अतश्शब्दयोरनयोस्समासेन सिद्धो 'जीरदानुः'। एवं स्वाभाविकरूपेण शब्दसिद्धौ सत्यां क उणादिमार्गमनुयायात्। अर्के चेन्मधु विन्देत किमर्थं पर्वतं व्रजेत्!! तथापि निघण्टुप्रक्रियाविलोपे सति श्रम एष क्रियत इति प्रतीमः। यावत्कालं सा परम्परा न विलुप्ता तावत्कालं तु सा

समन्वपाल्यत मनीषिभिः। यतो हि महाभाष्ये १.१.४ सूत्रे 'रकि ज्यः सम्प्रसारणम्' इति वार्त्तिकं प्रोच्यते। तेन रकि प्रत्यये ज्यः सम्प्रसारणं विधाय जीरशब्दः, तस्य दानुशब्देन सह समासे जीरः=क्षिप्रं दानुः=दानं यस्य इति विग्रहेण 'जीरदानु'शब्दः साध्यते। सिद्धिरेषा मूलतो निघण्टुतः प्रेरणां प्राप्य विहितेति वयं निश्चिनुमः।

पद-विज्ञानम्

प्रकृतिप्रत्यययोर्नियमानुकूलेन संयोगेन पदं निर्मीयते। तदेवाभिधीयते लोके–केवलायाः प्रकृतेः केवलस्य प्रत्ययस्य चाप्रयोगात्। यथा तु परिभाषते पाणिनिस्तथा पदस्यान्ते सुब्वा तिङ् वावश्यं वर्तमानो भवति।

समुचितपदविग्रहपरिज्ञानाय वेदात् प्राप्तस्सङ्केतः–विभिन्नपदानां समुचितविग्रहपरिज्ञानं वेदसङ्केतेन सम्पद्यते। यथा निघण्टौ १.११.२४ मध्ये 'स्वाहा'शब्दो वाङ्नामसु परिगण्यते। निरुक्तकारोऽस्यानेकान् विग्रहान्निर्दिशति। परं सर्वोत्तमो विग्रहः 'सु+आह' इत्येव। यतो ह्यथर्ववेदे शब्दस्यास्य प्रतिलोमं प्राप्यते–**स्वाहैभ्यो दुराहामीभ्यः**–अथर्व० ८.८.२४।

एवञ्च दुराहशब्दप्रतिलोमं 'सु+आह' इति व्युत्पत्तिविधानं समीचीनतरं प्रतिभाति।

पाणिनिप्रोक्तेषु शब्देषु निरुक्तकारानुगतः समीचीनतरः पन्थाः–महावैयाकरणेन पाणिनिना विवेचितान् कतिपयान् शब्दान् प्रति महर्षिर्यास्कः पूर्वमेव समीचीनतरां दिशमुपागादिति प्रतीमः। निदर्शनं यथा–दर्भपवित्रपाणिः पाणिनिः ५.३.२२ सूत्रे 'परेद्यवि'शब्दं निपातनेन साधयामास। अत्र व्याख्याकाराः 'परस्मिन्नहनि' इत्यर्थे परशब्दाद् एद्यविप्रत्ययं निपातयन्ति। परं महाभाष्यकारप्रोक्तेनान्वयव्यतिरेकविधिना ईषत्करमस्य प्रत्ययत्वसाधनम्।

निघण्टौ १.९ मध्ये त्वहर्नामसु 'द्यविद्यवि' इति पाठः क्रियते। अस्यार्थो दिनेदिन इति। स्पष्टत एव द्योशब्दस्यात्र सप्तम्यन्तं रूपं 'द्यवि' इति। अहर्नामसु पाठोऽयम् अस्य रूपस्य प्रभूतं प्रयोगं सूचयति।

अस्य शब्दस्य निघण्टौ पाठं पुरस्कृत्य 'परेद्यवि'शब्दस्य 'परे द्यवि' इति विग्रहः, 'अन्यस्मिन् दिने' इति तस्यार्थश्च शक्यते सुखं विधातुम्। वैदिके युगे द्योशब्दः पुंल्लिङ्गेऽपि प्रयुज्यते स्म। अपि चाथर्ववेदे 'परे'शब्दः, लौकिके संस्कृते 'परात्' (परात् परं साम्यमुपैति दिव्यम्-गीता) सदृशास्सर्वनामरहिताः प्रयोगा न सन्ति सर्वथाविज्ञाताः। अतोऽत्रापि 'परे'शब्दप्रयोगो नास्ति तथा, यथा कोऽपि दोषो महान् प्रादुःष्यात्। एवं द्वयोः शब्दयोः समासेन सप्तम्या अलुका च सिद्धं परेद्यवि इति। यद्यप्यत्र सप्तम्या

अलुङ्मार्गस्वीकारोऽपि न सर्वथा निसर्गतो निरर्गलः, तथापि 'एद्यवि' सदृशासाधारणप्रत्ययस्वीकारापेक्षया तु ऋजुतर एवेत्यर्थे देवाः प्रमाणम्!! नवीनमार्गप्रेरणा स्पष्टतो निघण्टुस्थाद् 'द्यवि'शब्दादेव प्राप्यते।

२. एवं विमलमतिः पाणिनिः ५.४.७ सूत्रे 'पुरुषाधीनः' इति शब्दसिद्धयेऽध्युत्तरपदात् खप्रत्ययमन्वशात्। परम् उपसर्गात् प्रत्ययोत्पादनं नास्ति नैसर्गिकम्।

अस्यान्यादृशव्याख्यानाय निरुक्तात् केचन सङ्केता उपलभ्यन्ते। निघण्टौ २.२२.४ मध्य ईश्वरनामसु 'इन'शब्दः परिगण्यते। सत्यस्मिन् शब्द 'अत्यादयः क्रान्ताद्यर्थे द्वितीयया' (अ० २.२.१८ वा०) इति वार्त्तिकद्वारा 'इनम् अधिगतः' इति विग्रहेण 'अधीन'शब्दः शक्यते सहजं निर्मातुम्। पश्चात् 'पुरुष'शब्देन सह समासे 'पुरुषाधीन'शब्दः सम्भूयते।

विग्रहेणानेनास्माभिरनेके लाभा लब्धाः। पाणिनिना 'पुरुषाधीनः' इति समस्तश्शब्दो निर्मितः। परमिदानीम् इदम्प्रथमतया प्रयुक्तोऽसमस्तः 'अधीन'-शब्दोऽपि शक्यते व्याहर्तुम्। अपि च 'सेना'सदृशानां मूर्धाभिषिक्तानां शब्दानां कृते नातिरिक्तं वचनं निर्मातव्यं भवति। अयं स+इन इति विग्रहेण सर्वथा साधुः। यथा महर्षिर्यास्को निरुक्ते २.११ मध्ये 'सेना सेश्वरा' इति व्याहरन् मुक्तकण्ठं प्रत्यपादयत्। सर्वमप्येतत्सूचनं निरुक्तात् प्राप्यत इति विजयतां निरुक्तम्!!

प्रतीयते यद् निरुक्तकाल 'इन'शब्दस्य प्रयोगेऽपि पाणिनियुगे शब्दोऽयं विरलतां गतः। अत एव पाणिनिरन्यप्रकारेण शब्दमन्वशात्। उपलब्धे निरुक्तसङ्केते तु नायं प्रकारोऽपेक्ष्यते।

३. निघण्टौ ३.१५ मध्ये मेधाविनामसु 'नवेदस्'शब्दः पठ्यते। महामतिः पाणिनिराचार्यः ६.३.७३ सूत्रे शब्दमिमं निपातनेन साधयति। काशिकाकारो 'न वेत्ति' इति विग्रहेणामुं व्याचष्टे। परं यो हि वर्तते मेधावी स कथं 'न वेत्ति' इति स्यात्? यदि स न वेत्ति किमपि, हन्त तर्हि कृतं मेधया!! सत्यम्, विलक्षणोऽयं प्रश्नः, व्याकरणप्रतिभाशालिशीलितानामपि मानसमद्याप्युन्मथति।

आचार्यो देवराजस्त्वत्रार्थं सुसङ्गतं विधातुं द्विनञ्पूर्वाद् वेदस्शब्दस्य समासेन शब्दं साधयति। परं तथात्वे तु 'नासत्याः' इतिवद् 'नावेदाः' इत्येवं दीर्घप्रयोगापत्तिरिति 'एकमनुसन्धित्सतोऽपरं प्रच्यवत इति न्यायापातः!! नास्य देवराजेन कोऽपि प्रोक्तस्समाधिः।

निरुक्तपरम्परया तु प्रश्नोऽयं शक्यते समाधातुम्। यतो हि १.४

वर्तिनिरुक्तवर्णनपुरःसरम् उपमार्थीयोऽपि नशब्दो भवत्येव। एवञ्च 'भवतं न वेदसा' इति मन्त्रांशस्य 'वेदसा प्रज्ञानेन न इव भवतम्' इत्यर्थो वरिवर्ति। एवं यो हि नास्ति मेधाविष्वग्रसरः परं मेधाविनां पन्थानमनुसरति सोऽस्ति नवेदाः। पाणिनिरपि 'तदधीते तद्वेद' (अ. ४.२.५८) इति सूत्रेऽधीयानस्य कृतेऽपि तमेव प्रत्ययं स्वीकरोति, यो हि विदाङ्कुर्वाणस्य कृते। अस्मिन्नर्थेऽपि पाणिनिप्रोक्तं नञ्पूर्वपदं भवति सर्वथा समीचीनम्। व्याकरणमतेन नञस्सादृश्यार्थस्समासगम्यो निरुक्तमतेन तूपमा वाच्यार्थः। एवं निरुक्तप्रक्रियया सर्वमेतत् समञ्जसमिति पुरःस्थिते प्रमेयाब्धौ ग्रन्थविस्तरभीरुभिरिति न्यायेनोपरम्यते।

कात्यायनप्रोक्तशब्दविषये निरुक्तकारानुगतः समीचीनतरः पन्थाः— वार्त्तिककारः कात्यायनोऽष्टाध्याय्याः ५.४.३० सूत्रे 'नवस्य नू त्नप्तनप्०' आदिवार्त्तिकेन नवस्य नू इत्यादेशेन नूतनम्, नवीनम् इत्यादिशब्दान् साधयति।

परं वस्तुतोऽस्थानेऽयं यत्न आदेशविधानस्य। न हीदं निरुक्तपरम्परातो भिद्यते यतो यत्नार्हं स्यात्! निरुक्तं तु ४.१७ मध्ये स्वतन्त्रं 'नू'शब्दस्य नवीनमर्थं ब्रवीति। तदनुसारेण—'नू च पुरा च सदनं रयीणाम्' इति मन्त्रांशस्य अद्यापि पूर्वमपि धनस्य सङ्ग्रह आसीदित्येषोऽर्थः। एवं च विद्यमाने 'नू'निपाते 'नू'आदेशकरणमत्राकिञ्चित्करम्। अस्माद् 'नू'शब्दादेव अ० ४.३.२३ इति सूत्रेणाव्ययात् ट्युप्रत्ययेन सिद्धो नूतनशब्दः।

अत्र निघण्टुव्याख्याकार आचार्यो देवराजोऽपि निरुक्तव्याख्यां नानुध्यायतीत्यहो चित्रम्!!

वेदात् सङ्केतप्राप्तौ देवराजानुगतः समीचीनः पन्थाः—अनेकेषां शब्दानां विषये वेदान्महत्त्वपूर्णास्सङ्केताः प्राप्यन्ते।ताननुसृत्य श्रीमता देवराजयज्वना प्रशंसनीयं निर्वचनं व्यधायि। यथा 'वारि'शब्दस्य विग्रहाय स यजुर्वेदस्थं २१.५७ मन्त्रमवलम्बते। एतेन वार्शब्दस्याप्यस्तित्वं परिज्ञायते। तथा च लौकिके संस्कृते 'वारां निधिः' सदृशाः शब्दास्साधवो भवन्ति। एवम् आचार्येण वैदिकप्रमाणमवलम्ब्य 'स्वधा' इत्यादिशब्दानामपि प्रशंसनीयं निर्वचनं विहितम्।

निरुक्तात् सङ्केतप्राप्तौ देवराजानुगतः समीचीनः पन्थाः— महावैयाकरणः पाणिनिरष्टाध्याय्याः ६.३.७३ सूत्रे नपाच्छब्दं निपातनेन साधयति। काशिकाकारस्तु 'न पाति' इति विग्रहेण नञ्पूर्वात् पाधातोश्शब्दममुं साधयति। परं 'पुत्रो वा पौत्रो वा न पाति' इति किमस्ति समीचीनम्? अस्य

न वर्ततेऽत्र कोऽपि समाधिः।

शास्त्रेषु लब्धवर्ण आचार्यो देवराजयज्वा त्वत्र निरुक्तकारसङ्केतमवलम्ब्य प्रशंसनीयां व्युत्पत्तिं विधत्ते। निरुक्तकारो निरुक्ते ३.२ मध्येऽपत्यशब्दस्य विग्रहो 'नानेन पतति' इति करोति। अत एव पुत्रोऽपत्यमित्यपतनादपत्यमिति प्रोच्यते। पुत्रशब्दं प्रत्यपि–

पुन्नाम्नो नरकाद्यस्मात् त्रायते पितरं सुतः।
तस्मात् पुत्र इति प्रोक्तः स्वयमेव स्वयंभुवा॥

–मनु० ९.१३८

इत्येषा भावना स्वन्यते ध्वन्यते च परितः।

एतां भावनामवलम्ब्यात्राचार्यो 'नपात्' इत्यस्य 'न+पत्' इति रूपेण सर्वथा समीचीनं विग्रहं करोति। अत एव शब्दकल्पद्रुमेऽपि 'नप्ता'शब्दस्य विग्रहो 'न पतन्ति पितरो येन' इत्येवमभिधीयते।

वेदान्निरुक्ताच्च सङ्केतप्राप्तावपि देवराजानुगतः पराचीनः पन्थाः– अस्य निदर्शनम्-निघण्टौ १.८.२ मध्ये 'सूनरी'शब्द उषोनामसु पठ्यते। आचार्यो देवराजः 'सूनरि'शब्दाद् ङीष्प्रत्ययेन, अथवा सूनरशब्दान्मत्वर्थीय ईकारः, तदन्ताच्च व्यत्ययेन हल्ङ्यादिलोपेन प्रकृतं शब्दं साधयति।

परं वेदे 'सूनरि'शब्दो नैव प्राप्यते। सूनरशब्दस्तु प्राप्यतेऽनेकधा। (बभ्रुरेको विषुणः सूनरो-ऋग्वेदः ८.२९.१ इत्यादिः) अस्मात् 'सूनर'शब्दाद् 'नर-नारी' इतिवत् शार्ङ्गरवादित्वाद् (अ० ४.१.७३) ङीन्प्रत्ययेन सिद्धं 'सूनरी' इति। अनेनानावश्यको व्यत्ययोऽपि हापितो भवति।

प्रक्रियैषा 'सुन्दरः–सुन्दरी' इति सिद्धावपि साहाय्यं प्रददाति। 'सूनरी'शब्दः प्रयुज्यते वेदे। परस्तात्तु पाणिन्यादिमुनिभिरननुज्ञातोऽपि दकारागमोऽत्र काव्यशास्त्रिणां श्रुतिपथमिष्टतः प्रविष्टः!! भाषावैज्ञानिका वानर–बन्दर इत्यत्र प्राकृतप्रभावं ब्रुवते। परं शब्दोऽयम् एतत्प्रभावप्रभावितोऽपि न कदापि न्यषिध्यतेति विजयतां सुन्दरीशब्दमाहात्म्यम्!!

२. निघण्टौ ३.१५ मध्ये मेधाविनामसु 'विपः, विपश्चित्'शब्दौ परिपठ्येते। आचार्यो देवराजो 'विपश्चित्'शब्दं 'विपो वाचश्चेतयते', 'विपश्यंश्चेतयते' इत्याद्यनेकाभिः क्लिष्टकल्पनाभिस्साधयते।

परं निरुक्तमवलम्ब्य सहजं शब्दोऽयं शक्यते साधयितुम्। यतो हि निघण्टौ 'विपस्'शब्दो मेधाव्यर्थे वर्तते। अत एव ऋग्वेदे १०.४६.५ इत्यादिमन्त्रे 'विपोधाः'शब्दस्य प्रयोगः। शब्दोऽयं लोके 'तपोधन'

इत्यादिवन्निर्मातुं शक्यते। अस्य 'विपस्'शब्दस्य 'चित्'शब्देन सह समासे 'विपश्चित्' इति प्रयोगस्सिद्ध्यति। निरुक्ते १.४ मध्ये चिच्छब्दः पूजार्थे निरुच्यते। यथा–आचार्यश्चिद् इत्यस्यार्थः–पूजनीय आचार्यः। एवं विपश्चिद् इत्यस्यार्थः–'पूजनीयो मेधावी' इति भविष्यति। स्पष्टतस्स्वाभाविकोऽसौ विग्रहोऽनेककृत्रिमविधानशङ्काकलङ्कमुच्छिनत्ति।

द्विपदाश्शब्दाः–निघण्टावनेके द्विपदाश्शब्दाः परिगण्यन्ते। तत्र केचन समस्ता अपरे समासविरहिताश्च। समस्तशब्देषु चित्रामघा, जलाषभेषजम् इत्यादयश्शब्दाः प्रस्तोतुं शक्यन्ते। 'चित्रामघा'शब्द उषोनामसु परिगण्यते। अत्र चित्रशब्दो मघशब्दश्च समस्यते। मघशब्दो धनवाचकः। धनवत्त्वादेव इन्द्रो मघवा। विचित्रविविधधनवतीत्वादेवोषाः चित्रामघाशब्देन प्रोच्यते।

वेदे प्राप्तो 'जलाषभेषजम्' इत्यप्येवंभूतश्शब्दः। अत्र जलाषशब्दो भेषजशब्दश्च समस्येते परस्परम्। अत्र जलम् ओषधिरूपेण प्रोच्यते। एषा भावना प्राप्यतेऽस्मिन् मन्त्रे–**'आपो अमीवचातनीः। आपः सर्वस्य भेषजीः'**॥ –ऋग्वेदः १०.१३७.६।

'जलं सर्वान् रोगानुच्छिनत्ति, जलमेव सर्वस्यौषधिः' इत्यस्य सङ्क्षिप्तोऽर्थः। मन्त्रोऽयं जलचिकित्साया अतिसुन्दरं महत्त्वं ख्यापयति।

असमस्तशब्देषु स्वादो अर्णाः, ऋतस्य योनिः, 'मम सत्यम्' इत्यादयश्शब्दाः परिपठितुं शक्यन्ते। सर्वस्यापि सत्यवस्तुन उपादानकारणं जलमेवेत्यतो जलस्य 'ऋतस्य योनिः' इति नामधेयम्। एषा भावना 'अप्रकेतं सलिलं सर्वमा इदम्' (ऋग्वेदः १०.१२९.३) इत्यादिषु मन्त्रेषु मूर्तभावं गृह्णाति।

एवं युद्धकाले सर्वेऽपि प्रतिभागिनः 'अहं सत्यम्' अथवा 'मम जयो ध्रुवं सत्यम्' इति मन्वते। एवञ्च 'इदं मम सत्यम्', 'मम सत्यम्' इति वारं-वारं कथनेन युद्धस्य नाम सम्पन्नम्।

निरुक्तकारः कतिपयान् शब्दानपि द्विपदशब्दान्निर्मितान् ब्रवीति। अस्यैकं शोभनमुदाहरणं-'कितव'शब्दः। अस्य विषये निरुक्ते ५.२२ मध्ये 'किं तवास्तीति शब्दानुकृतिः' इति प्रोच्यते। द्यूतसमये सर्वेऽपि प्रतिभागिनः 'किमस्ति तव पार्श्वे धनम्' इत्येवं वारं-वारं ब्रुवते। अतश्च 'किं तव', 'किं तव' इति शब्दसमाहारः कितवरूपेण सम्पन्नः।

अनुकरणनिर्मिताः केचन शब्दाः–महर्षिर्यास्कः, अनेके शब्दा विभिन्नध्वनीनामनुकरणसिद्धान्तेन विनिर्मिताः–इत्येवं सङ्गिरते। यथा–'काक' इति नामधेयं तस्य पक्षिणः 'का का' इति ध्वनेरनुकरणेन विनिर्मितम्।

(काक इति शब्दानुकृतिः—निरुक्तम् ३.१८)। एवं कुक्कुटार्थस्य 'कृकवाकु'-शब्दस्य पूर्वपदम् एवं विनिर्मितम्। कू कू शब्दस्यानुकरणं कृक इति। तं वक्ति-अत एवासौ कृकवाकुः। (कृकवाको: पूर्वं शब्दानुकरणं वचेरुत्तरम्—निरुक्तम् १२.१३)। कतिपये वाद्यपदार्था अप्येवं विनिर्मिताः। यथा-दुम्दुम् इति शब्दानुकरणेन दुन्दुभिशब्दः। (दुन्दुभिरिति शब्दानुकरणम्—निरुक्तम् ९.१२)।

डॉ० लक्ष्मणस्वरूपमहाशय आश्चर्यं प्रपेदे यद् महर्षिर्यास्कोऽनुकरण-निर्मितपक्षिणां मध्ये कोकिलस्य नाम नागृह्णात्। वस्तुतो नास्त्यस्थान इदमाश्चर्यम्। अतिप्राचीनकालात् पुंस्कोकिलोऽयं प्रकाममाकृक्षन्मनांसि मनुजानामित्यत्र नास्ति सन्देहः। यजुर्वेदे २४.३९ मन्त्रे 'कामाय पिकः' इति प्रोच्यते। भारतात् प्रभृति आयूरोपमहाद्वीपम् अस्य नामधेयम् अनुकरणमवलम्ब्य विनिर्मितम। इंग्लिशभाषायां (Cuckoo) शब्द एवम्प्रकारक एव। अत्रा-स्योल्लेखः स्याद्रोचको यद् धातुपाठे 'कु' धातुः कोकिलध्वनिप्रकाशनाय स्वीक्रियते। एवं कोकिलः कोकूयते। व्याकरणस्य यथा त्वन्यान्युदाहरणानि भणन्ति तथा त्वत्र 'चोकूयते' इति रूपेण भाव्यम्। परं पाणिनिराचार्योऽत्र 'न कवतेर्यङि' (अ. ७.४.६३) इति सूत्रेण महता प्रयत्नेन 'कोकूयते' इति रूपं साधयामास। व्याकरणनियमाः समाजस्य प्रवृत्तिं लक्षयन्ति। अत्र 'कोकूयते'प्रयोगस्य कारणमेतदेव यत् कूकू इति अनुकरणाकारोऽत्र न व्याहन्येत। यतः कोकिलस्य ध्वनेरनुकरणं कूकू इत्येव भवति, न तु चूकू इति। अतस्सिद्ध्यत्येवं यदत्र 'कोकिल'शब्दोऽपि, तस्य क्रियाप्यनुकरणेनैव विनिर्मीयते।

परं किं कथयामोऽत्र कतिपयानां वैयाकरणानामरसिकताम्! ते शब्दसिद्ध्येकधना वैयाकरणा ध्वनिमेतम् उष्ट्रेण, खरेण च साकं तुलयन्ति! काशिकायां कोकूयत उष्ट्रः, कोकूयते खर इत्युदाहरणं प्रदीयते। परं क्व कोकिलस्य कूजनम्, क्व च खरस्य प्रखरशशब्दः! अस्त्यत्र किमपि साम्यमिति पाठकैर्निर्णीयताम्!!

प्रकृतमनुसरामः। प्रस्तुतोदाहरणैर्ज्ञायते यद् यास्काचार्यः सीमितांशेऽनु-करणसिद्धान्तं स्वीचकार। एतदस्ति मैक्समूलरमहोदयस्य (Bow wow theory) सिद्धान्तस्य परस्सहस्रवर्षपूर्वं परिकल्पनम्। लौकिकसंस्कृतेऽपि 'घुघ्घू' इत्यादयश्शब्दाः, जडपदार्थानुकरणेन च 'पटपटायते' इत्यादयश्शब्दा विनिर्मिताः। प्राकृतेऽपि गलगलिया, 'फटफटिया' इत्यादीन्यस्योदाहरणानि।

एवं निघण्टौ १.१७ मध्ये 'कल्मलीकिनम्' जञ्जणाभवन् 'मल्मलाभवन्'

इत्यादयः प्रज्वलनार्थकाश्शब्दा अप्यनुकरणसिद्धान्तेन विनिर्मिता इत्यनुमीयते। निरुक्तकारेणात्र न किमपि मुक्तकण्ठं प्रोक्तम्। आचार्यो देवराजः पृषोदरादिना शब्दानिमान् व्याचष्टे। परं पृषोदरादिपरिवर्तनमपि समाजे नाकारणं सम्पद्यते। तस्य निगूढं कारणमवश्यमुद्घाटनीयम्। तदैव शब्दविकासो विवरीतुं शक्यते।

एवं 'जज्झतीः'शब्द 'आपः' इत्यर्थे निरुक्ते ६.१६ मध्ये परिगण्यते। निरुक्तकार इमम् अनुकरणशब्दरूपेण नैव प्राभाषत। आचार्यो देवराजोऽपि तेनैव पथा नास्य विषये किञ्चित् प्रोवाच। परं सत्यव्रतसामश्रमी स्वकीय-टिप्पण्याम् 'अनुकरणशब्द एषः' इति ब्रवीति। स्पष्टतो विवरणमेतन्निरुक्त-कारमान्यतयानुकूल्यं भजते।

मानवीकरणप्रक्रियया निर्मिताश्शब्दाः—मानवो जडपदार्थानपि कदाचिच्चेतनवद् व्यवहरति। महाभाष्ये ३.२.७ सूत्रे 'पिपतिषति कूलम्' इत्याद्युदाहरणैरस्य समर्थनं विधीयते। वेदेऽपि 'शृणोत ग्रावाण' इत्यादौ क्वचिदस्याः प्रवृत्तेः प्रतिफलनं दृश्यते। अपि च तत्र क्वचिन्मेघवाय्वा-दयोऽप्रतिहतशक्तयो जडपदार्था विग्रहवत्यो देवता इव वर्ण्यन्ते। निरुक्तकारः ७.६ मध्ये दैवतकाण्डे 'अथाकारचिन्तनं देवतानाम्' इति प्रकृत्य कतिपयान् मतभेदान्निर्दिशति। तत्र प्रमुखं मतं यत् कतिपये देवा मेघाद्यधिष्ठातारो मानवा इव हस्तपादं धारयन्ति, अन्ये तु विपरीतमाकारमपि लक्षयन्ति।

निरुक्तस्यानेके शब्दा मान्यतामेनां पुरस्कृत्य विनिर्मिताः। यथा निरुक्ते ९.२९ मध्ये 'अरण्यानी'शब्दस्य विग्रहः 'अरण्यस्य पत्नी' इत्येवं क्रियते। अत्रेदं निगूढमाकूतं यदस्त्यरण्यम् अधितिष्ठन् कश्चन शासको चेतनो देवः। तस्य वर्तते पत्न्यपि। सैवारण्यानी।

परिकल्पनेयं पूर्वोक्तां मान्यतां समर्थयते। महावैयाकरणः पाणिनिरपि पुंयोगादाख्यायाम् इन्द्राण्यादिशब्दानन्वशात्। तथा तत्रैव प्रसङ्गे 'अरण्यानी'शब्दमपि निरवोचत्। कात्यायनस्तु पूर्वोक्तमान्यताभिरनवहितचेताः 'कथं स्यादरण्यस्य पत्नी' इत्येवम् अनुचिन्तयन् 'हिमारण्ययोर्महत्त्वे' इति वार्त्तिकेन महदरण्यमरण्यानी इत्येवं वर्णयामास। सत्यम्, शब्दस्तु सिद्ध्य-त्येवमपि। परं शब्दार्थविकासतत्त्वं तु निहितमनेन गुहायाम्! एतेन न कोऽपि ज्ञातुं प्रभवति यत् पुंयोगादाख्यायाम् उत्पद्यमान 'आनी इत्यागमयुक्तः प्रत्ययोऽरण्यानी' इति शब्दे कथं सङ्गच्छते। निरुक्तं प्रति ददच्चक्षुस्तु सर्वं जानाति समञ्जसमिति प्रियं त उपहरामि!! अत्र अरण्यस्य पत्नी देवी परवर्तियुगे महद्बुद्धिं प्राप्य महदरण्यमित्यर्थे प्रोच्यते।

एवं निघण्टौ १.१० मध्ये शम्बरः, वृत्र इत्यादयश्शब्दा मेघनामसु परिपठिताः। परं वेदस्यानेकैर्विवरणैरसुराणाम् इमानि नामानीति परिज्ञायते। अयमस्ति वस्तुतो मानवीकरणस्य परिणामः। अनेन मेघस्य विभिन्नानि वस्तूनि विभिन्ना दशाश्च विभिन्नमानवासुररूपेण वा वर्ण्यन्ते। इन्द्रस्तु स्वकीयमहद्वज्रेण असुरं प्रहरति। तदैभ्योऽसुरेभ्यः सङ्गोपितं जलं पार्थिवा मनुष्याः प्राप्नुवन्ति। एवं शब्दा इमे मानवीकरणेन विनिर्मिता इति सिद्धम्।

निरुक्तव्याख्यातशब्देषु प्रतिबिम्बितं वैज्ञानिकं तथ्यम्– निरुक्तव्याख्यातशब्दैरनेकानि भौतिकवैज्ञानिकतथ्यानि ध्वन्यन्ते। यथा–

१. वृक्षास्सलिलं पान्ति सर्वतः–वृक्षाः स्वमूलैर्महज्जलौघमवरुन्धन्ति। एतैर्वृष्टिजलप्लावनम्, भूमेः क्षरणं चापि नैव सम्पद्यत इत्यस्ति वैज्ञानिकं तथ्यम्। महर्षिर्यास्को मूल्यवत्तथ्यमदो निरुक्ते ८.४ मध्ये वनस्पतिशब्द-निर्वचनप्रसङ्गेऽभिव्यनक्ति। निघण्टौ १.१२ मध्ये वनशब्दो जलार्थकः। अमरकोशे ३.१२६ मध्येऽपि 'वने सलिलकानने' इति वचनेन वनशब्दस्य जलार्थत्वं परिज्ञायते। बाणभट्टोऽपि हर्षचरिते महाभूतवर्णनप्रसङ्गे 'अवनिपवनवनगगन.....' इत्यादिप्रबन्धान्तर्गतेन वनशब्देन जलार्थमभिव्यनक्ति।

एवञ्च वनस्य=जलस्य परिपालकत्वाद् वृक्षा वनस्पतयः। अत्र वनस्य पश्चात् सुडागमः। अथवा 'तनूत्यजेव तस्करा वनर्गू' (ऋग्वेद १०.४.६) इति प्रमाणेन रेफान्तोऽत्र वनर्शब्द इति मन्तुं शक्यते। सर्वथा तथ्यमेतदत्र प्रकाश्यते स्वच्छम्!

२. चन्द्रमाः सूर्येण प्रकाश्यते–चन्द्रः स्वयं प्रकाशविहीनः। स तु सूर्यात् प्रकाशं प्राप्य, परावर्त्य च प्रकाशितो भवतीत्यप्यस्ति वैज्ञानिकं तथ्यम्। महर्षिः चन्द्रार्थकस्य 'गन्धर्व'शब्दस्य निर्वचनप्रसङ्गे तथ्यमेतद् व्याचष्टे। गां=सूर्यरश्मिं धारयतीत्यत एव चन्द्रमा गन्धर्वः। अत्रास्तीदं पारमर्षं वचनम्-'अथाप्यस्यैको रश्मिश्चन्द्रमसं प्रति दीप्यते तदेतेनोपेक्षितव्यम् आदित्यतोऽस्य दीप्तिर्भवति' (निरुक्तम् २.७)।

३. विद्युदस्ति महाजवशीला–सामान्यतो वायुः, झञ्झावातो वा तीव्रं वातीत्यनुज्ञायते। पवनवेगेन गमनं तीव्रतायाः प्रतिमानम्। निरुक्तकारोऽपि निघण्टौ २.१५ मध्ये क्षिप्रनामसु 'वातरंहा'शब्दस्य पाठेन तथ्यमदः सत्यापयति। परं सर्वाधिका जूस्तु विद्युत एव। नैतस्या उपमा प्रायशो दृश्यते लौकिकसाहित्ये। परम् अत्रैव निघण्टौ 'द्युगत्'शब्देनास्या महातीव्रगामित्वम् औपम्यं च प्रकाश्यते।

अर्थ-विज्ञानम्

भाषायाः प्रत्येकं शब्दः प्रतीकात्मकं महत्त्वम् अभिरक्षति। स ह्यर्थात् सर्वथा भिन्नोऽपि सन्नर्थं प्रत्याययति। यदि हि कोऽपि शब्दः कदापि वैशिष्ट्यमेतदवलुम्पेत्तर्हि स नैव कदापि भाषायां स्थानं प्राप्तुं क्षमते। एवञ्च भाषात्वं नामार्थवाहिकात्वम्। यथा ह्यमूर्ता मानवस्य 'इच्छा' मनसो रथे 'मनोरथे' वा स्थिता सती विश्वं भ्रमति एवम् अमूर्तो विचारो भाषारूपं रथं प्राप्य दूराद्दूरतरं मानवान्तरं गच्छति!!

मौलिकस्यार्थस्य प्रकाशनं शब्दनिर्वचनस्य प्रमुखं कर्तव्यम्। अन्तर्वर्तिप्रकृतिप्रत्ययनिरूपणमाध्यमेनान्तर्गतार्थम्, तस्य विकासं च निर्वचनं सम्यग् ज्ञापयति। निरुक्तकारः कर्तव्यमेतत् सर्वथानुभवन् निर्वचनविषये उदजूघुषत्–

'अर्थनित्यः परीक्षेत'–निरुक्तम् २.१। एवञ्चार्थविषये प्रामुख्यं विदधता शब्दः परीक्ष्यः। यदि काचन प्रकृतिः, कश्चन प्रत्ययो वा शब्दार्थं न सम्भजेत्, तर्हि न स स्वीकर्तुं योग्यः। परं यद्यन्या प्रकृतिरन्यो वा प्रत्ययः केवलं वर्णमात्रेणापि समानः, तस्यार्थेन सह सामञ्जस्यमभिरक्षति तदा स स्वीकार्य एव। अत एव निरुक्तकारो हस्तशब्दव्युत्पत्तिं सर्वथा शब्देन समानतामभ्युपगच्छतो हस्धातोर्नैव कुरुते। यद्यपि केचन शब्दसिद्ध्येकधना वैयाकरणा उणादिसूत्रं पुरस्कृत्य कुर्वन्त्यपि। परं निरुक्तकारस्तु वर्णैनैकेन साम्यमावहतो हन्धातोस्समुचितां व्युत्पत्तिं साधयति। यद्यप्यत्र नकारस्थाने सकारादेशो विधातव्यो भवति। परमर्थसङ्गत्यै सर्वमेतत् सोढव्यमेव। आधुनिका भाषावैज्ञानिकास्तु पर्शियनभाषाया तुलनां विधाय धस्त, हस्त इत्येवं शब्दं साधयन्ति। तस्यां भाषायां त्वेतद् 'दस्त'रूपेण प्रोच्यते। संस्कृते दस्धातुर्बलार्थकः प्रसिद्धोऽपि। यस्माद् दासः, दस्युरित्यादयश्शब्दाः सिद्ध्यन्ति। अपि च तस्यां भाषायां 'दस्ताना'शब्देन संस्कृते 'हस्तघ्न'-शब्दस्यास्तित्वमनुमीयते।

व्युत्पत्त्या प्रवृत्तिनिमित्तं परिज्ञायते–कस्याप्यर्थविशेषस्य कृते कस्यापि शब्दविशेषस्य प्रवृत्तेः प्रयोगस्य निमित्तं कारणं वा प्रवृत्तिनिमित्तमित्युच्यते। तच्च 'शब्दस्य भावः', 'नित्यं तत्त्वम्' इत्यादिपदेन प्रोच्यते। अग्नेस्तत्त्वेऽपगते सति अग्नेरग्नित्वमपागादिति प्रवादं प्रवदन्ति पण्डिताः!!

तस्य नित्यस्य तत्त्वस्य लक्षणान्यनेकानि सम्भवन्ति। एकेन शब्देन सर्वाणि लक्षणानि प्रोक्तुं न शक्यन्ते। अत एवैकं लक्षणमपि प्रवृत्तिनिमित्तपदेन प्रोच्यते तदेव व्युत्पत्त्या परिज्ञायते। यथा कमलपुष्पे गुणा अनेके समवयन्ति।

तदनेकां दशां स्थितिं च धारयति। सर्वाभिरपि पुष्पमेतल्लक्ष्यते। परं 'पङ्कज'शब्दो वा 'नीरज'शब्दो वा केवलं जलप्रभवशालितां समाचष्टे। अतोऽत्रैतदेव प्रवृत्तिनिमित्तम्। एतदेवात्र व्युत्पत्त्या परिज्ञायते।

एतेन सिद्धमेतद् यद् व्युत्पत्त्या यदपि लक्ष्यते न तत् शब्दार्थस्य सम्पूर्णं स्वरूपम्। तथापि तया तस्य शब्दार्थस्याभिज्ञानं तु भवत्येव। एतयैव तस्येतिकर्तव्यता सम्भवति। यथा पाककर्तृत्वात् कोऽपि पाचक इति प्रोच्यते। परं स पठनम्, स्वपनं न करोतीति तु नास्त्येव। सर्वकालं स पचत्येवेत्यपि नास्त्यवदातम्। तथापि मुख्यतः पचनकर्तृत्वात् स 'पाचक' इति पदेन प्रोच्यते। शब्दस्य व्युत्पत्त्या वयमस्य प्रमुखं कार्यम्, मुख्यं लक्षणं मुख्यं प्रवृत्तिनिमित्तं वावधारयितुं शक्नुमः। एतदेव व्युत्पत्तेर्मुख्यं प्रयोजनम्।

कस्याञ्चिद् व्युत्पत्तौ मुख्यस्य प्रवृत्तिनिमित्तस्योपेक्षा—लोके पुत्रार्थे 'नन्दन'शब्दः प्रयुज्यते। अस्य व्युत्पत्त्या ज्ञायते यत् पुत्रो भवति प्रसादाय। पुत्रोऽयं कस्मिंश्चित्क्षणलवनिमेषे दुःखमपि दातुं शक्नोति। परं नैतदस्य मुख्यं प्रवृत्तिनिमित्तम्। अत एवैतदवलम्ब्य नास्य किमपि नाम सम्भवति।

व्युत्पत्तिकारास्तथ्यमेतत् स्वीकुर्वन्तस्सर्वदा मौलिकं प्रवृत्तिनिमित्तम् आविरकार्षुः। परं कदाचिद्वैवश्ये सत्येतदुपेक्ष्यतेऽपि। यथाचार्यो देवराजो निघण्टौ ३.२ मध्ये वर्तमानम् अपत्यार्थकं 'तोक'शब्दं व्यथनार्थकात्तुद्-धातोर्निर्मिमीते। यतो हि पुत्रस्य गर्भवाससमये माता व्यथते, कष्टं वा प्राप्नोति। परं किं सम्भवत्येतदस्य प्रवृत्तिनिमित्तम्? स्थितिस्त्वेषा यद् वत्सस्यैककल्लोल-समक्षं मातुः शतं गर्भवासदुःखमप्यकिञ्चित्करम्, किमुत कथा एकस्य गर्भवासदुःखस्य!! 'अङ्काश्रयप्रणयिनस्तनयान् वहन्तो धन्यास्तदङ्गरजसा कलुषीभवन्ति' इति नास्त्यस्थाने महाकविः कालिदासः!! अथापि यद्यस्य प्रवृत्तिनिमित्तत्वे भवतामाग्रहस्तदा तु विश्वस्मिन् न कापि व्यवस्था स्यात्। यतो हि सर्वमपि दुःखं वस्तु, कदाचन सुखम्, सुखपूर्णं च वस्तु कदाचन दुःखं भवत्येव।

अत एवात्र 'तोक'शब्दप्रसङ्गेऽन्यः कोऽपि कृतान्त आस्थेयः। अत्र निघण्टौ तोकम्, तुक्, तोक्म इति शब्दपाठम्, अथ च ऋग्वेदे ६.४८.९ मन्त्रे 'तुचे' इति शब्दप्रयोमम् अवलम्ब्य 'तुच्'धातुः परिकल्पयितुं शक्यते। यतो ह्यत्र ध्वनिकृतम् अर्थकृतं च सादृश्यं वर्तते। अथ च अवेस्तामध्ये (Iaoxmen) शब्देऽप्यस्य सादृश्यं प्रदर्शयितुं शक्यते। एवञ्च यथा रुक्, रुक्म, रुच इत्यादिरूपाणि दृष्ट्वा रुच्धातुः परिकल्प्यते, एवमत्रापि तुच्धातुः।

परं तुद्धातोस्तोकस्तु ध्वनिपरिवर्तननियमानप्यतिक्रामति। यतो हि दकारस्थाने नकारादेशो नैव दृश्यते। महर्षिर्यास्को निरुक्ते ५.७ मध्ये तुद्धातोस्तोदशब्दं साधयति। पुनरनेनैव 'तोक'शब्दः कथं सिद्ध्येत् ? एवं सिद्धमेतद् यदत्र प्रवृत्तिनिमित्तं ध्वनिपरिवर्तनं वा न तथा परिपाल्यते।

२. एवं निघण्टौ ३.४.१९ मध्ये गृहनामसु 'दुर्याः' शब्दस्य पाठः क्रियते। अत्राचार्य उवटं पुरस्कृत्य समाचष्टे यद् दुःखेन प्राप्तुं योग्या दुर्या गृहा इति। परं नास्तीदमस्य मौलिकं प्रवृत्तिनिमित्तम्। 'सद्म' 'शर्म' इत्यादिशब्दैरभिधीयमानो गृहः परां स्थितिम्, परां शान्तिं वा प्रदत्ते। कथमसौ स्याद् दुःखयोग्यः? यदि कदापि दुःखेनाप्यसौ प्राप्यते तदापि महाभाष्यकारोक्तवचनानुसारेण कूपखानकवत् सम्प्राप्ते गृहे सर्वं दुःखं प्रघाणिष्यते। एवं तदापि क्षेमङ्करः, प्रियङ्करोऽसौ, न तु दुःखयोग्यः।

अत एव शब्दोऽयं वेदे बहुधा प्रासाद् द्वारार्थकाद् दुर्शब्दात् सिद्धिमर्हति। ऋग्वेदे 'अत्रये शतदुरेषु गातुवित्०' (ऋ० १.५१.३) इत्यादिमन्त्रे शतद्वारवत्सु महत्सु राजगृहेषु उद्गाता साम गायति इति प्रोच्यते। निरुक्ते ८.११ मध्ये द्वार्शब्दश्च निष्पाद्यते। ऋग्वेदे १.५१.१४ मन्त्रे दुर्यो यूपः, अथ च आश्वलायनश्रौतसूत्रे ५.११ मध्ये 'द्वारे हिता' इति विग्रहेण 'द्वार्या स्थूणा' इत्यपि प्रोच्यते। अस्यां दशायां 'प्रशस्ता दुरः=द्वारः सन्ति यत्रे'ति विग्रहेण 'दुर्'शब्दान्मत्वर्थे यत्प्रत्ययेन सिद्धो गृहार्थे दुर्यशब्दः। प्राकृते 'द्वार'शब्दोऽपि लक्षणया गृहं समाचष्टे। यथा हिन्दीभाषायां 'घर-बार' इति युग्मे दृश्यते।

३. महर्षिर्यास्कः कुपानमिति विग्रहेण, कुप्धातोर्वा कूपशब्दं समाचष्टे। एवमत्र जलपानमशोभनं भवति, कुप्यन्ति वात्र जनाः। दुर्गाचार्यस्त्वत्र गण्डस्योपरि पिण्डं स्फोटयन् अस्याशोभनतायाः कारणं ब्रूते-यतो ह्यत्र जलग्रहणाय रज्वादिकं साधनमपेक्ष्यते!!

स्पष्टतो नैतदस्य मौलिकं प्रवृत्तिनिमित्तम्। कोऽपि कूपो यावदधिकं रज्वादिकमपेक्षेत तथापि तं शंसन्त्येव जनाः, अथ च प्रशंसन्त्येव केवलम्!! एवं कूपस्तु वर्तते सूपायनम्!! कोऽपि ह्रदोऽशोभनः स्यात्। परं सामान्यतस्तु ह्रदे गभीरे ह्रदि चावगाढे शंसन्ति कार्यावतरं हि सन्तः!!

अतोऽत्र 'यथोत्तरं मुनीनां प्रामाण्यमिति वचनेन पाणिनिराचार्यस्समीचीनतरं प्रतीयते।' स हि अष्टाध्याय्यां ३.१.११४ सूत्रे 'कुप्य'शब्दं गुप्धातोस्समाचष्टे। यतो हि तत्सुषिरत्वान्मध्ये सङ्गोपितं भवति। एवं कूपोऽपि मध्ये सङ्गोपितत्वात् 'कूप' इत्येवं प्रोच्यत इति वक्तुं शक्नुमः।

परवर्त्यर्थविषयकप्रश्नानां समाधातृ निरुक्तशास्त्रम्—इदं नास्त्यविदितं

यत् कालक्रमेणानेकेषां शब्दानामर्थः पर्यवर्तत। तेषां विषयेऽनेके प्रश्ना उद्यन्ति। निरुक्तमार्गेण तेषां प्रश्नानां समाधानं शक्यते विधातुम्। यथा—

१. विभावरी—लौकिके संस्कृते निशार्थे 'विभावरी'शब्दस्य प्रयोगो दृश्यते। अत एव महाकविर्बाणभट्टो हर्षचरिते रात्रिं रूपकालङ्कारेण विभावरीवधूं ब्रवीति! शब्दोऽयं विभाशब्दाद् वन्प्रत्ययेन स्त्रीलिङ्गे नकारस्य स्थाने रेफादेशेन निष्पाद्यते। अतश्शब्दव्युत्पत्त्या तु 'प्रकाशवती' इति ह्यस्यार्थः। परं तमस्विनी रात्रिः प्रकाशवती इति कथं शक्यते वक्तुम्-इत्येष प्रश्नोऽत्र उदियर्ति। संस्कृते प्रकाशकरत्वात् सूर्योऽस्ति विभाकरः। एवं विभावरी रात्रिः कथम्?

अस्य समाधानं निघण्टुना ध्वन्यते। निघण्टौ १.८ मध्ये शब्दोऽयम् उषोनामसु परिगण्यते। उषःकाले कालान्धकारापेक्षया किञ्चित् प्रकाशस्तु भवत्येव। अत एव तत्प्रकाशमपेक्ष्य 'विभावरी' इति कथनं सर्वथा सङ्गच्छते। कोऽपि शब्दः कालक्रमेण मौलिकं प्रवृत्तिनिमित्तं त्यक्त्वा योगरूढम्, रूढं वार्थं ब्रवीति। अतः परस्तादयं शब्दः प्रगेतनायान्धकाराय प्रायुज्यत। पश्चात्तरं तु अन्धकारसाम्यात् रात्रेः कालान्धकारायास्य प्रयोगो लोके समवर्तताग्रे। अत एव शब्दोऽयमिदानीं रात्रिमभिधत्त इत्यहो चित्रम्!

२. व्रजो वा व्रजेन्द्रो वा—लौकिकसंस्कृते शब्दोऽयम् अवरोधार्थे प्रयुज्यते। 'गवाम् अवरोध' इत्यर्थे 'गोव्रजः' इति शब्दः प्रकामं प्रयुज्यते। एवम्प्रकारकायावरोधभूम्ने भूमिस्थानाय 'व्रजभूमिः' इति शब्देन. तस्य स्वामिने च 'व्रजेन्द्र' इति पदेन व्यवहरन्ति जनाः।

अष्टाध्याय्याः ३.३.११९ सूत्रे शब्दोऽयं गत्यर्थकाद् व्रज्धातोः करणेऽधिकरणे वा घञ्प्रत्ययेन निष्पाद्यते। एवञ्च 'व्रजन्ति येन, यस्मिन् वा सोऽस्ति व्रजः'। परमत्र व्रजे गावो मूलतस्तिष्ठन्ति, न तु व्रजन्ति। यदि कदाचित्तत्र व्रजन्ति, एतेन नैतत्प्रवृत्तिनिमित्तं भवितुमर्हति। यस्मिन् काले गावो व्रजे तिष्ठन्ति स तिष्ठद्गुकाल इत्युपचर्यते। अत एव व्रजोऽयं 'गोष्ठ' इति पदेनाप्युपचर्यते। एवं च गोष्ठोऽयं 'व्रज' इत्येवं कथमभिधीयताम्?

निघण्टोस्त्वस्य समाधानाय कश्चन सङ्केतः प्राप्यते। तत्र १.१०.११ मध्ये मेघनामसु व्रजशब्दोऽयं परिपठ्यते। यतो हि मेघोऽयम् आकाशे व्रजति, भ्रमति, मुहूर्तमपि नावतिष्ठते! परं पवनस्य स्थैर्ये सति कदाचिदयं सापेक्षतस्तिष्ठत्यपि। अनेन वैशिष्ट्येन मेघोऽसौ 'कोश'नाम्नापि प्रोच्यते। एवञ्च यदा 'व्रज'शब्दो मेघार्थे रूढतामुपागात्, तदा स्थिरोऽपि मेघो व्रजशब्देन प्रोच्यत। 'करोड़ीमल'नामा श्रेष्ठी दरिद्रेऽपि सति तेनैव नाम्ना

प्रोच्यते। एवं स्थिरो मेघोऽपि व्रजः। अनेन सादृश्येन परवर्तियुगे परितः पिहितम् अवरुद्धं वा निवासस्थानमपि व्रज इत्येवम् उपाचर्यत। एतेन सिद्धमेतद् यद् मौलिकप्रवृत्तिनिमित्तपरिवर्तनेनात्रार्थपरिवर्तनं सम्पन्नम्।

अर्थपरिवर्तनस्याधारः—प्रमुखतस्सादृश्यनिमित्ता लक्षणा—शब्दानां कालक्रमेणार्थपरिवर्तनं निरुक्तकारः स्वीकरोतीत्यत्र नास्ति सन्देहः। परिवर्तनमेतत् प्रमुखतस्सादृश्यनिमित्तिकया लक्षणया सम्पद्यते। महर्षिर्यास्कः, पाणिनिश्चापि न क्वापि नामग्राहमेतां न्यरूपयताम्। तथापि तावस्याः प्रकृतिं कार्यं च सर्वथावित्ताम्।

परवर्तिलक्षणकारास्तु 'शक्यसम्बन्धो लक्षणा' इत्येवं परिभाषन्ते। अत्र शक्यो नाम शक्तिवृत्त्या गम्यो मुख्योऽर्थः, तत्सम्बन्धो लक्षणा। सम्बन्धितस्समीपवर्त्यर्थस्तु लाक्षणिकोऽर्थः। अयं प्राकरणिको गौणोऽर्थः, क्वचनार्थसङ्गत्यै निष्पद्यते। परं निरूढलक्षणया तु सदैव सम्बन्धितोऽर्थः प्रकाश्यते। लक्षणायाः तात्स्थ्यम्, ताद्धर्म्यम्, तत्सामीप्यमित्यादीनि सहकारिकारणानि भवन्ति। यथा प्रोच्यते मञ्जूषायाम्-'सा च लक्षणा तात्स्थ्यादिनिमित्तिका'। एषु सर्वेष्वपि कारणेषु सादृश्यमनुस्यूतम्।

निरुक्तकारो यत्रापि 'अयमपीतरः······एतस्मादेव' इति ब्रवीति, तत्र सर्वत्रापि लक्षणामूलकम् अर्थविकासं मनुते, इति तत्तत्स्थानपरिशीलनेन प्रतीयते। एवं च तानि लाक्षणिकानामर्थानामुदाहरणानि सम्भवन्ति।

कतिपयान्युदाहरणानि—निरुक्तकारो निरुक्ते २.७ मध्ये ब्रवीति यत् 'चतुर्थांश' इत्यर्थे पादशब्दस्य मूलं वा प्रकृतिर्वा—पशोश्चत्वारः पादाः। एवञ्च मूलतः पशूनां पादेभ्यः प्रयुक्तश्शब्दः परस्താच्चतुर्थांशार्थे विकासं प्राप। इदमस्ति पारमर्षं वचनम्—पशुपादप्रकृतिः प्रभागपादः। प्रभागपादसामान्यादितराणि पदानि—निरुक्तम् २.७।

वचनमिदं सर्वथा वैज्ञानिकं परवर्तियुगे शब्दार्थविकासं द्योतयति। प्राकृतेऽपि प्रवाह एष सन्ततं प्राचलत्। एवञ्च तत्र निरूढलक्षणया पादशब्दस्य 'चतुर्थांश' इत्यर्थं कृत्वा पादोन—पौना, सपाद—सवाया, पादांश—पैसा इत्यादयोऽनेके शब्दाः प्रयुज्यन्ते। एवं मूलतो वृषभयुगस्य सकृत्प्रवर्तमानानां पदानां वाचको 'युगपत्'शब्दोऽपि निरूढलक्षणया सकृदर्थस्य वाचकस्सम्पन्नः।

२. निघण्टौ १.१० मध्ये मेघनामसु 'कोश' शब्दः परिपठ्यते। आचार्यो देवराजस्तु 'कूप'शब्देन तुल्यं 'कोश' शब्दमपि कुप्धातोर्निर्ब्रवीति। यथा मेघं दृष्ट्वापि जनोऽवकुप्येत्!! महर्षिर्यास्कस्तु निरुक्ते ५.२६ मध्ये शब्दस्यास्य सर्वथा समीचीनम्, वैज्ञानिकं विवरणं विधत्ते। स शब्दमिमं कुष्धातोस्साधयति।

यतो हि कुष्यतेऽसौ मेघो वृष्ट्यर्थम्। इन्द्रो वज्रेण मेघं कुष्णाति तदैव देवो वर्षतीति मतिः पूर्वं प्रचलति स्म। एतया 'अपां बिलमपिहितं यदासीद् वृत्रं जघन्वाँ अप तद् ववार' इति श्रुतिरप्यनुगृहीता भवति। 'वृत्रहननादिन्द्रेण खाताः' इति मान्यतया 'खाः'शब्दो नद्यर्थे प्रसिद्धः। 'इन्द्रो अस्माँ अकुष्णाद् वज्रबाहुः' इति मान्यतया तु 'कोश'शब्दो मेघार्थे प्रसिद्धः।

महर्षियास्कस्यात्रेदं मतम्-शेवध्यर्थकोऽपि कोशशब्द एतस्मादेव कुष्धातोर्निर्मीयते। यतोह्यस्यापि निर्माणसमय एतं कुष्णन्ति शिल्पिनः।

एतेन विवरणेन शब्दार्थविकासस्यानेके सिद्धान्ता ध्वन्यन्ते। यथा–

१. कस्यापि शब्दस्य मुख्यार्थप्रचलनानन्तरं तत्सहचरितो गौणोऽर्थो विकासमेति। यस्मिन्नंशे मुख्यं ध्यानं ददति जनाः, स एव पश्चान्मुख्यार्थो भवति। एतस्याध्ययनेनेदमवसीयते यत् समाजे कः प्रमुखोऽर्थः, काश्च मान्यता अध्यारूढा आसन्।

२. काव्यशास्त्रिणोऽर्थपरिवर्तनस्य हेतुं निरूढलक्षणां सङ्गिरन्ते। महर्षियास्कोऽपि प्रायशो निरूढलाक्षणिकान् शब्दान् वर्णयति। पादः, कोश इत्यादिशब्दा एवम्प्रकारका एव।

३. आधुनिका भाषावैज्ञानिकाः 'सादृश्यम् अर्थपरिवर्तनस्य प्रमुखं कारणम्' इति स्वीकुर्वते। महर्षियास्कोऽपि प्रायशो नवीनार्थं सादृश्याद् धेतोर्विकसितं मन्यते। अत एव वारंवारं 'सामान्यात्' इति पदं प्रयुनक्ति। महाभाष्यकारोऽपि हेतुमेतं सर्वथा मन्यते। एतदर्थं च 'उपमान'शब्दं प्रयुनक्ति। यथा इदं हि तस्य वचनम्-'एवमपि तुषजकस्य पत्नी न सिद्ध्यति-उपमानात् सिद्धम्–पत्नीव पत्नी' अ० ४.१.३३ सूत्रे महाभाष्यम्।

सादृश्यमाधृत्य विकसितान्यन्यान्युदाहरणानि–महर्षियास्कः कतिपयेषूदाहरणेष्वर्थपरिवर्तनस्य सादृश्यं कारणं न मुक्तकण्ठं प्रोवाच। तथाप्येतदत्रापादयितुं शक्यते। यथा निघण्टौ १.१० मध्ये मेघनामसु गोत्र-शब्दस्य पाठः क्रियते। परं गोत्रशब्दस्तु 'गो+त्र' इत्यनुनिर्वचनं गोष्ठमर्थं ब्रवीति। वेदेऽप्यस्मिन्नर्थे गोत्रशब्दस्य प्रयोगः प्राप्यते। यथा–

'गवां गोत्रमुदसृजो यदङ्गिरः' ऋ० २.२३.१८। पश्चात्तु सादृश्येन गोत्रशब्दो मेघार्थकस्सम्पन्न इत्यनुमानं नास्ति निरवकाशम्। यथा 'गाव एकत्र तिष्ठन्ति' इति हेतोर्गोष्ठो गोत्रः, एवम् 'आकाशे मेघोऽप्येकत्र तिष्ठति' इत्यतो मेघोऽपि गोत्रः प्रोच्यते। 'अत एवायं कोशोऽपि' इत्येतत् पूर्वं निरूपितम्।

एवं निघण्टौ १.१२ मध्य उदकनामसु 'नभः'शब्दस्य पाठः क्रियते। परम् एष शब्दस्तु मूलतो नीलाकाशार्थे प्रसिद्धः। अत आचार्यदेवराजस्यात्रेदं

मतं यद् नीलाकाशसादृश्येन नीलं जलमपि नभःशब्देन प्रोच्यते।

यद्यपि शब्दोऽयम् अन्यथापि शक्यते व्याचष्टुम्। महज्जलयुक्तो मेघोऽन्धकारपूर्णः कालमेघो वा भवति। अत एवायं न+भास्–नभस् इति रूपेण विग्रहीतुं शक्यते। एवञ्च दीप्तिविहीनत्वादसौ मेघो नभः। शब्दोऽयं मेघार्थकेन 'नभ्राट्'शब्देन तुलनामर्हति। अयं शब्दोऽपि न+भ्राज् इति विग्रहेण साध्यते। नभःशब्दोऽप्येवं सम्भवति।

कदाचित् कश्चन सदृशः पदार्थः, यत् किञ्चित् परिवर्तनसहितेन तेनैव नाम्ना व्यवह्रियते। यथा निघण्टौ १.३.१ मध्येऽन्तरिक्षनामसु 'अम्बर'शब्दः परिपठ्यते। अस्य निर्वचनम्-'अम्बुवद्राजते' इति। एवञ्च नीलाम्बुसादृश्यान्नीलमाकाशम् अम्बरमिति प्रोच्यते। अत्र किञ्चित् परिवर्तितोऽपि सर्वथा सादृश्याधारकोऽयं शब्दार्थः।

विविधगाथाधृतं सादृश्यम्–एकपदार्थस्यापरपदार्थेन सादृश्यं विविधगाथाभिर्विहितम्। अत एव सादृश्यमूलकशब्दार्थविकासनिर्धारणे तासां महान् योगः। प्रतियुगं निर्मिता इमा गाथाः पुराकथाशास्त्रम् (Mythology) अवीवृतन् इत्यस्ति तासां माहात्म्यम्।

गाथाभिर्निर्मितसादृश्यविषये निदर्शनम्–पर्वतानां विषये गाथासीद् यत्ते पूर्वं पक्षयुक्ता आसन्। ते उपर्युत्थानायोद्युञ्जन्ति स्म। केचन पर्वतास्तु सुमेरुमपि स्पर्धन्ते स्म। एवं ते जनान् कष्टायन्ते स्म। अत एवेन्द्रो वज्रबाहुरेषां पक्षाण्यच्छिनत्। तदा प्रभृति पर्वता इमे स्थावरास्सम्पन्नाः। अस्याः कथायास्सङ्केत ऋग्वेदे ४.५४.५ मन्त्रे विस्तरशस्तु मैत्रायणीसंहितायां १.१०.१३ मध्येऽग्निपुराणादौ च प्राप्यते।

एवं मेघा अपि पक्षाणि धारयन्ति स्म। एभिरेव ते दूराद् दूरतरं व्रजन्ति स्म। इन्द्रो वज्रेणैषां पक्षाणयप्यरदत्, छिद्रयुक्तांश्च व्यधात्। अस्य वर्णनम् 'अहन्नहिम्' (ऋ० १.३२.१), इन्द्रो अस्माँ अरदद् वज्रबाहुः (ऋ० ३.३३.६) इत्यादिमन्त्रेषूपलभ्यते। आभिर्गाथाभिः पर्वतमेघयोः पक्षयुक्तत्वं सादृश्यं व्यज्यते। अत एव निघण्टौ १.१० मध्ये यानि मेघार्थकानि नामानि, तान्यधिकृत्य निरुक्तकारेण प्रोक्तं यद् अद्रिशब्दात् प्रभृति उपर, उपलशब्दान्तानि सामान्यतो मेघार्थकानि पर्वतार्थकानि च। आचार्यो देवराजोऽत्र वेदोद्धरणानि पुरस्कृत्यानयोः समानं वैशिष्ट्यम्, समानाः कथाः, अत एव समानमर्थं ब्रवीति। यथा मेघो गर्जितलक्षणं शब्दं करोति। पर्वतोऽपि निर्झरादिपातजन्यमव्यक्तं शब्दं करोति। मेघो व्रजत्यन्तरिक्षे। पर्वतोऽपि पक्षच्छेदात् पूर्वमन्तरिक्षे व्रजति। मेघ इन्द्रेण हन्यते। पर्वतोऽपि इन्द्रेण हन्यते

पक्षच्छेदसमये। स्पष्टमत्र मेघपर्वतयोस्समानता स्थाप्यते। एतेन सिद्धमेतद् यद् विविधमान्यताधृतं सादृश्यम् अवलम्ब्यापि शब्दानामनेकार्थत्वं सम्भवति।

अत्र विशेषतो विवेचनीय उपर उपलश्च शब्दः। शब्दावेतौ सादृश्यहेतुना द्व्यर्थकौ। यज्ञग्रन्थेषु शब्दावेतौ पर्वतग्राव्णः सोमपेषणं दृषदुपरिस्थप्रस्तरविशेषार्थं द्योतयतः, अपि चान्येषु प्रसङ्गेषु मेघार्थं च। अत एव प्राकृते 'उपल'शब्दात् 'ओला' शब्दो निर्मितः। यो हि मेघहिमखण्डस्य वाचकः। एवमत्र द्वावपि शब्दौ विशिष्टार्थौ प्रकाशयतः। इदमत्रावधेयं यत् प्रस्तरशब्दोऽप्येवम्प्रकारक एव। प्राकृते शब्दादस्मात् पर्वतशिलार्थकः 'पत्थर' शब्दो विकासमाप। अपरतश्चास्मात् शब्दादेव मेघहिमखण्डार्थकः 'पत्थल'शब्दोऽपि 'भोजपुरी'भाषायां निरमीयत। सर्वं चैतत् सादृश्यहेतुना शब्दार्थद्वयस्य प्रमाणम्।

२. एवं निघण्टौ १.५ मध्ये खेदयः, किरणा इत्यादयश्शब्दा रश्मिनामसु पठ्यन्ते। अत्र निरुक्तकारस्य कथनमिदं यत् 'खेदयः'शब्दात् प्रभृति पञ्च नामान्यश्वरश्मिभिस्साधारणानि।

अत्राप्येषां शब्दानाम् अर्थद्वयस्य कारणं गाथाशास्त्रप्रयुक्ता मान्यता एव, सूर्यः कथं चलतीत्यस्य समाधानायालङ्कारेण कथा प्रोच्यते। तदनुसारेण सूर्य एकं रथमधितिष्ठति। तस्मिन् रथ एकमेव चक्रम्। तं रथमेको महान् अश्वः कर्षति। तस्मिन्नश्वे सप्त रश्मयो युञ्जन्ति। तथ्यमदो रूपकालङ्कारेण ऋग्वेदस्यास्मिन् मन्त्रे प्रोच्यते–

'सप्त युञ्जन्ति रथमेकचक्रमेको अश्वो वहति सप्तनामा।'

–ऋग्वेदः १.१६४.२

अत्रेदं ध्येयं यत् सूर्यस्य सप्त किरणा अश्वरश्मिभिर्नातिभिद्यन्ते–समानयोगक्षेमत्वात्। पारोवर्यविद्यास्कोऽस्य मन्त्रस्य व्याख्यानप्रसङ्गे 'सप्तनामा' शब्देनादित्यं प्राह। यतो ह्यस्मै सूर्याय सप्त रश्मयो रसानभिसन्नामयन्ति। अथ च सप्ताश्वरश्मित्वादश्वोऽपि सप्तनामा भवितुं शक्यते। अत्र द्व्यर्थकेन शब्देनैकेन श्लेषालङ्कारेण अश्वः, सूर्यश्च विशिष्येते। एवञ्च गाथाकृतमत्र शब्दार्थद्वयमिति प्रतीमः। एतेन 'सूर्यस्य सप्त किरणा भवन्तीत्याधुनिकं भौतिकं वैज्ञानिकं तथ्यं वेदमन्त्रोऽलङ्कारेण पुष्णातीति नास्ति सन्देहः।

स्कन्दस्वामी लक्षणामनुमन्यते–निघण्टौ १.११ मध्ये वाङ्नामस्वनेके शब्दाः परिगण्यन्ते। अत्र स्कन्दस्वामिनां मतं यदत्रानेके शब्दा मूलतोऽन्यार्थान् जुषमाणा अपि वागर्थं प्रकाशयन्ति। लक्षणया वोपचारेण वा तस्यार्थस्य प्रकाशनमिति तेषामभिमतं ध्वन्यते। यद्यपि न तैः क्वापि लक्षणाया नाम

परिगृहीतम्। तेषां मतमत्र विव्रियत एवम्–

१. येन शब्दः प्रोच्यते तद् वागिन्द्रियं वाङ्नाम्ना प्रोच्यते। अत्र करण-साधनं वाक्शब्दः।

२. यदपि प्रोच्यते तदपि वाङ्नाम्नाभिधीयते। अत्र तत्कार्यशशब्दोऽभि-धीयते। अत्र कर्मसाधनं वाक्शब्दः। अस्मिन् विग्रहे घोषः, स्वरः, श्लोकः, शब्दः, स्वन इत्यादयश्शब्दा वाङ्नामसु सुपरिगृहीता भवन्ति।

३. यया शब्दः प्रोच्यते सापि वाक्। अत्रापि करणसाधनं वाक्शब्दः। अत्र वाग्रूपकरणस्याप्युपकरणानि प्रमुखतः स्त्रीलिङ्गवन्त्यभिधानानि सङ्गृहीतानि भवन्ति। यथा काकुत्, जिह्वा, गीः, मन्द्राजनी इत्यादीनि।

४. स्तनयित्नुलक्षणा माध्यमिकापि वाक्। यथा पविः। अत्रापि कर्मसाधनं वाक्शब्दः। अत्र न सर्वो ध्वनिर्वाक्, अपितु मेघगर्जनमेव। अत इदं विशिष्टार्थताया उदाहरणम्।

५. तदधिष्ठात्र्यपि देवता वागिष्यते। यथा अदितिः, गन्धर्वी, इळा, सरस्वती, सूर्या इत्यादयः। इदमस्ति तात्स्थ्यनिमित्तिकया लक्षणया। यथा आधार आधेयस्योपचाराद् मञ्चे स्थितः पुरुषोऽपि मञ्च एव। एवमत्रापि अदित्यामधिष्ठिता वागप्यदितिरेव।

एवमन्येऽपि केचन शब्दा लक्षणया सुसमाहिता भवन्ति। यथा 'गभीरा', 'गम्भीरा' इत्यादयो मूलतो जलस्य गहनध्वनिम् अभिप्रयन्ति। पश्चात्तु लक्षणया मनुष्यध्वन्यभिव्यञ्जनायापि प्रयुज्यन्ते। एवं 'धारा' शब्दो मूलतस्सोमप्रवाहशब्दमभिव्यनक्ति। इदमस्ति महत्त्वपूर्णम्। नदीप्रवाहार्थकोधाराशब्दोऽस्ति परवर्ती। मूलतस्तु ध्वन्यर्थकोऽयमित्यनुनिघण्टुं शक्यते परिज्ञातुम्। एवं स्वाहा, भारती, ऋक्, अनुष्टुप्, गाथा इत्यादयश्शब्दा मूलतो यज्ञध्वनिम् अभिव्यञ्जन्ति।

आचार्यदेवराजोऽपि लक्षणामनुमन्यते–आचार्यो देवराजोऽपि लक्षणाशब्दप्रयोगं विनापि लक्षणां स्वीकरोतीति प्रतीमः। यथा निघण्टौ २.५ मध्येऽङ्गुलिनामसु 'स्वसारः सनाभयः' इति पाठः क्रियते। अत्राचार्यः शब्दयोरनयोः 'भगिनी' इत्यर्थं ब्रवीति। पश्चात्तु सादृश्येनाङ्गुल्यर्थकावप्यमू शब्दौ। एवं 'सनाभि'शब्दोऽपि मूलतो भगिनीं ब्रुवाणः पश्चात् सादृश्येनाङ्गुल्यर्थमप्यभिव्यनक्ति।

एवं शाखाशब्दो मूलतो वृक्षशाखायै प्रयुज्यते। अस्यावयव-सादृश्येनाङ्गुलयोऽपि शाखाशब्देनाभिधीयन्ते। आचार्यो देवराजो 'हस्ताभ्यां दशशाखाभ्याम्' इत्यादिमन्त्रेणामुमर्थं पुष्णाति। अमरकोशेऽपि 'अङ्गुल्यः

करशाखाः स्युः' इति वचनेनायमर्थस्स्वीकृतः। यद्यपि लोके सन्त्यस्य विरलाः प्रयोगाः।

अर्थपरिवर्तनस्य प्रकाराः

आधुनिका भाषावैज्ञानिका भाषासु त्रिप्रकारकमर्थपरिवर्तनं स्वीकुर्वते। तद्यथा-अर्थविस्तारः, अर्थसङ्कोचः, अर्थातिदेशश्चेति। पारोवर्यविद्यास्कः प्रकारत्रयमपि यथाविधि वेत्ति स्म। स हि यथास्थानम् इदं निरूपयामास। अस्य क्रमबद्धं विवरणम् एवम्–

१. अर्थविस्तारः–कदाचन कस्यापि शब्दस्यार्थः पूर्वापेक्षया विस्तीर्यते। प्रक्रियैषार्थविस्तारशब्देन भण्यते। अस्य कारणानि बहूनि। यथा–कदाचन किमपि वस्तु लोकेऽस्तितामेति। तस्य कृते कश्चन शब्दोऽपि प्रयुज्यते। पश्चात्तु तत्सदृशान्यवस्तुन आगमने सति पूर्वशशब्दो नवीनसदृशवस्तुनः कृतेऽपि प्रयुज्यते। अयमेवास्त्यर्थविस्तारः। यथा 'कृत्ति'शब्दः पूर्वमन्त्रार्थे चर्मवस्त्रार्थे च प्रयुज्यते स्म। निरुक्ते ३.२१ स्थाने प्रोक्ते मन्त्रे 'कृत्तिवासाः' इति पदस्य 'चर्मवासाः' इत्यर्थः कृतो भाष्यकारैः। अस्य चर्मवस्त्रस्य कृते 'त्वक्त्र' शब्दः प्रयुज्यते स्म। निरुक्ते १.१९ मध्य उद्धृते 'निष्ट्वक्त्रासश्चिदिन्नरो' इत्यादिश्लोके त्वक्त्रशब्दस्य प्रयोगो दृश्यते। पश्चात्तु सूत्रवस्त्राणामागमने सति तेषां कृतेऽपि कृत्तिशब्दस्य प्रयोगो बभूव। अत एव निरुक्ते ५.२२ मध्ये प्रोक्तं निरुक्तकारेण–'इयमपीतरा कृत्तिरेतस्मादेव सूत्रमयी।' स्पष्टतोऽयमर्थविस्तारस्य परिणामः।

कदाचन कश्चन शब्दः पूर्वं विशिष्टवाचको भूत्वा पश्चात् सामान्यवाचकतां प्रपद्यते। यथातिप्राचीने युगे 'यदु', 'द्रुह्यु' इत्यादयश्शब्दा विशिष्टमनुष्यसमूहानां वाचका आसन्। तथ्यमेतद् वेदमन्त्रेणानेनावगम्यते–

'यदिन्द्राग्नी यदुषु तुर्वशेषु यद्द्रुह्युष्वनुषु पूरुषु स्थः'

–ऋ० १.१०८.८

अत्र स्पष्टत इमे यद्वादयो मनुष्यसमूहविशेषस्य वाचकाः। यदि यद्वादयो मनुष्यसामान्यं ब्रूयुस्तर्हि किमस्ति प्रयोजनं पञ्चानां पृथक्पाठेन? पृथक्पठितास्त्वेते मनुष्यविशेषं गमयन्ति। यथा तु वेदमन्त्रोऽयं ब्रवीति तथा पञ्चजना इमे यद्वादय एव।

पश्चात्तु यद्वादीनां पुत्राः तथावर्धन्त, तथा व्याप्नुवन् स्थानानि, तथा प्राभावयन् जनान् यत् सर्वेऽपि मनुष्यसामान्यवाचकास्सम्पन्नाः। अत एव निघण्टौ २.३ मध्ये अन्वादयो मनुष्यसामान्यनामसु परिगण्यन्ते। स्थितिरेषा नहुषस्य पुत्राणां कृते 'नाहुष' शब्दे, पश्चात्तु प्रजासामान्यवाचके 'नाहुषीः

प्रजाः' इति शब्दे दृष्टा। मनोरपत्यमित्यर्थे निर्मितो 'मानवः'शब्दः, पश्चान्मानवसामान्यं द्योतयामास, इत्यप्यस्योदाहरणम्। एवं पूर्वं विशेषार्थकाः, पश्चात्तु सामान्यार्थका अनेके शब्दा विदुषां नयनयोरयनं गताः! एतत्सर्वमर्थविस्तारस्योदाहरणम्!

एवं निघण्टौ ३.२३ मध्य 'उत्स'शब्दः कूपनामसु परिगण्यते। अस्मात् स्थानाद् जलमुद्ध्रियते। अत इदं जलस्य मूलं निवासस्थानम्। पश्चात्तु अर्थविस्तारमाश्रित्यं प्रत्येकं मूलस्थानाय 'उत्स'शब्दस्य प्रयोगो बभूव। 'आकर'शब्देऽप्येषा स्थितिर्दृष्टा। एष शब्दोऽद्यत्वे सर्वविधमूलस्थानाय प्रकामं प्रयुज्यते लोके।

एवं निघण्टौ २.९ मध्ये बलनामसु 'सहस्'शब्दस्य पाठः क्रियते। एवञ्च लोके 'बलेन कृतम्' इत्यर्थे 'सहसाकृतम्' इति शब्दः प्रयुज्यते स्म। अत्र पाणिनिराचार्यः तृतीयान्त-'सहसा'शब्दस्य 'कृतम्' इत्यनेन समासे सति अ० ६.३.३ सूत्रेणालुकं विधत्ते। इदं बलेन कृतं कार्यं प्राय आकस्मिकमेव भवति। अतोऽनूचीनाहःसु शब्दोऽयमाकस्मिकार्थे प्रायुज्यत। महाकविर्माघ एकस्मिन् मनोहारिणि श्लोके प्रथमं सहसाशब्दं बलार्थे, अपरन्तु आकस्मिकार्थे प्रायुङ्क्त[1]। अत्र बहुकालकलितार्थविस्तारप्रक्रिया एकस्मिन्नेव श्लोकगुम्फे पिनद्धेति किं नास्ति चित्रम्!!

एवं निरुक्ते ५.१ मध्ये 'अन्धः'शब्दोऽन्धकारार्थे प्रयुज्यते। यतो हि 'अ+ध्या' इति विग्रहेण नास्मिन् ध्यानं वा दर्शनं वा भवति। अग्रिमेण प्रबन्धेन निरुक्तकारोऽर्थविस्तारं ब्रवीति। तेन प्रोक्तम्-'अयमपीतरोऽन्ध एतस्मादेव'। अत्र 'न ध्यानं दर्शनं वा भवत्यनेनेति करणसाधनकश्शब्दोऽयं व्याख्येयः। एवञ्च शब्दोऽयं मूलतो बाह्यवस्तुनिष्ठः। पश्चात्त्वात्मशरीरनिष्ठोऽपि सम्पन्नः। इह लोक उपकार्योपकारकयोर्विषयविषयिणोर्वा व्यत्यासस्य बहुलं समाचारः। चक्षुषस्सर्वथा सर्वदा भिन्नमपि 'नयनपात्रपेयं वपुः' इत्येवं कवयन्ति कवयः! मनुष्यमन्धं दृष्ट्वा दर्पणमप्यन्धः प्रोच्यते। एवं दर्शनायोग्यम् अन्धकारम् उपकार्यं दृष्ट्वा दर्शानानुपकारकं चक्षुषोरभावमपि 'अन्ध'शब्देन प्रवदन्ति जनाः। सर्वमेतदर्थविस्तारस्य प्रपञ्चः।

कदाचन क्रियापदेष्वप्यर्थविस्तारो दृश्यते। यथा निघण्टौ ३.१४ मध्ये अर्चतिकर्मसु 'भनति' इति क्रियापदं परिगण्यते। पदमेतत् सम्मानपूर्वकभाषणार्थे वर्तते। यथा श्रूयत एवम् ऋग्वेदे–

---

१. प्रियतमेन यथा सरुषा स्थितं, न सहसा सहसा परिरभ्य तम्।

–शिशुपालवधम् ६.५७

एता वि पृच्छ किमिदं भनन्ति

लौकिके संस्कृतेऽस्य रूपं 'भणति' इति सम्पन्नम्। अर्थविस्तारोऽपि समजनि। यतो हि सर्वप्रकारकसर्वविषयकभाषणार्थे चास्य प्रयोगः संस्कृतनाटकेषु दृश्यते प्रकामम्।

२. अर्थसङ्कोचः–यदा कश्चन शब्दो विस्तृतार्थं त्यक्त्वा विशिष्टार्थं सङ्कुचितार्थं वाभिधत्ते, तदा सोऽर्थसङ्कोचस्य परिणाम इत्यभिमन्यते। भाषावैज्ञानिकानां मतं यत् समाजविकासस्य स्वाभाविकः परिणामोऽर्थसङ्कोच एव। यतो हि तदा भाषया वस्तूनां सुसूक्ष्मरूपेण इदमित्थं रूपेण वा वर्णनमभीष्यते। इदं तदैव सम्भवति यदा भाषाशब्दाः सुनिश्चितार्थमभिदधीरन्। एतद् भाषायाम् अर्थसङ्कोचेनैव सम्भवति। निरुक्तकारः स्थानेस्थाने शब्दानेवम्प्रकारकान् समीक्षाञ्चक्रे।

वैदिकशब्दानां परवर्तिकालेऽर्थसङ्कोचः–अस्य निदर्शनम्–'वास्तु'-शब्दः। वेदे गृहार्थेऽस्य प्रयोगः प्राप्यते। निरुक्तकारः २.७ मध्येऽमुं शब्दं व्याख्यातुम् अतिसुन्दरं मन्त्रम् उदाजहार–

'ता वां वास्तून्युश्मसि गमध्यै यत्र गावो भूरिशृङ्गा अयासः'

–ऋग्वेदः १.१५४.६

अर्थः–वयं तानि निवासस्थानानि कामयामहे, यत्र बहुदीप्तयोऽयनाः सूर्यरश्मयः स्युः।

अपि च वास्तुशब्दोऽन्तरिक्षार्थेऽपि प्राप्यते। यतस्तत्रैव प्राणिनो निवसन्ति। अयमस्य विस्तृतोऽर्थः। अत्र प्रमाणं 'वास्तोष्पति'शब्दः। निरुक्तकारः १०.१७ मध्ये वास्तोः पालके रुद्रेऽर्थे शब्दममुं प्रायुङ्क्त। परं परवर्तियुगे तु नियमेन गृहार्थ एव शब्दोऽयं प्रयुज्यते।

एवम् 'अम्बर'शब्दोऽप्यर्थद्वयमभिदधाति। अस्याकाशार्थे वस्त्रार्थे च प्रयोगो दृश्यते। अस्य द्वितीयार्थविकासं प्रति (Rhys Darrds) महोदयेन स्वकीये (Pali-English Dictionary) ग्रन्थे परिकल्पितं यद् 'रक्तकम्बल' शब्दः प्राकृते 'रत्तम्बर'-रूपमधारयत्। तस्मान्निःसृतोऽम्बरशब्दोऽर्थविकास विधिना वस्त्रमात्रवाचकतां प्राप।

परम् उपरिलिखितवास्तुशब्दतुलनया वयं मन्महे यत् सम्पूर्णम् अन्तरिक्षमेव विस्तृतार्थे वस्त्रम्। यथा वास्तुशब्दे समस्तमन्तरिक्षमेव निवासः। दिगम्बरशब्देऽपीयं भावना प्राकाश्यमेति। वस्त्रम्, निवासश्चेति शब्दाविमौ एकस्माद् वस्धातोर्विनिर्मितौ। अत एकं प्रवृत्तिनिमित्तमभिरक्षतः। एवं

सङ्कुचितरूपेऽम्बरस्य वस्त्रमर्थः, विस्तृतरूपे त्वाकाशमर्थः।

एवं समितिः, सङ्ग्रामः, पृतना—इमे शब्दा मूलतो यस्य कस्यापि समूहमर्थं प्रत्याययन्ति। पश्चात्तु समितिशब्दः सभायां मनुष्यसमूहार्थे, सङ्ग्रामः, पृतना शब्दौ तु युद्धे सैनिकानां समूहार्थे व्यवह्रियेते।

वामा—निघण्टौ ३.८ मध्ये प्रशस्यनामसु 'वामा'शब्दः परिगण्यते। निरुक्ते ४.२६ मध्ये, ऋग्वेदे १.१६४.१ मन्त्रे च शब्दोऽयं वननीयार्थे प्रकाश्यते। एवं प्रत्येकं प्रशंसनीयं वस्तु वामः। पश्चात्तु 'वामा'शब्दः प्रशंसनीयायाः स्त्रियाः कृते प्रयुज्यते।

परवर्तिवैयाकरणास्तु शब्दमेनमनेकप्रकारेण व्याचक्षते। अत्रार्थस्योपेक्षणीयता तदा परां काष्ठामुपागमद् यदा केऽपि शब्दसिद्ध्येकधना वामाशब्दम् उद्गिरणार्थकाद् वम्धातोः साधयामासुः! तेषां मतं यत् स्त्री सौन्दर्यं वमति। शब्दकल्पद्रुमादिष्वेष एव विग्रहः। परं निरुक्तकारस्तु वन्धातोश्शब्दं व्युत्पादयन् सर्वथा समीचीनतरमर्थं ब्रवीतीत्यत्र नास्ति सन्देहः।

वैदिके युगे शब्देषु विशिष्टार्थता—अत्र निदर्शनम्—निघण्टौ १.११.१७ मध्ये धमनिशब्दस्य वाङ्नामसु परिगणनम्। परं वेदेन ज्ञायते यच्छब्दोऽयं न वाङ्मात्रार्थं ब्रवीति। अपितु केवलं विशिष्टं नाडीध्वनिं प्रकाशयति। यतो ह्येवं श्रूयते वेदे—**इयमस्य धम्यते नाडी**—ऋग्वेद १०.१३५.७। अत्र नाडीपरिचलनार्थे नाडीध्वन्यर्थे वा धम्धातुः प्रयुज्यते। अतोऽस्मान्निर्मितो धमनिशब्दो मूलतो नाडीध्वनिं प्रकाशयतीति प्रतीमः।

वैदिकधातुषु विशिष्टार्थता—निरुक्ते नैगमकाण्डस्य प्रारम्भे व्याख्याकारो दुर्गाचार्यः तथ्यमदो यथाविधि व्याचष्टे। तस्य मतं यन्निघण्टौ २.१४ मध्ये सर्वे धातवः सामान्यगत्यर्थे परिगण्यन्ते। परं ते वस्तुतो विशिष्टगत्यर्थं प्रकाशयन्ति। यथा—

कसति=उरसा चलनम्, न तूर्ध्वगमनम्।

(यद्यप्यद्यत्वेऽर्थविकासेन मनुष्याणां चलनमपि 'निकसनं', 'निकासो' वेति शब्देन प्रोच्यते।)

लोठते=लोष्ठादीनामचेतनानां निम्नप्रदेशं प्रति गमनम्। अस्मादेव प्राकृते 'लुढ़कना'क्रिया निष्पद्यते।

श्चोतते=द्रवद्रव्याणां स्रवणम्। निरुक्तकारोऽस्माद् धातोः 'स्तोक'शब्दं निर्मिमीते। यतो ह्येतत् स्रवणं न्यूनमेव भवति।

दुर्गाचार्यस्य वचनमिदमतिसमीचीनम्। एवं धातुपाठे प्रोक्ता अनेके

सामान्यगत्यर्थका धातवो मूलतो विशिष्टक्रियां द्योतयन्ति। कतिपये धातवस्सामान्यार्थका अपि, तन्निर्मिता नामशब्दा विशिष्टार्थकास्सम्भवन्ति। यथा निघण्टौ २.१४ मध्ये, धातुपाठेऽपि च 'सर्पति'क्रिया गत्यर्थे प्रयुज्यते। संस्कृतनाटकेष्वपि सामान्यगत्यर्थे क्रियाया अस्या असकृत् प्रयोगः। परमस्माद् धातोर्निर्मितः 'सर्प'शब्दः पूर्वं सर्वेषां सरीसृपाणां प्राणिनां कृत आसीत्। पश्चात्तु केवलमसौ सर्पार्थे प्रयुज्यते।

वैदिकधातूनां दर्शनशास्त्रयुगे विशिष्टार्थता—अत्र निदर्शनम्—निघण्टौ २.१५.३ मध्ये क्षिप्रनामसु 'द्रवत्'शब्दः परिगण्यते। परवर्तिसाहित्ये तु शब्दोऽयं नास्ति क्षिप्रक्रियासामान्यार्थे, अपितु केवलं क्षिप्रस्यन्दनार्थे विशिष्यते। अत एव न्यायशास्त्र आद्यस्यन्दनासमवायिकारणार्थे शब्दोऽयं परिभाष्यते। अत एव 'द्रवत्वमाद्यस्यन्दनासमवायिकारणमि'ति तर्कभाषा।

वैदिकशब्दानां पाणिनियुगेऽर्थसङ्कोचः—निघण्टौ ३.७ मध्ये रूपसामान्यार्थे 'अरुष'शब्दस्य पाठः क्रियते। परं शब्दोऽयं मुख्यतो रक्तरूपार्थे प्रयुज्यते। यतो हि निघण्टौ १.८.१३ मध्य उषोनामसु 'अरुषी' इति परिगण्यते। अपि च तत्रैव १.१५ मध्ये 'अरुण्यो गाव उषसाम्' इति प्रोच्यते। एतेन 'उषसां किरणा रक्ता' इत्यनुमन्यते। एवञ्च निरुक्तकारमतेन 'अरुष'शब्दस्य, अरुणशब्दस्य च रक्तोऽर्थ इति ध्वन्यते।

परवर्तियुगे त्वरुणशब्द एव सामान्यं रक्तमर्थं प्रकाशयति केवलम्। 'अरुष'शब्दस्तु विशिष्टे मनुष्यरक्तार्थे प्रायुज्यत। अत एव महावैयाकरणः पाणिनिः अ० ३.२.२१ सूत्रे 'अरुस्'शब्द उपपदे कृधातोः टप्रत्ययेन 'अरुष्करः' इति शब्दं साधयामास। अस्यार्थस्तु रक्तं व्रणं करोतीति कोशकाराः। एवञ्चात्र शब्दोऽयं विशिष्टरक्तार्थक इति प्रतीमः। 'रक्त'शब्दोऽपि रञ्जनार्थमात्रे प्रयुज्यते स्म। पश्चात्तु केवलं मनुष्यशोणितार्थे व्यवह्रियते। एवं सर्वमेतदर्थसङ्कोचस्योदाहरणम्।

प्राकृते युगेऽर्थसङ्कोचः—कतिपये वैदिकशब्दाः प्राकृते युगे किञ्चिद् ध्वनिपरिवर्तनम् अर्थसङ्कोचं च प्राप्याद्यापि श्वसन्ति। यथा निघण्टौ १.९ मध्ये घर्मशब्दोऽहर्नामसु, तत्रैव ३.१७ मध्ये च यज्ञनामसु परिपठ्यते। अर्थद्वयेऽपि शब्दोऽयं मुख्यत उष्णत्ववैशिष्ट्यं प्रकाशयतीति प्राकृतशब्द-तुलनाभिरभिव्यज्यते। यतो हि प्राकृते घर्मशब्दान्निर्मितो 'घाम'शब्दो मध्याह्नकिरणार्थं प्रकाशयति। पर्शियनभाषायां चास्मान्निर्मिता 'गर्म', 'गर्मी' इत्यादयश्शब्दा औष्ण्यमर्थमभिव्यञ्जयन्ति। एवं प्राकृते शब्दोऽयं निश्चितरूपेणार्थसङ्कोचं गतः।

एवं वैदिके युगे 'प्रस्तर'शब्दो विस्तारमात्रे, प्रमुखतस्तु कुशस्तृतासनाद्यर्थे प्रयुज्यते स्म। 'इमं यम प्रस्तरमा हि सीद' इति ऋग्वेदे १०.१४.४ मन्त्रे संवर्ततेऽस्य प्रयोगः। प्राकृते युगे तु शब्दोऽयं केवलं विस्तृतपाषाणार्थं ब्रवीति। एवम् अस्मिन् विस्तारार्थ एव 'स्तर'शब्देन निर्मित इंग्लिशभाषायाः (Star) शब्दः केवलं ताराणां विस्तारं द्योतयति। एवं निघण्टौ १.१० मध्ये वर्तमानो मेघार्थक 'उपल'शब्दः। प्राकृते त्वस्मान्निर्मित 'ओला'शब्दः केवलं मेघे निर्मितं हिमखण्डं करकं वा ब्रवीति। पश्चात्तु करकाकारसादृश्येन गोमयखण्डोऽपि 'उपला'शब्देन प्रोच्यते।

एवं निरुक्ते २.६ मध्ये 'वि'शब्दः पक्षिमात्रार्थं ब्रवीति। विरिति शकुनिनाम इति निरुक्तम्। पक्षीव उड्डयनसामर्थ्यात् 'विमानम्' इति प्रोच्यते। परं प्राकृते 'वि'शब्दान्निर्मितो 'बया'शब्दः पक्षिविशेषं द्योतयति, न तु सामान्यम्।

एवं निघण्टौ ३.३ मध्ये महन्नामसु 'रभस'शब्दः परिपठ्यते। परं संस्कृतनाटकेषु तु केवलं महच्छीघ्रार्थे 'सरभसम्' इति शब्दः प्रयुज्यते। प्राकृतेऽपि हरबी, हरबियाना इत्यादयश्शब्दा अस्मिन्नेव सङ्कुचितेऽर्थे प्रयुज्यन्ते।

३. अर्थातिदेशः—यदि कोऽपि शब्दः पूर्वस्माद् भिन्नमर्थं धारयति तदा सोऽर्थातिदेशस्य परिणाम इति प्रोच्यते। एवंविधानामुदाहरणानामस्ति नैयून्यम्। यतो हि कोऽपि समाजः कमपि शब्दं विशेषकारणं विना न सर्वथा परिवर्तितुं समीहते। तथापि सम्भवन्ति कतिचन निदर्शनानि। यथा—

निघण्टौ ३.१५ मध्ये कण्वशब्दो मेधाविनामसु परिगण्यते। अयं हि यजुर्वेदीयकाण्वशाखाया द्रष्टृत्वेन स्मर्यते। अष्टाध्याय्याः ६.१.१४८ सूत्रे प्रस्कण्व शब्द ऋषित्वेन व्यपदिश्यते। परम् अष्टाध्याय्याः ३.१.१४ सूत्रस्य महाभाष्यवार्त्तिके कण्वचिकीर्षायां क्यङ्प्रत्ययो विधीयते। व्याख्याकारा अस्यार्थं 'पापचिकीर्षा' इत्येवमभिदधति। एवमत्र कण्वशब्दस्यार्थस्सर्वथा परिवर्त्यते। एवं 'कुत्स' इत्येकस्य ऋषेर्नामधेयम्। महर्षियास्केन सहास्य शास्त्रार्थस्सम्पन्नः। अयं हि कौत्सः 'अनर्थका हि मन्त्राः' इति मतं समास्थित। मतेऽस्मिन् पर्यनुयोगपरिहारावग्राहिषाताम् ऋषिभ्याम्। निरुक्तस्योपोद्घाते सङ्क्षिप्तं विवरणमस्य प्राप्यते। पश्चात्तु 'कुत्सः', 'कुत्सा' वा निन्दार्थे प्रयुज्यते। चुरादिगणीयः कुत्सधातुश्चावक्षेपणार्थे परिपठ्यते। प्रतीयते यत् कुत्सस्य मतं निन्दितमवधारितं लोके। अतः प्रवर्तकस्य नामापि निन्दार्थं सम्पन्नम्।

निघण्टौ २.७ मध्ये 'कीलाल'शब्दोऽन्नार्थे परिगण्यते। वेदे शब्दोऽयम् अन्न-रस-सोमामृताद्यर्थेषु प्रसिद्धः। अतोऽस्य पातारो देवा अमन्यन्त समाजे। पश्चात्तु शब्दोऽयं रक्तार्थे शोणितार्थे वा पर्यवर्तत। अमरकोशे शब्दोऽयमस्मिन्नेवार्थे परिपठ्यते। अत एव लौकिके संस्कृते 'कीलालपाः'शब्देन राक्षसमवबुध्यन्ति जनाः।

एवं निघण्टौ १.२ मध्ये हिरण्यार्थे 'अयः', 'लोहम्' इति शब्दद्वयस्य पाठः प्राप्यते। कस्मिंश्चित् समये समाजे लौहः, ताम्रं चास्तितामुपागमताम्। तदा त्वनयोरर्थयोरपि शब्दद्वयस्य प्रयोगः प्रचलितः। एवञ्चार्थयोरनयोर्महद् विपर्यास आलक्ष्यते। वेदे मन्त्रः प्रोच्यते यत्–'आयसीं जङ्घां विश्पलायै अधत्तम्'। परमत्र न वयं निर्णेतुं शक्नुमो यत् सा कृत्रिमजङ्घा लौहमयी आसीदथवा ताम्रमयी! एवञ्च 'अयस्'शब्दस्य निश्चितोऽर्थो नैव परिज्ञायते।

पश्चात्तु निश्चितार्थप्रदानायानेके प्रयत्नास्समभूवन्। हिरण्यार्थे 'अयः'शब्दस्य, 'लोहम्'शब्दस्य च प्रयोगस्सर्वथा पर्यहीयत। अपि च ताम्रलोहविभाजनाय 'लोहायसम्' 'कृष्णायसम्' इति प्रयोगद्वयं समारब्धम्। तस्मिन् समये ताम्रस्य कृते 'ताम्र'शब्दस्य प्रयोगो नैवासीत्। यतो हि शब्दोऽयं निघण्टौ ३.७ मध्ये यथा ब्रवीति तथा रूपसामान्यवाचक आसीत्। एवं 'लोहायस'शब्देन ताम्रम्, कृष्णायसशब्देन तु लौहः प्रोच्यते स्म। पाणिनिराचार्योऽपि अ० ५.४.९४ सूत्रे शब्दद्वयमेवमन्वशात्।

पश्चात्तु प्राकृते शब्दयोरनयोर्महत्परिवर्तनं सम्पन्नम्। महाभाष्ये प्रोक्तमुदाहरणम् देवदत्तः–दत्तः, सत्यभामा–भामा इतिवत् 'लोहायस'शब्दस्य पूर्वभागोऽवशिष्टोऽपरभागस्तु विच्छिन्नः। अर्थातिदेशसिद्धान्तेनार्थोऽपि सर्वथा परिवर्तितः। पूर्वं लोहितार्थको लोहशब्दोऽद्यत्वे कृष्णमयो ब्रवीतीति क इदानीं शोचितुं पारयते? सर्वेऽपि 'गतानुगतिको लोकः' इति न्यायेन शब्दं प्रयुञ्जन्ति। इदमस्ति तथैव यथा 'क्षीरौदन'शब्दस्य पूर्वपदं प्राकृते 'खीर' इति रूपेणावशिष्टम्, अर्थश्च परिवर्तितः। एवमर्थातिदेशोऽयं शब्दशास्त्रे महतीं चित्रीयां दधाति। एवं सिद्ध्यत्येवं यदर्थातिदेशोऽपि व्यापकः, विविधशब्दाँश्च सर्वथा प्रभावयते॥

उपसंहारः

प्रबन्धेनैतेन ज्ञायते यद् महर्षिर्यास्कः शास्त्रेष्वनेकेषु लब्धवर्णः, व्युत्पत्तिशास्त्रपारदृश्वा पण्डितो बभूव। स हि परवर्तिव्याख्याकृतोऽपि सर्वथाऽतिशेते। विविधप्रसङ्गे यास्ककृता व्युत्पत्तिरेव गरिमाणमादधातीति स्पष्टं सन्दृश्यते। व्याकरणादिशास्त्रेष्वधीती देवराजयज्वा च सर्वप्रथमं प्रत्येकं

निघण्टुशब्दं क्रमेण निर्ब्रुवन् अत्यधिकं महत्त्वमभिरक्षति। निर्वचनक्रमेऽस्मिन् विपश्चिदपश्चिमोऽसौ सर्वेभ्यः पूर्ववर्तिवैयाकरणेभ्यस्साहाय्यमनुगृह्णाति।

कृतज्ञता-प्रकाशनम्

ग्रन्थेऽस्मिन् कार्यकरणाय पूज्याचार्य-विजयपाल-विद्यावारिधि-महाभागाः मां निरदिशन्। ते हि मां पूर्वं परमकृपया ग्रन्थाननेकानध्यापिपन्। अनन्तरमिदानीं ते सुधास्यन्दिशास्त्रेऽस्मिन् अवगाहनायावसरं प्रायच्छन्निति तान् प्रति हार्दिकीं कृतज्ञतां ज्ञापयामि। अथ च ते सदा सर्वदा नैरुज्यं लभन्तामिति च प्रभुं प्रार्थये।

निपुणं निरीक्षितेऽप्यस्मिन् लेखे यदि स्यात् काचनाशुद्धिस्तर्हि तां विमलधियो विद्वांसः क्षमन्ताम्।

मु०म० टाउन
स्नातकोत्तर महाविद्यालयः
बलिया (उ०प्र०)
२०.७.९८

विदुषां विधेयः
सुद्युम्नाचार्यः

अध्यायानां खण्डानाञ्च सूची

अथ प्रथमोऽध्यायः

नैघण्टुकं काण्डम्

खण्डः		पृष्ठे
१.	एकविंशतिः पृथिवीनामधेयानि	४
२.	पञ्चदश हिरण्यनामानि	१२
३.	षोडशान्तरिक्षनामानि	१६
४.	षट् साधारणानि	२१,३०८
५.	पञ्चदश रश्मिनामानि	२२
६.	अष्टौ दिङ्नामानि	२७
७.	त्रयोविंशती रात्रिनामानि	३०
८.	षोडशोषोनामानि	३४
९.	द्वादशाहर्नामानि	३८
१०.	त्रिंशन्मेघनामानि	४१
११.	सप्तपञ्चाशद् वाङ्नामानि	५२
१२.	एकशतमुदकनामानि	६९
१३.	सप्तत्रिंशन्नदीनामानि	९२
१४.	षड्विंशतिरश्वनामानि	१०१
१५.	दशादिष्टोपयोजनानि	१०८
१६.	एकादश ज्वलतिकर्माणः	११०
१७.	एकादश ज्वलतोनामधेयानि	११२

अथ द्वितीयोऽध्यायः

नैघण्टुकं काण्डम्

खण्डः		पृष्ठे
१.	षड्विंशतिः कर्मनामानि	११५
२.	पञ्चदशापत्यनामानि	१२०
३.	पञ्चविंशतिर्मनुष्यनामानि	१२४
४.	द्वादश बाहुनामानि	१३२
५.	द्वाविंशतिरङ्गुलिनामानि	१३४
६.	अष्टादश कान्तिकर्माणः	१३९
७.	अष्टाविंशतिरन्ननामानि	१४२
८.	दशात्तिकर्माणः	१४८
९.	अष्टाविंशतिर्बलनामानि	१५०
१०.	अष्टाविंशतिरेव धननामानि	१५४
११.	नव गोनामानि	१६०
१२.	दश क्रुध्यतिकर्माणः	१६१
१३.	एकादश क्रोधनामानि	१६२
१४.	द्वाविंशशतं गतिकर्माणः	१६४
१५.	षड्विंशतिः क्षिप्रनामानि	१७७
१६.	एकादशान्तिकनामानि	१८१
१७.	षट्चत्वारिंशत्सङ्ग्रामनामानि	१८३
१८.	दश व्याप्तिकर्माणः	१९०
१९.	त्रयस्त्रिंशत् वधकर्माणः	१९२
२०.	अष्टादश वज्रनामानि	१९५
२१.	चत्वार ऐश्वर्य्यकर्माणः	१९८
२२.	चत्वारीश्वरनामानि	१९९

अथ तृतीयोऽध्यायः

नैघण्टुकं काण्डम्

खण्डः		पृष्ठे
१.	द्वादश बहुनामानि	२००
२.	एकादश ह्रस्वनामानि	२०२
३.	पञ्चविंशतिर्महन्नामानि	२०४
४.	द्वाविंशतिर्गृहनामानि	२०९
५.	दश परिचरणकर्माणः	२१३
६.	विंशतिः सुखनामानि	२१४
७.	षोडश रूपनामानि	२१७
८.	दश प्रशस्यस्य	२१९
९.	एकादश प्रज्ञानामानि	२२१
१०.	षट् सत्यनामानि	२२२
११.	अष्टौ पश्यतिकर्माणः	२२२

खण्डः	पृष्ठे
१२. नव सर्वपदसमाम्नानाय	२२३
१३. द्वादश उपमा	२२४
१४. चत्वारिंशदर्चतिकर्माणः	२२५
१५. चतुर्विंशतिर्मेधाविनामानि	२२९
१६. त्रयोदश स्तोतृनामानि	२३३
१७. पञ्चदश यज्ञनामानि	२३५
१८. अष्टावृत्विङ्नामानि	२३७
१९. सप्तदश याच्ञाकर्माणः	२३८
२०. दश दानकर्माणः	२४०
२१. चत्वारोऽध्येषणाकर्माणः	२४२
२२. द्वौ स्वपितिकर्माणौ	२४२
२३. चतुर्दश कूपनामानि	२४२
२४. चतुर्दशैव स्तेननामानि	२४५
२५. षट् निर्णीतान्तर्हितनामधेयानि	२४७
२६. पञ्च दूरनामानि	२४८
२७. षट् पुराणनामानि	२४९

खण्डः	पृष्ठे
२८. षडेव नवनामानि	२५०
२९. षड्विंशतिर्द्विशनामानि	२५१,२५७
३०. चतुर्विंशतिर्द्यावापृथिवीनामधेयानि	२५१

अथ चतुर्थोऽध्यायः

नैगमं काण्डम्

१. द्विषष्टिः पदानि	२६१
२. चतुरशीतिः पदानि	२७०
३. द्वात्रिंशच्छतं पदानि	२८२

अथ पञ्चमोऽध्यायः

दैवतं काण्डम्

१. त्रीणि पदानि	३०३
२. त्रयोदश पदानि	३०४
३. षट्त्रिंशत् पदानि	३०६
४. द्वात्रिंशत् पदानि	३१२
५. षट्त्रिंशत् पदानि	३१७
६. एकत्रिंशत् पदानि	३२१

संक्षेप-विवरण-सूची

अ०	अष्टाध्यायी (पाणिनीया)
अ०उ०	अमरकोशोद्घाटनम्
अथर्व०	अथर्ववेदः (शौनकसंहिता)
अदा०	अदादिर्गणः (पाणिनीयधातुपाठस्थः)
अमर०	अमरकोशः
आ०	आत्मनेपदी
आप०श्रौ०	आपस्तम्ब-श्रौतसूत्रम्
आ०श्रौ०	आश्वलायन-श्रौतसूत्रम्
उ०	उणादिसूत्रम् (पञ्चपादी)
उभ०	उभयपदी
ऋ०	ऋग्वेदः (शाकल-संहिता)
ऋक्प्रा०	ऋक्प्रातिशाख्यम्
ऐ०आ०	ऐतरेयारण्यकम्
ऐ०उ०	ऐतरेयोपनिषद्
ऐ०ब्रा०	ऐतरेयब्राह्मणम्
का०सं०	काठक-संहिता
काठ०सं०	काठक-संहिता
कौ०ब्रा०	कौषीतकिब्राह्मणम्
क्र्या०	क्र्यादिर्गणः (पाणिनीयधातुपाठस्थः)
खि०	खिलपाठः (ऋग्वेदीयः)
ग०सू०	गणसूत्रम्
गुरु०	गुरुमण्डल-संस्करणम् (हरिदत्तशास्त्रिसंपादितम्)
गो०ब्रा०	गोपथब्राह्मणम्
चुरा०	चुरादिर्गणः (पाणिनीयधातुपाठस्थः)
छा०उ०	छान्दोग्योपनिषद्
जीवा०	जीवानन्दसंपादित-संस्करणम्
जु०	जुहोत्यादिर्गणः (पाणिनीयधातुपाठस्थः)
टि०	टिप्पणी

तना०	तनादिर्गणः (पाणिनीयधातुपाठस्थः)
ता०ब्रा०	ताण्ड्यब्राह्मणम्
ता०म०ब्रा०	ताण्ड्यमहाब्राह्मणम्
तु०	तुलना विधेया
तु०	तुदादिर्गणः (पाणिनीयधातुपाठस्थः)
तै०आ०	तैत्तिरीयारण्यकम्
तै०उ०	तैत्तिरीयोपनिषद्
तै०ब्रा०	तैत्तिरीयब्राह्मणम्
तै०सं०	तैत्तिरीयसंहिता
द०उ०	दशपाद्युणादिसूत्रम्
दि०	दिवादिर्गणः (पाणिनीयधातुपाठस्थः)
द्र०	द्रष्टव्यम्
निघ०	निघण्टुः
निरु०	निरुक्तम्
न्या०वात्स्या०भा०	न्यायवात्स्यायनभाष्यम्
प०	परस्मैपदी
परि०	परिभाषा (परिभाषेन्दुशेखरस्था)
पृ०	पृष्ठम्
फि०	फिट्सूत्रम्
बाल०	बालकाण्डम्
बृ०दे०	बृहद्देवता
बृ०उ०	बृहदारण्यकोपनिषद्
भ्वा०	भ्वादिर्गणः (पाणिनीयधातुपाठस्थः)
मनु०	मनुस्मृतिः
म०भा०	महाभाष्यम्
महा०	महाभाष्यम्
मा०सं०	माध्यन्दिनसंहिता
मै०सं०	मैत्रायणी-संहिता
यजु:०	यजुर्वेदः (माध्यन्दिन-संहिता)

रु०	रुधादिर्गणः (पाणिनीयधातुपाठस्थः)
वा०	वार्त्तिकम्
श०ब्रा०	शतपथब्राह्मणम्
शत०ब्रा०	शतपथब्राह्मणम्
शा०श्रौ०	शाङ्खायन-श्रौतसूत्रम्
शौ०सं०	शौनकसंहिता
श्वे०	श्वेतवनवासिवृत्तिः
श्वेत०	श्वेतवनवासिवृत्तिः
ष०ब्रा०	षड्विंशब्राह्मणम्
सं०	संस्करणम्
स०क०	सरस्वतीकण्ठाभरणम्
सत्य०	सत्यव्रतसामश्रमि-संपादित-संस्करणम्
सा०पू०	सामवेद-(कौथुमसंहिता)-पूर्वार्चिकम्
सीर०प०	सीरदेवीया परिभाषावृत्तिः
(सु०)	डॉ० सुद्युम्नाचार्यः
सौ०	सौत्रो धातुः
स्कन्द०भा०	स्कन्दस्वामिभाष्यम्
स्वा०	स्वादिर्गणः (पाणिनीयधातुपाठस्थः)

निघण्टु-निर्वचनम्

भूमिका

महस्त्रय्यन्तकान्तारसञ्चारिकरिणं मुखे।
मदालदैत्यमातङ्गभङ्गे केसरिणं भजे[1] ॥ १ ॥
नमस्त्रिधाम्ने शिपिविष्टनाम्ने[2] निरुक्तविद्यानिगमप्रतिष्ठाम्।
अवाप यास्को विविधेषु यागेष्वनेन चाम्नायमभिष्टुवानः ॥ २ ॥
प्रणमामि यास्कभास्करं यो हृत्तमसः प्रकाशितपदार्थः।
यस्य भुवनत्रयीमिव गावः[3] प्रकटां त्रयीं वितन्वन्ति ॥ ३ ॥
वागीश्वरं वचोभिर्वसिष्ठमुख्यान्मुनींस्तपोभिश्च।
अनुकृतवन्तं वन्दे पितामहं देवराजयज्वानम् ॥ ४ ॥
आचार्यं शाब्दिकानामृचि यजुषि च यद्दृष्टतुल्यप्रभावम्,
वन्दे नैरुक्तवृत्तिक्रममुपनिषद्वल्लरीणामुपघ्नम्।
आभक्तारं क्रतूनामवनिसुखकरप्रक्रियानुक्रियायै,
तातं यज्ञेश्वरार्यं[4] प्रतिहततमसं ज्ञानभास्वन्मयूखैः ॥ ५ ॥
यज्वारङ्गेशपुरी—पर्येतग्रामवास्तव्यः[5]।
विरचयति देवराजो नैघण्टुककाण्डनिर्वचनम् ॥ ६ ॥

भगवता यास्केन समाम्नायं नैघण्टुकनैगमदेवताकाण्डरूपेण त्रिविधं गवादिदेवपत्न्यन्तं निर्ब्रुवता नैगमदेवताकाण्डपठितानि पदानि प्रत्येकमुपादाय निरुक्तानि दर्शितनिगमानि च, नैघण्टुककाण्डपरिपठितानान्तु गवाद्यपारेअन्ता[6]-नामेकचत्वारिंशच्छतत्रयाधिकसहस्रे[7] सामान्येन 'एतावन्त्यस्य सत्त्वस्य नामधेयानि'[8]—इति व्याख्याय तत्र प्रदर्श्य कतिचिदेव निरुक्तानि, तथा कानिचिदेव

---

१. मुखे गजं पराक्रमे सिंहं गणेशं भजे।
२. शिपिविष्टो विष्णुः (निरु० ५.७)।
३. रश्मयः, पक्षे वाचः।
४. 'यज्ञेश्वराख्यं' इति जीवा०, गुरु०।
५. '०पर्य्यन्तग्राम०' इति गुरु०।
६. '०द्यपर्यन्ता०' इति जीवा०, गुरु०।
७. प्रत्यध्यायं तु—४१५+५१६+४१० इति संकलय्य १३४१ सम्पद्यते।
८. निरु० १.२०।

दर्शितनिगमानि, अन्यानि तु ग्रन्थविस्तरभीत्या सामान्येन निर्वचनलक्षणस्योक्तत्वाद् बुद्धिमद्भिर्निर्वक्तुं सुशक्यानीत्यभिप्रायेण चोपेक्षितानि। स्कन्दस्वामी च तत एव निरुक्तमनुजगाम।

तत्र तु 'दिवश्चादित्यस्य च साधारणनामानि स्वरादीनि षट्'[१]–'इदमादीनि च उपमाभेदात् भेदनामानि द्वादश'[२]–'प्रपित्वे अभीके इत्यादीनि च षड्विंशतिश्च'[३] भाष्यकारेण[४] बहुवक्तव्यत्वात् प्रकरणश एव निरुक्तानि, स्कन्दस्वामिना च व्याख्यातानि। अतोऽन्येषां यथाक्रमेणानिरुक्तेर्निगमाप्रदर्शनाच्च स्वरूपमात्रमपि अध्ययनादेवावगन्तव्यम्। तच्चाध्ययनं कलियुगे प्रायेण विच्छिन्नसम्प्रदायमासीत्। ततश्च कोश एव शरणमासीत्। तेषु च केषुचिदर्थेषु लेखकप्रमादादिभिः कानिचित्पदान्यधिकानि आसन्, अन्येषु च कानिचिन्न्यूनानि, अपरेषु च कानिचिदपहाय कानिचिद् विस्रस्तानि[५] अक्षराणि च विपर्य्यस्तानि। एवं व्याकीर्णेषु कोशेषु नियमैकभूतस्य प्रतिपदनिर्वचननिगमप्रदर्शनपरस्य कस्यचिद् व्याख्यानस्य अभावाद् नैघण्टुकं काण्डमुत्सन्नप्रायमासीत्।

ततश्च पाठसंशोधनार्थं बालानां सुगमत्वाय च तद्गतानां पदानां क्रमेण प्रतिपदनिर्वचननिगमौ प्रदर्शयितुम्–स्वरादीनीति पूर्वमुक्तस्य प्रकरणत्रयस्य, नैगमदेवताकाण्डगतानाञ्च पदानां भाष्यकारेण निरुक्तानां स्कन्दस्वामिना च तद्व्याख्यातानां प्रक्रिययोन्मीलयितव्यम्, बहुशस्तु नैघण्टुककाण्डनिर्वचनानन्तरं तदुन्मीलयितुञ्चायमस्मत्परिश्रमः।

इदञ्च स्वमनीषिकया न क्रियते किन्तु निघण्ट्वागतेष्वेव[६] पदेष्वध्यर्द्धशतत्रयमात्राणि पदानि भाष्यकारेणैव तत्र तत्र निगमेषु प्रसङ्गान्निरुक्तानि, स्कन्दस्वामिना च निगमव्याख्यानेषु अन्यानि च पदानि शतद्वयमात्राण्युपात्तानि। तेन च समाम्नायपठितानां पदानामन्येभ्यो व्यावृत्त्यर्थं किञ्चिच्चिह्नं कृतम्, अतस्तेषां पाठशुद्धिस्तत्रैव शुद्धा। अन्येषाञ्च पदानामस्मत्कुले समाम्नायाध्ययनस्याविच्छेदात्, श्रीवेङ्कटचार्यतनयस्य माधवस्य भाष्यकृतौ नामानुक्रमण्याः, आख्यातानुक्रमण्याः, स्वरानुक्रमण्याः, निपातानुक्रमण्याः, निर्बन्धनानुक्रमण्याः, तदीयस्य भाष्यस्य च बहुशः पर्यालोचनात्, बहुदेशसमानीतात् बहुकोशनिरीक्षणाच्च पाठः संशोधितः। निर्वचनञ्च–(१) निरुक्तम्, (२) स्कन्दस्वामिकृतां निरुक्तटीकाम्, (३) स्कन्दस्वामिभवस्वामिराहदेवश्रीनिवासमाधवदेवउवटभट्टभास्करमिश्रभरतस्वाम्यादिविरचितानि वेदभाष्याणि, (४) पाणिनीयं

१. निरु० २.१३।
२. निरु० ३.१३-१८।
३. निरु० ३.२०, २१।
४. यास्केन।
५. 'विश्रस्तानि' इति मुद्रितेषु।
६. 'नैघण्ट्वागते०' इति मुद्रितेषु।

व्याकरणम्, (५) विशेषत उणादितद्वृत्तिम्, क्षीरस्वाम्यनन्ताचार्यादिकृतां निघण्टुव्याख्याम्, (६) भोजराजीयं व्याकरणम्, (७) कमलनयनीयनिखिलपदसंस्कारांश्च निरीक्ष्य क्रियते। तत्र च अस्मद्व्याख्येयानां तत्र दृष्टानां पदानां तत्तत्कृतञ्च निर्वचनमुपादाय तदेवास्मत्प्रकरणानुरूपञ्चेदुल्लिख्यते, अननुरूपन्तु किञ्चिद् विपरिणमय्य, अन्येषाञ्च कतिपयानां निरुक्तकारोक्तनिर्वचनसामान्यलक्षणमनुसृत्य निरुक्तिः क्रियते।

निगमश्च[1] दक्षिणापथनिवासिभिरधीतेषु वेदेषु परिदृश्यमानस्तत्तद्भाष्याणि निरीक्ष्य तत्र तत्र प्रदर्श्यते, अदृष्टनिगमानाञ्च पदानां निगमा अन्वेष्याः।

अतोऽस्माभिर्यथामति प्रदर्शितौ प्रतिपदनिर्वचननिगमौ विद्वांसो बुद्ध्या निरूप्य शुकभाषितवन्मनसि कुर्वन्तु॥

—o—

१ वैदिकमुदाहरणम्।

प्रथमोऽध्यायः

'अथातोऽनुक्रमिष्यामः' (निरु० २.५)—इत्यादि निरुक्ते तस्य टीकायाञ्च यन्नैघण्टुककाण्डविषयमुक्तं तत् सर्वं तत्रैव द्रष्टव्यम्॥

आदित एकविंशतिः पृथिवीनामधेयानि—

गौः (१)। ग्मा (२)। ज्मा (३)। क्ष्मा (४)। क्षा (५)। क्ष्मा (६)। क्षोणिः (७)। क्षितिः (८)। अवनिः (९)। उर्वी (१०)। पृथ्वी (११)। मही (१२)। रिपः (१३)। अदितिः (१४)। इळा (१५)। निर्ऋतिः (१६)। भूः (१७)। भूमिः (१८)। पूषा (१९)। गातुः (२०)। गोत्रा (२१)। इत्येकविंशतिः पृथिवीनामधेयानि॥ १॥

(१) गौः[१]—'गम्लृ गतौ' (भ्वा० प० ७०९) अस्माद् 'गमेर्डोः[२]' (उ० २.६८)—इति कर्तरि कारके अधिकरणे वा डोः प्रत्ययः। गातेर्वा[३] स्तुत्यर्थात् (जु० प० २३) बाहुलकोक्तेः (अ० ३.३.११३) कर्मण्यधिकरणे वा। 'गोतो णित्' (अ० ७.१.९०) इति च णिद्वद्भावाद् वृद्धिः। अत्र भाष्यम्—'गौरिति पृथिव्या नामधेयं यद् दूरं गता भवति यच्चास्यां भूतानि गच्छन्ति गातेर्वौकारो नामकरणः' (निरु० २.५) इति। अस्य स्कन्दस्वामी—'दूरं गता भवति नैरन्तर्येणात्माकाशादिवत् दूरेऽप्युपलब्धेर्गमिक्रियाव्यवहारः। अन्यत्रान्यत्र चोपलब्धेर्दूरापदेशः। प्रत्ययोपात्तरूढ्यर्थसम्बन्धाच्च गमिरत्र नैरन्तर्योपलब्धिर्दूरविशिष्टं गमनमुपादत्ते, तक्षा परिव्राजक इति यथा। ......यच्चास्यां भूतानि प्राणिनो गच्छन्ति। चो वार्थे। ......गातेर्वा स्तुत्यर्थस्य[४] (जु० प० २३)। गीयते स्तूयतेऽसाविति, गायन्ति वास्यां स्थिता इति गौः'। उदाहरणम्—'गोषदसि' (मै० सं० १.१.२) इति। गार्हपत्योपस्थाने विनियोगात्,[५] गार्हपत्यस्य च गवि पृथिव्यां सदनात् गोशब्दस्य पृथिव्यभिधानत्वन्निश्चितमिति।[६] एवमन्येष्वप्युदाहरणेषु तत्र तत्र मन्त्रवाक्यार्थसमवायेनाभिधेयं प्रदर्शनीयं

---

१. अपि द्र०—निघ० १.४, ५, ११, १५, ३.१६, ४.१, ५.५। निरु० २.५, १४, ४.२४, ६.२, १२.७।

२. '०र्डोस्' इति मुद्रितेषु।

३. 'जिगातेर्वा' इति स्यात्।

४. 'गत्यर्थस्य' इति दुर्गः।

५. द्र०—मा० श्रौ० सू० १.१.१.२४।

६. व्यत्यासेन स्कन्दमहेश्वरटीका (निरु० २.५) इहोद्ध्रियते।

निश्चित्य तत्तदर्थाभिधायित्वम्। 'व्रजं गच्छ गोष्ठानम्' (मा० सं० १.२५-२६)–'गौर्जगार यद्ध पृच्छान्' (ऋ० १०.३१.१०)–'अभवत् पूर्व्या भूमना गौः' (ऋ० १०.३१.६) इति निगमाः॥

(२) ग्मा–गमेः पूर्वस्मिन्नेव कारकद्वये 'कनिन्युवृषितक्षि०' (उ० १.१५६)–इत्यादिना विहितः कनिन्प्रत्ययो बाहुलकाद् भवति। 'गमहनजनखनघसां लोपः क्ङित्यनङि' (अ० ६.४.९८) इत्युपधालोपः, औणादिकेन 'मनिन्०' (उ० ४.१४६, श्वे० ५८१) इति सूत्रेण वा मनिनि बाहुलकात् (अ० ३.३.१) टिलोपः 'डाबुभाभ्यामन्यतरस्याम्' (अ० ४.१.१३)। अर्थः पूर्ववदेव। 'ग्मा गच्छतेः, गच्छन्ती हीयम्'[1] इति माधवः। 'दिवश्च ग्मश्चापाञ्च जन्तवः' (ऋ० १०.४९.२), 'दिवश्च ग्मश्च मर्त्यम्' (ऋ० १०.२२.६) इति च निगमौ। ग्म इत्यत्र छान्दसत्वाद्रूपसिद्धिः॥

(३) ज्मा[2]–जमतिर्गतिकर्मा (निघ० २.१४) 'जमु अदने' (भ्वा० प० ३१७) 'जनी प्रादुर्भावे' (दि० आ० ४०), 'अञ्जू व्यक्तिम्रक्षणकान्तिगतिषु' (रु० प० २०) म्रक्षणं सेचनमिति तद्वृत्तिः[3]। एतेभ्यः 'श्वन्नुक्षन्पूषन्प्लीहन्०' (उ० १.१५९, श्वे० १४६) इत्यादिना परिज्मन्निति कनिन्नन्तं सोपसर्गं निपातितम्, बाहुलकात् (अ० ३.३.१) निरुपसर्गमपि भवति। निपातनादेव कारकविशेषसिद्धिः। 'डाबुभाभ्यामन्यतरस्याम्' (अ० ४.१.१३)। गतौ पूर्ववदर्थः। अदन्ति वास्यां भूतानि, जातानि वा स्वकारणात्, जायन्ते वास्या ओषधयः। तथा चोपनिषत्–'अद्भ्यः पृथिवी, पृथिव्या ओषधयः' (तै० उ० २.१) इति। अथवा व्यक्ता सर्वेषां प्रत्यक्षा न ह्याकाशादिवदव्यक्ता पृथिवी, 'तिस्रो महीरुपरास्तस्थुरत्या गुहा द्वे निहिते दर्श्येका' (ऋ० ३.५६.२) इति च श्रुतिः। अक्ता सिक्ता भवति वृषेण, 'तस्मादसाविमां वृष्ट्याभ्युनत्त्यभिजिघ्रति' (ऐ० ब्रा० १.७) इति ब्राह्मणम्। 'ये के च ज्मा महिनो अहिमायाः' (ऋ० ६.५२.१५), 'अभि क्रत्वेन्द्र भूरध ज्मन्' (ऋ० ७.२१.६), 'ज्मया अत्र वसवो रन्त देवाः' (ऋ० ७.३९.३), 'अध ज्मो अध वा दिवः' (ऋ० ८.१.१८) इति च निगमाः॥

(४) क्ष्मा[4]–'क्षि क्षये' भूवादिः (प० १४५), 'क्षि निवासगत्योः' तुदादिः (प० ११६), 'क्षीष् हिंसायाम्' क्र्यादिः (प० ३९), 'क्षै, जै, षै,

---

१. यथाकोशं पाठः। वेङ्कटमाधवीये ऋग्भाष्ये नोपलभ्यते।
२. निरु० १२.४३।
३. द्र०–क्षीरतरङ्गिणी।
४. निरु० १०.७।

क्षये' (भ्वा० प० ६५२), 'क्षमूष् सहने' (दि० प० ९६), 'क्ष्मायी विधूनने' (भ्वा० आ० ३२७) एतेभ्य औणादिके मनिनि (उ० ४.१४६, श्वे० ५८१) बाहुलकाद्रूपसिद्धिः[१], डापि। गतावर्थ उक्तः। क्षियन्ति निवसन्त्यस्यां प्राणिनः, क्षायन्ति अवयवं गच्छन्त्यस्यां पदार्था इति वा, हिंस्यन्तेऽस्यां पापकृत इति वा, क्षमते वा प्राणिजातरूपं भारम्, विधूनयति वा प्राणिनः स्वकीयकाले। 'पि॒ता यत् स्वां दु॑हि॒तर॑मधि॒ष्कन् क्ष्म॒या रेत॑:' (ऋ० १०.६१.७), 'क्ष्म॒या चर॑ति॒ परि॒ सा वृ॑णक्तु नः' (ऋ० ७.४६.३) इति च निगमौ॥

(५) क्षा[२]–निरूपिता एव धातवः। 'अन्येष्वपि दृश्यते' (अ० ३.२.१०१) इति सोपपदात् जनेर्विधीयमानो डः प्रत्ययः, 'अपिशब्दः सर्वोपाधिव्यभिचारार्थः'[३]–इत्युक्तेर्निरुपपदेभ्योऽपि भवति। क्ष्मायस्तु छान्दसत्वान्मकारलोपः। अर्थः पूर्वोक्त एव। 'जा॒तस्य॑ च॒ जाय॑मानस्य च॒ क्षाम्' (ऋ० १.९६.७) इति निगमः॥

(६) क्षमा–निरूपिता एव धातुभावाः। औणादिके मनिनि (उ० ४.१४६, श्वे० ५८१) बाहुलकाद्रूपसिद्धिः। अर्थः पूर्वोक्त एव। 'क्षमूष् सहने' (दि० प० ९६)–इत्यस्माद् वा। पूर्ववद् डाप्प्रत्ययः। 'यः पार्थि॑वस्य॒ क्षम्य॑स्य॒ राजा॑' (ऋ० २.१४.११) इति निगमः॥

(७) क्षोणिः[४]–'टुक्षु शब्दे'[५] अदादिः (प० २९) 'वीज्याज्वरिभ्यो निः' (उ० ४.४९, श्वे० ४७६) इति विहितो निप्रत्ययो बाहुलकाद् भवति, गुणः णत्वम्। क्षूयते शब्द्यते स्तूयते स्तोतृभिः, क्षुवन्त्यस्यां भूतानीति वा। क्षोणीति ईकारान्तं केचित् पठन्ति। तदा 'कृदिकारादक्तिनो वा ङीष् वक्तव्यः' (अ० ४.१.४५ ग० सू०) इति ङीष्। 'नव॑न्त क्षो॒णयो॑ यथा' (ऋ० १०.२२.९), 'यं क्षो॒णीर॑नुचक्र॒दे' (ऋ० ८.३.१०) इति निगमौ॥

(८) क्षितिः[६]–'क्षि निवासगत्योः' (तु०प० ११६), 'क्षि क्षये' (भ्वा० प० १४५), 'क्षि हिंसायाम्' (स्वा प० ३०) एतेभ्योऽपि 'वसेस्तिः' (उ० ४.१८१, श्वे० ६१२) इति विहितस्तिप्रत्ययो बाहुलकाद् (अ० ३.३.१) भवति, गुणाभावश्च। अथवा 'स्त्रियां क्तिन्' (अ० ३.३.९४), कर्मण्यधिकरणे (अ० ३.३.१९) वा भवति। अर्थस्तु क्ष्मेत्यत्रोक्तः 'क्षेति॑ क्षि॒तीः सु॒भगो॒ नाम॒ पुष्य॑न्' (ऋ० ५.३७.४), 'वी॒हि स्व॒स्तिं सु॑क्षि॒तिं दि॒वः' (ऋ० ६.२.११) इति निगमौ॥

---

१. अपि द्र०–उ० ५.६५।
२. निरु० २.६।
३. काशिका ३.२.१०१।
४. निघ० ३.३०।
५. 'टुक्षु रुक्षु शब्दे' इति मुद्रितेषु।
६. निघ० २.३, निरु० ४.२४।

(९) अवनिः[१]–'अव रक्षणगतितृप्तिभीत्यवगमप्रवेशश्रवणसामर्थ्ययाचनक्रियेच्छादीप्त्यवाप्त्यालिङ्गनहिंसादानभागवृद्धिषु[२]' (भ्वा० प० ३९६) अस्मात् 'अर्त्तिसृधृधम्यम्यश्यवितृभ्योऽनिः' (उ० २.१०४, श्वे० २४९) इत्यनिप्रत्ययः। अवति प्रजाः, अव्यते[३] वा भूपैः। एतावत्स्वर्थेषु यो योग्यः स बोद्धव्यः। 'आ वां रथोऽवनिर्न प्रवत्वान्' (ऋ० १.१८१.३), 'यत्सीं महीमवनिं प्राभि मर्मृशत्' (ऋ० १.१४०.५) इति च निगमौ॥

(१०) उर्वी[४]–'ऊर्णुञ् आच्छादने' (अदा० उभ० ३२) अस्माद् 'महति ह्रस्वश्च' (उ० १.३१, श्वे० ३१) इति कुप्रत्ययो[५] णुलोपो ह्रस्वश्च, उरुः। 'वोतो गुणवचनात्' (अ० ४.१.४४) इति ङीष्। ऊर्णोति आच्छादयति उर्वी। महत्त्वादाच्छादयित्री भूमिः स्वस्मिन्[६] हितानां वा पदार्थानाम्। वृणोतेर्वा (स्वा० उभ० ८) पृषोदरादित्वात् (अ० ६.३.१०९) रूपसिद्धिः। 'छादनार्थत्वं च विशिष्टम्' इति स्कन्दस्वामी[७]। वृणोतेराच्छादनार्थत्वेऽनुवादश्च। 'मा सीमवद्य आ भागुर्वी काष्ठा' (ऋ० ८.८०.८) इति निगमः॥

(११) पृथ्वी[८]–'प्रथ प्रख्याने' (भ्वा० आ० ५१६)–'प्रथिम्रदिभ्रस्जां सम्प्रसारणं सलोपश्च' (उ० १.२८, श्वे० २८) इति कुप्रत्ययः सम्प्रसारणञ्च। प्रथतेऽसाविति पृथुः। पूर्ववत् (अ० ४.१.४४) ङीष्। पृथ्वी विस्तीर्णेत्यर्थः। पञ्चाशत्कोटियोजनविस्तीर्णेति पृथिवी। यद्वा अन्तर्भावितण्यर्थात् प्रथतेः 'उणादयो बहुलम्' (अ० ३.३.१), 'भूतेऽपि दृश्यन्ते' (अ० ३.३.२) इति वचनात् भूते कुप्रत्ययः। ब्रह्मणा पूर्वमेव विस्तारितेत्यर्थः। 'तत्पुष्करपर्णेऽप्रथयत् यदप्रथयत् पृथिव्यै पृथिवीत्वम्' (तै० ब्रा० १.१.३.६,७) इति हि ब्राह्मणम्। 'पृथुना राज्ञा अवतारिता पृथ्वी'[९] इति क्षीरस्वामी। 'स्तेगो न क्षामत्यैति पृथ्वीम्' (ऋ० १०.३१.९) इति निगमः। 'यत्रैकार्थानां पदानां सन्निपातः, तत्रैकं तस्य वाचकं भवति, अन्येषां निरुक्त्या योजनं कर्तव्यम्'–इति मर्यादा, अतोऽत्र

---

१. निघ० १.१३, २.५। निरु० ३.९।

२. '०गतिकान्तिप्रीतितृप्त्यवगमप्रवेशश्रवणस्वाम्यर्थयाचन०' इति धातुवृत्तिपाठः।

३. 'अव्यन्ते' इति मुद्रितेष्वपपाठः।

४. निघ० १.१३, ३.३०। निरु० २.२६।

५. 'उप्रत्ययो णलोपः' इत्यपपाठो मुद्रितेषु।

६. यथाकोशम्।

७. निरु० २.२६, स्कन्द०भा०।

८. निघ० ३.३०। निरु० १.१३,१४।

९. 'पृथुनावतारिता वा पृथिवी' इति क्षीर० अमर० १.२.३।

क्षामित्यस्य निरुक्त्या योजनम्।

(१२) मही[१]–'मह पूजायाम्' भ्वादिः (प० ४८५)। 'इन् सर्वधातुभ्यः' (उ० ४.११९, श्वे० ५५२) इतीन्प्रत्ययः। 'कृदिकारात्०' (अ० ४.१.४५ ग०सू०) इति ङीष्। मह्यते प्रजाभिः, महति वा देवताः स्वभारावतरणाय। अथवा मानेन स्वगुणेन परिमाणेन स्वस्मादूनं[२] परिमाणं पातालं जहाति अतिक्रामति, मानशब्दाज्जहातेश्च मही। पृषोदरादित्वात् (अ० ६.३.१०९) निर्वाहः। 'आ नो॑ म॒हीम॒रम॑तिं स॒जोषा॑' (ऋ० ५.४३.६) इति निगमः॥

(१३) रिपः–'रेपृ गतौ' (भ्वा० आ० २५८), 'क्विब् वचिप्रच्छ्यायतस्तुकटप्रुजुश्रीणाम्०'[३] (अ० ३.२.१७८ वा०) इत्यत्र 'प्राक्प्रत्ययनिर्देशाद् इष्टसिद्धिः'[४] इति वचनाद् ह्रस्वे रिपः। गौरित्यनेन समानार्थः। यद्वा 'स्फि कत्थनयुद्धनिन्दाहिंसादानेषु' तुदादिः परस्मैपदी (२३)। क्विपि फकारस्य पकारो व्यत्ययेन (अ० ३.१.८५) कत्थनयुद्धादीनस्यां कुर्वन्ति तत्कारिणः। यद्वा 'लिप उपदेहे' (तु० उभ० १४२), क्विप्[५]। गोमयादिना आलिप्यते इति लिप्। रलयोरभेदः। तथा च माधवीयनिर्वचनानुक्रमण्यां 'लेपनाद्रेपणादपि' इति। यद्वा 'रप लप व्यक्तायां वाचि' (भ्वा० प० २८५) 'रपेरिच्चोपधायाः' (उ० १.२६, श्वे० २६) इत्युप्रत्यये[६] विधीयमानमित्वं बाहुलकादन्यत्रापि भवति। आलपन्त्यस्यां प्राणिनः इति रिप्, जसि रिपः, एवंरूपस्य वेदे भूयोदर्शनाद् यथादृष्टं पाठः। 'रि॒रि॒ह्वांसं॑ रि॒प उ॒पस्थे॑ अ॒न्तः' (ऋ० १०.७९.३), 'पाति॑ प्रि॒यं रि॒पो अग्रं॑ प॒दं वेः' (ऋ० ३.५.५) इति च निगमौ॥

(१४) अदितिः[७]–'दीङ् क्षये' (दि०आ० २४)। 'कृत्यल्युटो बहुलम्' (अ० ३.३.११३) इति कर्तरि क्तिनि छान्दसं ह्रस्वत्वम्, नञ्समासः। अदितिः सकलप्रपञ्चधारणेष्वदीना न खिद्यते इत्यर्थः। 'अदितिरदीना' (निरु० ४.२२) इत्यत्र भाष्ये स्कन्दस्वामी–यद्यपि नञ्पूर्वाद् द्यतेः क्तिनि 'द्यतिस्यतिमास्थाम्०' (अ० ७.४.४०) इतीत्वे च रूपं सिध्यति, तथापि द्यतेर्नित्यमवपूर्वादर्थानन्वयाच्च[८] 'दीङ् क्षये' इत्यस्यैवेदं छान्दसं रूपं द्रष्टव्यम्।

---

१. निघ० १.११, २.११, ३.३०। निरु० ४.२१, ५.२२।
२. यथाकोशम्।
३. दशपाद्युणादिषु (१०.२)। अग्रिमोद्धरणमप्यत्रैवानुकूलम्। द्र०–माणिक्यदेववृत्तिः।
४. तु०–दशपाद्युणादिवृत्तिः १०.२।
५. 'लिप्' इति कोशेषु।
६. 'इति कुप्रत्यये' इति स्यात्।
७. निघ० १.११, २.११, ३.३०, ४.१, ५.५। निरु० ४.२२, ११.२२।
८. '०त्यमपूर्वादर्थान्वया०' इति मुद्रितेषु।

तथा चोक्तम्–'न संस्कारमाद्रियेत अर्थनित्यः परीक्षेत' (निरु० २.१)[१] इति। 'दे॒वेभ्यो॒ अदितये स्यो॒नम्' (ऋ० १०.११०.४), 'तमंमृक्षन्त वा॒जिनंमु॒पस्थे॒ अदि॑ते॒रधि॑' (ऋ० ९.२६.१) इति निगमौ॥

(१५) इळा[२]–'ईड स्तुतौ' (अदा० आ० ९), 'ञिइन्धी दीप्तौ' (रु० आ० ११)। अनयोः 'अकर्तरि च कारके संज्ञायाम्' (अ० ३.३.१९) इति घञ्, पृषोदरादित्वात् (अ० ६.३.१०९) ईडेर्ह्रस्वत्वम्, इन्धेर्नकारलोपो धकारस्य डकारो गुणाभावश्च। ईट्टे स्तुते[३] वास्यां यजमानो देवान्, इन्धे दीप्यतेऽस्यां श्रीभिः। यद्वा 'इण् गतौ' (अदा० प० ३८), 'क्वादिभ्यः कित्' (उ० १.११५, श्वे० १०८) इत्यस्मिन्सूत्रे 'बहुलानुवृत्तेः अञमन्तादपि भवति'[४] इति वचनाद् डप्रत्ययः कित्त्वाद् गुणाभावः। गवा समानार्थः। यद्वा 'इल स्वप्रक्षेपणयोः' (तु० प० ६७) इत्यस्मात् 'इगुपधज्ञाप्रीकिरः कः' (अ० ३.१.१३५) इति कप्रत्ययः, 'कृत्यल्युटो बहुलम्' (अ० ३.३.११३) इति अधिकरणे भवति। क्षिप्यन्तेऽस्यां भावाः, स्वपन्ति[५] अस्यामिति वा, ड-लयोरेकत्वस्मरणाड् डत्वम्। यद्वा 'इळा' इत्यन्ननाम गोनाम वा (निघ० २.७, २.११) इळा अन्नं गौर्वा अस्यामस्तीत्यर्शआदित्वात् (अ० ५.२.१२७) अच्, अन्नवती गोमती वा इडा। बह्वृचानान्तु 'द्वयोश्चास्य स्वरयोर्मध्यमेत्य सम्पद्यते स डकारो ळकारः' (ऋक्प्राति० १.११) इति ळत्वम् इळा। ऋक्षु उदाहरण-बाहुल्याच्च ऋग्वेददृष्टपाठ इळेति। 'इळा॑यास्त्वा प॒दे व॒यं' (ऋ० ३.२९.४), 'अधा॒ होता॒ न्य॑सीदो॒ यजी॑यानि॒ळस्प॒द०' (ऋ० ६.१.२) ['इळश्छान्द-सत्वादाकारलोपः'[६] इति स्कन्दस्वामी], 'इ॒ळस्प॒दे समि॑ध्यसे॒' (ऋ० १०.१९१.१) इति निगमाः।

(१६) निर्ऋतिः[७]–'निर्ऋतिर्निरमणात्' निरुक्तम् (२.७)। अस्य स्कन्दस्वामी 'निरमणात्–निश्चलत्वेनावस्थानात्–इत्यर्थः, रमन्ते वास्यां भूतानि'[८] इति। तत्र निर्पूर्वाद्रमेः (भ्वा० आ० ५९२) 'कृत्यल्युटो बहुलम्'

---

१. निरु० ४.२२ स्कन्दटीका।

२. निघ० १.११, २.७, २.११, ५.५। निरु० ११.४८।

३. 'ईड्यते स्तूयते' इति मुद्रितेष्वपपाठः।

४. दशपाद्युणादिमाणिक्यदेववृत्तिः ५.८।

५. 'भावः, स्वपन्ते' इति मुद्रितेषु।

६. मृग्यम्।

७. निरु० २.७।

८. निरु० २.७ स्कन्दटीका।

(अ० ३.३.११३) इति कर्तर्यधिकरणे च क्तिनि (अ० ३.३.९४) अनुनासिकलोपः, 'रयेर्मतौ बहुलम्' (अ० ६.१.३४ वा०) इत्यत्र बहुलवचनात् सम्प्रसारणम्। आद्येऽर्थे निर्निश्चलत्वमाह नानवस्थानम्, उत्तरत्र धात्वर्थमनुवर्त्तनिः। वैयाकरणपक्षेण तु निरुपसृष्टादर्त्तेः क्तिनि निर्ऋतिः, निष्क्रान्ता ऋतेर्गमनाद्[१]। निश्चलवदवतिष्ठत इत्यर्थः। 'बहुप्रजा निर्ऋतिमाविवेश' (ऋ० १.१६४.३२), 'अधा शयीत निर्ऋतेरुपस्थे' (ऋ० १०.९५.१४) इति च निगमौ॥

(१७) भूः–'भू सत्तायां' (भ्वा० प० १) सम्पदादित्वाद् भावे क्विप् (अ० ३.३.९४ वा०)। भवत्यस्यां सर्वमिति भूः। 'मूर्द्धा भुवो भवति नक्तमग्निः' (ऋ० १०.८८.६) इति निगमः। रेफान्तं त्वव्ययम्,[२] यथा–'भूर्भुवः स्वः' (मा० सं० ३६.३) इति॥

(१८) भूमिः–'भुवः कित्' (उ० ४.४६, श्वे० ४७४) इति भवतेर्मिप्रत्ययः।[३] अर्थः पूर्ववत्। अथवा 'भूतेऽपि दृश्यन्ते' (अ० ३.३.२) इति वचनात् भूते मिप्रत्ययः। 'अभूतभूमिस्तथा अभूद्वा इदमिति तद् भूम्यै भूमित्वम्' (तु०–तै० ब्रा० १.१.३.७) इति श्रुतिः। 'न्यङ्ङुत्तानामन्वेति भूमिम्' (ऋ० १०.२७.१३), 'भूमिर्भूमिमगात्' (षड्विंश ब्रा० १.६.२१) इति च निगमौ॥

(१९) पूषा[४]–'पुष पुष्टौ' (दि० प० ७१)। 'श्वन्नुक्षन्पूषन्०' (उ० १.१५९, श्वे० १४६) इत्यादिना कनिन्-प्रत्ययान्तो निपात्यते, निपातनादुपधाया दीर्घः[५]। पुष्यति धान्यादिभिः समृद्धा भवति पोषयति वान्नैः प्रजाः। 'सर्वार्थपोषणात् पूषा' इति भट्टभास्करमिश्रः[६]। तथा 'पृथिवी न्यवर्तयत सौषधीभिर्वनस्पतिभिरपुष्यत्' (तै० ब्रा० २.३.३.२) इति श्रुतिः। यद्वा 'पुष धारणे' (चु० २२१) इति धातुः। धारयति सर्वाणि भूतानि पोषयत्याभरणानीति। यथा 'आ पूषञ्चित्रबर्हिषम्' (ऋ० १.२३.१३) इत्यत्र माधवः 'पूषा पोषयतीति तस्य प्रत्यक्षं रूपम्'[७]। 'पूषा त्वेतो नयतु हस्तगृह्य' (ऋ०

---

१. 'निष्क्रान्ताकृते०' इति मुद्रितेषु।
२. 'व्यत्ययम्' इत्यपपाठो मुद्रितेषु।
३. 'भुवः क्मिन्' इति दशपाद्युणादिसूत्रपाठः (१.१६)। स एव साधीयान् स्वरसाधकत्वात्।
४. निघ० ५.६। निरु० ६.३१, १२.१६।
५. 'श्वन्नुक्षन्पूषन्निति पूषान्तोदात्तो निपात्यते' इति काशिका (६.२.१४२)।
६. तै० सं० भाष्य १.२.२.३।
७. द्र०–माधवकृता ऋग्वेदव्याख्या।

१०.८५.२६) इति, 'सरस्वत्यै पूष्णेऽग्नये स्वाहा' (मा० सं० ४.७) इति निगमौ॥

(२०) गातुः[१]–'गा स्तुतौ' छन्दसि जुहोत्यादिः (प० २३), 'गाङ् गतौ' (भ्वा० आ० ६८१), 'कै गै शब्दे' भूवादिः (प० ६५३)। 'कमिमनिजनिगाभायाहिभ्यश्च' (उ० १.७३, श्वे० ६९) इति तुप्रत्ययः। गीयते स्तूयतेऽसौ, स्तुवन्ति वास्यां स्थिता इन्द्रादीन्, गच्छन्त्यस्यां भूतानीति वा, गायन्ति वास्यां स्थिता गायना इति। यद्वा गम्यतेऽनेनेति गातुर्मार्गः, 'लुगकारेकाररेफाश्चेति वक्तव्यम्' (अ० ४.४.१२८ वा०) इति मत्वर्थीयस्य लुक्। गातुः मार्गवती हि भूमिः। 'इन्द्राय गातुरुशतीव येमे' (ऋ० ५.३२.१०), 'अदर्शि गातुरुरवे वरीयसी' (ऋ० १.१३६.२) इति निगमौ॥

(२१) गोत्रा–'गुङ् अव्यक्ते शब्दे' (भ्वा० आ० ६८०)। 'गुधृवीपचिवचियमिमनितनिसदिक्षदिभ्यस्त्रः' (उ० ४.१६८, श्वे० ६०१) इति त्रप्रत्ययः। गुणः। मृगपक्ष्यादयोऽस्यामव्यक्तशब्दं कुर्वन्तीति गोत्रा। यद्वा गोत्राः शैलाः सन्त्यस्याम् अर्शआदित्वात् (अ० ५.२.१२७) अच्। यद्वा गोशब्दे कर्मण्युपपदे 'त्रैङ् पालने' (भ्वा० आ० ६९२) इत्यस्मात् 'आतोऽनुपसर्गे कः' (अ० ३.२.३)। टाप् (४.१.४)। गास्त्रायते रक्षति यवसोदकवत्तया। यद्वा गोभिरादित्यकिरणैर्वृष्टिप्रदानेन त्रायते रक्ष्यते इति, 'कृत्यल्युटो बहुलम्' (अ० ३.३.११३) इति कर्मणि 'आतोऽनुपसर्गे कः' (अ० ३.२.३)। यद्वा गोशब्दात् 'तस्य समूहः' (अ० ४.२.३७) इत्यस्मिन्नधिकारे 'खलगोरथात्' (अ० ४.२.५०) इत्यनुवृत्तौ 'इनित्रकट्यचश्च' (अ० ४.२.५१) इति त्रप्रत्ययः। गोत्रा गवां समूहः। मत्वर्थीयोऽकारः, गोसमूहोऽस्यामस्तीति गोत्रा। निगमोऽन्वेषणीयः[२]॥

इत्येकविंशतिः पृथिवीनामधेयानि। 'उवाच मे वरुणो मेधिराय' (ऋ० ७.८७.४) इत्यत्र माधवः–'उवाच मह्यं वरुणो मेधाविने'[३] इति स तत्र 'एकविंशतिनामानि काचिद् गौर्बिभर्त्तीति पृथिवीमाह तस्या हि यास्कपठितानि एकविंशतिर्नामानि' इति॥१॥

---

१. निघ० ४.१। निरु० ४.२१,२५।

२. बहुषु मन्त्रेषु श्रूयमाणमपि गोत्रापदं स्कन्दवेङ्कटमाधवसायणैर्भाष्यकृद्भिः क्वचिदपि पृथिवीनामधेयत्वेन न व्याख्यातम्। ऋषिदयानन्दस्तु ऋ० ६.६५.५ भाष्ये–'गोत्रा भूमिः। गोत्रेति पृथिवीनाम' इति व्याचख्यौ।

३ वेङ्कटमाधवभाष्यम् (ऋ० ७.८७.४)।

हेम (१)। चन्द्रम् (२)। रुक्मम् (३)। अयः (४)। हिरण्यम् (५)। पेशः (६)। कृशनम् (७)। लोहम् (८)। कनकम् (९)। काञ्चनम् (१०)। भर्म (११)। अमृतम् (१२)। मरुत् (१३)। दत्रम् (१४)। जातरूपम् (१५)। इति पञ्चदश हिरण्यनामानि॥ २॥

(१) हेम[1]–'हि गतौ वृद्धौ च' (स्वा० प० ११) अस्माद् धातोः 'नामन्सीमन्व्योमन्हेमन्रोमन्लोमन्विधर्मन्पाप्मन्०' (उ० ४.१५२, श्वे० ५८८)[2] इति मनिन्नन्तं निपात्यते। हिनोति गच्छति अनेन सुखं पुरुषः, गम्यते वा तदर्थिभिः, गच्छति वा स्वयं कटकादिरूपां विकृतिम्, हिनोति वाणिज्यादिना प्रतिदिनं वर्द्धते। 'ताम्राद्युपरि लेपनाद् वर्द्धते'[3] इति सुबोधिनी। अथवा हितमापदि निहितं वा भूम्यादौ। दधातेर्हिरादेशो निपातनाद् हेम। 'अस्य प्रेषा हेमना पूयमानः' (ऋ० ९.९७.१), 'अश्वो न स्वे दम आ हेम्यावान्' (ऋ० ४.२.८) इति च निगमौ। हेम्यावान्–हिरण्मयकक्ष्यया युक्तः॥

(२) चन्द्रम्[4]–'चदि आह्लादने दीप्तौ च' (भ्वा० प० ५६) अस्मात् 'स्फायितञ्चिवञ्चिशकिक्षिपिक्षुदि०' (उ० २.१३, श्वे० १५९) इत्यादिना रक्। चन्दयति, आह्लादयति तद्वद् दीप्यते वा स्वयं तैजसत्वात्। यद्वा णिजन्ताच्चदेर्बाहुलकाद् णिलोपः, दीपयति धारयितॄन्–दीप्यतेऽनेन धारयितेति वा। कान्त्यर्थो वा चदिः, 'चन्द्रः चन्दतेः कान्तिकर्मणः' (निरु० ११.५) इत्युक्तेः। काम्यते सर्वैरिति चन्द्रम्। 'ये वध्वश्चन्द्रं वहतुम्' (ऋ० १०.८५.३१), 'दक्षिणा चन्द्रमुत यद्धिरण्यम्' (ऋ० १०.१०७.७) इति च निगमौ॥

(३) रुक्मम्–'रुच दीप्तौ' (भ्वा० आ० ४९८) 'युजिरुचितिजां कुश्च' (उ० १.१४६, श्वे० १३२) इति मक्प्रत्ययः कुत्वं च। रोचते तदतिशयेन दीप्यते तेन तदिति च रुक्मम्। 'आ रुक्मैरायुधा नरः' (ऋ० ५.५२.६), 'एष रुक्मिभिरीयते' (ऋ० ९.१५.५) इति च निगमौ॥

(४) अयः–'इण् गतौ' (अदा० प० ३८)। असुन् (उ० ४.१९०, श्वे० ६२०)। एति गच्छति अंगुलीयकादिरूपेण शरीरम्, ऋक्थक्रयसं-

---

१. निघ० १.१२।

२. त्रितयेऽप्युणादिसूत्रे परस्परं पाठा भिद्यन्ते।

३. मृग्यम्।

४. निरु० ११.५।

विभागादिना वा पुरुषात् पुरुषान्तरम्, गच्छत्यनेन धर्मं[1] दानादिनेति वा। 'अर्यः शीर्षा मदैरघुः' (ऋ० ८.१०१.३) इति निगमः॥

(५) हिरण्यम्–'हृञ् हरणे' (भ्वा० उभ० ६४०) अस्मात् 'हर्यतेः कन्यन् हिर च' (उ० ५.४४, श्वे० ७१८) इति विधीयमानः कन्यन् प्रत्ययो हिरादेशश्च बाहुलकाद् भवतः। तथा च अन्यन्नित्यधिकृत्य 'हृञ इच्च'[2] इति भोजसूत्रम्। ह्रियते जनाज्जनमिति वा संव्यवहारार्थम्, द्रव्यस्वभावत्वात् नैकत्रावस्थायित्वं तस्य। अथवा द्विधातुजं रूपम्–हिनोतेः रमतेश्च धातुद्वयात् समुदितात् कन्यन् प्रत्ययो बाहुलकाद् रूपसिद्धिश्च, हितञ्च तद् आपदि दुर्भिक्षादौ, रमयति च सर्वदा सर्वमिति। अथवा हर्यतेः प्रेप्साकर्मणः (निरु० २.१०), हर्यतेः कन्यन् हिरश्च ह्रियतेर्यथाप्राप्तं रूपम्। सर्वैर्हि तत् सर्वदा प्राप्तुमिष्यते। 'हर्यति स्वप्रभया दीप्यते'[3]–इति सुबोधिनीकारः। 'हिरण्यरूपः स हिरण्यसन्दृग्' (ऋ० २.३५.१०) इति निगमः॥

(६) पेशः[4]–'पिश[5] गतौ' (चु० प० ३६)। असुन् (उ० ४.१९०, श्वे० ६२०)। अय इत्यनेन समानार्थम्। 'त्रिवन्धुरेण त्रिवृता सुपेशसा' (ऋ० १.४७.२) इति निगमः। 'हिरण्ययेन रथेन' (ऋ० ८.५.३५), 'हिरण्ययीं वां रभिः' (ऋ० ८.५.२९) इत्यादौ अश्विनो रथस्य हिरण्ययेत्युक्तेः[6] पेशोऽत्र हिरण्यम्। बृहदारण्यके–'तद्यथा पेशस्कारी पेशसो मात्रामपादायान्यन् नवतरं कल्याणतरꣳ रूपं तनुते' (४.४.४) इति यथा। वाजसनेयके–'सरस्वती मनसा पेशलम्' (मा० सं० १९.८३) इत्यत्र 'पेश इति हिरण्यनाम रूपनाम वा' इत्युवटेन व्याख्यातम्॥

(७) कृशनम्[7]–'कृश तनूकरणे' (दि० प० ११७)। 'कृपृवृजिमन्दिनिधाञ्भ्यः क्युः' (उ० २.८२, श्वे० २२७) इति विधीयमानः क्युर्बाहुलकाद् भवति। कृश्यति तनूकरोति यम्। अत्र माधवस्तु–'कृशिर्दीप्त्यर्थः। कृश्यति स्वप्रभया दीप्यते, अपि वा कर्शयति संसृष्टम्, कृशमेव वा भवति संस्थानतो रजतात्'[8] इति। 'स्मद्दिष्टयः कृशनिनो निरेके' (ऋ० ७.१८.२३), 'अभि श्यावं

---

१. 'धर्मदानेति' इति मुद्रितेषु।
२. स० क० २.३.२०। तत्र मुद्रिते 'अन्यत्' प्रत्ययोऽयुक्तः।
३. नोपलब्धम्।
४. निघ० ३.७। निरु० ८.११।
५. 'पिस' इत्येव सार्वत्रिकः पाठो धातुपाठेषु।
६. 'हिरण्यकेशीत्युक्तेः' इति मुद्रितेषु।
७. निघ० ३.७।
८. ऋ० १.३५.४ माधवभाष्ये। 'रजतादिभ्यः' इति मुद्रितः पाठः।

न कृशनेभिरश्वम्' (ऋ० १०.६८.११), 'अभीवृतं कृशनैर्विश्वरूपम्' (ऋ० १.३५.४) इति निगमाः॥

(८) लोहम्–'लुह कत्थनादौ'[१]। घञ् (अ० ३.३.१२१)। कत्थते श्लाघतेऽनेनात्मा, त्रिवर्गसाधनत्वात् पुरुषैः सम्प्रार्थ्यते वा। 'लूञो हः'[२] इति तु श्रीभोजदेवः। लुनाति छिनत्ति पापसम्बन्धं पात्रे दीयमानम्। निगमोऽन्वेषणीयः[३]॥

(९) कनकम्–'कनी दीप्तिकान्तिगतिषु' (भ्वा० प० ३११)। 'कृञादिभ्यः संज्ञायाम्०' (उ० ५.३५, श्वे० ७०७) इति वुन्प्रत्ययो धात्वर्थेष्वपि। रुक्मादिवदर्थोऽनुसन्धेयः। निगमोऽन्वेषणीयः[४]॥

(१०) काञ्चनम्–अत्र सुबोधिनी–'कचि दीप्तिबन्धनयोः' (भ्वा० आ० १०२)। कञ्चते वर्णेन दीप्यते बध्यते कुण्डलादिरूपेणेति। 'युच् बहुलम्' (श्वे० २२४, द० उ० ५.२३, उ० २.७८) इति युच् प्रत्ययः। दीर्घोऽत्र बाहुलकात्। निगमोऽन्वेषणीयः[४]॥

(११) भर्म[५]–'डुभृञ् धारणपोषणयोः' (जु० उभ० ५)। 'मनिन्' (श्वे० ५८१, द० उ० ६.७३, उ० ४.१४६)। भ्रियते धार्यत अङ्गुल्यादिभिः, धार्यत आपदर्थमिति वा, पोषयत्यनेन कुटुम्बमिति वा। हरतेर्वा (भ्वा० उभ० ६४०) मनिनि 'हृग्रहोर्भश्छन्दसि' (अ० ८.२.३५ वा०) इति भकारः। हिरण्येन हरतिधातुजेन समानार्थम्। 'सुवीराभिस्तिरते वाजभर्मभिः' (ऋ० ८.१९.३०), 'अरिष्टभर्मन्नागहि' (ऋ० ८.१८.४) इति च निगमौ। 'वाजभर्मभिः', 'अरिष्टभर्मन्' इत्यत्र माधवस्तु–'भर्तव्यं भर्म'[६] इति व्याख्यत्, तदा निगमोऽन्वेषणीयः[७]॥

(१२) अमृतम्[८]–नञ्पूर्वाद् म्रियतेः (तु० आ० ११३) 'तनिमृङ्भ्यां

---

१. पाणिनीयधातुपाठे न संगृह्यते। क्षीरस्वामी त्वमरकोषटीकायां 'लुह कत्थनादौ वा' इत्यूचे (अमरकोषोद्घाटनम् २.९.९८)।

२. स० क० २.३.१८३।

३. लोहं पदं सकृदेव श्रूयते मन्त्रेषु (मा० सं० १८.१३)। तत्र ऋषिदयानन्दः–'लोहं सुवर्णम्। लोहमिति सुवर्णनाम० (निघ० १.२)' इति व्याचख्यौ।

४. इदं पदं सांप्रतिकेषु मन्त्रेषु न श्रूयते।

५. निरु० ७.२५।

६. 'आहृतान्नैः' 'अहिंसितहविर्भरणे' इति यथासंख्यं वेङ्कटमाधवः।

७. भर्मपदम् असमस्तं सकृच्छ्रूयते (ऋ० १०.८८.१), तत्रापि न हिरण्यार्थम्।

८. निघ० १.१२। निरु० २.२०, ३.१२, ८.२०, १०.३।

किच्च' (उ० ३.८८, श्वे० ३५५) तन्प्रत्यये रूपम्। न म्रियन्तेऽनेन दुर्भिक्षादौ, नास्ति मृतं मरणमस्येति वा—न हि हिरण्यस्य यस्यां कस्याञ्चिदवस्थायामात्मनाशो विद्यते। 'अ॒ग्नेः प्रजा॑तं॒ परि॒ यद्धिर॑ण्यम॒मृतं॑ द॒ध्रे अधि॒ मर्त्ये॑षु' (खिल० ऋ० १.१२८ सूक्तानन्तरं ५[१], शौ० सं० १९.२६.१) इति खैलिको मन्त्रः। न म्रियते पात्रे प्रतिपादितेन ध्रियमाणेन वा आयुष्करत्वात्। 'आयुर्वै हिरण्यम्' (मै० सं० २.१.७, तै० ब्रा० १.८.९.१) इति श्रुतिः। तथा च खैलिको मन्त्रः—'यो बि॒भर्ति॑ दाक्षाय॒णꣳ हिर॑ण्य॒ꣳ स दे॒वेषु॑ कृणुते दी॒र्घमायुः॒ स म॑नु॒ष्ये॒षु कृणुते दी॒र्घमायुः॑' (मा० सं० ३४.५१, खि० ऋ० १.१२८ सूक्तानन्तरं ७)[२] इति। 'स॒त्रा च॒क्रा॒णो अ॒मृता॑नि॒ विश्वा॑' (ऋ० १.७२.१), 'शु॒क्रं त्वा॑ शु॒क्रेण॑ क्रीणामि च॒न्द्रं च॒न्द्रेणा॒मृत॑म॒मृते॑न' (मा० सं० ४.२६) इति निगमौ।

(१३) मरुत्[३]—मितममितं वा रोचते, मितममितं वा रोचयति, मातेः पूर्वार्द्धम्, रौतेर्वोत्तरार्द्धम्, पृषोदरादित्वात् (अ० ६.३.१०९) साधुः। हिरण्यं हि अग्न्यादितेजस्विपदार्थेभ्यो मितं भोगादिभ्योऽमितं रोचते, अर्थिभ्यो दीयमानं लोकद्वयेऽपि कीर्त्तिं कारयति। तथा च सुभाषितश्लोकः—

'शृणु पाणे! त्वयि न्यस्तं कियत्क्वाणादि कङ्कणम्।
इदमेवार्थिहस्तस्थं रावयति च रोचते'[४]॥

यद्वा 'मृग्रोरुतिः' (श्वे० ९२, द० उ० ६.१, उ० १.९२)—म्रियतेर्धातोः (तु० आ० ११३) उतिप्रत्यये रूपम्। म्रियन्तेऽनेन पुरुषा इति मरुत्—एतदर्थं हि चौरादिभिः पुरुषा हन्यन्ते। निगमोऽन्वेषणीयः[५]॥

(१४) दत्रम्—'डुदाञ् दाने' (जु० उभ० ९)। 'अमिचिमिदिशंसिभ्यः क्त्रः' (द०उ० ८.८६, श्वे० ५९८) इति विधीयमानः क्त्रो बाहुलकात् (अ० ३.३.१) भवति। 'दो दद् घोः' (अ० ७.४.४६) इति दद्भावः। दीयते पात्रे दत्रम्[६]। 'इन्द्र॒ यत्ते॒ माहि॑नं॒ दत्र॒मस्त्यु॒०' (ऋ० ३.३६.९) इति निगमः॥

(१५) जातरूपम्—'जनी प्रादुर्भावे' (दि० आ० ४०)। निष्ठातकारः।

---

१. ऋग्वेदखिलेषु 'दध्रे'पदस्य स्थाने 'यज्ञे'पदं श्रूयते।
२. ऋग्वेदखिलेषु 'दाक्षायणꣳ'पदस्य स्थाने 'दाक्षाय॒णा'पदं श्रूयते। तु०—शौ० सं० १.३५.१।
३. निघ० ३.७,१८, ५.५। निरु० ११.१३।
४. मृग्यम्।
५. 'मरुतः हिरण्यादीनि०' इति दयानन्दो यजुर्वेदभाष्ये (मा० सं० ८.३१)।
६. दद्भावे द्वितकारकं पदं स्यात्, तथा तु नोपलभ्यते?

'जनसनखनाम्०' (अ० ६.४.४२) इत्यात्वम्। जातः। 'रुच दीप्तौ०' (भ्वा० आ० ४९८)। 'खष्पशिल्पशष्पवाष्परूपपर्पतल्पाः' (उ० ३.२८, श्वे० २९९) इति पप्रत्ययान्तो निपातितः, निपातनादुकारस्य दीर्घश्चकारलोपश्च। रोचते रूपम्। अनाहार्यतया जातं रूपमस्य जातरूपम्। तथा च श्रीरामायणे स्कन्दोत्पत्तौ—'इह हैमवते भागे गर्भोऽयं सन्निवेश्यताम्' (बाल० ३७.१७) इत्यतः परि 'निक्षिप्तमात्रे गर्भे तु तेजोभिरभिरञ्जितम्। सर्वं पर्वतसन्नद्धं सौवर्णमभवद्वनम्। जातरूपमिति ख्यातं तदा प्रभृति राघव। सुवर्णं पुरुषव्याघ्र हुताशनसमप्रभम्' (बाल० ३७.२१-२२) इति। जातं रूपं सौन्दर्यमनेन धारयितृणामिति वा जातरूपम्। 'जातरूपमयेन च पवित्रेणान्तर्धायाभिषिञ्चति' (ऐ० ब्रा० ८.१८) इति निगमः॥

इति पञ्चदश हिरण्यनामानि॥ २॥

अम्ब॑रम् (१)। वि॒यत् (२)। व्यो॑म (३)। ब॒र्हिः (४)। धन्व॑ (५)। अ॒न्तरि॑क्षम् (६)। आ॒का॒शम् (७)। आपः॑ (८)। पृ॒थि॒वी (९)। भूः (१०)। स्व॒य॒म्भूः (११)। अध्वा॑ (१२)। पुष्क॑रम् (१३)। सग॑रः (१४)। स॒मु॒द्रः (१५)। अध्वरम् (१६)। इति षोडशान्तरिक्षनामानि॥ ३॥

(१) अम्बरम्[1]—'अबि शब्दे' (भ्वा० आ० २६२)। 'कृदरादयश्च' (उ० ५.४१, श्वे० ७१२) इति अरन्प्रत्ययान्तो निपात्यते। अम्बन्ते शब्दायन्तेऽस्मिन् मेघाः, अम्बते शब्दायते वा स्वयं वायुमेघादिसंसर्गात्—आकाशगुणो हि शब्दः। अथवा अर्त्तेर्धातोः 'अर्जिदृशिकम्यमिपंसिबाधामृजिपशितुक्धुक्दीर्घहकाराश्च' (उ० १.२७) इति अमतेर्विधीयमान उप्रत्ययो बुगागमश्च बाहुलकात् (अ० ३.३.१) भवति, तस्मिन् गुणे रपरत्वे च रेफस्य मकारश्च, अम्बु। अमतेरेव वा तेनैव सूत्रेण उप्रत्ययो बुगागमश्च। उभयत्रापि गच्छति देशाद् देशान्तरं गम्यते वा प्राणिभिरित्यम्बु जलम्। तद्राति ददातीत्यम्बरो मेघः। 'आतोऽनुपसर्गे कः' (अ० ३.२.३), पृषोदरादित्वात् (अ० ६.३.१०९) उकारस्याकारः। तद्वदाकाशमप्यम्बरम्। 'लुगकारेकाररेफाश्च वक्तव्याः' (अ० ४.४.१२८ वा०) इति मत्वर्थीयस्य लुक्। तदेव वा वर्षासु प्राणिभ्य उदकं ददातीति अम्बरम्। अथवा अम्बुशब्द उपपदे राजतेर्धातोः 'अन्येष्वपि दृश्यते'

---

१. निघ० २.१६।

(अ० ३.२.१०१) इति दृशिग्रहणाड् डः, अपिशब्दस्य सर्वोपाधिव्यभिचारार्थत्वादर्थसिद्धिः[1]। अथवा अम्बुवद्राजते स्वस्थस्तिमितसाराम्बुवदवभासते। कल्पितोपमानञ्चैतत्, तद्यथा–

पुञ्जीकृतमिव ध्वान्तं मेघो भाति मतङ्गजः।
सरः शरत्प्रसन्नाम्भो नभःखण्डमिवोज्झितम्[2]॥

परमार्थतः स्वरूपमवकाशः। अथवा अम्बुमत् भवति रो मत्वर्थीयः, पूर्ववदुकारस्याकारः, अन्तरिक्षं हि वर्षोदकेन तद्वत्। 'यन्नासत्या परावति यद्वा स्थो अध्यम्बरे' (ऋ० ८.८.१४) इति निगमः॥

(२) वियत्–'यमु उपरमे' (भ्वा० प० ७१०) इत्यस्माद् औणादिके क्विपि 'गमः क्वौ' (अ० ६.४.४०) 'गमादीनामिति वक्तव्यम्' (अ० ६.४.४० वा०) इत्युक्तेरनुनासिकलोपः। 'ह्रस्वस्य पिति कृति तुक्' (अ० ६.१.६९)। विगतं यमनमुपरमणमस्मादिति वियत्–अन्तरिक्षं हि सर्वत्र व्याप्तत्वात् न कुत्रचित् उपरतम्। 'वियच्छति न[3] विरमति' (अमर० १.२.२) इति क्षीरस्वामी। यद्वा विपूर्वात् 'यती प्रयत्ने' (भ्वा० आ० २५) इत्यस्मात् क्विप्। विविधं यतन्तेऽस्मिन् प्राणिनः–आकाशे हि सर्वे व्याप्रियन्ते। निगमोऽन्वेषणीयः[4]॥

(३) व्योम[5]–विपूर्वादवतेर्व्याप्त्यर्थत्वात् (भ्वा० प० ३९६) औणादिके 'सर्वधातुभ्यो मनिन्' (उ० ४.१४६, श्वे० ५८१) इति सूत्रेण मनिन्प्रत्यये 'ज्वरत्वरस्रिव्यविमवामुपधायाश्च' (अ० ६.४.२०) इत्यूठि गुणः। व्यवति व्याप्नोति सर्वं जगत्। यद्वा अवतिर्गत्यर्थः (भ्वा० प० ३९६) भावे[6] मनिन्–ओम, अवनं गमनं विविधमस्मिन् विद्यते। यद्वा रक्षणार्थः, विशेषेणावति प्राणिनोऽवकाशप्रदानेन। उणादौ तु 'नामन्सीमन्व्योमन्०' (उ० ४.१५२, श्वे० ५८८) इत्यादिना 'व्येञ् संवरणे' (भ्वा० उभ० ७३३) इत्यस्माद् मनिनि उत्वं निपात्यते। वीयते तद्वायुना व्योम। तथा च निरुक्तम्–'योनिरन्तरिक्षं महानवयवः परिवीतो वायुना' (निरु० २.८) इति। इदं निर्वचनमेतत्पदकारयोः शाकल्यात्रेययोरनभिमतं वीत्यस्मिन्नवगृहीतत्वात्[7]। 'सहस्राक्षरा परमे व्योमन्'

---

१. सर्वोपाधिव्यभिचारस्तु काशिकानुमोदितः (द्र०–काशिका ३.२.१०१)।
२. मृग्यम्।
३. 'न' इति नास्ति मुद्रिते (पूना सं०)।
४. 'वियत्'शब्दः सकृच्छ्रूयते (ऋ० ४.१९.३)। भाष्यकारैरन्तरिक्षार्थे न व्याख्यायते।
५. निघ० १.६, १२। निरु० ११.४०।
६. बाहुलकत्वात् पूर्वेण सूत्रेण।
७. 'विऽओमन्' इति पदपाठः।

(ऋ० १.१६४.४१), 'सत्यामाशिरं पूर्व्ये व्योमनि' (ऋ० ९.७०.१) इति च निगमौ॥

(४) बर्हिः[१]–'बृहि वृद्धौ' (भ्वा० प० ४८८) 'बृंहेर्नलोपश्च' (उ० २.१११, श्वे० २५६) इति इसिप्रत्ययः। बृंहति वर्द्धतेऽनेन प्राणिजातम्, सर्वे हि प्राणिन आकाशे वर्द्धन्ते, परिवृद्धं वा त्वयं विभुत्वात्। 'यस्य त्रिधात्ववृतं बर्हिः' (ऋ० ८.१०२.१४) इति निगमः॥

(५) धन्व[२]–'इवि रिवि धवि[३] गत्यर्थाः' (भ्वा० प० ३९३)। इदित्वान्नुम् (अ० ७.१.५८)। 'कनिन् युवृषितक्षिराजिधन्विद्युप्रतिदिवः' (उ० १.१५६, श्वे० १४२) इति कनिन्। धन्वन्ति गच्छन्ति अस्मादापः। यद्वा, 'धन धान्ये' (जु० प० २१), अनेकार्थत्वादर्थनार्थः। क्वनिप्। धन्यते अर्थ्यतेऽवकाशप्रदानाय देवतात्वात् स्वं स्वमभीष्टं वा। 'यः परस्याः परावतस्तिरो धन्वातिरोचते' (ऋ० १०.१८७.२) इति निगमः॥

(६) अन्तरिक्षम्[४]–'अन्तरिक्षं कस्मात्?' (निरु० २.१०) इत्यादिभाष्यस्य स्कन्दस्वामिग्रन्थो यथादृष्टं लिख्यते–'अन्तरा मध्ये सर्वभूतानां क्षान्तं शान्तं [स्थितं] निष्क्रियं वा शान्तमव्यूहं विष्कम्भस्थानात्मकत्वात्। अन्तरा इमे रोदस्यौ [द्यावापृथिव्यौ] क्षियतीति वा। अन्तरेमे क्षोण्याविति वा। एवमनेकविकल्पमुत्तरपदम्। [अन्तराशब्दात् पूर्वपदम्] शरीरेष्वन्तरक्षयमिति वा, अन्तःशब्दात् पूर्वपदमक्षयशब्दादुत्तरपदं [इति विशेषः]। विनाशिष्वपि अविनाशीत्यर्थः'[५] इति। सर्वत्र पृषोदरादित्वात् (अ० ६.३.१०९) साधु। 'न यस्य द्यावापृथिवी न धन्व नान्तरिक्षम्' (ऋ० १०.८९.६) इति निगमः॥

(७) आकाशम्–आङ्पूर्वात् 'काशृ दीप्तौ' (भ्वा० आ० ४३०) इत्यस्मात् 'पुंसि संज्ञायां घः प्रायेण' (अ० ३.३.११८) इति घप्रत्ययः। आ समन्तात् काशन्ते दीप्यन्ते सूर्यादयोऽत्र। यद्वा नञ्पूर्वात् काशेः पचाद्यच् (अ० ३.१.१३४), नञश्छान्दसः (अ० ६.३.१३६) दीर्घः। न काशते, पृथिव्यादिवत् अप्रत्यक्षत्वात्। तथा च श्रुतिः–'तिस्रो महीरुपरास्तस्थुरत्या गुहा द्वे निहिते

---

१. निघ० १.१२, ५.२। निरु० ८.८।

२. निघ० ४.२। निरु० ५.५, ९.१८।

३. 'रिवि रवि धवि' इति साम्प्रतिकः पाठः।

४. निरु० २.१०।

५. कोष्ठान्तर्गतः पाठो मुद्रितस्कन्दस्वामिभाष्यमनुसृत्यात्र निवेशितः। अन्येऽपि स्वल्पाः पाठभेदा उपलभ्यन्ते।

दर्श्येका' (ऋ० ३.५६.२) इति। 'तस्मान्नान्तरिक्षं पश्यति'[१] इति च। 'तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः' (तै० उ० २.१) इति निगमः॥

(८) आपः[२]–'आप्लृ व्याप्तौ' (स्वा० प० १५)। 'आप्नोतेर्ह्रस्वश्च' (उ० २.५९, श्वे० २०४) इति क्विप् प्रत्ययः उपधाह्रस्वश्च। जसि 'अप्तृन्तृच्स्वसृ०' (अ० ६.४.११) इत्यादिना दीर्घः। व्याप्नोति ह्यन्तरिक्षं सर्वं जगत्, आप्यते वा प्राणिभिः। अप्शब्दस्य नित्यं बहुवचनान्तत्वात् बहुवचनान्तस्य पाठः। ......'तृतीयमप्सु नृमणा अजस्रम्' (ऋ० १०.४५.१) इति निगमः॥

(९) पृथिवी[३]–'प्रथ प्रख्याने' (भ्वा० आ० ५१६)। 'प्रथेः षिवन्० सम्प्रसारणं च' (उ० १.१५०, श्वे० १३६)। 'षिद्गौरादिभ्यश्च' (अ० ४.१.४१) इति ङीष्। प्रथते पृथिवी। 'यः पार्थिवस्य क्षम्यस्य राजा' (ऋ० २.१४.११), 'स दाधार पृथिवीं द्यामुतेमाम्' (ऋ० १०.१२१.१) इति च निगमौ॥

(१०) भूः[४]–भवतेः (भ्वा० प० १) क्विप्। भवत्यस्माद् वृष्ट्यादिः। निगमोऽन्वेषणीयः॥

(११) स्वयम्भूः–स्वयं भवति न केनचित् सृज्यते, केषाञ्चिद् वादिनां पक्षे नित्यं ह्याकाशम्। स्वयम्भ्वित्युकारान्तं केषुचित्। तदा मृगय्वादित्वात् (उ० १.३७, श्वे० ३७) कुः। निगमस्यादर्शनाद् उभयमपि लिखितम्, निगमदर्शनान्निर्णयः कार्यः[५]॥

(१२) अध्वा–'अद भक्षणे' (अदा० प० १)। 'अदेर्ध च' (उ० ४.११७, श्वे० ५५०) इति क्वनिब् धकारश्चान्तादेशः। अदनं स्वस्ति गच्छतां पक्ष्यादीनां विषमस्थानाभावात्। यद्वा अधिर्गत्यर्थः कश्चिद्धातुः, बाहुलकात् पूर्वेण क्वनिप्, गच्छन्त्यस्मिन् देवादय इत्यध्वा। 'अधेर्गतिक्रियात्'[६] इति माधवः। यद्वा अध्वा मार्गोऽस्मिन् विद्यते मत्वर्थीयस्य लुक्–सन्ति ह्याकाशे मेघपथादयः। 'अतेर्धश्च' (स० क० २.१.२८२) इति भोजसूत्रम्। 'अत सातत्यगमने' (भ्वा० प० ३१)। सततं गच्छन्त्यत्र सूर्यादय इत्यध्वा। 'भूमा

---

१. मृग्यम्।

२. निघ० १.१२, ५.३। निरु० ९.२६।

३. निघ० ५.३, ५.६। निरु० १.१३।

४. निघ० १.१।

५. स्वयम्भूः शब्द ऋ० १०.८३.४ मन्त्रे श्रूयते। तस्यान्तरिक्षवाचित्वं न व्याख्यातं भाष्यकारैः।

६. मृग्यम्।

रेजन्ते अध्वनि प्रविक्ते' (ऋ० ६.५०.५), 'असमने अध्वनि वृजिने पथि' (ऋ० ६.४६.१३) इति निगमौ॥

(१३) पुष्करम्[१]–'पुष पुष्टौ' (दि० प० ७१)। 'पुषः कित्' (उ० ४.४, श्वे० ४३०) इति करन्प्रत्ययः। पुषिरत्रान्तर्णीतण्यर्थः, पोषयति भूतानि अवकाशप्रदानेन उदकदानाद्युपकारेण च। 'पुष्कं वारि राति पुष्करम्' (अमर० १.२.१) इति क्षीरस्वामी। पुषेरन्तर्णीतण्यर्थात् 'सृवृभूशुषियुधिभ्यः कित्' (द०उ० ३.१९, उ० ३.४१) इति विहितः कप्रत्ययो[२] बाहुलकाद् भवति। 'हृदृकृसृपृवीचीपुषिमुषिमूङ्शूभ्यः कित्'[३] इति कस्तु[४] श्रीभोजदेवः। पोषयति भूतानीति [पुष्कम्]। पुष्कोपपदाद्रातेः 'आतोऽनुपसर्गे कः' (अ० ३.२.३)। यद्वा वपुरित्युदकनाम (निघ० १.११), तत्कर्तुं शीलमस्येति 'कृञो हेतुताच्छील्यानुलोम्येषु' (अ० ३.२.२०) इति टः, वपुष्करं सद् वकारलोपेन पुष्करम्, पृषोदरादिः (अ० ६.३.१०९)। 'विश्वे देवाः पुष्करे त्वाददन्त' (ऋ० ७.३३.११) इति निगमः॥

(१४) सगरः–सहशब्दपूर्वात् 'गॄ निगरणे' (तु० प० ११९) इत्यस्माद् 'ऋदोरप्' (अ० ३.३.५७), सहस्य सभावः (अ० ६.३.७७)। सह गिरन्त्यस्मिन् स्थिता आदित्यरश्मयो भौमरसमिति सगरः। सह उद्गिरन्त्यस्मिन् स्थिता मेघा वर्षोदकमिति वा। यद्वा गीर्यते अभ्यवह्रियते स्वद्यत[५] इति गर उदकम्, तेन सह वर्तत इति सगरः। तथा च–'रश्मयश्च देवा गरगिरः' (तै० आ० १.९.३) इत्यत्र श्रीराहदेवः 'गरमुदकं गिरन्ति गरगिरः'[६] इति भाष्यं[७] कृतवान्। यद्वा 'गॄ शब्दे' (क्र्या० प० २९) इत्यादि। गीर्यत इति गरः शब्दः पूर्ववत्, गरेण शब्देन सह वर्तत इति सगरः–आकाशो हि स्वगुणेन शब्देन सहैव सर्वदा वर्तते। 'अपः प्रेरयं सगरस्य बुध्नात्' (ऋ० १०.८९.४) इति निगमः॥

(१५) समुद्रः[८]–समुद्द्रवन्ति सङ्गता ऊर्ध्वं द्रवन्ति गच्छन्त्यस्मादापो

---

१. निरु० ५.१४।
२. 'करन्प्रत्ययः' इत्यपपाठः। उद्धृतसूत्रे स्वल्पपाठभेदः।
३. इदं सूत्रं भोजीयव्याकरणे नोपलभ्यते। 'कृसृवृ .... कित्' (स० क० २.२.५) अभिप्रेतं स्यात्?
४. 'करुः' इत्यपपाठो मुद्रितेषु।
५. 'विद्यते' इति कोशेषु।
६. 'गरमुदकं गिरन्ति पिबन्तीति गरगिरः' इति भट्टभास्करः।
७. राहदेवभाष्यं नोपलभ्यते।
८. निघ० ५.६। निरु० २.१०, १०.३२, ११.४१, १२.३१।

रश्मिभिराकृष्यमाणा आदित्यमण्डलम्। समुत्पूर्वात् द्रवतेर्गत्यर्थात् 'अन्येष्वपि दृश्यते' (अ० ३.२.१०१) इति अपादाने डप्रत्यये टिलोपे च रूपम्। यद्वा संहता अभिद्रवन्त्येनमापो भौमरसलक्षणा वायुना प्रेर्यमाणा आदित्यमण्डलाद्वा वर्षाकाले रश्मिभिः प्रवर्तमानाः। अत्र उदित्येष उपसर्गोऽभीत्यर्थे वर्तते, कर्मणि डप्रत्यय इति विशेषः। सम्मोदन्तेऽस्मिन् भूतानि अन्तरिक्षचारीणीति वा। सम्पूर्वाद् 'मुद हर्षे' (भ्वा० आ० १५) इत्यस्मात् 'स्फायितञ्चिवञ्चि०' (उ० २.१३, श्वे० १५९) इत्यादिना अधिकरणे रक्प्रत्यये, समो मलोपे च रूपम्। यद्वा 'सम्' इत्येकीभावे, उदकात् उच्छब्दः, रो मत्वर्थीयः। एकीभूतमुदकमस्मिन् विद्यते वर्षास्विति। उदकशब्दस्योद्भावश्छान्दसः। यद्वा सम्पूर्वात् 'उन्दी क्लेदने' (रु० प० १९) इत्यस्मात् 'स्फायितञ्चिवञ्चि०' (उ० २.१३, श्वे० १५९) इत्यादिना कर्त्तरि रक्प्रत्यये कित्त्वान्नलोपे च समुद्रः। समुनत्ति वर्षेण भुवनं समुद्रः। 'एकः सुपर्णः स समुद्रमा विवेश' (ऋ० १०.११४.४) इति निगमः॥

(१६) अध्वरम्[१]–अध्वा व्याख्यातः (पृ० १९)। अध्वानं मार्गं राति ददाति (अदा० प० ५०) स्वस्मिन् गच्छतां पक्ष्यादीनाम्। यद्वा अध्वा मार्गो विद्यतेऽस्मिन् मेघादीनाम्। रो मत्वर्थीयः। यद्वा ध्वरतिर्हिंसाकर्मा (निघ० २.१९), तत्प्रतिषेधः। अध्वर्त्तव्यं न हिंस्यमित्यर्थः। नञ्पूर्वाद् ध्वरतेः 'पुंसि संज्ञायां घः प्रायेण' (अ० ३.३.११८) इति घः। 'शिशू क्रीळन्तौ परि यातो अध्वरम्' (ऋ० १०.८५.१८) इति निगमः। 'अध्वरं यज्ञम्' इति स्कन्दस्वामी व्याख्याति[२], तदा निगमोऽन्वेषणीयः॥

इति षोडशान्तरिक्षनामानि॥ ३॥

स्वः[३] (१)। पृश्निः[४] (२)। नाकः[४] (३)। गौः[५] (४)। विष्टप्[६] (५)। नभः[७] (६)। इति षट् साधारणानि॥ ४॥

---

१. निघ० ३.१७। निरु० १.८, ६.१३, १०.१९।
२. निरु० १.८ स्कन्दटीका।
३. निघ० १.१२। निरु० २.१४, ५.४, ५.१९, ११.७।
४. निरु० २.१४।
५. निघ० १.१। निरु० २.१४।
६. निरु० २.१४, ५.३०।
७. निघ० १.१२, ३.३०। निरु० २.१४।

स्वरादीनि षट् तु भाष्यकारेण स्कन्दस्वामिना च कृतव्याख्यानानीति नास्माभिरत्रोच्यन्ते[१]॥ ४॥

खेदयः (१)। किरणाः (२)। गावः (३)। रश्मयः (४)। अभीशवः (५)। दीधितयः (६)। गभस्तयः (७)। वनम् (८)। उस्राः (९)। वसवः (१०)। मरीचिपाः (११)। मयूखाः (१२)। सप्तऋषयः (१३)। साध्याः (१४)। सुपर्णाः (१५)। इति पञ्चदश रश्मिनामानि॥ ५॥

(१) खेदयः[२]–'तेषामादितः साधारणानि पञ्चाश्वरश्मिभिः' (निरु० २.१५) इत्युक्तेः पूर्वमादित्यरश्मीनामनन्तरम्[३] अश्वरश्मीनाञ्च निर्वचनं प्रदर्श्यते। 'खिद दैन्ये' दिवादिः (५९) रुधादिश्च (१२) आत्मनेपदी, 'खिद परिघाते' तुदादिर्मुचादिः परस्मैपदी (१४५)। 'अकर्त्तरि च कारके सञ्ज्ञायाम्' (अ० ३.३.१९) इति घञ्। खिद्यते खिन्ते[४] वानया, लोको घर्मकाले, अश्वो बन्धनकाले। यद्वा परिहन्यते[५] सर्वतो हिंस्यते[६] अनया लोक आदित्येन, अश्वो बन्धनकाले। यद्वा अनेकार्थत्वाद् धातूनां खिदिः खेदने वर्त्तते। तथा च 'खेदनं छेदनम्'[७] इति माधवः। अस्मात् पचाद्यचि (अ० ३.१.१३४) खेदयति[८] छिनत्ति नाशयति तमः। तथा हि 'दोषश्छिन्नः' इत्यादौ छिदिर्नाशने दृष्टः, घञि छिद्यतेऽश्वोऽनयेति खेदा अश्वरश्मिः। तृतीयैकवचनान्तस्य पाठो यथादृष्टः। 'खेदया त्रिवृता दिवः' (ऋ० ८.७२.८) इत्यश्वरश्मेर्निगमः, आदित्यरश्मेरन्वेषणीयः[९]॥

(२) किरणाः–'कॄ विक्षेपे' तुदादिः (प० ११८), 'कृञ् हिंसायाम्'

१. तृतीयाध्यायादुत्तरत्र परिशिष्टे वक्ष्यन्ते।
२. 'खेदया' इति पाठो देवराजाभिमतः।
३. 'पूर्वमादित्यरश्मिनामानन्तरम्' इति मुद्रितेषु।
४. 'खित्ते' इति मुद्रितेषु।
५. 'परिहन्यन्ते' इति मुद्रितेषु।
६. 'हिंस्यन्ते' इति कोशेषु।
७. मृग्यम्।
८. 'खेदति' इति मुद्रितेषु।
९. अन्यत्र स्थलद्वये (ऋ० ८.७७.३, १०.११६.४) उपलभ्यमानः खेदाशब्द आदित्यरश्मित्वेन न व्याख्यातो भाष्यकृद्भिः।

क्र्यादिः (प० १४)। 'कॄपॄवृजिमन्दिनिधाञ्भ्यः क्युः' (उ० २.८२, श्वे० २२७) इति क्युप्रत्ययः। किरन्ति तापम्, एकत्रौष्ण्येन, इतरत्र बन्धनेन। कीर्य्यन्ते वा, आदित्येन दिङ्मुखेषु, अश्वपालेनाश्वग्रीवादिषु[1]। यद्वा कृण्वन्ति हिंसन्ति तमः, हिंस्यन्त एभिरश्वाः किरणाः[2]। 'भिया दृळ्हासः किरणा नैजन्' (ऋ० १.६३.१) इति निगमः आदित्यरश्मेः। 'रेणुं रेरिहत् किरणं ददश्वान्' (ऋ० ४.३८.६) इत्यश्वरश्मेः॥

(३) **गावः**–व्याख्यातः पृथिवीनामसु (१.१)। गच्छन्ति सर्वतस्तमो विहन्तुम्, भौमं रसं वा हर्तुम्, गीयन्ते स्तूयन्ते स्वाभिमतसाधनाद् यजमानैरश्वपालैश्च। 'यत्र गावो भूरिशृङ्गा अयासः' (ऋ० १.१५४.६), 'को अद्य युङ्क्ते धुरि गा ऋतस्य' (ऋ० १.८४.१६) आदित्यरश्मेर्निगमौ। अश्वरश्मेरन्वेषणीयः[3]॥

(४) **रश्मयः**[4]–रशिर्यमनार्थो[5] धातुः[6]। 'नियो मिः' (उ० ४.४४, श्वे० ४७१, द०उ० १.१३) इति विधीयमानो मिप्रत्ययो बाहुलकाद् भवति। रशना रश्मिरिति कतिपयप्रयोगविषय एवायं रशिः[7], घरत्यादिवत्[8], न सर्वत्र, बन्धनप्रतीतेः। बध्नन्त्युदकमथवा बध्यते तैरुदकमश्वो वा। यद्वा 'अशू व्याप्तौ' (स्वा० आ० १८)। 'अशे रश च' (उ० ४.४७, श्वे० ४७३) इति मिप्रत्ययो रशादेशश्च। अश्नुवते सर्वं जगत् अश्वग्रीवादि वा रश्मयः। 'सूर्य्यस्येव रश्मयो द्रावयित्नवो' (ऋ० ९.६९.६), 'वि रश्मयो जनाँ अनु' (ऋ० १.५०.३) इति आदित्यरश्मेर्निगमौ। 'मनः पश्चादनु यच्छन्ति रश्मयः' (ऋ० ६.७५.६), 'ते रश्मिभिस्त ऋक्वभिः सुखादयः' (ऋ० १.८७.६) इति चाश्वरश्मेः॥

(५) **अभीशवः**[9]–अभिपूर्वात् 'अशू व्याप्तौ' (स्वा० आ० १८)

---

१. 'अश्ववालेना०' इति मुद्रितेषु।
२. '०रश्वकिरणाः' इति मुद्रितेषु।
३. मृग्यम्।
४. निरु० २.१५।
५. 'रश्मिर्यमनात्' इति यास्कः (निरु० २.१५)।
६. पाणिनीये धातुपाठे न संगृह्यते।
७. तथा चाह पतञ्जलिः–'रशिरस्मा अविशेषेणोपदिष्टः स राशिः रश्मिः रशना इत्येवं विषयः' (महा० ७.१.९६)।
८. द्र०–महा० ७.१.९६। 'भरत्या०' इति मुद्रितेषु।
९. निघ० २.४, २.५, ५.३। निरु० ३.९, ९.१५।

इत्यस्मात् 'भृमृशीतृचरित्सरितनिधनिमिमस्जिभ्य उः' (उ० १.७, श्वे० ७) इति उप्रत्ययो बाहुलकाद् भवति धात्ववयवस्याकारस्येकारश्च। जस्। अभिव्याप्नुवन्ति जगदश्वग्रीवां वा। यद्वा अभिपूर्वात् 'ईश ऐश्वर्ये' (अदा० आ० १०) इत्यस्मात् पूर्ववदुप्रत्ययः। ईष्टे सूर्यस्तमोऽपहन्तुमेभिः, अश्वपालोऽश्वं बद्धुम्। 'अभीशूनां महिमानं पनायत' (ऋ० ६.७५.६) इत्यश्वरश्मेर्निगमः। आदित्यरश्मेरन्वेषणीयः[1]॥

(६) दीधितयः[2]–एतदादीन्यादित्यरश्मिनामान्येव। 'दीधीङ् दीप्ति-देवनयोः' (अदा० आ० ६९) 'क्तिच्क्तौ च संज्ञायाम्' (अ० ३.३.१७४) इति क्तिचि पृषोदरादित्वादेव (अ० ६.३.१०९) यथाकथञ्चिद् रूपसिद्धिरुन्नेया। धीयन्ते[3] विधीयन्ते प्रेष्यन्ते रसाहरणादिकर्मस्वादित्येन, धार्य्यते वा वर्षार्थमुद-कमेभिरादित्येन। तथा 'अथास्य कर्म रसादानं रश्मिभिश्च रसधारणम्' इति निरुक्तम् (७.११)।

'नवमासधृतं गर्भं भास्करस्य गभस्तिभिः।
पीत्वा रसं समुद्राणां द्यौः प्रसूते रसायनम्'॥

इति श्रीरामायणम् (किष्किन्धा० २८.३)। 'शुचीदयन्दीधितिमुक्थशासः' (ऋ० ४.२.१६) इति निगमः। 'दीधितिं [आदित्य-] रश्मिमित्यर्थः' (मा० सं० १९.६९, उ०भा०) इति वाजसनेयभाष्यकृदुवटोऽभाषयत्॥

(७) गभस्तयः[4]–गोशब्दपूर्वादन्तर्णीतण्यर्थात् 'भस भक्षणदीप्त्योः' (जु० प० १७) इत्यस्मात् पूर्ववत् क्तिचीडभावे च पृषोदरादित्वाद् गोशब्द-स्याकारान्तादेशः। गां भूमिञ्च भासयन्ति दीपयन्ति। यद्वा, गवि संसारे[5] दीप्यन्ते[6]। यद्वा बभस्तिरत्तिकर्मा (निघ० २.८)। गामुदकं भौमरसलक्षणं बभसति अदन्ति। यद्वा 'भसेर्गट् च' इति भोजसूत्रेण (स० क० २.१.१८५) तिप्रत्ययः धातोर्गडागमश्च, बभसति दीप्यन्ते इति गभस्तयः। 'ग्रहेर्गभस्तिः' इति माधवः[7], तदा पूर्वसूत्रेण तिप्रत्यये धातोरसुगागमः, 'हृग्रहोर्भश्छन्दसि' (८.२.३५ वा०) इति निर्वाहः। गृह्णन्ति भौमं रसम्। 'गभस्तिपूतो नृभिरद्रिभिः

---

१. ऋ० ५.४४.४। (अभीशुभिः)।
२. निघ० २.५। निरु० ५.१०।
३. 'दीधीयन्ते' इति स्यात्?
४. निघ० २.४, ५।
५. 'संसर्गे' इत्यपपाठो मुद्रितेषु।
६. 'दीप्यते' इति कोशेषु।
७. मृग्यम्।

सुतः' (ऋ० ९.८६.३४), 'वृष्णो॑ अं॒शुभ्यां॒ गभ॑स्तिपूतः' (मा० सं० ७.१) इति च निगमौ॥

(८) वनम्[1]–'वन षण सम्भक्तौ' भ्वादिः परस्मैपदी (३१३)। 'पुंसि संज्ञायां घः०' (अ० ३.३.११८)[2]। वन्यते सेव्यते शीतादिनिवारणाय। अथवा वनतिर्हिंसार्थः[3]। वन्यते हिंस्यतेऽनेन तमः। यद्वा 'वनु याचने' तनादिरात्मनेभाषा (८)। वन्यते याच्यते वृष्टिप्रदानाय। यद्वा 'वन शब्दे' भ्वादिः परस्मैपदी (३१२)। वन्यते शब्द्यते स्तूयते स्तोतृभिः। 'अ॒बु॒ध्ने राजा॒ वरु॑णो॒ वन॑स्य॒' (ऋ० १.२४.७) इति निगमः। 'वननीयस्य तेजसः' इति माधवः[4]॥

(९) उस्राः[5]–'वस निवासे' (भ्वा० प० ७३१)। 'स्फायितञ्चिवञ्चि०' (उ० २.१३, श्वे० १५९) इत्यादिना रक्, यजादित्वात् (अ० ६.१.१५) सम्प्र-सारणम्, बाहुलकात् 'शासिवसिघसीनाञ्च' (अ० ८.३.६०) इति षत्वाभावः। वसत्येषु परं तेजः, वसन्त्येषु रसा इति वा। यद्वा उत्पूर्वात् 'स्रु गतौ' (भ्वा० प० ६७३) इत्यस्मात् 'उपसर्गे च सञ्ज्ञायाम्' (अ० ३.२.९९) इति जनेर्विधीयमानो डप्रत्ययो बाहुलकाद् भवति, उदोऽन्तलोपश्च। उत्स्रवन्ति एभ्यो रसाः। 'उ॒स्रा इ॑व॒ स्वस॑राणि' (ऋ० १.३.८) इति निगमः॥

(१०) वसवः[6]–'वस निवासे' (भ्वा० प० ७३१), 'वस आच्छादने' (अदा० आ० १३)। 'शृस्वृस्निहित्रप्यसिवसिहनिक्लिदिबन्धिमनिभ्यश्च' (उ० १.१०, श्वे० १०) इति उप्रत्ययः। वसन्ति लोकषु, वसन्त्यत्र रसाः, वसत्यत्र परं तेजः, आच्छादयति वा लोकान् वृष्ट्या, विवासयति वा तमः। 'बहुलमन्यत्रापि सञ्ज्ञाच्छन्दसोः' (उ० २.२३, श्वे० १७१) इति णिलुक्। वासयितारो वा लोकानां वृष्ट्यादिप्रदानेन। 'ज्मया॒ अत्र॒ वस॑वो रन्त दे॒वाः' (ऋ० ७.३९.३), 'सु॒गा वो॑ देवा॒ः सद॑ना अक॑र्म य आ॑ज॒ग्मुः, सव॑नमिदं जुषा॒णाः। ज॒क्षि॒वांस॑ः पपि॒वांस॑श्च॒ विश्व॑स्मै धत्त॒ वसवो॒ वसूनि॒' (तु०–मा० सं० ८.१८)[7], 'हि॒ङ्कृ॒ण्व॒ती व॑सुपत्नी॒ वसू॑नाम्' (ऋ० १.१६४.२७) इति च

---

१. निघ० १.१२। निरु० ८.३।

२. घे यथेष्टस्वरानुपलम्भाद् घन् वा क्युर्वा कल्पनीयः।

३. पाणिनीये धातुपाठे न संगृह्यते।

४. ऋ० १.२४.७ भाष्यम्। मद्रास सं०।

५. निघ० २.११। निरु० ४.१९, ६.१५।

६. निघ० २.१०, ५.६। निरु० ५.१९, १२.४१।

७. अयं पाठो यथानुपूर्वि न क्वचिदुपलभ्यते। तु०-निरु० १२.४२, शौ० सं० ७.९७.३, ४।

निगमाः॥

(११) मरीचिपाः–'मृङ् प्राणत्यागे' (तु० आ० ११३)। 'मृकणिभ्यामीचिः' (उ० ४.७१, श्वे० ४९८) इति ईचिः प्रत्ययः। म्रियते तमोऽस्मिन्निति मरीचिः रश्मिः। अत्र मरीचिशब्देन मरीचिमान् सूर्य उच्यते, मत्वर्थीयस्य लुक् साहचर्याद् भाव्यते, मरीचिमत्सूर्यमण्डलं पान्ति मरीचिपाः, 'आतोऽनुपसर्गे कः' (अ० ३.२.३)। 'दे॒वेभ्य॑स्त्वा मरीचि॒पेभ्य॑ः' (मा० सं० ७.३) इति निगमः॥

(१२) मयूखाः–'डुमिञ् प्रक्षेपणे' (स्वा० उभ० ४)। अस्मात् 'मुहेः खो मूर् च' (उ० ५.२२, श्वे० ६९०)[1] इति विधीयमानः खप्रत्ययो बाहुलकाद् भवति, डयूडागमश्च प्रत्ययस्य बाहुलकादेव। मिन्वन्ति तमः मयूखाः। खप्रत्ययाधिकारे 'मयेरूट् च' इति श्रीभोजदेवः (स० क० २.२.५२)। मयतिर्गत्यर्थः (भ्वा० आ० ३२०)। गच्छन्ति सर्वलोकेषु मयूखाः। 'दा॒धर्थ॑ पृथि॒वीम॒भितो॑ म॒यूखैः॑' (ऋ० ७.९९.३), 'इ॒मे म॒यूखा॒ उप॑सेदुरू॒ सद॑ः' (ऋ० १०.१३०.२) इति च निगमौ॥

(१३) सप्तऋषयः[2]–'सप्त सृप्ता संख्या' (निरु० ४.२६) इत्युक्तेः सृपेर्गत्यर्थात् 'सप्यशूभ्यां तुट् च' (उ० १.१५७, श्वे० १४३) इति सपेर्विधीयमानः कनिन् प्रत्ययस्तुडागमश्च बाहुलकाद् भवति ऋकारस्याकारश्च। षड्भ्यः सकाशात् सृप्ता संख्या सप्त। 'ऋष गतौ' (तु० प० ७), अनेकार्थत्वाद्धातूनां दर्शनार्थः। 'इगुपधात्०' (उ० ४.१२१, श्वे० ५५५) इति इन् प्रत्ययः। ऋषयो द्रष्टारः। सप्तसंख्याकाश्च ते ऋषयो द्रष्टारश्च त्रैलोक्यस्येति सप्तऋषयः। 'ऋत्यकः' (अ० ६.१.१२४) इति प्रकृतिभावः। 'स॒प्त यु॑ञ्जन्ति॒ रथ॒मेक॑चक्र॒म्' (ऋ० १.१६४.२) इत्यत्र 'सप्त आदित्यरश्मयः' (निरु० ४.२६) इति वदन्ति नैरुक्ताः। यद्वा 'षप समवाये' (भ्वा० प० २८४), 'सप्यशूभ्यां तुट् च' (उ० १.१५७, श्वे० १४३) इति कनिन् प्रत्ययस्तुडागमश्च। समवेताः सप्त, ऋषिरपि गत्यर्थ एव [इन्] प्रत्ययः। समवेता गच्छन्ति दिङ्मुखानि सप्तर्षयः। 'यत्रा॑ सप्तऋ॒षीन् प॒र एक॑मा॒हुः' (ऋ० १०.८२.२), 'स॒प्त ऋष॑य॒ः प्रति॑हिता॒ः शरी॑रे' (मा० सं० ३४.५५), 'अत्रा॑सत॒ ऋष॑य॒ः स॒प्त सा॒कम्' (निरु० १२.३८, शौ० सं० १०.८.९) इति निगमाः॥

---

१. 'माङ ऊखो मय च' (उ० ५.२५) इति पञ्चपादिसूत्रेण ऊखप्रत्यये यथेष्टस्वरसिद्धिः। नारायणवृत्तिकृतस्तु 'माङ उखा' (उ० ५.२५) इति सूत्रपाठः। देवराजोऽपि तमेव पाठं बुबुध इति कल्प्यते।

२. निघ० ५.६। निरु० १०.२६, १२.३८।

(१४) साध्याः[१]–'राध साध संसिद्धौ' (स्वा० प० १७)। 'ऋहलोर्ण्यत्' (अ० ३.१.१२४) इति ण्यत् प्रत्ययः, 'कृत्यल्युटो बहुलम्' (अ० ३.३.११३) इति कर्त्तरि भवति। 'रसाहरणादिकं स्वव्यापारं साध्नुवन्ति संसिद्धं कुर्वन्ति'[२] इति स्कन्दस्वामी। 'साध्यन्ते आराध्यन्ते साध्याः' इति क्षीरस्वामी (अमर० १.१.१०)। अत्र यथाप्राप्तो ण्यत्। 'यत्र पूर्वे साध्याः सन्ति देवाः' (ऋ० १.१६४.५०) इति निगमः॥

(१५) सुपर्णाः[३]–सूपसृष्टात् 'पृ पालनपूरणयोः' (क्र्या० प० १८) इत्यस्मात् 'धापॄवस्यस्यज्यतिभ्यो नः' (उ० ३.६, श्वे० २७७) इति नप्रत्ययः। 'पर्णं पततेः पृणातेः प्रीणातेर्वा' इत्यष्टादशाध्यायदृष्टत्वात्[४] पतधातोः बाहुलकात् नप्रत्ययः, तकारस्य रेफादेशश्च। प्रीणातेरीकारस्य अकारादेशः स च पकारात् परः। शोभनं पृणन्ति पालयन्ति जगत् शीतादिनिवारणात्। अथवा पूरयन्ति वा वृष्ट्या, शोभनं पतनं गमनमेषामिति[५] वा, सुष्ठु प्रीणन्ति तर्पयन्ति जगत् वर्षप्रदानेनेति वा सुपर्णाः। यद्वा सुर्मत्वर्थः, भावे च नप्रत्ययः। पतनादिमन्तः सुपर्णाः। तथा च–'बृहद्वदेम विदथे सुवीराः' (ऋ० २.११.२१) इत्यत्र 'वीरवन्तः कल्याणवीरा वा' (निरु० १.७), अष्टादशाध्याये च 'सुपर्णं विप्राः' (ऋ० १०.११४.५) इत्यत्र 'पर्णवन्तं कल्याणपर्णं वा'[६] इति चेति सुर्मत्वर्थे बहुशो दृष्टः। 'यत्रा सुपर्णा अमृतस्य भागम्' (ऋ० १.१६४.२१), 'वयः सुपर्णा उप सेदुरिन्द्रम्' (ऋ० १०.७३.११) इति च निगमौ॥

रश्मीनां प्रायो बहुवचनान्तत्वेन दृष्टत्वात् रश्मिनामाभिप्रायेण बहुवचनान्तानि पठितानि। एवं दिङ्नामस्वपि द्रष्टव्यम्॥

इति पञ्चदश रश्मिनामानि॥ ५॥

आताः (१)। आशाः (२)। उपराः (३)। आष्ठाः (४)। काष्ठाः (५)। व्योम (६)। ककुभः (७)। हरितः (८)। इत्यष्टौ दिङ्नामानि॥ ६॥

---

१. निघ० ५.६। निरु० १२.४०।

२. 'साध्याः'-व्याख्याने (निरु० १२.४०) स्कन्दटीकायामयं पाठो नोपलभ्यते। तत्र 'साधनात् स्वव्यापारस्य। कर्तरि कृत्यप्रत्यय इत्यभिप्रायः' इत्येव पाठो मुद्रिते ग्रन्थे।

३. निघ० १.१४, ५.४। निरु० ३.१२, ४.३, ७.२४।

४. सम्प्रति न दृश्यते।

५. तु०–सुपर्णाः सुपतना आदित्यरश्मयः। निरु० ३.१२, ४.३।

६. सम्प्रति न दृश्यते।

(१) आताः–आङ्पूर्वादततेर्गतिकर्मणः (भ्वा० प० ३१) 'अकर्त्तरि च कारके०' (अ० ३.३.१९) इति घञ्। आभिमुख्येन गम्यन्ते प्राणिभिस्तत्तत्[१] कार्यं प्रति। यद्वा आङ्पूर्वात् तनोतेः 'उपसर्गे च सञ्ज्ञायाम्' (अ० ३.२.९९) इति जनेर्विधीयमानो डप्रत्ययो बहुलवचनाद्[२] भवति। आतताः आताः। 'ऋ॒ञ्जन्त्याता॒ः सुस॑म्मृष्टसः' (ऋ० ३.४३.६), 'उदातै॑र्जिहते बृ॒हद् द्वारो॑' (ऋ० ९.५.५) इति निगमौ॥

(२) आशाः[३]–आङ्पूर्वात् 'शद्लृ शातने' (भ्वा० प० ५९४) इत्ययमत्र गत्यर्थः, अनेकार्थत्वाद् धातूनाम्। पूर्ववड्डः। तं तमर्थं प्रत्यागमनात्। यद्वा आ इत्येषोऽभीत्यस्यार्थे वर्त्तते। 'अशू व्याप्तौ' (स्वा० आ० १८) इत्यस्मात् घञि रूपम्। आशा उपदिशा भवन्त्यभ्यशनात्[४] परस्परं दिग्भिः[५] संव्याप्तेः। 'आ[६] अश्नुवते आशाः' इति क्षीरस्वामी (अमर० १.२.२)। अत्र पचाद्यच् (अ० ३.१.१३४)। 'इन्द्र॒ आशा॑भ्य॒स्परि॑' (ऋ० २.४१.१२) इति निगमः॥

(३) उपराः[७]–उपरमन्ते आस्वभ्राणि प्राणिनो वा स्वस्वव्यापारेभ्यः। पूर्ववद् डः। 'उ॒प॒ह्व॒रे यदुप॑रा॒ अपि॑न्व॒न्' (ऋ० १.६२.६) इति निगमः। 'तम॑स्य पृक्षमुप॑रासु धीमहि॒' (ऋ० १.१२७.५) इत्यत्र दिग्वाची न वेति चिन्त्यम्[८]॥

(४) आष्ठाः–आङ्पूर्वात् तिष्ठतेः (भ्वा० प० ६६२) धातोः 'घञर्थे कविधानं स्थास्नापाव्यधिहनियुध्यर्थम्' (अ० ३.३.५८ म० भा०) इति कप्रत्ययः। सुषामादित्वात् (अ० ८.३.९८) षत्वम्। आ समन्तात् स्थीयते आभिः। निगमोऽन्वेषणीयः[९]॥

(५) काष्ठाः[१०]–'काष्ठा दिशो भवन्ति' (निरु० २.१५) इत्यत्र स्कन्द-

---

१. 'तं तं' इति मुद्रितेषु।
२. 'अन्येष्वपि दृश्यते' (अ० ३.२.१०१) इति वा स्यात्। अपिशब्दस्तत्र सर्वोपाधिव्यभिचारार्थः।
३. निघ० ४.३। निरु० ६.१।
४. द्र०–निरु० ६.१।
५. 'परस्परादिभिः' इति मुद्रितेषु।
६. मुद्रितायाममरकोशटीकायाम् 'आ' नास्ति।
७. निघ० १.१०। निरु० २.२२।
८. 'उपरासु दिक्षु' इति दयानन्दः (ऋ० १.१२७.५)।
९. अयं शब्दो वैदिकवाङ्मये नोपलभ्यते।
१०. निरु० २.१५, ९.२४।

स्वामी–'क्रान्त्वा सर्वमतीत्य स्थिताः आकाशवद् व्यतिरेकपक्षे। अव्यतिरेकेऽपि त एव शब्दादयः सर्वत्र सन्ति संस्थिताश्चेति। उपदिशोऽप्येवमेव। व्यतिरेकेऽपि इतरेतरापेक्षया परत्वापरत्ववत् सर्वत्र व्यवहारास्तित्वम्[१] इति'। क्रान्त्वाशब्दात् पूर्वार्द्धं स्थिताशब्दादुत्तरार्द्धमित्यर्थः। पृषोदरादिः (अ० ६.३.१०९)। वैयाकरणपक्षे तु 'काशृ दीप्तौ' (भ्वा० आ० ४३०)। 'हनिकुषिनीरमिकाशिभ्यः क्थन्' (उ० २.२, श्वे० १४८) इति क्थन् प्रत्ययः। 'तितुत्रतथसिसुसरकसेषु च' (अ० ७.२.९) इति इडभावः। काशन्ते दीप्यन्ते काष्ठाः। 'नरुस्त्वां काष्ठास्वर्वतः' (ऋ० ६.४६.१) इति निगमः॥

(६) **व्योम**[२]–व्याख्यातमन्तरिक्षनामसु (निघ० १.३)। स एवार्थोऽत्रापि। परिवीतो वायुना। 'पर्वमानो हुरित आ विवेश' (ऋ० ८.१०१.१४) इति श्रुतिः। यद्वा विविधमोममन्नमस्मिन् विद्यत इति व्योम। 'ओमानमापो मानुषीरमृक्तम्' (ऋ० ६.५०.७) इत्यत्र 'अञ्जेर्वा ओमन्' इति माधवः[३]। निगमोऽन्वेषणीयः॥

(७) **ककुभः**[४]–'कं स्कुभ्नाति विस्तारयतीति ककुप्' इति क्षीरस्वामी (अमर० १.२.२)। 'ककुप् कुभेरुच्छ्र्यार्थात् उच्छ्रिता इव हि दिशो वृक्षाग्रेषूपलभ्यमानाः'[३] इति माधवः। केन प्रजापतिना विस्तारिता इति वा। सर्वत्र 'क्विब् वचिप्रच्छ्यायतस्तु०'[५] (द० उ० १०.२) इत्यत्र 'प्राक् प्रत्ययनिर्देशादिष्टसिद्धिः'[५] इत्युक्तेः क्विपि पृषोदरादित्वाच्च रूपसिद्धिः। 'यः कुकुभौ निधारुयः' (ऋ० ८.४१.४) इति निगमः॥

(८) **हरितः**[६]–'हृञ् हरणे' भ्वादिः (उभ० ६४०), 'हृ प्रसह्यकरणे' जुहोत्यादिः (प० १५)। 'हसृरुहिपुषिभ्यः०' (द०उ० ६.३) इति इतिः। हरन्ति जिहृति वा आसु स्थिताश्चौरादयो धनादिकम्। 'हरन्त्याभिः'[७] इति क्षीरस्वामी (अमर० १.२.२)। 'पर्वमानो हुरित आ विवेश' (ऋ० ८.१०१.१४) इति निगमः॥ 'वायुरेव दिशो हरित आविष्टे' इत्युपनिषत् (ऐ० आ० २.१)॥

इत्यष्टौ दिङ्नामानि॥ ६॥

---

१. 'व्यवहारोऽस्तित्वम्' इति मुद्रितेषु।
२. निघ० १.३, १२।
३. मृग्यम्।
४. निरु० ७.१२।
५. द्र०–पृ० ८, टि० ३, ४।
६. निघ० १.१३.१५, २.५। निरु० ४.११।
७. 'हरन्त्यनया' इति मुद्रितग्रन्थे (अमर० १.२.२)।

श्यावीं (१)। क्षुपा (२)। शर्वरी (३)। अक्तुः (४)। ऊर्म्यां (५)। राम्यां (६)। यम्या (७)। नम्या (८)। दोषा[1] (९)। नक्ता (१०)। तर्मः (११)। रजः (१२)। असिक्नी (१३)। पयस्वती (१४)। तमस्वती (१५)। घृताची (१६)। शिरिणा (१७)। मोकी (१८)। शोकी (१९)। ऊधः (२०)। पयः (२१)। हिमा (२२)। वस्वी (२३)। इति त्रयोविंशती रात्रिनामानि॥ ७॥

(१) श्यावी[2]–'श्यैङ् गतौ' (भ्वा० आ० ६९०)। 'इण्शीभ्यां वन्' (उ० १.१५२, श्वे० १३८) इति विधीयमानो वन्प्रत्ययो बाहुलकाद् भवति। श्यायते गच्छति[3] स्वाश्रयमिति। श्यावो धूसरारुणो वर्णः, तमःसन्ध्यादि-बन्धात् श्याववर्णा रात्रिः श्यावी, 'अन्यतो ङीष्' (अ० ४.१.४०)। 'श्यावी च यदरुषी च स्वसारौ' (ऋ० ३.५५.११) इति निगमः॥

(२) क्षपा–'क्षप्यते सूर्यचारेण क्षपा'[4] इति क्षीरस्वामी (अमर० १.३.४)। 'क्षप प्रेरणे', 'क्षपि क्षान्त्याम्' इति[5] कथादिषु पठितोऽपि[6] बहुलमे-तन्निदर्शनमित्यस्योदाहरणत्वेन धातुवृत्तौ पठ्यते[7]। 'क्षम्पेः क्षम्पयन्ति क्षान्त्यां प्रेरणे क्षपयेत्' इति दैवम् (दैवश्लोक १३६)। 'क्षपः क्षपयतेर्निशा' इति च माधवः (तु०–पृ० ५१६, ऋ० १.७०.५)। क्षपाशब्दोऽन्तोदात्तो रात्रिनाम, आद्युदात्तस्तु क्षपणवचनः। 'नृणां नर्यो नृतमः क्षपावान्' (ऋ० १०.२९.१) इति निगमः। 'त्वमिदसि क्षपावान्' (ऋ० ८.७१.२) इति क्षपणवचनः॥

(३) शर्वरी–'शॄ हिंसायाम्' (क्र्या० प० १७)। 'कृगृशृवृञ्चतिभ्यः ष्वरच्' (उ० २.१२३, श्वे० २७०)। टित्त्वात्[8] (अ० ४.१.१५) ङीप्।

---

१. अत्राद्युदात्तपाठश्चिन्त्यः संहितासु सर्वत्रान्तोदात्तत्वदर्शनात्। 'दोषावस्तः' इति पदमामन्त्रितत्वादाद्युदात्तं पादादौ। सायणमुद्गलौ (ऋ० १.१.७), भट्टभास्करश्च (तै० १.२.१४.४) न युक्ताः, उवट-महीधरौ (मा०सं० २.२३) तु नायुक्तौ।

२. तु०–निघ० १.१५।

३. 'श्यायन्ते गच्छन्ति अस्यां स्वाश्रयम्' इति स्यात्।

४. 'क्षप्यते क्षपा' इत्येव मुद्रितपाठः।

५. इतः स्थाने 'भीमसेनेन' इति पुरुषकारे।

६. 'कथादिष्वपठितोऽप्ययम्' इति पुरुषकारपाठः।

७. 'क्षप प्रेरणे .... पठ्यते' इति पुरुषकार उद्धृतः (दैव-श्लोक १३६)।

८. देवराजः 'ट्वरच्' इति मन्यते। तथा च दशपाद्यां (८.४७) पाठान्तरं दृश्यते।

शृणाति चेष्टाम्, रात्रौ हि स्वस्वव्यापारेभ्यः उपरमन्ते प्राणिनः, शीर्यन्ते वास्यां प्राणिनो नक्तञ्चरैः। 'अति ष्कन्दन्ति शर्वरीः' (ऋ० ५.५२.३) इति निगमः॥

(४) अक्तुः[१]–'अञ्जू व्यक्तिम्रक्षणकान्तिगतिषु' (रु० प० २०)। 'पः किच्च' (उ० १.७१, श्वे० ६६) इति विधीयमानः तुप्रत्ययः[२] कित्त्वञ्च बाहुलकाद् भवति। 'पाञ्जनृभ्यः क्तुः'[३] (स० क० २.१.६३) इति क्तुरिति श्रीभोजदेवः। 'अनिदिताम्०' (अ० ६.४.२४) इति नलोपः। अज्यते सिच्यतेऽस्यामवश्यायेन जगत्, गच्छति वा प्रतिदिनम् अक्तुः। 'विशामक्तोरुषसः पूर्वहूतौ' (ऋ० ७.३९.२) इति निगमः॥

(५) ऊर्म्या–'ऊर्णुञ् आच्छादने' (अदा० उभ० ३२)। 'ऊर्णोतेर्णुलोपश्च' (उ० १.३०, श्वे० ३०) इति मिप्रत्ययः[४] इति केचित्। 'अर्त्तेरूच्च' (उ० ४.४५, श्वे० ४७२) इति मिप्रत्ययः–इति कमलनयनः। ऊर्मिः तमःसङ्घातः, आच्छादकत्वात् लोकस्य। 'तदर्हति' (अ० ५.१.६२) 'छन्दसि च' (अ० ५.१.६६) इति यत् प्रत्ययः। 'इन्द्राय नक्तमूर्म्याः सुवाचः' (ऋ० ८.९६.१) इति निगमः॥

(६) राम्या–'रमु क्रीडायाम्' (भ्वा० आ० ५९२)। अन्तर्णीतण्यर्थात् प्रोपार्थविशिष्टदस्मात् 'कृत्यल्युटो बहुलम्' (अ० ३.३.११३) इति बहुलवचनात् 'पोरदुपधात्' (अ० ३.१.९८) इति यतं बाधित्वा 'ऋहलोर्ण्यत्' (अ० ३.१.१२४) भवति, 'अचो ञ्णिति' (अ० ७.२.११५) इति वृद्धिः[५]। प्ररमयति भूतानि नक्तञ्चराणि, उपरमयति दिवाचराणि स्वव्यापारेभ्यः। माधवस्तु–'सर्वभूतानि रमयति'। तथा च कौषीतकिः–'ये वै के चानन्दा अन्ने पाने मिथुने रात्र्या एव ते सन्तता अवच्छिन्नाः क्रियन्ते, तेषां रात्रिः कारोतरः' (कौ० ब्रा० २.७)[६] इति। 'अधोरामः सावित्रः' (मा० सं० २९.५८) इत्यत्र 'श्वेतः कृष्णोदरः' इति भाष्यम्[७]। 'रामश्चारौ सितेऽसिते' इति वैजयन्ती (अर्थ-वल्लिङ्गाध्यायः १४)। तस्माद्रामशब्दः कृष्णपर्य्यायः। स्वाश्रये रमते रामः 'ज्वलितिकसन्तेभ्यो णः' (अ० ३.१.१४०)। 'तदर्हति' (अ० ५.१.६२),

---

१. निरु० ५.२८, १२.२३।

२. 'तुन्' प्रकृतः? तुरिष्यते स्वरानुरोधात्।

३. 'पाञ्ज्यर्तिभ्यः कित्' (स० क० २.१.६३) इति मुद्रितपाठः 'तुन्' इति प्रकृतः।

४. बाहुलकादिति शेषः।

५. वस्तुतस्तु 'अत उपधायाः' (अ० ७.२.११६) इति वृद्धिः।

६. ऋ० १.३५.१, पृ० २६६-६७ मद्राससं०।

७. 'अधोदेशे श्वेतः' इति महीधरः।

'छन्दसि च' (अ० ५.१.६६) इति यत्। 'अहश्च कृष्णमहरर्जुनं च' (ऋ० ६.९.१) इति श्रुतिः। यद्वा रमणं रामः। भावे घञ् (अ० ३.३.१८)। स्त्रीभिः सह क्रीडा रामः। 'तत्र साधुः' (अ० ४.४.९८) इति यत्। 'स ईधान उषसो राम्या अनु' (ऋ० २.२.८) इति, 'आविर्धेना अकृणोद्राम्याणाम्' (ऋ० ३.३४.३) इति च निगमौ॥

(७) यम्या–'यम उपरमे' (भ्वा० प० ७१०)। 'अघ्न्यादयश्च' (उ० ४.११३, श्वे० ५४६) इति यक्प्रत्ययान्तो निपात्यते। उपरमयति प्राणिनां चेष्टाः। अथवा 'गदमदचरयमश्चानुपसर्गे' (अ० ३.१.१००) इति यत् कर्त्तरि बाहुलकेन। यद्वा यमनीया उपरमयितव्या आदित्यचारेणेति यथाप्राप्तं यत्। निगमोऽन्वेषणीयः[१]॥

(८) नम्या[२]। **(९) दोषा**[३]। **(१०) नक्ता**[४]। **(११) तमः**[५]। **(१२) रजः**[६]। **(१३) असिक्नी**[७]॥

(१४) पयस्वती[८]–पयोऽस्या अस्तीति। 'अस्मायामेधास्रजो विनिः' (अ० ५.२.१२१)। 'बहुलं छन्दसि' (अ० ५.२.१२२) इत्युक्तेर्मतुपि वत्वे च 'उगितश्च' (अ० ४.१.६) इति ङीप्। 'तसौ मत्वर्थे' (अ० १.४.१९) इति भसञ्ज्ञाविधानाद् रुत्वं न भवति। निगमोऽन्वेषणीयः[९]॥

(१५) तमस्वती–ताम्यन्त्यनेनेति (दि० प० ९२) तमोऽन्धकारः, तेन तद्वती। पूर्ववत् प्रकृत्या। निगमोऽन्वेषणीयः[१०]॥

(१६) घृताची–'घृ क्षरणदीप्त्योः' (जु० प० १४) 'गृ घृ सेचने' (भ्वा० प० ६७१)। 'अञ्जिघृषिभ्यः क्तः' (उ० ३.८९, श्वे० ३५६)

---

१. 'यम्या या सर्वान् प्राणिनो निद्रया नियच्छति सा रात्रिः' (ऋ० भा० ३.५५.११) इति दयानन्दः॥

२. दयानन्द इमानि पदानि रात्रिनामत्वेन व्याचख्यौ। तथा हि–नम्या–ऋ० १.५३.७, दोषा–ऋ० ७.१.६, नक्ता–ऋ० ४.११.१, तमः–ऋ० ५.१४.४, रजः–ऋ० ६.९.१, असिक्नी–ऋ० ७.५.३।

३. निरु० ३.१५।

४. निरु० ८.१०।

५. निरु० २.१६।

६. निघ० ३.३०, ४.१। निरु० २.२, ४.१९, १०.४४, १२.७, १२.२३।

७. निरु० ९.२६।

८. निघ० १.१३। निरु० ५.२।

९. तु०–दयानन्दः–ऋ० २.३.६।

१०. शौ०सं० १९.४७.२।

सेचयत्यनेन भूमिं पर्जन्यः, क्षरति मेघात् दीप्तं वा स्वेन तेजसा देवतात्वादिति घृतमत्रावश्यायलक्षणं जलम्, तदञ्चति। 'ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चां च' (अ० ३.२.५९) इति अञ्चतेर्गत्यर्थात् (भ्वा०प० ११५) क्विनि 'अनिदिताम्०' (अ० ६.४.२४) इति नलोपे, 'अचः' (अ० ६.४.१३८) इत्यकारलोपे, 'चौ' (अ० ६.३.१३८) इति दीर्घे, 'अञ्चतेश्चोपसङ्ख्यानम्' (अ० ४.१.६ वा०) इति ङीप्, घृताचीति। निगमोऽन्वेषणीयः[1]॥

(१७) शिरिणा–शीङः (अदा० आ० २५) अन्तर्णीतण्यर्थात् 'बहुलमन्यत्रापि' (उ० २.५०, श्वे० १९७) इति इनच्प्रत्यये रुडागमो धातोर्ह्रस्वश्च। शाययति प्राणिनः शिरिणा। शाययेरन्त्रिशेति माधवः[2]। 'शिरिणायां चिद्क्तुनामहोभिः' (ऋ० २.१०.३) इति निगमः॥

(१८) मोकी–'मुच्लृ मोक्षणे' (तु० उभ० १३९)। 'इन् सर्वधातुभ्यः' (उ० ४.११९, श्वे० ५५२) इति इनि बाहुलकात् कुत्वम्। 'कृदिकारादक्तिनः' (अ० ४.१.४५ ग०सू०) इति ङीष्[3]। मुञ्चत्यस्यामवश्यायं मध्यमः। मुञ्चन्ति प्राणिनः स्वस्वव्यापारात् मोकः[4]। तदस्यामस्तीति 'छन्दसीवनिपौ च' (अ० ५.२.१०९ वा०) इति मत्वर्थीय ईकारप्रत्ययः[3], व्यत्ययेन (अ० ३.१.८५) हल्ङ्यादिलोपः (अ० ६.१.६६)। 'अनुव्रतं सवितुर्मोक्यागात्' (ऋ० २.३८.३) इति निगमः॥

(१९) शोकी–'शुच शोके' (भ्वा प० १११), ज्वलतिकर्मा (निघ० १.१६) वा। पूर्ववत् प्रक्रिया। शोचन्त्यस्यां विरहिणः। शोकस्तेजोऽस्या अस्तीति वा, 'अग्निना वै तेजसा रात्रिस्तेजस्वती'[5] इति ब्राह्मणम्। निगमोऽन्वेषणीयः[6]॥

(२०) ऊधः[7]–रात्रिनामनिर्वचनार्थं प्रसिद्धं तावदुच्यते। गोरूध उद्धृततरं भवति, प्रसवकाले अङ्गान्तरेभ्य उच्छ्रिततरं भवति। यद्वा उपोन्नद्धमुपरि सृष्टमूर्ध्वमिव केनचित् ततः स्नेहः। रसानुप्रदानसामान्याद् रात्रिरप्यूध उच्यते[8]। यद्वा 'उन्दी क्लेदने' (रु० प० १९)। असुनि (उ० ४.१९०, श्वे०

---

१. दयानन्दः–ऋ० ३.३०.७।

२. मृग्यम्। ३. स्वरः कथम्?

४. 'मोक्' इति मुद्रितेषु। भावे घञ्। अग्रिमे वाक्ये सामान्येन निर्देशस्तदिति।

५. अन्वेषणीयम्?

६. एतत् पदं संहितासु न श्रुतम्।

७. निरु० ६.१९।

८. तु०–निरु० ६.१९ स्कन्दटीका।

६२०) बाहुलकान्नलोपे दकारस्य धत्त्वे दीर्घे च रूपम्। उनत्त्यवश्यायेन भूतानि। 'उनत्त्यूधः' इति क्षीरस्वामी (अमर० २.९.७३)। 'यो अस्मै घ्रंस उत वा य ऊधनि' (ऋ० ५.३४.३), 'ऊधर्न नग्ना जरन्ते' (ऋ० ८.२.१२) इति च निगमौ। ऊधनीत्यत्र छान्दसत्वादनङ् (अ० ७.१.७६)॥

(२१) पयः[१]–व्याख्यातं पयस्वतीत्यत्र (१४), मत्वर्थीयस्य लुक्। निगमोऽन्वेषणीयः[२]॥

(२२) हिमा–'हन्तेर्हि च' (उ० १.१४७, श्वे० १३३) इति मक्-प्रत्ययो हिरादेशश्च। हन्ति (अदा० प० २) पद्मानीति हिमम्, अर्शआदित्वादच् (५.२.१२७)। 'शं भानुना शं हिमा शं घृणेन' (ऋ० १०.३७.१०) इति निगमः॥

(२३) वस्वी–'वस आच्छादने' (अदा० आ० १३)। 'शृस्वृस्निहित्रप्य-सिवसि०' (उ० १.१०, श्वे० १०) इति उप्रत्ययः। वस्ते आच्छादयते लोकमिति अवश्यायस्तमो वा, वसुः[३] तद्वती। 'छन्दसीवनिपौ च' (अ० ५.२.१०९ वा०) इति ईकारः। 'वृषादीनाञ्च' (अ० ६.१.१९७) इत्या-द्युदात्तत्वम्। यद्वा प्रशस्यवचनाद् वसुशब्दात् 'वोतो गुणवचनात्' (अ० ४.१.४४) इति ङीष्, सर्वभूतरमणत्वाद्रात्र्याः प्राशस्त्यम्। निगमोऽन्वेषणीयः[४]॥

इति त्रयोविंशती रात्रिनामानि॥७॥

विभावरी (१)। सूनरी (२)। भास्वती (३)। ओदती (४)। चित्रामघा (५)। अर्जुनी (६)। वाजिनी (७)। वाजिनीवती (८)। सुम्नावरी (९)। अहना (१०)। द्योतना (११)। श्वेत्या (१२)। अरुषी (१३)। सूनृता (१४)। सूनृतावती (१५)। सूनृतावरी (१६)। इति षोडशोषोनामानि॥८॥

---

१. निघ० १.१२, २.७। निरु० २.५।

२. दयानन्दः–यजुः० ८.१६।

३. 'तद्वती वसुः' इति मुद्रिते।

४. 'वस्वी षु ते जरित्रे' (ऋ० ७.२०.१०) इति संभाव्यते सामश्रमिणा। सायणस्तु पदपाठमन्यथा प्रदर्शयामास।

परं तुद्धातोस्तोकस्तु ध्वनिपरिवर्तननियमानप्यतिक्रामति। यतो हि दकारस्थाने नकारादेशो नैव दृश्यते। महर्षिर्यास्को निरुक्ते ५.७ मध्ये तुद्धातोस्तोदशब्दं साधयति। पुनरनेनैव 'तोक'शब्दः कथं सिद्ध्येत् ? एवं सिद्धमेतद् यदत्र प्रवृत्तिनिमित्तं ध्वनिपरिवर्तनं वा न तथा परिपाल्यते।

२. एवं निघण्टौ ३.४.१९ मध्ये गृहनामसु 'दुर्याः' शब्दस्य पाठः क्रियते। अत्राचार्य उवटं पुरस्कृत्य समाचष्टे यद् दुःखेन प्राप्तुं योग्या दुर्या गृहा इति। परं नास्तीदमस्य मौलिकं प्रवृत्तिनिमित्तम्। 'सद्म' 'शर्म' इत्यादिशब्दैरभिधीयमानो गृहः परां स्थितिम्, परां शान्तिं वा प्रदत्ते। कथमसौ स्याद् दुःखयोग्यः? यदि कदापि दुःखेनाप्यसौ प्राप्यते तदापि महाभाष्यकारोक्तवचनानुसारेण कूपखानकवत् सम्प्राप्ते गृहे सर्वं दुःखं प्रघाणिष्यते। एवं तदापि क्षेमङ्करः, प्रियङ्करोऽसौ, न तु दुःखयोग्यः।

अत एव शब्दोऽयं वेदे बहुधा प्रासाद् द्वारार्थकाद् दुर्शब्दात् सिद्धिमर्हति। ऋग्वेदे 'अत्रये शतदुरेषु गातुवित्०' (ऋ० १.५१.३) इत्यादिमन्त्रे शतद्वारवत्सु महत्सु राजगृहेषु उद्गाता साम गायति इति प्रोच्यते। निरुक्ते ८.११ मध्ये द्वार्शब्दश्च निष्पाद्यते। ऋग्वेदे १.५१.१४ मन्त्रे दुर्यो यूपः, अथ च आश्वलायनश्रौतसूत्रे ५.११ मध्ये 'द्वारे हिता' इति विग्रहेण 'द्वार्या स्थूणा' इत्यपि प्रोच्यते। अस्यां दशायां 'प्रशस्ता दुरः=द्वारः सन्ति यत्रे'ति विग्रहेण 'दुर्'शब्दान्मत्वर्थे यत्प्रत्ययेन सिद्धो गृहार्थे दुर्यशब्दः। प्राकृते 'द्वार'शब्दोऽपि लक्षणया गृहं समाचष्टे। यथा हिन्दीभाषायां 'घर-बार' इति युग्मे दृश्यते।

३. महर्षिर्यास्कः कुपानमिति विग्रहेण, कुप्धातोर्वा कूपशब्दं समाचष्टे। एवमत्र जलपानमशोभनं भवति, कुप्यन्ति वात्र जनाः। दुर्गाचार्यस्त्वत्र गण्डस्योपरि पिण्डं स्फोटयन् अस्याशोभनतायाः कारणं ब्रूते-यतो ह्यत्र जलग्रहणाय रज्वादिकं साधनमपेक्ष्यते!!

स्पष्टतो नैतदस्य मौलिकं प्रवृत्तिनिमित्तम्। कोऽपि कूपो यावदधिकं रज्वादिकमपेक्षेत तथापि तं शंसन्त्येव जनाः, अथ च प्रशंसन्त्येव केवलम्!! एवं कूपस्तु वर्तते सूपायनम्!! कोऽपि ह्रदोऽशोभनः स्यात्। परं सामान्यतस्तु ह्रदे गभीरे ह्रदि चावगाढे शंसन्ति कार्यावतरं हि सन्तः!!

अतोऽत्र 'यथोत्तरं मुनीनां प्रामाण्यमिति वचनेन पाणिनिराचार्यस्समीचीनतरं प्रतीयते।' स हि अष्टाध्याय्यां ३.१.११४ सूत्रे 'कुप्य'शब्दं गुप्धातोस्समाचष्टे। यतो हि तत्सुषिरत्वान्मध्ये सङ्गोपितं भवति। एवं कूपोऽपि मध्ये सङ्गोपितत्वात् 'कूप' इत्येवं प्रोच्यत इति वक्तुं शक्नुमः।

परवर्त्यर्थविषयकप्रश्नानां समाधातृ निरुक्तशास्त्रम्—इदं नास्त्यविदितं

शंसिभ्यः क्त्रः' (द०उ० ८.८६) इति क्त्रप्रत्ययः, चित्रम्। मंहतिर्दानकर्मा (निघ० ३.२०), 'घञर्थे कविधानम्०' (अ० ३.३.५८ वा०) इत्यत्र परिगणनस्योपलक्षणार्थत्वात् कप्रत्यये 'अनिदिताम्०' (अ० ६.४.२४) इति नलोपः, पृषोदरादित्वात् (अ० ६.३.१०९) घत्वम्। मह्यते दीयतेऽर्थिभ्यः इति मघं धनम्। चित्रमाश्चर्य्यभूतं धनं यस्या इति चित्रामघा, 'अन्येषामपि दृश्यते' (अ० ६.३.१३७) इति दीर्घः। 'वाजिनीवती सूर्यस्य योषा चित्रामघा' (ऋ० ७.७५.५) इति निगमः॥

(६) अर्जुनी—'अर्ज षर्ज अर्जने' (भ्वा० प० १३४)। अर्जेर्णिलुकि उनन्प्रत्ययः (उ० ३.५९), अर्जयति। यद्वा 'अर्ज गतिस्थानार्जनेषु[१]'। बाहुलकादुनन्। गम्यते तदर्थिभिः तिष्ठति स्वाश्रये। अर्जुनमिति रूपनाम (निघ० ३.७), तच्चात्रादित्यरश्मिसम्बन्धात् श्वेतम्, अर्जुनी श्वेता[२], 'अन्यतो ङीष्' (अ० ४.१.४०)। यद्वा अर्जुन्यो गावः, ता अस्याः सन्ति वाहनत्वेन मत्वर्थीय ईकारः, व्यत्ययेन हल्ङ्यादिलोपः। 'या गोमतीरुषसः सर्ववीरा' (ऋ० १.११३.१८) इति श्रुतिः। 'द्विपच्चतुष्पदर्जुनि' (ऋ० १.४९.३) इति निगमः॥

(७) वाजिनी—वाज इत्यन्ननाम[३] (निघ० २.७), वाजो हविर्लक्षण-मन्नमस्या अस्ति, 'अत इनिठनौ' (अ० ५.२.११५) 'ऋन्नेभ्यो ङीप्' (४.१.५)। यजमानेभ्यो यानि देयान्यन्नानि तैस्तद्वती वा। 'वायविन्द्रश्च चेतथः सुतानां वाजिनीवसू' (ऋ० १.२.५) इति निगमः॥

(८) वाजिनीवती—वाजो बलं[४] वेगो वा तेन तद्वती वाजिनी। कासौ? उषसः स्वभूता। तेन तद्वती वाजिनीवती। यद्वा वाजो हविर्लक्षणम् अन्नाद्यस्या अस्तीति वाजिनी यागसन्ततिः, तद्वती वाजिनीवती। यद्वा वाजमन्नं तद्वती वा वाजिनी। कासौ? अवयवभूतेनान्नेन तद्वती अत्र संहतिः, तया अन्नसंहत्या तद्वती वाजिनीवती। यद्वा द्वावेतौ मत्वर्थीयौ, तयोरेकार्थेनातितरो मत्वर्थीयः अतिशयेनान्नवतीत्यर्थः। 'वाजिनीवतीत्विषा हि सर्वेऽन्नं लभन्ते'[५] इति माधवः।

---

१. पाणिनीये धातुपाठे नोपलभ्यते।

२. अत एव वेदेऽर्जुनशब्दो दिनार्थकोऽपि। द्र०—'अहश्च कृष्णमहरर्जुनं च' (ऋ० ६.९.१) 'शुक्लं दिनम्' इति तस्यार्थः। (सु०)।

३. तु०—'अन्नैरन्नवती' (निरु० ११.२६)। अपि च (१२.६)। यज्ञग्रन्थेषु 'वाजपेय'यज्ञे प्राकृतभाषासु च 'वाजपेयी'नाम्नि जातौ च जीवत्ययमन्नार्थे शब्दः। (सु०)।

४. तु०—'महो वाजेभिर्महद्भिश्च शुष्मैः' (ऋ० ४.२२.३)। (सु०)।

५. मृग्यम्।

'सञ्ज्ञायाम्' (अ० ८.२.११) इति वा 'छन्दसीरः' (अ० ८.२.१५) इति वा मतुपो वत्वम्। 'व्यश्वेभ्यः सुभगे वाजिनीवति' (ऋ० ८.२४.२८), 'अस्मभ्यं वाजिनीवति' (ऋ० ४.५५.९) इति निगमौ॥

(९) सुम्नावरी–सुपूर्वात् 'म्ना अभ्यासे[1]' (भ्वा० प० ६६३) इत्यस्मात् 'उपसर्गे च सञ्ज्ञायाम्' (अ० ३.२.९९) इति जनेर्विधीयमानो डप्रत्ययो बाहुलकाद् भवति। सुष्ठु आम्नायते अभ्यस्यते इति सुम्नं सुखम्, तद्धि सर्वैः सर्वदा ममेदं भूयादित्यभ्यासेन प्रार्थ्यते। तथा च–'सुखं सुम्नातेः, प्रजा वै पशवः सुम्नम्'[2] इति माधवः। तदस्या अस्ति। 'छन्दसीवनिपौ च०' (अ० ५.२.१०९ वा०), 'वनो र च' (अ० ४.१.७) इति ङीब्रौ, 'अन्येषामपि दृश्यते' (अ० ६.३.१३७) इति दीर्घः। सुम्नावतीत्यर्थः। 'सुम्नावरी सूनृता ईरयन्ती' (ऋ० १.११३.१२) इति निगमः।

(१०) अहना–'अहि गतौ,' भ्वादिरात्मनेपदी (४२३), 'अह व्याप्तौ', स्वादिः परस्मैपदी (२७)। 'युच् बहुलम्'[3] (उ० २.७९) इति युच्प्रत्ययः, बहुलवचनात् पूर्वत्र नकारलोपः। अंहते[4] गच्छत्याकाशे प्रतिदिनम्, क्षयं गच्छतीति वा। व्याप्नोति स्वभासा लोकं व्याप्यते वादित्यरश्मिभिः। 'गृहं गृहमहना यात्यच्छा' (ऋ० १.१२३.४) इति निगमः॥

(११) द्योतना–ण्यन्तात् 'द्युत दीप्तौ' (भ्वा० आ० ४९३) इत्यस्मात् 'ण्यासश्रन्थो युच्' (अ० ३.३.१०७) इति बाहुलकात् कर्त्तरि युच् 'णेरनिटि' (अ० ६.४.५१) इति णिलोपः। द्योतयति सर्वान् पदार्थान् प्रकाशकत्वात्। यद्वा केवलात् 'अनुदात्तेतश्च हलादेः' (अ० ३.२.१४९) इति युच्। द्योतते स्वयं द्योतना। 'सिषासन्ती द्योतना शश्वदागात्' (ऋ० १.१२३.४) इति निगमः॥

(१२) श्वेत्या[5]–'श्विता वर्णे' (भ्वा० आ० ४९४)। अघ्न्यादित्वात् (उ० ४.११३) यग् द्रष्टव्यः। श्वेतते श्वेत्या। 'श्विता वर्णे' इति वर्णसामान्यं सामर्थ्यात् शुक्लवर्णे विशेषे[6] पर्य्यवसितं द्रष्टव्यम्, उषसि तथा दर्शनात्। 'रुशद्वत्सा रुशती श्वेत्यागात्' (ऋ० १.११३.२) इति निगमः॥

(१३) अरुषी[7]–'ऋ सृ गतौ' जुहोत्यादिः (प० १६), 'ऋ गति-प्रापणयोः' भ्वादिः (प० ६७०)। 'ऋहनिभ्यामुषन्' (उ० ४.७४), पिप्पल्यादेः

---

१. 'माने' इति मुद्रितेषु। २. मृग्यम्।
३. 'बहुलमन्यत्रापि' इति सूत्रपाठः।
४. 'अहन्ते' इत्यपपाठो मुद्रितेषु।
५. निरु० २.२०। (सु०)।
६. 'शुक्लवर्णेऽपि शेषे' इति मुद्रितेषु।
७. निरु० १२.७। (सु०)।

(४.१.४१ ग० सू०) आकृतिगणत्वादीकारः। इयर्त्ति गच्छति वादित्योदयेनान्तं प्रतिदिनम्, प्रापयति वा स्तोतॄन् ऐश्वर्य्यादि। यद्वा आङ्पूर्वात् 'रुच दीप्तौ०' (भ्वा० आ० ४९८) इत्यस्मात् बाहुलकात् डुषट्[1], टिलोपः, आङो ह्रस्वश्च, आरोचते अरुषी। यद्वा अरुषमिति रूपनाम[2]' (निघ० ३.७), सामर्थ्यादत्र शुक्लविषयम्, शुक्लवर्णा अरुषी। 'अन्यतो ङीष्' (अ० ४.१.४०)। 'अश्वैव चित्रारुषी' (ऋ० ४.५२.२) इति च निगमः॥

(१४) सूनृता, (१५) सूनृतावती, (१६) सूनृतावरी—सुष्ठु ऊन्यते अप्रियैरिति सून्। सुपूर्वात् 'ऊन परिहाणे' (चु० उभ० ३१३) इत्य-स्मात् क्विप्[3]। ऋतमिति सत्यनाम (निरु० ४.१९)। सूंश्च तदृतञ्च सूनृतम्, पृषोदरादित्वात् (अ० ६.३.१०९) नलोपाभावः। प्रियञ्च सत्यञ्च। पूर्वत्र[4] मत्वर्थीयोऽकारः, उत्तरत्र मतुप्, अन्यत्र 'छन्दसीवनिपौ च०' (अ० ५.२.१०९ वा०) इति वनिप्, मतौ वत्वरत्वौ, 'अन्येषामपि दृश्यते' (अ० ६.३.१३७) इति दीर्घः। यद्वा प्रियसत्यरूपा वाचः सूनृता उच्यन्ते। 'सुम्नावरी सूनृता ईरयन्ती' (ऋ० १.११३.१२), 'उदीरय प्रति मा सूनृता उषः' (ऋ० १.४८.२) इत्यादिदर्शनात्, तद्वत्यः सूनृतादयः। दीर्घो नापेक्षणीयः। यद्वा सूनृतेत्यन्ननामसु (निघ० २.७) पाठादन्नम्। सूनृता धननाम माधवपक्षेण[5]। अन्नवत्यो धनवत्यो वा सूनृतादयः। 'रेवत्स्तोत्रे सूनृते जारयन्ती' (ऋ० १.१२४.१०), 'रेवदस्मे व्युच्छ सूनृतावति' (ऋ० १.९२.१४), 'चिकित्वित् सूनृतावरि' (ऋ० ४.५२.४) इति च निगमाः क्रमेण॥

इति षोडशोषोनामानि॥८॥

वस्तोः (१)। द्यौः (२)। भानुः (३)। वासरम् (४)। स्वसराणि (५)। घ्रंसः (६)। घर्मः (७)। घृणः (८)। दिनम् (९)। दिवा (१०)। दिवेदिवे (११)। द्यविद्यवि (१२)। इति द्वादशाहर्नामानि॥९॥

---

१. 'डुषच्' इति मुद्रितेषु।

२. अरुणशब्देन तुलनामर्हत्यसौ शब्दः। लौकिकसंस्कृते तु लक्षणया व्रणितस्य रक्तार्थे शब्दोऽयं प्रयुज्यते। तत्करोति अरुष्करः—द्र०—अ० ३.२.२१। (सु०)।

३. सून्शब्दो न क्वापि दृश्यते। अतस्सुपूर्वस्य ऋतशब्दस्य समासे 'अनृता' शब्दसादृश्येन नकारागमेन साधीयान् सम्प्रवर्ततेऽसौ शब्दः। (सु०)।

४. 'पूर्वम्' इति मुद्रितेषु।

५. मृग्यम्।

(१) वस्तोः[१]–अत्र स्कन्दस्वामी–'वस्तोरितीदृशमेवेदं नाम, न विभक्त्यन्तम्'[२], 'दो॒षाव॑स्तोर्ह॒विष्म॑ती घृ॒ताची॑' (ऋ० ७.१.६), 'दो॒षाव॑स्तो॒र्व-हीयसः प्रपि॒त्वे' (ऋ० १.१०४.१) इति समस्तस्यापि दर्शनात्[३]। 'वस्ते ज्योतिरिति वस्तोः। द्योतत इति द्यौः[४]। एवं सर्वत्र'[५] इति। वस्ते (अदा० आ० १३) आच्छादयतीति ज्योतिः। व्यत्ययेन कर्त्तरि तोसुन् (अ० ३.४.१३)। 'कुह॑ स्विद्दो॒षा कुह॒ वस्तो॑र॒श्विना॑' (ऋ० १०.४०.२) इति निगमः[६]। कुह क्वेति सप्तमीसामानाधिकरण्यात् दोषावस्तोरित्यपि सप्तम्या एवाव्ययलुगध्यवसितः॥

(२) द्यौः–'द्युत दीप्तौ' (भ्वा० आ० ४९३), बाहुलकाद् डोप्रत्ययः (उ० २.६८)। द्योतते किरणसम्बन्धात्। यद्वा 'द्यु अभिगमने' (अदा० प० ३३), 'द्युगमिभ्यां डोः' (स०क० २.१.१५०) इति श्रीभोजदेवः। अभिगच्छन्त्यस्मिन् स्वं स्वमभिमतप्रदेशं प्राणिनः। 'गोतो णित्' (अ० ७.१.९०) इति वृद्धिः। 'मध्य॑ आ॒रोध॑ने दि॒वः' (ऋ० १.१०५.११) इति निगमः॥ केचित् द्युरिति पठन्ति। तदा 'डिच्च' इत्यधिकारे 'द्युद्रुभ्यां च' (स० क० २.१.३४) इति भोजसूत्रेण कुप्रत्ययः[७]। 'द्यु अभिगमने' (अदा० प० ३३)। द्युतेरेव वा 'अश्र्वादयश्च' (उ० ५.२९) इति डुन्प्रत्ययान्तो निपातितो द्रष्टव्यः। उभयत्र पूर्वोक्त एवार्थः। 'द्युभि॑र॒क्तुभि॒ः परि॑पातम॒स्मान्' (ऋ० १.११२.२५), 'त्वम॑ग्ने॒ द्युभि॒स्त्वमा॑शुशु॒क्षणि॒ः' (ऋ० २.१.१) इति निगमौ॥

(३) भानुः–'भा दीप्तौ' (अदा० प० ४४), 'भादाभ्यां नुः' (उ० ३.३२)। भात्यादित्याधिकरणसम्बन्धादेव। 'उद्दे॒व्या उ॒षसो॑ भा॒नुर॑र्त्त' (ऋ० ४.१.१७) इति निगमः। 'रश्मिर्भानुः'[८] इति माधवोक्तमहर्भवितुमर्हति॥

(४) वासरम्–'वस निवासे' (भ्वा० प० ७३१), णिजन्तः शुद्धोऽपि विपूर्वस्यार्थे वर्त्तते। 'अर्त्तिकमिभ्रमिदिविचमिवासिभ्यश्चित्' (उ० ३.१३२) इत्यरच् प्रत्ययः। विवासयति अपनयति शीतादिकम्। यद्वा वसेः स्वार्थे णिचि

---

१. निरु० ३.१५।   २. 'विभक्त्यन्तरम्' इति मुद्रितेषु। द्र०–स्कन्दटीका।

३. 'उभयत्रापि दोषा वस्तोः' इत्यसमस्तं दृश्यते सातवळेकरसंस्करणे। (सु०)।

४. 'द्योतत इति द्यौः' इति वाक्यमेतदत्र त्वप्रासङ्गिकं दृश्यते। अग्रिमे 'द्यौः' पदे तु स्यात्?।

५. निरु० २.२० स्कन्दटीका।

६. निरु० ३.१५ मध्ये मन्त्रोऽयं व्याख्यायते। निरु० ८.९ मध्ये वस्तोरित्यस्य 'वसनाय' इत्यर्थः। (सु०)।

७. 'उप्रत्ययः' इति कोशेषु।   ८. द्र०–ऋ० ३.२२.२ वेङ्कटमाधवभाष्यम्।

अधिकरणेऽरच्। वसत्यस्मिन् सुखेनेति वासरम्। यद्वा 'वासृ दीप्तौ'[१] पूर्वस्मादेव सूत्रादरच्। दीप्यते वासरम्। यद्वा विपूर्वात् सर्त्तेर्गत्यर्थात् पचाद्यचि वीत्यस्यैकारस्याकारः पृषोदरादित्वात्। विविधं सराणि सृतानि विस्तीर्णानीत्यर्थः। 'वासराणि वेसराणि' (निरु० ४.७) इति भाष्ये स्कन्दस्वामी– 'वेसरशब्दस्यायमेकारस्याकारः। सादृश्येन चात्र वर्त्तते। यथा वेसरो निष्पादकगताभ्यां विरुद्धाभ्यां जातिभ्यामश्वत्वजात्या गर्दभत्वजात्या च सम्बन्धः। एवं यावह्नो निष्पादकौ पूर्वभागापरभागौ तद्गताभ्यां विरुद्धाभ्यां शीतोष्णाभ्यां पूर्वभागगतेन शीतेनापरभागगतेन चोष्णेन सम्बन्धाद् वेसरसदृशत्वाद् वासरम्'[२] इति। 'अहानीव सूर्यो वासराणि' (ऋ० ८.४८.७)। अहानीत्यनेन पौनरुक्त्यादन्योऽपि निगमोऽन्वेषणीयः[३]॥

(५) **स्वसराणि**[४]–स्वशब्दे उपपदे सर्त्तेर्गत्यर्थात् (जु० प० १६) पचाद्यच् (अ० ३.१.१३४)। स्वेन आत्मनैव गच्छन्ति[५]। अपि च, स्वरित्यादित्यनाम (निरु० २.१४)। सर्त्तेः 'पुंसि सञ्ज्ञायां घः प्रायेण' (अ० ३.३.११८)। अन्तर्णीतण्यर्थश्चात्र सर्त्तिः। स्वरित्येतस्य रेफलोपः पृषोदरादित्वात् (अ० ६.३.१०९)। आदित्येन सार्यते। स हि स्वोदयास्तमयाभ्यां तानि गमयति। यद्वा सुपूर्वात् 'असु क्षेपणे' (दि० प० ६९) इत्यस्मात् कृदरादित्वादरच् (उ० ५.४१) द्रष्टव्यः। सुष्ठु अस्यन्ते क्षिप्यन्ते सूर्येण स्वोदयास्तमयाभ्याम्, तथा च 'स्वसर इहेत्युपसृष्टात्'[६] इति माधवः। 'उस्रा इव स्वसराणि' (ऋ० १.३.८) इति निगमः॥

(६) **घ्रंसः**[७]–'ग्रह उपादाने' (क्र्या० उभ० ६४) अस्मात् घञि पृषोदरादित्वात् (अ० ६.३.१०९) गकारस्य घकारो नुमागमः[८] हकारस्य सकारः। गृह्यन्तेऽस्मिन् रसा अवश्याया आदित्येन। 'यो अस्मै घ्रंस उत वा य ऊधनि' (ऋ० ५.३४.३) इति निगमः॥

---

१. पाणिनीये धातुपाठे न संगृह्यते।

२. निरु० ४.७ स्कन्दमहेश्वरभाष्यम्। स्वल्पपाठान्तरम्।

३. 'आदित् प्रत्नस्य रेतसो ज्योतिष्पश्यन्ति वासरम्'–ऋ० ८.६.३०। (सु०)।

४. निघण्टौ ३.४ मध्ये गृहार्थकोऽयम्। (सु०)।

५. तु०–निरु० ५.४। (सु०)।

६. मृग्यम्।

७. निरु० ६.४, ६.१९। अत्र निरुक्तकारेण स्वाभाविकग्रसधातोरुपादानेऽपि, देवराजेन ग्रहधातोः स्वीकरणं न तथा समञ्जसम्। (सु०)।

८. 'नुगागमः' इति मुद्रितेषु।

(७) **घर्मः**[१]–'घृ क्षरणदीप्त्योः' (जु० प० १४), 'घर्मः' (उ० १.१४९) इति मप्रत्ययान्तो निपातितः[२]। जिघर्त्ति दीप्यते रश्मिसम्बन्धात्। निगमोऽन्वेषणीयः[३]॥

(८) **घृणः**–जिघर्त्तेः (जु० प० १४) 'इण्सिञ्जिदीङुष्यविभ्यो नक्' (उ० ३.२) इतीणादिभ्यो विधीयमानो नक्प्रत्ययो बाहुलकाद् भवति। पूर्ववदर्थः। 'घृणा वयोऽरुषासः परिग्मन्' (ऋ० ४.४३.६) इति निगमः॥

(९) **दिनम्**–'दो अवखण्डने' (दि० प० ३९), पूर्ववदौणादिके नक्-प्रत्यये बाहुलकात् 'द्यतिस्यतिमास्थाम्०' (अ० ७.४.४०) इतीत्वम्[४]। द्यति तमः दिनम्। 'अधा सूरिभ्यः सुदिना व्युच्छान्' (ऋ० ७.१८.२१) इति निगमः॥

(१०) **दिवा**–द्योतनात्। अव्ययमिदम्। 'दिवाभिपित्वेऽवसागमिष्ठा' (ऋ० ५.७६.२), 'दिवा नक्तमवसा शन्तमेन' (ऋ० ५.७६.३) इति निगमौ॥

(११) **दिवेदिवे**[५]–'दिवु क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिमोद-मदस्वप्नकान्तिगतिषु' (दि० प० १)। 'दिवेर्डिविः' (स० क० २.१.३०५) इत्यधिकरणे डिविप्रत्ययः। दीव्यन्तेऽस्मिन्निति द्यौः। दिव्शब्दात् परस्य सप्तम्या एकवचनस्य 'सुपां सुलुक्०' (अ० ७.१.३९) इत्यादिना शे आदेशः, प्रगृह्यत्वं (अ० १.१.१३) तु व्यत्ययेनात्र न भवति। चतुर्थी वा व्यत्ययेन। ततो वीप्सादिः (अ० ८.१.४), दिवसे दिवसे इत्यर्थः। यथादृष्टं पठितमिदं नाम। 'उप त्वाग्ने दिवेदिवे' (ऋ० १.१.७), 'दिवेदिवे वाममस्मभ्यं सावीः' (ऋ० ६.७१.६) इति च निगमौ॥

(१२) **द्यविद्यवि**–द्योशब्दो व्याख्यातः (२)। सप्तम्येकवचनम्, वीप्सादि पूर्ववत्। 'मिनीमसि द्यविद्यवि' (ऋ० १.२५.१) इति निगमः॥

इति द्वादशाहर्नामानि॥ ९॥

अद्रिः (१)। ग्रावा (२)। गोत्रः (३)। वलः (४)। अश्नः (५)। पुरुभोजाः (६)। वलिशानः (७)। अश्मा

---

१. निघ० ३.१७ यज्ञनामसु। निरु० ६.३२, अथ च निरु० ११.४३ आदित्यार्थे। (सु०)। २. 'निपातः' इति मुद्रितेषु।

३. 'आ सूर्यादभरन् घर्ममेते' ऋ० १०.१८१.३। अथ च १.१८०.४ मन्त्रे दयानन्दः, लौकिकसंस्कृते विरलोऽपि प्राकृतभाषासु 'घाम' इति रूपेण पर्शियनभाषायां च 'गर्म' इति रूपेण जीवत्यसौ शब्दः। (सु०)।

४. द्यतेरिनच् (उ० २.५०) इति साम्प्रतिकाः।

५. निरु० ४.१९।

(८)। पर्वतः (९)। गिरिः (१०)। व्रजः (११)। चरुः (१२)। वराहः (१३)। शम्बरः (१४)। रौहिणः (१५)। रैवतः (१६)। फलिगः (१७)। उपरः (१८)। उपलः (१९)। चमसः (२०)। अहिः (२१)। अभ्रम् (२२)। बलाहकः (२३)। मेघः (२४)। दृतिः (२५)। ओदनः (२६)। वृषन्धिः (२७)। वृत्रः (२८)। असुरः (२९)। कोशः (३०)। इति त्रिंशन्मेघनामानि॥ १०॥

'आ उपर उपल इत्येताभ्यां साधारणानि पर्वतनामभिः' (निरु० २.२१) इत्युक्तेर्मेघनामत्वं पर्वतनामत्वं क्रमेण निरुच्य प्रदर्श्यते।

(१) अद्रिः–'अद भक्षणे' (अदा० प० १)। 'अदिशदिभूशुभिभ्यः क्रिन्' (उ० ४.६६) इति क्रिन् प्रत्ययः[१]। अत्ति हि मेघो वर्षार्थमादित्यरश्मिभिराहृतान् भौमरसान्, अत्ति मेघैरभिवृष्टं जलम्, अद्यते वा प्राणिभिस्तत्प्रभवपदार्थभक्षणं तत्रोपचर्यते, अदन्त्यस्मिन् पदार्थान् मनुष्या इति वा। यद्वा नञ्पूर्वाद् 'दॄ विदारणे' (क्र्या० प० २२) इत्यस्माद् बाहुलकाद् रिन्प्रत्ययः टिलोपश्च। 'अदरणीय[२] इत्यद्रिः पर्वतः'। 'विजयुषा ययथुः सान्वद्रैः' (ऋ० १.११७.१६) इति मेघस्य निगमः। 'नान्तरिक्षं नाद्रयः सोमो अक्षाः' (ऋ० १०.८९.६) इति पर्वतस्य॥

(२) ग्रावा[३]–हन्तेः (अदा० प० २) 'अन्येभ्योऽपि दृश्यन्ते' (अ० ३.२.७५) इति क्वनिप्। पृषोदरादित्वात् (अ० ६.३.१०९) धातोर्ग्रादिशः। हन्यते हि मेघ इन्द्रेण–'अहन्नहिम्' (ऋ० १.३२.१) इति श्रूयते। हन्यतेऽनेन सोमः। यद्वा 'गॄ निगरणे' (तु० प० ११९), 'गॄ शब्दे' (क्र्या० प० २९), 'गृणातिः स्तुतिकर्मा' (निरु० ३.५) एभ्यः पूर्ववत् क्वनिपि आडागमः। दृशिग्रहणात् (अ० ३.२.७५) सर्वं सिद्धम्। गिरत्युदकं वर्षितुम्। अत्र गिरतिरुत्पूर्वस्यार्थे वर्त्तते, समुद्गिरति जलं वृष्टिसमये, समुद्गीर्ण इति वा अन्तरिक्षेण, गृणाति गर्जितलक्षणं शब्दं करोति, स्तूयते वा वर्षार्थिभिरिति ग्रावा मेघः। पर्वतोऽपि इन्द्रेण हन्यते पक्षच्छेदसमये, गिरति मेघैरभिवृष्टं जलमुद्गिरति

१. तु०–निरु० ४.४ अपि वात्तेः स्यात्। (सु०)।
२. निरुक्ते ९.९ मध्ये तु आदरणीयः (आसमन्तात् दरणीयः) इत्येवं विज्ञायते। (सु०)।
३. तु०–निरु० ९.८। (सु०)।

निर्झरजलम्, समुद्गीर्ण इव वा गुहादिगतसिंहादिशब्देन, शब्दकारी, स्तूयते च पदार्थबाहुल्यात् प्राणिभिस्तदाश्रयिभिरिति ग्रावा। 'इन्द्र ग्रावाणो अदितिः सजोषाः' (ऋ० ५.३१.५) इति मेघस्य निगमः। 'ग्रावाणो अप दुच्छुनामप सेधत' (ऋ० १०.१७५.२), 'ग्रावाण उपरेष्वा महीयन्ते' (ऋ० १०.१७५.३) इति पर्वतस्य निगमौ॥

(३) गोत्रः–'गुङ् अव्यक्ते शब्दे' (भ्वा० आ० ६८०)। 'गुधृवीपचिवचियमि-(मनितनि)-सदिक्षदिभ्यस्त्रः' (उ० ४.१६८) इति त्रप्रत्ययः। मेघो गर्जितलक्षणमव्यक्ताक्षरं शब्दं करोति, गूयते शब्द्यते वा–'अहो! अयमतीव घर्मकाले वर्षार्थमागतः' इति। यद्वा गामुदकं रश्मिभिराहृतं वर्षाव्यतिरिक्तेषु त्रायते पालयति। 'आतोऽनुपसर्गे कः' (अ० ३.२.३)। शरदादिषु हि मेघेषु घनीभूतास्तिष्ठन्त्यापः। गां पशुजातिं त्रायते वा वृष्ट्या पानीयप्रदानात्। पर्वतोऽपि निर्झरादिपतनजन्यमव्यक्तं शब्दं करोति, अभिवृष्टमुदकमुदकाधारेषु धारणाद् रक्षति च, गाश्च[1] सुयवसवत्तया गोत्रः[2]। 'गोत्रा शिक्षन् दधीचे मातरिश्वने' (ऋ० १०.४८.२), 'उद्गोत्राणि ससृजे दंसनावान्' (ऋ० ३.३९.४) इति च मेघनिगमौ। 'गोत्रभिदं गोविदं वज्रबाहुम्' (ऋ० १०.१०३.६) इति पर्वतस्य॥

(४) वलः[3]–'वृ आवरणे' (स्वा० उभ० ८)। 'ग्रहवृदृनिश्चिगमश्च' (अ० ३.३.५८) इत्यप्। कपिलकादित्वात्[4] (अ० ८.२.१८ वा०) लत्वम्। यद्वा 'वल संवरणे' (भ्वा० आ० ३३१) अस्मात् 'पुंसि सञ्ज्ञायां घः प्रायेण' (अ० ३.३.११८) इति घः। व्रियतेऽनेन दिश आकाशश्च मेघः, पर्वतेनापि स्वशरीरेण भूमिराकाशश्च संव्रियते। 'अलातृणो वल इन्द्र व्रजो गोः' (ऋ० ३.३०.१०) इति निगमो मेघस्य। 'इन्द्रो वलं रक्षितारं दुघानाम्' (ऋ० १०.६७.६) इति पर्वतस्य॥

(५) अश्नः–'अशू व्याप्तौ' (स्वा० आ० १८), 'अश भोजने' (क्र्या० प० ५४) आभ्याम् 'इण्सिञ्जिदीङुष्यविभ्यो नक्' (उ० ३.२) इति विधीयमानो नक्प्रत्ययो बाहुलकाद् भवति, चुत्वं च न भवति, 'शात्' (अ० ८.४.४३) इति प्रतिषेधात्। उभावपि व्याप्नुत आकाशमश्नीतश्चोदकम्, एको वर्षितव्यमपरो वृष्टम्। अशनेन चात्र तत्स्थत्वं लक्ष्यते। 'अश्नापिनद्धं मधु

१. 'गोश्च' इति मुद्रितेषु।
२. 'गोत्राः' इति मुद्रितेषु।
३. तु०–निरु० ६.२। (सु०)।
४. 'अपि लकादित्वात' इति मुद्रितेषु।

पर्यैपश्यन्' (ऋ० १०.६८.८) इति मेघस्य[१]। [पर्वतस्य] निगमोऽन्वेषणीयः[२]॥

(६) पुरुभोजाः–'भुज पालनाभ्यवहारयोः' (रु० प० १७) इत्यस्मात् 'विदिभुजिभ्यां विश्वे' (उ० ४.२३९) इति विश्वशब्दे उपपदे विहितोऽसु-प्रत्ययः पुरुशब्देऽप्युपपदे बाहुलकात् (अ० ३.३.१) भवति। पुरु बहु प्राणिजातं भुनक्ति पालयति वृष्टिप्रदानेन मेघः, पर्वतो हि दुर्भिक्षादे रक्षति। 'समुद्रः पर्वतो राजा इव दुर्भिक्षनाशकः'[३] इत्युक्तेः। पुरु अभ्यवहरति, सामर्थ्याज्जलमत्र विशेष्यम्, एको वर्षितव्यमपरो हि वृष्टमिति विशेषः। बहुभिर्भुज्यते पाल्यते अभ्यवह्रियते वा। मेघस्य त्विन्द्र आदित्यरश्मयश्च रक्षितारः, पर्वतस्य तत्तद्देशाधिपतयः। मेघः स्ववृष्ट्युदकद्वारेण अभ्यवह्रियते। द्वयोरपि निगमावन्वेषणीयौ[४]॥

(७) वलिशानः–'वल संवरणे' (भ्वा० आ० ३३१), औणादिकः क्विप्। 'ईश ऐश्वर्ये' आदादिकः (आ० १०)। लट् शानच्। संवृण्वन्ना-काशमीष्टे वर्षितुम्, पर्वतोऽपि स्वभोगेन भूमिमाकाशं संवृण्वन्नीष्टे दुर्भिक्षा-देर्मनुष्यादीन् रक्षितुम् वलीशान इति। लोकवेदनिघण्टौ दृष्टान्तात् पृषोदरादित्वात् (अ० ६.३.१०९) ह्रस्वः। निगमावन्वेषणीयौ[५]॥

(८) अश्मा–'अशू व्याप्तौ' (स्वा० आ० १८), 'अश भोजने' (क्र्या० प० ५४)। 'अशिशकिभ्यां छन्दसि' (उ० ४.१४८) इति मनिन्। अश्न इत्यनेन समानार्थः। 'अपावृणोद्दुरो अश्मव्रजानाम्' (ऋ० १०.१३९.६) इति मेघस्य निगमः। 'यो अश्मनोरन्तरग्निं जजान' (ऋ० २.१२.३) इति पर्वतस्य। अत्र स्कन्दस्वामिना मेघत्वेन व्याख्यातम्[६]॥

(९) पर्वतः[७]–'पॄ पालनपूरणयोः' (क्र्या० प० १८)। 'स्नामदिप-द्यर्त्तिपॄशकिभ्यो वनिप्' (उ० ४.११४)। पृणन्ति पालयन्ति अवयविनं पूर्यन्ते वा तेन इति पर्वाणि। यद्वा प्रीणातेर्बाहुलकात् (अ० ३.३.१) वनिपि ईकारस्याकारः, स च पकारात् परः, प्रीणयन्ति स्वाश्रयमिति। पर्वाण्यवयवाः

---

१. मन्त्रोऽयं निरु० १०.१२ मध्ये व्याख्यातः। (सु०)।
२. 'वा' इत्यधिकं मुद्रितेषु।
३. मृग्यम्।
४. पर्वतार्थे ऋ० ८.८८.२, मेघार्थे ऋ० ७.७५.८–अत्र सामश्रमिणा प्रोक्तं यत्–तत्तद् व्याख्यातृभिर्नेत्रयोर्धूलिमुष्टिः प्रक्षिप्तेति नोपलब्धो निगमः देवराजेन। (सु०)।
५. वलिशानशब्दः सम्प्रत्युपलभ्यमाने वैदिकवाङ्मये नोपलभ्यते।
६. द्र०–निरु० ८.२ स्कन्दटीका।
७. तु०–निरु० १.२०, १०.९, ११.३८। (सु०)।

सन्त्यस्य, 'पर्वमरुद्भ्यां तन् वक्तव्यः' (अ० ५.२.१२२ वा०) इति मत्वर्थीयस्तन्प्रत्ययः। मेघस्य पर्वतस्य च देवतात्मकत्वस्य च विद्यमानत्वात् अवयविनि वक्तुं शक्यम्। यद्वा परिदृश्यमानाकारेणापि मेघस्य धूमादिसङ्घातत्वात्, पर्वतस्य च शिलादिमत्त्वादवयवित्वम्। यद्वा 'पर्व पूरणे' (भ्वा० प० ३८५), अस्मात् 'भृमृदृशियजिपर्विपच्यमितमिनमिहर्यिभ्योऽतच्' (उ० ३.११०) इत्यतच् प्रत्ययः। पर्वति पूरयति वर्षेण भूमिं स्वशरीरेणाकाशं वा। पर्वतोऽपि निर्झरनदीप्रवाहादिना भूमिं स्वोन्नत्याकाशञ्च पूरयति। 'नि पर्वता अद्मसदो न सेदुः' (ऋ० ६.३०.३), 'बळित्था पर्वतानाम्' (ऋ० ५.८४.१) इति मेघस्य निगमौ। 'यदद्रयः पर्वताः साकमाशवः' (ऋ० १०.९४.१), 'प्र पर्वतानामुशती उपस्थात्' (ऋ० ३.३३.१) इति च पर्वतस्य॥

(१०) गिरिः[1]–'गॄ निगरणे' (तु० प० ११९), अथवा 'गॄ शब्दे' (क्र्या० प० २९), गृणातिः स्तुतिकर्मा (निरु० ३.५)। किदिति वर्त्तमाने (उ० ४.१४३), 'कॄगॄशॄपॄकुटिभिदिछिदिभ्यश्च इः' (उ० ४.१४४) इति इप्रत्ययः, 'ॠत इद्धातोः' (अ० ७.१.१००) इतीत्वम्, गिरिः। ग्रावेत्यनेन समानार्थः। 'निराविध्यद्गिरिभ्य आ' (ऋ० ८.७७.६)[2], 'गिरेर्भृष्टिर्न भ्राजते तुजा शवः' (ऋ० १.५६.३) इति पर्वतस्य। 'मृगो न भीमः कुचरो गिरिष्ठाः' (ऋ० १.१५४.२) इत्युभयस्य॥

(११) व्रजः–'०व्रज गतौ' (भ्वा० प० १५४)। 'गोचरसञ्चरवहव्रजव्यजापणनिगमाश्च' (अ० ३.३.११९) इति निपातनाद् घः करणाधिकरणयोः, तद्व्यतिरिक्ते कारकेऽपि घो भवति। व्रजत्यन्तरिक्षे[3] व्रजत्यनेनेन्द्र इति वा व्रजो मेघः, मेघवाहनो हीन्द्रः। पर्वतोऽपि पक्षच्छेदात् पूर्वमन्तरिक्षे व्रजति। अथवा स्वशरीरेण भूमिमन्तरिक्षञ्च व्रजति। व्रजन्ति तत्र प्राणिन इति वा। 'अप व्रजमूर्णुथः सप्तास्यम्' (ऋ० १०.४०.८) इति मेघस्य निगमः। 'व्रजं गोमन्तमुशिजो विवव्रुः' (ऋ० ४.१.१५) इति पर्वतस्य॥

(१२) चरुः–'चर गतिभक्षणयोः' (भ्वा० प० ३७५, ३७६)। 'भृमृशीङ्तृचरित्सरितनिधनिमिमस्जिभ्य उः' (उ० १.७) इति उप्रत्ययः। चरन्ति गच्छन्त्यस्मादापो[4] मेघाद्वर्षाकाले, पर्वतानां निर्झरलक्षणाः। चरति[5] जलं

---

१. तु०–निरु० १.२०। (सु०)।

२. 'निराविध्यद्' इत्येव प्रतीकं कोशेषु। अपि द्र०–निरु० ६.३४।

३. तु०–निरु० ६.२। (सु०)।

४. निरु० ६.११। (सु०)।

५. 'चरयन्ति' इत्यपपाठो मुद्रितेषु।

वर्षितव्यमिति चरुर्मेघः, चरन्ति तत्र प्राणिनः, चर्यते भक्ष्यते स्वप्रभवपदार्थरूपेणेति चरुः पर्वतः। 'स नौ वृषन्नमुं चुरुम्' (ऋ० १.७.६) इति मेघस्य निगमः। पर्वतस्यान्वेषणीयः[१]॥

(१३) वराहः–वृणोतेः (स्वा० प० ८)। 'ग्रहवृदृनिश्चिगमश्च' (अ० ३.३.५८) इत्यकारः (अप्), वरशब्दे कर्मण्युपपदे आङ्पूर्वाद्धरतेः 'कर्मण्यण्' (अ० ३.२.१)। वरमुदकमाहरतीति वराहः। वर उदकलक्षण आहारोऽस्येति वा वराहः (निरु० ५.४) आङ्पूर्वाद्धरतेर्घञ्। 'वरमाहारमाहार्षीः'[२] इति च ब्राह्मणम्। पृषोदरादित्वात् (अ० ६.३.१०९) आहारशब्दस्याकाररेफयोर्लोपः। यद्वा वरशब्दे उपपदे हरतेराङ्पूर्वात् 'अन्येष्वपि दृश्यते' (अ० ३.२.१०१) इति बाहुलकाद् डप्रत्ययः। वराहाकारो वा कृष्णो मेघो वराहसादृश्येन वर्त्तते। वरमुत्कृष्टमुदकं वृहति उद्यच्छति वर्षितुम् 'वृहू उद्यमने' (तु० प० ५८)। ...... हन्तेः पूर्ववद् डः। यद्वा वरशब्द उपपदे जुहोतेर्दानार्थात् डः। वरमुदकं ददाति आदत्ते वा वर्षितुमिति वराहो मेघः, पर्वतोऽपि वरमुत्कृष्टं पदार्थमाहारयति प्राणिभिः, पदार्थानां सर्वत्र सौलभ्यादाहारयतीत्युच्यते। वर आहारोऽत्रेति वा। वराहवत् कृष्णवर्ण इति वा। वरं [वरं] मूलं वृहत्युद्यच्छत्यस्मादिति वा[३]। वरं वरमित्यत्रैकस्य वरशब्दस्य निवृत्तिः। वरशब्दाद् वृहेश्च वराह इत्यर्थः। वरमुदकमाददाति, आदीयते च तस्मात् पुरुषैर्वरः पदार्थ उदकमेव वा[४]। 'विध्यद्वराहं तिरो अद्रिमस्ता' (ऋ० १.६१.७), 'वराहमिन्द्र एमुषम्' (ऋ० ८.७७.१०) इति च मेघस्य निगमौ। पर्वतस्यान्वेषणीयः॥

(१४) शम्बरः–'शमु उपशमे' (दि० प० ११) अत्रान्तर्णीतण्यर्थः। 'शमेर्बन्' (उ० ४.९५) इति बन्प्रत्ययः। शमयति नाशयति असुरानिति शम्बो वज्रः। यद्वा शातयतेर्बाहुलकात् बन्प्रत्यये पृषोदरादित्वात् (अ० ६.३.१०९) शमादेशः। शम्बोऽस्य प्रहर्तृत्वेनास्ति। रो मत्वर्थीयः। प्रहरति हि वज्रः इन्द्रप्रेरितो मेघान् पर्वतांश्च[५] पक्षच्छेदसमये। यद्वा सम्पूर्वाद् वृणोतेः (स्वा० प० ८) 'ग्रहवृदृनिश्चिगमश्च' (अ० ३.३.५८) इत्यपि सम्वरः सन्

---

१. अत्र टिप्पण्यां सामश्रमी–'सायणविरोधाशंका न चेदेष एव निगमः-'प्रसूतो भक्षमकरं चरावपि' (ऋ० १०.१६७.४), तेन त्वस्य व्याख्याने वृथैव कष्टकल्पना कृता'। (सु०)। अपि द्र०–दयानन्दः, ऋ० १.७.६ भाष्यम्।

२. मृग्यम्।

३. तु०–निरु० ५.४। तत्रैव स्कन्दटीकापि द्र०।

४. अत्र वरादः–वराहः इति।

५. 'मेघात् पर्वतानाञ्च' इत्यपपाठो मुद्रितेषु।

वर्णव्यत्ययेन शम्बरः। संव्रियते मेघेनाकाशम्, भूमिः पर्वतेन। यद्वा शम्बरमित्युदकनाम (निघ० १.१२), मत्वर्थीयस्य लुक्, उदकमस्यास्तीति [अस्मिन्] वा, उभयत्रापि तुल्यम्। 'उतादर्दर्मन्युना शम्बराणि वि' (ऋ० २.२४.२), 'अधूनोत् काष्ठा अव शम्बरं भेत्' (ऋ० १.५९.६) इति मेघस्य निगमौ। पर्वतस्यान्वेषणीयः॥

(१५) **रौहिणम्**–'रुह बीजजन्मनि०' (भ्वा० प० ५९८)। भावे घञ् (अ० ३.३.१८) रोहः आरोहणम् आदित्यपक्ष्यादीनामस्मिन्नस्तीति। 'अत इनिठनौ' (अ० ५.२.११५), रोहि अन्तरिक्षम्। 'तत्र भवः' (अ० ४.३.५३) इत्यण्, 'इनण्यनपत्ये' (अ० ६.४.१६४) इति प्रकृतिभावः रौहिणः। अन्तरिक्षेण हि गच्छति मेघः, पक्षच्छेदात् पूर्वं पर्वतश्चेति तत्र भव इति वक्तुं शक्यते। यद्वा 'बहुलमन्यत्रापि' (उ० २.५०) इति इनच्प्रत्यये रोहिण इन्द्रः। 'तस्येदम्' (अ० ४.३.१२०) इत्यण् रौहिणः। आरोहति मेघमिन्द्रः स्ववाहनत्वात्, 'तुराषाण्मेघवाहनः' (अमरकोशः १.४४) इति तत्पर्यायेषु पठ्यते। अप्सरोभिः सह रिरंसया पर्वतेष्विन्द्रस्य गमनात् तदीयता। यद्वा उभयत्रापि छेद्यछेदकभावेन सम्बन्धः। तथा च चरकाध्वर्यूणां ब्राह्मणे इतिहासः श्रूयते– 'प्रजापतेर्वा एतज्जयोक्तन्तोकं यत्पर्वतास्ते पक्षिण आसन्, ते यत्र यत्र कामयन्ते तत्परा तमासत, इयं हि शिथिलासीत्, तेषामिन्द्रः पक्षानच्छिनत्, तैरिमा वृहदेति'[1]। 'अहन्नहिमभिनद्रौहिणम्' (ऋ० १.१०३.२), 'यो रौहिणमस्फुरद्वज्रबाहुः' (ऋ० २.१२.१२) इति निगमौ क्रमेण॥

(१६) **रैवतः**–रेवत्यो गावः 'पशवो वै रेवतीः' (तै० सं० १.५.८.२)[2] इति श्रुतेः। 'तस्येदम्' (अ० ४.३.१२०) इत्यण्। मेघो हि सर्वत्र वर्षति यवसं पानीयं च जनयित्वा तदीयो भवति, पर्वतस्तद्वत्तया। यद्वा रयिरस्यास्तीति मतुपि 'रयेर्मतौ बहुलम्' (अ० ६.१.३६ वा०) इति सम्प्रसारणम्, 'सञ्ज्ञायाम्' (अ० ८.२.११) इति वत्वम्, सर्वस्य धनस्येशितृत्वात् रेवान् इन्द्रः, मघवेति हि तस्य नाम, तदीयो रैवतः। पूर्ववत् तदीयत्वं द्रष्टव्यम्। निगमावन्वेषणीयौ[3]॥

(१७) **फलिगः**–प्रतिफलति तत् फलम्। तदस्मिन्नस्तीति फलि स्वच्छमुदकं तद्गच्छत्याधारत्वेन मेघो वर्षिष्यमाणं पर्वतो हि वृष्टमिति

---

१. मृग्यम्।

२. अपि द्र०–मै० सं० ३.९.६। काठ० सं० ७.७।

३. ऋग्वेदे ५.६०.४ मध्ये 'वरा इवेद् रैवतासो हिरण्यैः' इति मन्त्रे पूर्वमन्त्रसम्बन्धाद् रैवतशब्दः पर्वतार्थकः शक्यते भवितुम्। अत एव महाभारते आनर्तदेशे पर्वतविशेषः प्रसिद्धोऽपि। सामान्यतस्तु सुमेरुपर्वताय रैवताद्रिप्रभृतिशब्दाः प्रसिद्धाः। (सु०)।

विशेषः। डप्रकरणे 'अन्येष्वपि दृश्यते' (अ० ३.२.१०१) इति गमेर्डप्रत्ययः, स्वच्छोदकपूर्ण इत्यर्थः। यद्वा फलवत् स्नानपानादिप्रयोजनवत् उदकं फलि, तद्गच्छतीति पूर्ववत्। माधवस्तु–'फलिर्भेदनकर्मापि भिन्दन् गच्छति फलसंयुक्तो गच्छतीति वा'[1] इति निरवोचत्। तस्यायमभिप्रायः प्रायेण मेघो हि वर्षासु ग्रीष्मजन्यं तापं भिन्दन् गच्छति, पर्वतोऽपि स्वभारेण भूमिं भिन्दन्नधोगच्छति, अन्तकाले वा शतधा स्वयमेव भिद्यमानो गच्छति नाशम्। कृषिफलस्य मेघायत्तत्वात् फलसंयुक्तो गच्छति इत्युच्यते। तथा च कालिदासः–'त्वय्यायत्तं कृषिफलमिति भ्रूविकारानभिज्ञैः' इति मेघकाव्यम् (मेघदूतम् १.१६)। पर्वतोऽपि शस्यादिरूढवृक्षादिफलसंयुक्तो गच्छति च फलवत्त्वदशायाम्। फलेर्गमिगाम्यादित्वादिन्, गमेः पूर्ववत् डः (अ० ३.२.१०१) इति च। 'वलं रुरोज फलिगं रवेण' (ऋ० ४.५०.५) इति निगमः॥

(१८) उपरः[2], **(१९) उपलः**–'आ उपर उपल इत्येताभ्यां साधारणानि पर्वतनामभिः' (निरु० २.२१) इत्यादिभाष्यस्य स्कन्दस्वामिग्रन्थः–'आ उपर उपल इति, आङ् [3]अभिविधौ मर्यादायामित्यन्ये, विना उपर उपल इत्येताभ्यां साधारणानीत्यर्थः। आ उपरादिति वक्तव्ये उभयोरुपादानं रलयोरविशेषत्वप्रदर्शनार्थम्। तयोश्चैकनिर्वचनत्वप्रदर्शनार्थमेकयोगक्षेमं चाङ्गीकृत्याह–'उपर उपलो मेघो भवति' (निरु० २.२१) इति। वक्ष्यमाणनिगमापेक्षया उपलशब्दस्य च पाषाणे प्रसिद्धत्वात् 'तेषामुपरः स्थविष्ठो मध्यमः' इति तत्सङ्घातशब्दे पर्वत उपलशब्दवाच्यत्वेन प्रसिद्ध एवेति मेघग्रहणं कृतम्। मर्यादापक्षस्य च मेघग्रहणमेव लिङ्गमिति उत्तराणि मेघस्यैवेति। यदा पर्वतस्तदा उपेत्य रमन्ते ह्यस्मिन् अभ्राणीति, मेघपक्षे आप इति। अभिविधिपक्षे इदं[4] निर्वचनम्[5] इति। जनेर्विधीयमानो डप्रत्ययः (अ० ३.२.१०१) बाहुलकाद्रमेर्भवति[6]। कृदुत्तरपदप्रकृतिस्वरं (अ० ६.२.१३८) बाधित्वा अव्ययपूर्वपदप्रकृतिस्वरत्वम्[7] (अ० ६.२.२)। 'उपरो जलवापनात्'[1]–

---

१. मृग्यम्।

२. निघण्टौ १.६ मध्ये दिङ्नामस्वपि। (सु०)।

३. अभिविधावाङ् इति मननं समीचीनतरम्। अत एव यज्ञेष्वपि 'उपर उपल' इति शब्दाभ्यां सोमपेषणो दृषदुपरिस्थप्रस्तरविशेषः प्रोच्यते। प्राकृतभाषासु च उपलशब्दान् निःसृतः 'ओला' शब्दः प्रस्तरसदृशं मत्वा प्रोच्यते। (सु०)।

४. 'नेदम्' इति मुद्रितेषु।

५. द्र०–निरु० २.२१ स्कन्दटीका। पाठभेदा अपि केचनात्र सन्दर्भे।

६. अपिशब्दः सर्वोपाधिव्यभिचारार्थः (काशिका ३.२.१०१)।

७. इमे शब्दा भट्टभास्करस्य (द्र०–तै०सं० १.३.६ भाष्यम्) भाष्ये व्युत्पादिताः सन्ति।

इति माधवः। वपेः कृदरादित्वात् (उ० ५.४१) अरन् द्रष्टव्यः, सम्प्रसारणं च बाहुलकात्। 'उपरमिव हि नभस्यभ्रं भूमौ पर्वतश्च'[१] इति माधवः। अत्र श्रीभोजः–'वृषिपटिदेविकेविवपिचपिभ्यश्चित्' (स० क० २.३.९६) इत्यलक्प्रत्ययः। व्युत्पत्त्यनवधारणान्नावगृह्यते[२]। मेघनामत्वे तत्र–'एषामुपरा उदायन्' (ऋ० १०.२७.२३) इति निगमः। पर्वतानां चान्वेषणीयः। 'हिरण्यनिर्णिगुपरा न ऋष्टिः' (ऋ० १.१६७.३) इति, अत्र 'उपरा अस्माच्छिला दीर्घाः'[१] इति माधवः॥

(२०) चमसः[३]–'चमु अदने' (भ्वा० प० ३१७), 'अत्यविचमि०' (उ० ३.११७) इत्यादिना असच्॥

(२१) अहिः[४]–'इण् गतौ' (अदा० प० ३८),' 'इन् सर्वधातुभ्यः' (उ० ४.११९) इतीन्प्रत्ययः, गुणायादेशौ, यकारस्य हकारो व्यत्ययेन। एत्यन्तरिक्षे। अयतेरेव गत्यर्थादिन्प्रत्यये पूर्ववद् व्यत्ययः। यद्वा 'अहि गतौ' भौवादिकः (आ० ४२३), इन्प्रत्ययः, बाहुलकान्नलोपः, आगमानित्यत्वाद्वा नुम् न क्रियते। इप्रत्ययाधिकारे श्रीभोजदेवः–'अंहिकुण्ठिकम्पान्नलोपश्च' (स० क० २.१.१५७) इति। यद्वा 'अह व्याप्तौ' स्वादिः (प० २७), इन्, अह्नोति व्याप्नोति आकाशं दिगन्तराणि वा। यद्वा आङ्पूर्वाद्धन्तेः हिंसार्थाद् गत्यर्थाद् वा 'आङि श्रिहनिभ्यां ह्रस्वश्च' (उ० ४.१३९) इति इण्प्रत्ययो डिच्च, आ समन्तात् हन्ति भिनत्ति उष्णम्, आभिमुख्येन हन्ति गच्छत्यन्तरिक्षम्। यद्वा केवलादेव हन्तेर्बाहुलकादिण्प्रत्ययो डिच्च, हिः हन्ता, न हन्ता अहन्ता, अहिः अहिंसक इत्यर्थः, सर्वदा लोकस्य वर्षप्रदत्वात्। माधवेन तु– 'त्वमपामपिधानावृणोरप' (ऋ० १.५१.४) इत्यत्र[५]........वाजसनेये तु 'सोऽग्नीषोमावेवाभिसम्बभूव सर्वा विद्याः सर्वं यशः सर्वमन्नाद्यं सर्वां श्रीम्। स यद्वर्त्तमानः समभवत् तस्माद् वृत्रोऽथ यदपात् समभवत् तस्मादहिः' (श० ब्रा० १.६.३.८,९) इति प्रदर्शितम्। तेन चैतद् युक्तम्। अहिशब्दोऽसुरवाचक आद्युदात्तः[६]। 'यदिन्द्राहन् प्रथमजामहीनाम्' (ऋ० १.३२.४) इति। नदीवचनोऽन्तोदात्तः[६]। 'इन्द्रो दक्षं परि जानादहीनाम्' (ऋ० १०.१३९.६)

---

१. मृग्यम्।

२. इमे शब्दा भट्टभास्करस्य (द्र–तै०सं० १.३.६ भाष्यम्) भाष्ये व्युत्पादिताः सन्ति।

३. चमसः यज्ञपात्रम्, तदाकारेण स्थितत्वात् मेघोऽपि लक्षणया चमसः। सादृश्यं प्रदर्शितम् ऋग्वेदे १०.६८.८, निरुक्ते १०.१२ च। (सु०)।

४. निघण्टौ १.१२ मध्ये उदकनामस्वपि मेघार्थे तुलनीयम्। निरु० १०.४३। (सु०)।

५. अतोऽग्रे कश्चिद् ग्रन्थपातः समजनि।

६. अहिशब्दोऽन्तोदात्तो व्युत्पादितः। केचिद् आद्युदात्तमिच्छन्ति (काशिका ६.२.४८)।

इति। अत्राहिशब्दम्मेघनामत्वेनाभाषयत् स्कन्दस्वामी[१]। 'दासपत्नीरहिगोपा अतिष्ठन्' (ऋ० १.३२.११) इति निगमः॥

(२२) अभ्रम्[२]–'अभ्र गतौ' (भ्वा० प० ३७५), पचाद्यच् (अ० ३.१.१३४) अभ्रत्यन्तरिक्षे। आपो रातीति वा अप्शब्दे कर्मण्युपपदे रातेर्दानार्थात् 'आतोऽनुपसर्गे कः' (अ० ३.२.३), पकारस्य भकारो व्यत्ययेन (अ० ३.१.८५)। न भ्रंस्यन्त्यस्मादापो वर्षासमयादन्यत्रेति वा। यदुक्तं–'न भ्रंस्यन्ति यतस्तेभ्यो जलान्यभ्राणि तान्यतः'[३] इति नञ्पूर्वात् 'भ्रसु भ्रंसु अधःपतने' (दि० प० ११५) इत्यस्मात् 'अन्येष्वपि दृश्यते' (अ० ३.२.१०१) इति डप्रत्ययः। न भ्राजते वा वर्षासु मलिनवर्णत्वात् भ्राजतेः पूर्ववद् डः (अ० ३.२.१०१)। 'प्र णः पिन्व विद्युदभ्रेव रोदसी' (ऋ० ९.७६.३), 'उदभ्राणीव स्तनयन्नियर्त्ति' (ऋ० ६.४४.१२) इति च निगमौ॥

(२३) वलाहकः–वलाकाभिर्हीयते गम्यते इति वलाहकः। वारिवाहको वा, पृषोदरादित्वात् (अ० ६.३.१०९) वर्णागमादिना साधुः। वराहशब्दाद् वा 'सञ्ज्ञायां कन्' (अ० ५.३.७५), रेफस्य लकारः। उक्तार्थो वराहशब्दः (१३), विकृतस्यासाधारणार्थत्वप्रदर्शनाय पुनः पाठः। निगमोऽन्वेषणीयः[४]॥

(२४) मेघः–'मिह सेचने' (भ्वा० प० ७१८), पचाद्यच् (अ० ३.१.१३४), न्यङ्क्वादित्वात् (अ० ७.३.५३) कुत्वम्[५]। मेहति सिञ्चति वर्षेण भूमिं मेघः। 'वृषा वां मेघो वृषणा पीपाय' (ऋ० १.१८१.८), 'अस्मिन् मेघे विद्युत्' इति च निगमौ॥

(२५) दृतिः–'दॄ विदारणे' (क्र्या० प० २२)। 'दृणातेर्ह्रस्वश्च' (उ० ४.१८५) इति तिप्रत्ययः, ह्रस्वविधानसामर्थ्याद् गुणो न भवति। दीर्यते इन्द्रेण, दृतिवत् स्यन्दमानाधारत्वाद्वा। 'दृतिं सु कर्ष विषितं न्यञ्चम्' (ऋ० ५.८३.७), 'ईशानो विसृजा दृतिम्' (तै० सं० २.४.८.२) इति च निगमौ॥

(२६) ओदनः[६]–उदकशब्द उपपदे ददातेः 'कृत्यल्युटो बहुलम्' (अ० ३.३.११३) इति कर्त्तरि ल्युट्। ओदनः उदकदातेत्यर्थः। यद्वा 'उन्दी

---

१. द्र०–स्कन्दस्वामिभाष्यम् (ऋ० १०.१३९.६)।

२. निरु० ५.५। (सु०)।

३. मृग्यम्।

४. सम्प्रत्युपलभ्यमाने वैदिकवाङ्मये नास्ति।

५. निरुक्ते २.२ मध्ये समर्थितोऽसावादेशः। (सु०)।

६. निरु० ६.४४। (सु०)।

क्लेदने' (रु० प० १९), 'उन्देर्नलोपश्च' (उ० २.७७) इति युच्प्रत्ययः, गुणः, उनत्ति वर्षणेन भूमिम्[१] ओदनः। 'धारयत् पक्वमौदनम्' (ऋ० ८.७७.६) इति निगमः॥

(२७) वृषन्धिः-'वृष सेचने' (भ्वा० प० ४६८), 'कनिन् युवृषि०' (उ० १.१५६) इत्यादिना कनिन्, वृषा। शत्रुजयादिसाधनत्वात् कामानां वर्षिता यज्ञः, स निधीयतेऽस्मिन्निन्द्रेण प्रहारकाले 'कर्मण्यधिकरणे च' (अ० ३.३.९३) इति किप्रत्ययः नलोपाभावश्छान्दसः। 'विषन्धिः' इति केषुचित् कोशेषु दृष्टम्। तदा विषं जलं धीयतेऽस्मिन्निति निर्वाहः, मुगागमश्छान्दसः। निगमदर्शनान्निर्णयः। 'वृषा वृषन्धिञ्चतुरश्रिमस्यन्' (ऋ० ४.२२.२) इति मेघनाम न वेति सन्दिग्धम्॥

(२८) वृत्रः[२]-वृणोतेराच्छादनार्थात् (स्वा० प० ८) 'अमिचिमिदिशंसिभ्यः क्त्रन्' (द०उ० ८.८६) इति क्त्रन्प्रत्ययो बाहुलकाद् भवति, आच्छादयति ह्यसौ कृत्स्नं नभः। वर्त्ततेर्वा गतिकर्मणः (निघ० २.१४) 'स्फायितञ्चिवञ्चि०' (उ० २.१३) इत्यादिना रक्प्रत्ययः, गच्छत्यसौ कृत्स्नं नभः। वर्द्धतेर्वा वृद्ध्यर्थात् (भ्वा० आ० ५०९) बाहुलकात् त्रन्, धकारस्य तकारो व्यत्ययेन, वर्धते हि वर्षासु मेघः। ब्राह्मणोक्ता एवामी त्रयोऽप्यर्थाः- 'यदिमांल्लोकानवृणोत् तद् वृत्रस्य वृत्रत्वम्, स इषुमात्रमिषुमात्रं विष्वङ् अवर्द्धत' (तै० सं० २.५.२.२)[३] इति। 'वृत्राय वज्रमीशानः कियेधाः' (ऋ० १.६१.१२), 'अहन्यद् वृत्रन्नर्यं विवेरपः' (ऋ० १०.१४७.१) इति च निगमौ॥

(२९) असुरः-'असु क्षेपणे' (दि० प० ९९), 'असिमसोरुरन्' (उ० १.४२, ४३) इति उरन्प्रत्ययः, अस्यति क्षिपति भूमौ जलम्। यद्वा अस्यते क्षिप्यते स्थाने इन्द्रेण वर्षार्थम्। यद्वा अस्ति (अ० प० ५८) तिष्ठति 'शृस्वृस्निहित्रप्यसिवसि०' (उ० १.१०) इत्यादिना उप्रत्ययः, असुः। शरीरे वसतीत्यसुः[४] प्राणः[५]। 'प्राणा वा आपः' (तै०सं० ३.२.५.२), 'पानीयं प्राणिनां प्राणाः'[६] इत्यादिदर्शनात् असुशब्देनात्र जलमुच्यते। तद्राति, 'आतोऽनुपसर्गे कः' (अ०

---

१. 'वनभूमिम्' इति मुद्रितेषु।

२. निरु० २.१६ मध्ये महता सम्भारेण व्याख्यातोऽयं शब्दः। (सु०)।

३. आनुपूर्वी भिद्यते तैत्तिरीयसंहितायाम्।

४. 'असतीत्यसुः' इति स्यात्?

५. तु०-निरु० ३.८। (सु०)।

६. मृग्यम्।

३.२.३)। यद्वा जलवान् प्राणवान् वा। रो मत्वर्थीयः। यद्वा 'अस गतिदीप्त्यादानेषु' (भ्वा० उभ० ६२५) भौवादिकः स्वरितेत्, पूर्वस्मादेव सूत्रादुरन्। असति गच्छत्यन्तरिक्षे, दीप्यते स्वयम्, आदत्ते वा जलं वर्षितुम्। यद्वा 'षुर ऐश्वर्य्य०' (तुदा० प० ५१), इगुपधलक्षणः कः (अ० ३.१.१३९), सुरतीति सुर ईश्वरः स्वतन्त्र इत्यर्थः, असुरः अनीश्वरः, इन्द्रादिपरतन्त्र इत्यर्थः। 'दिवः श्येनासो असुरस्य नीळयः' (ऋ० १०.९२.६), 'दीर्घाधियो रक्षमाणा असुर्यम्' (ऋ० २.२७.४) इति च निगमौ॥

(३०) कोशः–क्रोशतेः शब्दकर्मणः (भ्वा० प० ५९५) पचाद्यचि (अ० ३.१.१३४) पृषोदरादित्वात् (अ० ६.३.१०९) रेफलोपः, कोशः। मेघो हि गर्जितलक्षणं शब्दं करोति। कुप्यतेर्वा वृद्ध्यर्थात्[1] (दि० प० १२२) अस्मिन्नेवार्थे पकारस्य शकारः[2], इषुमात्रमवद्धतेत्युक्तम् (२८)। क्रोशतिश्छादनार्थ इति माधवः[3], पूर्ववदवच्छादयत्यसौ कृत्स्नं नभः। जलस्य कोशस्थानीयत्वात् कोश इत्यन्ये। यद्वा 'कु शब्दे' (अदा० प० ३५), 'कुदापाभ्यः शः' (स० क० २.३.१३९) इति श्रीभोजदेवः। कौति गर्जितशब्दं करोति कोशः। 'दिव्या न कोशासो अभ्रवर्षाः' (ऋ० ९.८८.६), 'महान्तं कोशमुदचा नि षिञ्च' (ऋ० ५.८३.८) इति च निगमौ॥

इति त्रिंशन्मेघनामानि॥१०॥

श्लोकः (१)। धारा (२)। इळा (३)। गौः (४)। गौरी (५)। गान्धर्वी (६)। गभीरा (७)। गम्भीरा (८)। मन्द्रा (९)। मन्द्राजनी (१०)। वाशी (११)। वाणी (१२)। वाणीची (१३)। वाणः (१४)। पविः (१५)। भारती (१६)। धमनिः (१७)। नाळीः (१८)। मेना (१९)। मेळिः (२०)। सूर्या (२१)। सरस्वती (२२)। निवित् (२३)। स्वाहा (२४)। वग्नुः (२५)। उपब्दिः (२६)। मायुः (२७)।

१. क्रोधार्थो धातुपाठे।

२. निरुक्ते ५.२६ मध्ये सुषिरत्वात् विकुषितत्वादसौ कोषः सन् कोश इति साधुतरा व्युत्पत्तिः। देवराजेन त्वत्र महतो वंशस्तम्बाल्लट्वानुकृष्यते। वैदिकध्वनिशास्त्रे पकारस्य शकारादेशत्वं न क्वापि श्रुतम्। (सु०)।

३. मृगयम्।

13529

काकुत् (२८)। जिह्वा (२९)। घोषः (३०)। स्वरः (३१)। शब्दः (३२)। स्वनः (३३)। ऋक् (३४)। होत्रा (३५)। गीः (३६)। गाथा (३७)। गणः (३८)। धेना (३९)। ग्नाः (४०)। विपा (४१)। नना (४२)। कशा (४३)। धिषणा (४४)। नौः (४५)। अक्षरम् (४६)। मही (४७)। अदितिः (४८)। शची (४९)। वाक् (५०)। अनुष्टुप् (५१)। धेनुः (५२)। वल्गुः (५३)। गल्दा (५४)। सरः (५५)। सुपर्णी (५६)। बेकुरा (५७)। इति सप्तपञ्चाशद्वाङ्नामानि ॥ ११ ॥

'आ उपर उपल इत्येताभ्यां साधारणानि पर्वतनामभिः। वाङ्नामान्युत्तराणि' (निरु० २.२१-२३) इति भाष्ये स्कन्दस्वामी 'उत्तराणि सप्तपञ्चाशत् श्लोकेत्यादीनि वाङ्नामानि। उच्यतेऽनेनेति वागिन्द्रियम्, तत्कार्यः शब्दोऽप्युच्यते इति वाक्[१], उच्यतेऽनया[२] इति वाक्[३], स्तनयित्नुलक्षणा माध्यमिका साप्युच्यते इति वाक्[४], तदधिष्ठात्र्यपि देवता वागिष्यते[५]। सर्वतश्चास्या मेघहेतुत्वात् 'मेघनामभ्य उत्तराणि'[६] इति। स च वाक्शब्दः 'वच परिभाषणे' (अदा० प० ५६) इत्यस्मात् धातोः 'क्विब् वचि०' (उ० २.५८, अ० ३.२.१७८ वा०) इत्यादिना क्विपि दीर्घत्वे सम्प्रसारणाभावे च व्युत्पन्नः॥

(१) श्लोकः[७]–'श्रु श्रवणे' (भ्वा० प० ६७५) 'इण्भीकापाशल्यतिमर्चिभ्यः कन्' (उ० ३.४३) इति कन्प्रत्ययो बाहुलकाद् भवति, गुणः, कपिलकादित्वात् (अ० ८.२.१८ वा०) लत्वम्, श्रूयते इति श्लोकः। यद्वा 'श्लोकृ सङ्घाते' (भ्वा० आ० ६३)) 'पुंसि सञ्ज्ञायां घः०' (अ० ३.३.११८) श्लोक्यते पद्यरूपेण[८] संहन्यते कविभिः श्लोकः। 'पद्ये यशसि च श्लोकः' (अमर० ३.३.२) इत्यमरसिंहः। 'ऋतस्य श्लोको बधिरा ततर्द'

---

१. यथा घोषः स्वरः शब्दः। (सु०)।
२. 'अर्थः' इत्यधिकं मुद्रितेषु।
३. यथा काकुत्, जिह्वा। (सु०)।
४. यथा पविः। (सु०)।
५. यथा अदितिः। (सु०)।
६. द्र०–स्कन्दटीका (निरु० २.२३)।
७. निरुक्तस्तु–श्लोकः शृणोतेः ९.१०, श्रवणीय इत्यर्थः। (सु०)।
८. 'पद्यते रूपेण' इति मुद्रितेषु।

(ऋ० ४.२३.८), 'श्लोको न यातामपि वाजो अस्ति' (ऋ० १०.१२.५) इति निगमौ॥

(२) धारा[१]–'धृञ् धारणे' (भ्वा० उभ० ६४१) 'हेतुमति च' (अ० ३.१.२६) इति णिचि 'एरजण्यन्तानाम्'[२] इत्यस्याप्रापकत्वादेव 'कृत्यल्युटो बहुलम्' (अ० ३.३.११३) इति कर्त्तरि भवति। यद्वा धारेः पचाद्यच् (अ० ३.१.१३४) लोकस्य धारयित्री वर्षप्रदानेन स्वाभिधेयस्य वा। 'तनसहे सुधारा'[३] इत्यत्र धारा वाङ्नाम। 'धारा सुतस्य रोचते' (ऋ० ९.१११.१), 'यः ससाद धारामृतस्य' (ऋ० १.६७.४) इति च निगमौ॥

(३) इळा[४]–'इल क्षेपणे' (तु० प० ६७) इगुपधेभ्यः (अ० ३.१.१३५) कर्त्तरि विधीयमानः कः प्रत्ययो बाहुलकात् (अ० ३.३.१) भवति। क्षिप्यते प्रेर्य्यते उच्चारणकाले प्राणेन, इळा। बह्वृचानां लत्वमुक्तं पूर्वमेव। यद्वा 'ईड स्तुतौ' (अदा० आ० ९), 'ञिइन्धी दीप्तौ' (रु० आ० ११) आभ्यां पूर्ववत् कः (अ० ३.३.१), पृषोदरादिः (अ० ६.३.१०९), ईड्यते[५] स्तूयतेऽनया देवता, ईड्यते वा या स्वयं देवतात्वात्। दीपयति प्रयोक्तारम्, दीप्यते वा स्वेन तेजसा। यद्वा इळेत्यन्ननाम (निघ० ३.७), अकारो मत्वर्थीयः। यजमानानां देयेनान्नेन हविर्लक्षणेन वा तद्वती इळा। 'अभि न इळा यूथस्य माता[६]' (ऋ० ५.४१.१९) इति निगमः॥

(४) गौः–व्याख्याता पृथिवीनामसु[७] (१)। गच्छति यज्ञेष्वाहूता, गीयते स्तूयते वा। 'अयं स शिङ्क्ते येन गौरभीवृता' (ऋ० १.१६४.२९) इति निगमः॥

(५) गौरी–रोचतेर्ज्वलतिकर्मणः (निघ० १.१६)[८]। 'ऋज्रेन्द्राग्र-वज्रविप्रकुब्र०' (उ० २.२९) इत्यादिसूत्रेण रन्प्रत्ययान्तो गौरशब्दो निपातितः, तस्माद्रुचेर्धातोर्गावादेशः, 'षिद्गौरादिभ्यश्च' (अ० ४.१.४१) इति ङीष्।

---

१. निरु० १३.७। (सु०)।

२. द्र०–काशिका (अ० ६.१.१६०)। कैयटस्तु इदं 'वचनमनार्षम्' इत्याह (प्रदीपोद्योतः ३.३.५६)।

३. मृग्यम्।

४. निघ० १.१ पृथिवीनामसु। निघ० २.७ अन्ननामसु। निघ० २.११ गोनामस्वपि। (सु०)।

५. 'ईडति' इत्यपपाठो मुद्रितेषु।

६. निरुक्ते ११.४९ मध्ये व्याख्यायतेऽसौ मन्त्रः। (सु०)।

७. निघ० १.१ तत्रैव निरुक्ते पश्वर्थे दुग्धार्थे अधिषवणचर्मार्थे, श्लेष्मार्थे निरु० ६.२. ११.४२, १२.७, ज्यार्थे, आदित्यार्थे रश्म्यर्थे च। निघ० १.४ साधारणार्थे च। (सु०)।

८. वस्तुतस्तु निरु० ११.४०। (सु०)।

स्वया दीप्त्या ज्वलति वाग्देवतात्वात्। यद्वा 'गुरी उद्यमने' (तु० आ० १०४) अस्मात् रनि[१] पूर्ववन्निपातनादुकारस्यौकारः, 'रो रि' (अ० ८.३.१४) इति रेफलोपः, ङीष्, गुरते उद्यच्छति स्वमभिधेयम्, उद्यमनं चारु प्रकाशनम्। यद्वा 'गुङ् अव्यक्ते शब्दे' (भ्वा० आ० ६८०) इत्यस्मान्निपातनाद् रनि[१] वृद्धिः, गवते गर्जितलक्षणमव्यक्तशब्दं करोतीति गौरी। यद्वा शुक्लवर्णत्वात् गौरी, 'भास्वत्कपर्दां शशिकलामिन्दुकुन्दावदन्ताम्'[२] इत्याचार्याः, 'सर्वशुक्ला सरस्वती'[२] इति च। 'गौरीर्मिमाय सलिलानि तक्षति[३]' (ऋ० १.१६४.४१), 'सोमो गौरी अधिश्रितः' (ऋ० ९.१२.३) इति च निगमौ॥

(६) **गान्धर्वी**–गवि गन् धृञो[४] वः (उ० ५.७८, श्वे० ७४७)। 'धृञ् धारणे' (भ्वा० उभ० ६४१) इत्यस्मात् गोशब्दोपपदाद्[५] वप्रत्ययः, उपपदस्य गनादेशः, गन्धर्वः, गोर्यज्ञस्य धारयितेन्द्रः। भोजस्तु 'गन्धेररक् च' (स० क० २.३.१२५) इति वप्रत्ययोऽधिकृतः धातोररगागमश्च। गन्धयते अर्दयति हिनस्ति देवशत्रूनिति गन्धर्व इन्द्रः। 'गन्ध अर्दने' (चु० आ० १५२) इति धातुश्चुरादिरात्मनेपदी। 'तस्येदम्' (अ० ४.३.१२०) इत्यण्, ङीप् (अ० ४.१.१५), गान्धर्वी। ऐन्द्रीत्यर्थः। तथा च ब्राह्मणम्–'अथ यैन्द्रवायवी तस्यै यदैन्द्रं पदं तेन वाचं कल्पयति, वाग्घ्यैन्द्री' (ऐ० ब्रा० २.२६) इति। यद्वा गन्धर्वा देवानां गायकाः, तेषामियम्। तथा चैतरेयब्राह्मणे–'सोमो वै राजा गन्धर्वेष्वासीत्' (ऐ० ब्रा० १.२७) इत्यस्मिन् खण्डे वाचो गान्धर्वीत्वं स्पष्टमुक्तम्। 'तां गन्धर्वीऽवदद् गर्भे अन्तः' (ऋ० १०.१७७.२) इति श्रुतिः। 'अग्निर्गान्धर्वीं पथ्यामृतस्य' (ऋ० १०.८०.६) इति निगमः॥

(७) **गभीरा**[६], (८) **गम्भीरा**–भियं भीतिं[७] रातीति (अदा० प० ५०) भीरा। 'आतोऽनुपसर्गे कः' (अ० ३.२.३)। गवां भीरा गभीरा गम्भीरा च। पृषोदरादित्वात् (अ० ६.३.१०९) गोशब्दस्य गभावो गम्भावश्च। स्तनयित्नुलक्षणा हि माध्यमिका वाक् श्रूयमाणैव सर्वप्राणिनां भियमादधाति।

---

१. 'इनि' इत्यपपाठो मुद्रितेषु।

२. मृग्यम्।

३. मन्त्रोऽपि व्याख्यायते तत्रैव निरुक्ते (११.४०)। (सु०)।

४. 'धृङः' इति श्वेत०। मुद्रितेषूणादिषु न संगृह्यत इदं सूत्रम्।

५. 'वा' इत्यधिकं कोशेषु।

६. निघ० १.१२ उदकनामसु, निघ० ३.३ महन्नामसु, निघ० ३.३० द्यावापृथिवीनामस्वपि। (सु०)।

७. 'भीयन्ति' इति मुद्रितेषु।

यद्वा उणादौ गभीरादिसूत्रेण (उ० ४.३६) गमेर्धातोरीरन्प्रत्यये नुमागमो मकारस्य [भकारः][1] विकल्पेन [नुमो][1] लोपो निपात्यते। गच्छति यज्ञे, अधिगम्यते वा ज्ञानार्थिभिः। यद्वा 'गाधृ प्रतिष्ठालिप्सयोर्ग्रन्थे च' भौवादिकः (आ० ४), अस्य ह्रस्वत्वं भश्चान्तादेशः, वा च नुम् निपात्यते। प्रतिष्ठिता स्वस्मिन् स्थाने, लिप्स्यते वा प्राणिभिः, ग्रथिता वा गद्यपद्यादिरूपेण गभीरा गम्भीरा। उभयोरपि निगमावन्वेषणीयौ॥

(९) मन्द्रा[2]–'मदि स्तुतिमोदमदस्वप्नकान्तिगतिषु' (भ्वा० आ० १२)। गच्छति स्वाभिधेयं प्राप्नोति, अधिगम्यते वा तदर्थिभिः। 'स मन्द्रया च जिह्वया' (ऋ० ७.१६.९) इति निगमः॥

(१०) मन्द्राजनी–मन्द्रशब्दो व्याख्यातः। 'अज गतिक्षेपणयोः' (भ्वा० प० १३९) ल्युट्। मन्द्रमजनं गमनं क्षेपणं प्रेरणमुच्चारणं वा यस्याः सा मन्द्राजनी, पिप्पल्यादिषु (अ० ४.१.४१ ग० सू०) द्रष्टव्यम्। 'मन्द्राजनी चोदते अन्तरासनि' (ऋ० ९.६९.२) इति निगमः॥

(११) वाशी–'वाशृ शब्दे' दैवादिकः (आ० ५२)। 'वसिवपियजिराजिव्रजिध्वजिसदिहनिकमिवाशिवादिवारिभ्य इञ्' (उ० ४.१२६) कर्मणि कारके वाश्यते[3], वाशिः। 'कृदिकारादक्तिनः' (अ० ४.१.४५ ग० सू०) इति ङीष्, वाशी। 'ते वाशीमन्त इष्मिणो अभीरवो' (ऋ० १.८७.६), 'वाशीभिस्तक्षताश्मन्मयीभिः'[4] (ऋ० १०.१०१.१०) इति च निगमौ॥

(१२) वाणी–'वण शब्दे'[5] (भ्वा० प० ३०३)। बाहुलकादिञ् (उ० ४.१२६) (अ० ३.३.१), ङीष् (अ० ४.१.४५ ग० सू०)। 'वाणीः पुरुहूतं धर्मन्तीः' (ऋ० ३.३०.१०), 'अभिवाणीर्ऋषीणां सप्त नूषत' (ऋ० ९.१०३.३) इति निगमौ॥

(१३) वाणीची–वाणीं स्तुतिरूपां वाचमञ्चति गच्छतीति विगृह्य 'ऋत्विग्०' (अ० ३.२.५९) इत्यादिना क्विनि, नलोपे, 'अचः' (अ० ६.४.१३८) इत्यकारलोपे 'अञ्चतेश्चोपसङ्ख्यानम्' (अ० ४.१.६ वा०) इति ङीप्। 'रथे वाणीच्याहिता' (ऋ० ५.७५.४) इति निगमः॥

---

१. कोष्ठकगतः पाठो नास्ति मुद्रितेषु।

२. निरु० ११.२९–मन्द्रा मदनेत्यर्थः। (सु०)।

३. 'वा दृश्यते' इत्यपपाठो मुद्रितेषु।

४. निरु० ४.१९ मध्ये व्याख्यायतेऽसौ मन्त्रः। (सु०)।

५. वणधातुर्नैवोपलभ्यते वैदिकलौकिकसाहित्ये, ऋते धातुपाठसिद्धान्तकौमुद्याः। अतः ६.२ मध्ये वदधातोः निरुक्तकृतस्साधुतरा व्युत्पत्तिः। (सु०)।

(१४) वाणः–वण्यते शब्द्यते वाणः। 'अकर्तरि च कारके सञ्ज्ञायाम्' (अ० ३.३.१९) इति घञ्। यद्वा वणनं शब्दनं वाणः, भावे घञ् (अ० ३.३.१८), अर्शआदित्वादच् (अ० ५.२.१२७)। स्तुतिमती हि वाक्। 'दीना दक्षा वि दुहन्ति प्र वाणम्' (ऋ० ४.२४.९) इति निगमः॥

(१५) पविः[1]–'पूञ् पवने' (क्र्या० उभ० १०) 'अच इः' (उ० ४.१४०) इति इप्रत्ययः। पुनाति हि वाक्[2]। 'पावका नः सरस्वती' (ऋ० १.३.१०) इति मन्त्रः। पूयते वा सङ्कीर्तनादिना, 'वाचं शौरिकथालापप्रसङ्गे पुनीमहे'[3] इत्युक्तेः। पूयतेऽनयेति वा शुद्धिकरणं हि वाक्। 'पवित्रं हि वाग् विदुषाम्'[3] इति माधवः। 'वाणस्य चोदया पविम्' (ऋ० ९.५०.१) इति निगमः॥

(१६) भारती[4]–'डुभृञ् धारणपोषणयोः' (जु० उभ० ५) 'भृमृदृशियजिपर्विपच्यमितमिनमिहर्यिभ्योऽतच्' (उ० ३.११०)। भरतशब्दात् 'प्रज्ञादिभ्यश्च' (अ० ५.४.३८) इति स्वार्थिकोऽण्, ङीप् (अ० ४.१.१५)। बिभर्त्ति जगद् वर्षप्रदानेन, स्वाभिधेयं वा भ्रियते प्राणिभिः व्यवहारसाधनत्वेन। अथवा अग्निर्भरतः '.........प्राणो भूत्वा हवींषि बिभर्त्ति' (श० ब्रा० १.४.२.२) इति वाजसनेयकम्, तदीया भारती। तथा च 'अग्निर्वाक् भूत्वा मुखं प्राविशत्' इत्युपनिषत् (ऐ० उ० २.४)। अथवा 'भरतः' (निघ० ३.१८) इति ऋत्विङ्नाम, तदीया, स्तुतिसाधनत्वात् भारती। 'आ भारती भारतीभिः सजोषा' (ऋ० ३.४.८) इति निगमः॥

(१७) धमनिः[5]–धमतिर्गतिकर्मा (निघ० २.१४), 'अर्त्तिसृधृधम्यम्यश्यवितृभ्योऽनिः' (उ० २.१०४) इत्यनिप्रत्ययः। गत्यर्था बुद्ध्यर्थाः। गम्यते ज्ञायते अनया अर्थः, ज्ञायते वा विद्वद्भिः साध्वसाधुविभागेन। यद्वा 'धमति' इति वधकर्मस्वपि पठ्यते (निघ० २.१९)। हन्यतेऽनया शापाक्रोशादिरूपयेति। तथा च 'वज्र एव वाक्' इति ब्राह्मणम् (ऐ० ब्रा० २.२१)। 'वाक्सायका वदनान्निःसरन्ति पौरा हताः' इति च महाभारतम्। 'इन्द्रैषितां धमनिं पप्रथन्नि'

---

१. निघ० २.२० वज्रनामसु, निरु० ५.५ रथनेम्यर्थे। (सु०)।

२. सामान्यतो वज्रनिर्घोषार्थे प्रयुज्यते। पवित्रीकरणार्थे पूञ् धातुः पावकादिशब्दे लक्षणया उज्ज्वलार्थकोऽपि 'पावकवर्चाः' आदिषु दृष्टत्वात्। तद्गता वागेवात्र पविः। (सु०)।

३. मृग्यम्।

४ निरु० ८.१३। (सु०)।

५. निरु० ६.२४। (सु०)।

(ऋ० २.११.८) इति निगमः॥

(१८) नाळीः—'नल गन्धे' (भ्वा० प० ५७९) 'वसिवपियजिराजिव्रजि०' (उ० ४.१२६) इत्यादिना विहितः इञ्प्रत्ययो बाहुलकाद् भवति, 'कृदिकारात्०' (अ० ४.१.४५ ग० सू०) इति ङीष्, व्यत्ययेन सोर्विसर्जनीयः। 'गन्ध अर्दने' (चु० आ० १५२) 'अर्द हिंसायाम्' (चु० उभ० २५५) इति पठ्यते। गन्धनं हिंसात्मकं सूचनम्, सूचयति परमर्माणि[1]। 'इ॒यम॑स्य धम्यते ना॒ळीः' (ऋ० १०.१३५.७) इति निगमः॥

(१९) मेना[2]—'मान पूजायाम्' (चु० आ० २७०) इत्यस्मात् 'बहुलमन्यत्रापि' (उ० २.५०) इनच् भवति इति वचनादिनच्, बहुलग्रहणान्नलोपः। पूज्यतेऽनया गुर्वादिरुपदेशवाक्येन[3], पूज्या वा देवतात्वात्। 'आन्मेनाँ कृ॒ण्वन्न॑च्यु॒तो भुव॒द्गोः' (ऋ० १०.१११.३) इति निगमः। 'मेनां गर्जितशब्दम्'[4] इति माधवः॥

(२०) मेळिः—सम्पर्कार्थो धातुः (तु० प० ७३)। पूर्ववत् बाहुलकादिञ्। सम्पृक्ता ह्यर्थेन वाक्। तथा च—'वागर्थाविव सम्पृक्तौ' (रघुवंश १.१) इति कालिदासः। 'मे॒ळिं मद॑न्तं पि॒त्रोरु॒पस्थे॑' (ऋ० ३.२६.९) इति निगमः। मत्वर्थीयस्य लुकि वाग्मिनमित्यर्थः। 'मेळिः स्यात् त्राणयोजनात्'[5] इति माधवः॥

(२१) सूर्या[6]—सरतेर्गत्यर्थात् (भ्वा०प० ६६९), सुवतेर्वा प्रेरणार्थात् (तु० प० ११७) 'राजसूयसूर्य०' (अ० ३.१.११४) इत्यादिना निपातनात् क्यपि सरतेरूत्वं सुवतेर्वा रुडागमः। सरति गच्छति स्तोतॄन् प्रति कर्णशष्कुलिं वा, सुवति प्रेरयति चोदनारूपा पुरुषादीनिदं कुर्विति। यद्वा सुपूर्वादीरतेः 'कृत्यल्युटो बहुलम्' (अ० ३.३.११३) इति कर्मणि क्यपि निपातनाद्रूपसिद्धिः। सुष्ठु ईर्य्यते उच्चार्य्यते इति सूर्य्या। यद्वा 'षू प्रेरणे' (तु० प० ११७) 'सुसूधीगृधिभ्यः क्रन्' (उ० २.२५) इति क्रन्प्रत्ययः। प्रेर्य्यते उच्चारणकाले प्राणेन सूरा, 'छन्दसि स्वार्थे'[7] इति यत्प्रत्ययः, सूर्य्या। यद्वा सूरयो मेधाविनः,

---

१. 'परमर्हाणि' इति मुद्रितेषु।
२. निरु० ३.२१ स्त्रीनामार्थे। (सु०)।
३. उपदिशतु मां भवानित्याद्याकारकेण? उपस्थानवाक्येन?
४. द्र०—वेङ्कटमाधवभाष्यम् (ऋ० १०.१११.३)।
५. मृग्यम्। 'वाचोमिश्रयितारम्' इति वेङ्कटमाधवः।
६. निरु० ११.४८। (सु०)।
७. स्वार्थविज्ञानात् सिद्धम् (महाभाष्यम् ४.४.१४०)।

तानर्हति 'छन्दसि च' (अ० ५.१.६६) इति यत्प्रत्ययः। यद्वा सूरिषु साधुः 'तत्र साधुः' (अ० ४.४.९८) इति यत्। निगमोऽन्वेषणीयः॥

(२२) **सरस्वती**[1]–सरतेरसुन् (उ० ४.१९०) सरः। गद्यपद्यादिरूपेण प्रसरणमस्या अस्तीति 'अस्मायामेधास्रजो विनिः' (अ० ५.२.१२१) 'बहुलं छन्दसि' (अ० ५.२.१२२) इत्युक्ते मतुपि, ङीष्। यद्वा सर इत्युदकनाम (निघ० १.१२) सरतेः, तद्वती वृष्ट्यधिदेवतात्वादुदकवती हि माध्यमिका वाक्। सैव चासीन्नदी सरस्वती। तदुक्तं भाष्यकारेण–'तत्र सरस्वतीत्येतस्य नदीवत् देवतावच्च निगमा भवन्ति' (निरु० २.२३) इत्यादिना। 'पा॒व॒का नः॒ सर॑स्वती'[2] (ऋ० १.३.१०) इति निगमो देवतायाः। 'इ॒यं शुष्मे॑भिः' (ऋ० ६.६१.२) इत्येषा नद्याः॥

(२३) **निवित्**–'विद ज्ञाने' (अदा० प० ५७), निपूर्वः [अन्तर्णीतण्यर्थः] 'सत्सूद्विषद्रुहदुह०' (अ० ३.२.६१) इत्यादिना क्विपि, नितरां वेदयति ज्ञापयति स्वमभिधेयम्। 'तान् पूर्व॑या नि॒विदा॑ हूमहे व॒यम्' (ऋ० १.८९.३) इति निगमः॥

(२४) **स्वाहा**–यस्य नाम्नो यादृङ्निर्वचनं दृष्टं तत्सर्वं तद्रूपेणैव लिख्यते। अत्र निरुक्तम्–'स्वाहेत्येतत् सु आहेति[3] वा स्वा वागाहेति वा स्वं प्राहेति वा स्वाहुतं हविर्जुहोतीति वा' (निरु० ८.२०) इति। अस्य स्कन्दस्वामी–'स्वाहेत्येतत् स्वाहाकृतिशब्दस्य पूर्वपदं स्वाहाकारान्तो होममन्त्राणां कर्त्तव्यः, 'न ह वै ता आहुतयो देवान् गच्छन्ति या अवषट्कृता वा अस्वाहाकृता वा भवन्ति' (कौ० ब्रा० १२.४) इति श्रुतिः। स्वाहाकारस्य सम्प्रदानत्वेन मन्त्रान्तेऽवश्यम्भावित्वाद् अयमर्थः-यस्यान्ते श्रूयते स होममन्त्रः शोभनमर्थमाह। अथवा प्रजापतेः स्वा आत्मीया वागाहेति स्वाहा। एवं हि श्रूयते–'स्वा ह्येनं वागभ्यवदत् तत् स्वाहाकारस्य जन्म' (मै० सं० १.८.१) इति। एवमिति[4] स्वाहाकाररूपा वाक् प्रजापतिसृष्टेत्यर्थः। अथवा स्वं प्राहेति यजमानस्य स्वं हविः देवतायै दत्तं तदुद्देशेन त्यागात्, तस्य यजमानस्येत्येवं प्राहेति स्वाहा। सम्प्रदानत्वं स्वाहाकारस्य स्पष्टमनेन प्रकारेण प्रदर्शितं भवति। स्वाहुतमित्यादि। अथवा यदनेन स्वाहाकारेण जुहोति तदेव सुष्ठु मर्य्यादया

---

१. निघ० १.१३। नदीनामसु, निरु० ९.२६। (सु०)।

२. व्याख्यायतेऽसौ मन्त्रः निरु० ११.२७। (सु०)।

३. अथर्ववेदे ८.८.२४ मन्त्रे 'स्वाहै॒भ्यो दु॒राहा॒मीभ्यः॑' इत्यत्र स्वाहाशब्दप्रतिलोमस्य दुराहाशब्दस्य पाठात् व्युत्पत्तिरेषा वेदेन समर्थितेति प्रतीमः। (सु०)।

४. 'स्वाहा। एवं एवमिति' इति नास्ति कोशेषु।

जुहोतीति। एवञ्च सति पूर्वकाणि निर्वचनानि ब्रूतेः, इदन्तु जुहोतेरिति'।[१] अत्र भास्करमिश्रः-'स्वयं सरस्वती आह ब्रूते'।'स्वैव ते वागित्यब्रवीत्' (तै० ब्रा० २.१.२,३) इति ब्राह्मणम्। स्वयमेवाहेत्यस्यार्थस्य द्योतकोऽयं निपातः' (तै०सं० १.१.३.१ भट्टभास्करभाष्ये)। प्रदेशान्तरेऽपि विभक्त्यन्तसमुदायात्मनिपातः स्वाहेति। संस्कारविशेषानवधारणान्नावगृह्यते। अत्र क्षीरस्वामी-'सुष्ठु आहूयते[२] स्वाहा' (अमर० २.७.२१ क्षीर०)। अत्र स्वाहाशब्दो नाव्ययम् अप्यग्निजायावाचित्वमित्यर्थः। भाष्ये तु स्वाहाशब्दस्य वाङ्नामत्वेनाभिव्यक्तेर्दृष्टानि निर्वचनानि लिखितानि, तेषु यच्चोच्छ्रितं तद् गृह्णन्तु विद्वांसः। तस्याः वाचः सृष्टौ पृथिवी चाग्निश्चेति। वाचोऽग्नेश्च कारणकार्य्यभावः श्रूयते-'अग्निर्वाग् भूत्वा मुखं प्राविशत्' (ऐ० उ० २.४) इति। तस्मादग्नेर्वाचश्च सम्बन्धात् अग्नायी स्वाहा वागित्युच्यते। वाति वातात्मत्वेन वागुच्यते[३] इति सन्देहः। निगमः सुलभः स्वाहाकारपक्षे, अन्यत्रान्वेषणीयः॥

(२५) वग्नुः-'वच [परि]-भाषणे' (अदा० प० ५६), 'वचेर्गश्च' (उ० ३.३३) इति नुप्रत्ययः, चकारस्य गकारश्च। वग्नुः वाचा समानोऽर्थः। 'वग्नुमियर्त्ति यं विदे' (ऋ० ९.१४.६), 'इन्द्रस्येव वग्नुरा शृण्व आजौ' (ऋ० ९.९७.१३) इति च निगमौ॥

(२६) उपब्दिः-उपपूर्वात् पदेर्गत्यर्थात् (दि० आ० ५८) 'इन् सर्वधातुभ्यः' (उ० ४.११९) इतीन्प्रत्ययो बाहुलकादुपधालोपः, 'न पदान्तद्विर्वचन०' (अ० १.१.५८) इत्यनेन जश्विधिं प्रति स्थानिवद्भावनिषेधात् 'झलां जश् झशि' (अ० ८.४.५२) इति पकारस्य बकारः। उप समीपे भक्तानां गच्छति, उप आचार्य्यसमीपे गम्यते इति वा। यद्वा उपपूर्वात् ददातेः (जु० उभ० ९), द्यतेः (दि० प० ३९), दयतेः (भ्वा० आ० ६८९) वा 'कृत्यल्युटो बहुलम्' (अ० ३.३.११३) इति बहुलवचनात् 'उपसर्गे घोः किः' (अ० ३.३.९२) इति किप्रत्ययः कर्त्तरि भवति बकारश्चोपजनः। उपेत्य ददातीत्यभिलषितं प्रयोक्तृणाम्, खण्डयत्यज्ञानं तर्कादिसमये प्रतिवादिनां वा, रक्षति भक्तानिति वा उपब्दिः। 'आघोषयन्तः पृथिवीमुपब्दिभिः' (ऋ० १०.९४.४), 'उपब्दिरिर्यर्त्ति सोमः' (ऋ० ९.८८.५), 'शृण्व आयतामुपब्दिः' (ऋ० १.१६९.७) इति निगमाः॥

---

१. द्र०-स्कन्दटीका (निरु० ८.२०)।

२. 'आह्वयति' इति मुद्रितेषु।

३. तै० ब्रा० १.८.८.१।

(२७) मायुः–'डुमिञ् प्रक्षेपणे' (स्वा० उभ० ४)। 'कृवापाजिमिस्वदिसाध्यशूभ्य उण्' (उ० १.१), 'मीनातिमिनोतिदीङां ल्यपि च' (अ० ६.१.४९) इत्यात्वम्, 'आतो युक् चिण्कृतोः' (अ० ७.३.३३) इति युक्। क्षिप्यते प्रेर्य्यते उच्चार्य्यत इति मायुः, प्रक्षिपति वृष्ट्युदकं भूमाविति वा। 'मिमाति मायुं ध्वसनावधिश्रिता' (ऋ० १.१६४.२९) इति निगमः[1]॥

(२८) काकुत्[2]–'कै गै रै शब्दे' (भ्वा० प० ६५३)। सम्पदादित्वात् (अ० ३.३.९४ वा०) क्विप्। कानं शब्दनं करोतीति काकुत्, मृगय्वादित्वात् कुः (उ० १.३७)। बाहुलकात् तकार उपजनः। यद्वा 'कक वक लौल्ये' (भ्वा० आ० ७१), 'मृग्रोरुतिः' (उ० १.९४, श्वेत० ९२) इत्येष बाहुलकात् (अ० ३.३.१) अस्माद् भवति णिच्च काकुत्[3]। ककते चञ्चला भवति एकस्मिन्नर्थे न प्रतितिष्ठतीत्यर्थः, तथाहि शब्दा अनेकार्था बहवः, एकार्थाश्च काक्वादिनाभिधीयमाना अनेकार्था भवन्ति। ककुदुच्चस्थानम्[4] अस्यास्तीति काकुत्। मत्वर्थीयस्य लुक्, छान्दसो दीर्घः, सर्वथा पृषोदरादिरयं शब्दः। 'या ते काकुत् सुकृता या वरिष्ठा' (ऋ० ६.४१.२) इति निगमः॥

(२९) जिह्वा[5]–'शेवायह्वजिह्वाग्रीवाप्वामीवाः' (उ० १.१५४) इति निपातिताः।[6] 'लिह आस्वादने' (अदा० उभ० ६), वप्रत्यये, अस्यादेर्जकारो निपात्यते। लेढ्यास्वादयत्यनया ग्रन्थविषयावसारान्। यद्वा आह्वयतेः (भ्वा० उभ० ७३४) जुहोतेः (जु० प० १) वायं यङ्लुगन्तस्याच्,[7] सम्प्रसारणम् 'अभ्यस्तस्य च' (अ० ६.१.३३) इति, सम्प्रसारणे च 'न धातुलोप आर्द्धधातुके' (अ० १.१.४) इति गुणनिषेधादुवङादेशे रूपम्। जोहवीति[8] पुनः पुनराह्वयति शब्दं करोति रसान् वादत्ते जुहोत्यस्यात्मनि।[9] जोहुवा सति

---

१. व्याख्यायतेऽसौ निरु० २.८। अत्रैवोपमया मायुशब्दम् आदित्यार्थकमपि व्याचष्टे निरुक्तकारः। निरु० ११.४२ मध्येऽपि उभयोरर्थयोरसौ शब्दः। (सु०)।

२. अत्र काकुत्काकुदशब्दयोर्मध्ये विभेदो विधेयः। काकुत्शब्द उच्चस्थानत्वात् ताल्वर्थकोऽपि कारणे कार्यस्याभेदोपचारात् वागर्थकः। काकुदशब्दस्तु केवलं ताल्वर्थक एव। (सु०)।

३. काकुदशब्दस्य कृते 'काकुर्जिह्वा सास्मिन्नुद्यते' इति पस्पशाह्निके महाभाष्यम्। निरुक्तस्तु ५.२६ मध्ये कोकुवाशब्दं जिह्वार्थकं प्रतिजानीते। (सु०)।

४. वेदे शब्दोऽयमुच्चस्थानार्थे प्रसिद्धः। यथा–'अग्निर्मूर्धादिवः ककुत्पतिः' (ऋ० ८.४४.१६), लोकेऽपि यथा–'त्रिककुत्पर्वते' (अ० ५.४.१४७)। (सु०)।

५. साध्ये साधनस्योपचारात् शब्दोऽयं वाङ्नामसु। (सु०)।

६. 'निपाताः' इति मुद्रितेषु।

७. 'यङन्तस्य कः' इति मुद्रितेषु।

८. 'जोहुवाति' इति मुद्रितेषु।

९. तु०–स्कन्दटीका (निरु० ५.२६)।

[1]ओकारस्येकारादेशे उकारलोपे च जिह्वा। 'पुरो विप्रा दधिरे मन्द्रजिह्वम्' (ऋ० ४.५०.१), 'अनर्वाणं वृषभं मन्द्रजिह्वम्' (ऋ० १.१९०.१) इति च निगमौ॥

(३०) घोषः–'घुष शब्दार्थः' (भ्वा० प० ४३६), 'हलश्च' (अ० ३.३.१२१) इति घञ्। घुष्यते शब्द्यते घोषः[2]। 'उतो पितृभ्यां प्रविदानु घोषम्' (ऋ० ३.७.६), 'इन्द्रे घोषा असृक्षत' (ऋ० ८.६३.७) इति च निगमौ॥

(३१) स्वरः–'स्वृ शब्दोपतापयोः' (भ्वा० प० ६६६), 'पुंसि सञ्ज्ञायां घः०' (अ० ३.३.११८)। स्वर्य्यति शब्द्यतेऽनेन देवता, उपतप्यतेऽनया मर्मस्पृक्प्रयुक्तयेति वा। स्वरतिरर्चतिकर्मा वा (निघ० ३.१४)। स्वर्य्यते स्तूयते देवतात्वात्। 'गोचरसञ्चर०' (अ० ३.३.११९) इत्यत्र चकारस्यानुक्तसमुच्चयार्थत्वाद् घः। यद्वा स्वरति देवतामिन्द्रादिम्, पचाद्यच् (अ० ३.१.१३४)। 'स्वरश्च मे श्लोकश्च मे' (मा० सं० १८.१) इति निगमः॥

(३२) शब्दः–'शप आक्रोशे' (भ्वा० उभ० ७२६) 'शाशपिभ्यां दादनौ' (उ० ४.९८)।[3] अस्य वृत्तिग्रन्थः–'शपते अनेनेति शब्दः संस्कृता वाक्। झलां तृतीये इति योगविभागात् अचतुर्थेऽपि तृतीयं भवति'[4] इति। 'शब्दनं शब्दः'[5] इति क्षीरस्वामी। खेऽन्तरिक्षे शब्दं करोतीति वा[6]। 'शब्दो रोगिणो मीमांसा च' इति निगमः[7]॥

(३३) स्वनः–'स्वन शब्दे' (भ्वा० प० ५७१) 'स्वनहसोर्वा' (अ० ३.३.६२) इत्यप्। स्वन्यत इति स्वनः। 'सिन्धोरूर्मेरिव स्वनः' (ऋ० ९.५०.१) इति निगमः॥

(३४) ऋक्[8]–ऋच्यते स्तूयतेऽनया। यद्वा स्तूयते स्वयं देवतात्वात्। 'ऋच स्तुतौ' (तु० प० १९) इत्यस्मात् सम्पदादित्वात् (अ० ३.३.९४ वा०)

---

१. तु०–निरु० ५.२६, कोकुवाशब्दोऽप्येवम्। (सु०)।
२. तु०–निरु० ९.११। (सु०)।
३. वस्तुतस्तु क्विबन्तात् 'शप्' इत्युपपदात् दाधातोः अब्दादिवत् 'शब्द'सिद्धिः। (सु०)।
४. द्र०–माणिक्यदेववृत्तिः (द० उ० ६.४८)।
५. मृग्यम्।
६. असम्बद्धम्। अयं पाठः कशा (४३) इत्यत्र 'उपलब्धेः' इति शब्दात् परः स्यात्।
७. वस्तुतस्तु नायं निगमः। 'शब्दायाडम्बराघातम्' (मा० सं० ३०.१९) इति भवत्युदाहरणम्। (सु०)।
८. निरु० १.८ इत्यत्र तु वाग्विशेषे ऋक्शब्दः। (सु०)।

क्विप्। 'ऋ॒चा वनेमा॒नृचः' (ऋ० १०.१०५.८) इति निगमः॥

(३५) होत्रा[१]–'हु दानादनयोः' (जु० प० १)–'हुयामाश्रुभसिभ्यस्त्रन्' (उ० ४.१६९)। हूयतेऽनया मन्त्ररूपया हविः, हूयतेऽस्यां प्राणः, हूयते वा प्राणः। तथा च–'वाचि हि प्राणं जुहुमः प्राणे वा वाचम्' इत्युपनिषत् (ऐ० आ० ३.२.६)। यद्वा होत्रेति यज्ञनाम (निघ० ३.१७) हूयतेऽस्मिन् हविरिति, यज्ञश्च वागित्युच्यते तत्साध्यत्वात्। 'वाचं यच्छन्ति वाग्वै यज्ञः' इति ब्राह्मणम् (ऐ० ब्रा० ५.२४)। ऋतुयाजप्रैषेषु दशमे प्रैषे–'व॒नेम॒ तद्धोत्रया चि॒तन्त्या' (ऋ० १.१२९.७) इति निगमः। 'वी॒तिहोत्रं त्वा कवे' (ऋ० ५.२६.३) इति च निगमः॥

(३६) गीः[२]–गृणातिरर्चतिकर्मा (निघ० ३.१४), औणादिकः क्विप्, 'ऋत इद्धातोः' (अ० ७.१.१००) 'र्वोरुपधाया दीर्घ इकः' (अ० ८.२.७६) इति दीर्घः, हल्ङ्यादिलोपः (अ० ६.१.६६), रेफस्य विसर्जनीयः। गृणात्यनया गीः। 'तमिद् वर्द्धन्तु नो॒ गिरः' (ऋ० ८.१३.१८) इति निगमः॥

(३७) गाथा–'गै शब्दे' (भ्वा० प० ६५३) अर्चतिकर्मा च (निघ० ३.१४), 'उषिकुषिगार्त्तिभ्यस्थन्' (उ० २.४)। गायतीत्यसौ देवता[३], गायन्ति तामिति वा गाथा। 'तं गाथया पुरा॒ण्या' (ऋ० ९.९९.४), 'यु॒ञ्जन्ति॒ हरी इषि॒रस्य॒ गाथया॒' (ऋ० ८.९८.९) इति निगमौ॥

(३८) गणः[४]–'गण गणने' चुरादिरदन्तः (प० २८१)। 'अकर्त्तरि च कारके सञ्ज्ञायाम्' (अ० ३.३.१९) इति घञ्। 'अतो लोपः' (अ० ६.४.४८)। गण्यते यो गणः, अतो लोपस्य स्थानिवद्भावात् वृद्धिर्न भवति। गणेति केचित् पठन्ति। निगमोऽन्वेषणीयः॥

(३९) धेना[५]–दधातेर्लटः शानचि व्यत्ययेन एत्वाभ्यासलोपौ, दधाना स्वमभिधेयं वर्षप्रदानेन लौकिकाय वा। यद्वा 'धेट् पाने' (भ्वा० प० ६४३) 'धेट इच्च' (उ० ३.११) इति नप्रत्यय इकारश्चान्तादेशः, गुणः, धयन्ति तामिति धेना। पानमत्र स्वीकारः, यद्वा आस्वादः। धीयते पीयते आस्वाद्यते प्राणेन[६], धयति[७] प्राणमिति वा धेना। तथा च–'तं मा॒ता रे॑ळि॒ह स उ॑ रेळिह

---

१. निघ० ३.१७ मध्ये यज्ञनामसु। (सु०)।

२. निरु० १.१। निरु० ६.२४ गीत्या, स्तुत्येत्यर्थः। निरु० १०.५ अपि तथैव। (सु०)।

३. 'देवताः' इति मुद्रितेषु।

४. निरु० ६.३६। अत्र सर्वगणं सर्वनामानमित्यर्थः। (सु०)।

५. निरुक्तस्तु ६.१७ मध्ये धेना दधातेः। (सु०)।

६. वानेन' इति मुद्रितेषु।

७. 'धयन्ति' इति मुद्रितेषु।

मातरम्' (ऋ०१०.११४.४) इति श्रुतिः। यद्वा 'धिविः प्रीणनार्थः' (भ्वा० प० २९२) बाहुलकात् नप्रत्ययो नकारवकारयोर्लोपश्च, गुणः, धेना। प्रीणयति हि वाक् सुष्ठु प्रयुक्ता। 'धेना वाक् प्रीणनाद्धि वः[१]' इति माधवः। 'धेना जिगाति दाशुषे' (ऋ० १.२.३), 'जनानां धेना अवचाकशद्वृषा' (ऋ० १०.४३.६) इति च निगमौ॥

(४०) ग्राः[२]–गमेर्धातोः (भ्वा० प० ७०९) 'धापृवस्यज्यतिभ्यो नः' (उ० ३.६) इति बाहुलकाद् नप्रत्ययो भवति टिलोपश्च। टाप् (अ० ४.१.४)। गत्यर्था बुद्ध्यर्थाः। जानन्ति काममिति ग्राः[३]। यद्वा गच्छन्ति यज्ञेष्वभितः[४]। 'अभि यज्ञं गृणीहि नो ग्रावः' (ऋ० १.१५.३) इत्यत्र 'छन्दांसि वै ग्राः' (तै० सं० ५.१.७.२) इति ब्राह्मणम् इति माधवः[५]। .... तस्मात् छन्दसां गायत्र्यादीनां वाग्रूपत्वात् ग्राव्यपदेशः। निगमोऽन्वेषणीयः[६]॥

(४१) विपा–'विप प्रेरणे[७]'। सम्पदादित्वात् (अ० ३.३.९४ वा०) क्विप्। तृतीयैकवचनम्। प्रेर्य्यते मनसा विपा। 'मनसा वा इषिता वाग् वदति' (ऐ० ब्रा० २.५) इति ब्राह्मणम्। 'वरुणाय विपा गिरा' (ऋ० ५.६८.१) इति निगमः। गिरेति पदं निरुक्त्या योजनीयम्॥

(४२) नग्रा[८]–न गच्छति पितृकुलाद् बाल्याद् अनावरणापि न गच्छति लज्जामिति वा। 'नग्निकानागतार्त्तवा' इत्यमरः (२.६.८)। नग्रा कन्या। ग्राशब्दः पूर्वमेव निरुक्तः, इह नपूर्वः। नायं नञ्, किन्तु प्रतिषेधार्थोऽयं निपातः, अतः 'नलोपो नञः' (अ० ६.३.७२) इति न भवति। .... 'नना' इति केचित्। नमतेर्नप्रत्ययो बाहुलकाद् मकारलोपश्च। नमयत्यनयेति नना। निगमोऽन्वेषणीयः॥

(४३) कशा–'काशृ दीप्तौ' (भ्वा० आ० ४३०)। अन्तर्णीतण्यर्थः।

---

१. मृग्यम्।

२. निरु० ३.२१ स्त्रीनामार्थे, निरु० १०.४७ मध्ये ग्रा आपः। निरु० १२.४६ प्रोक्ते मन्त्रेऽपि ग्राशब्दो स्त्रीनामार्थे। (सु०)।

३. अथवा ज्ञाधातोः क्विपि कुत्वम्। भारोपीयोऽयं शब्दः। तु०–'Know' शब्दः। (सु०)।

४. 'गच्छति यज्ञेष्वभूत्' इति मुद्रितेषु।

५. वेङ्कटमाधवभाष्ये नास्ति।

६. 'ग्रास्पतिर्नो अव्याः' (ऋ० २.३८.१०)। वाचः पतिः पालक इति दयानन्दः। (सु०)।

७. पाणिनीये धातुपाठे न संगृह्यते।

८. अत्र सामश्रमी सूचयति यद् ऋज्वर्थाभिधटीकामतिरिच्य सर्वत्रापि 'नना' इति पाठ उपलभ्यते। (सु०)।

पचाद्यच् (अ० ३.१.१३४)। आकारस्य ह्रस्वत्वं छान्दसम्। प्रकाशयत्यर्थान्।[१] यद्वा खेशया सती वर्णव्यत्ययादिना कशा, वाग्धि मुखात् काशते, तत उपलब्धेः।[२] यद्वा 'कश शब्दे[३]'। अत्र शब्दायते कशा। यद्वा 'कश गतौ' (अ० आ० १६) अच् (अ० ३.१.१३४)। गच्छति गन्तव्यम्। 'या वां कशा मधुमती' (ऋ० १.२२.३) इति निगमः॥

(४४) धिषणा[४]–धारयत्यर्थमिति धीः बुद्धिः। धारयति कर्त्तारं फलप्रदानेनेति धीः कर्मबुद्धिः कर्म वा। सनोति सम्भजते इति सनोतेः[५] (त० उभ० २) पचाद्यचि (अ० ३.१.१३४), पृषोदरादित्वात् (अ० ६.३.१०९) पूर्वपदह्रस्वत्वे च धिषणा। यद्वा 'ञिधृषा प्रागल्भ्ये' (स्वा० प० २२)। 'धृषेर्धिष् च सञ्ज्ञायाम्' (उ० २.८३) इति क्युप्रत्ययो धिषादेशश्च धिषणा। प्रगल्भा समर्था रक्षितुं जगद् वर्षप्रदानेनेत्यर्थः। यद्वा 'दिधिषामि बिल्मैः' (ऋ० २.३५.१२) इत्यत्र स्कन्दस्वामिना पठितात् 'धिषि धारणे' इत्यस्मात् 'धिष शब्दे[६]' (जु० प० २०) इति धातुपाठपठिताद्वा[७] बाहुलकात् क्युप्रत्ययो धिषणा। वाचि स्वाभिधेयं धारयति सम्बन्धस्य नित्यत्वात्। शब्दायते वा मेघे अधिश्रिता–'मिमाति मायुं ध्वसनावधिश्रिता' (ऋ० १.१६४.२९) इति श्रुतिः। 'आपश्च मित्रं धिषणा च साधन्' (ऋ० १.९६.१) इति निगमः॥

(४५) नौः–'णुद प्रेरणे' (तु० उभ० २) 'ग्लानुदिभ्यां डौः' (उ० २.६५) इति डौप्रत्ययः। नुद्यते प्रेर्य्यते मूलाधारादिस्थानेभ्यः प्राणेन। नमतेर्वा (भ्वा० प० ७०८) बाहुलकात् (अ० ३.३.१) डौः, नम्यते वा देवतात्वात्। 'सुतर्माणमधिनावं रुहेमेति यज्ञो वै सुतर्मा नौः कृष्णाजिनं वै सुतर्मा नौर्वाग्वै सुतर्मा नौः' (ऐ० ब्रा० १.१३) इति ब्राह्मणम्, 'समितो नाव्याहितम्' (ऋ० १०.१३५.४) इति च निगमौ॥

(४६) अक्षरम्[८]–'अशू व्याप्तौ' (स्वा० आ० १८) 'अश भोजने'

---

१. तु०–निरु० ९.१९। (सु०)।

२. 'खेऽन्तरिक्षे शब्दं करोतीति वा' इति 'शब्दः' (३२) इत्यत्रोक्तः पाठोऽत्र स्यात्।

३. पाणिनीये धातुपाठे नोपलभ्यते।

४. निघ० ३.३० द्यावापृथिवीनामसु। (सु०)।

५. तु०–निरु० ८.३ धीसादिनीति वा। धीसानिनीति वा। (सु०)।

६. तु०–निरु० ८.५ धिषणा वाग्धिषेर्दधात्यर्थे। (सु०)।

७. धातुपाठे छन्दसि पठितस्यास्य धातोः लौकिकसंस्कृते प्रयोगो नोपलभ्यते। परं वेदे तु प्रयोगोऽस्त्येव। निदर्शनम्–सूरींश्चिद्यदि धिषा वेषि जनान् (ऋ० १.१७३.८)। (सु०)।

८. निघ० १.१२ मध्ये उदकनामसु निरु० ११.४१ व्युत्पत्तिपूर्वकं समर्थ्यते उदकनामत्वम्। (सु०)।

(क्र्या० प० ५४)। 'अशेः सरन्' (उ० ३.७०) इति सरन्प्रत्ययः, व्रश्चादिना (अ० ८.२.३६) षत्वम्, 'षढोः कः सि' (अ० ८.२.४१)। अश्नुते श्रोतुं स्वाभिधेयम्, व्याप्नोति वा अश्नाति वा हविः। अञ्जेर्वा (रु० प० २०) बाहुलकात् सरन् नकारलोपश्च। 'खरि च' (अ० ८.४.५४) इति चर्त्वम्। अनक्ति म्रक्षयति सेचयति वर्षेण भूमिम्। यद्वा नञ्पूर्वात् क्षरतेः (भ्वा० प० ५९०) पचाद्यच् (अ० ३.१.१३४)। न क्षरति, सर्वदा सर्वैः प्रयुज्यमानापि न क्षीयत इत्यर्थः[1]। 'वाग्वै समुद्रो न वै वाक् क्षीयते' (ऐ० ब्रा० ५.१६) इति ब्राह्मणम्। 'अक्षरेण प्रति मिम एताम्' (ऋ० १०.१३.३) इति निगमः। 'वाचा विरूपनित्यया'[2] इत्यर्थं माधवोऽवादीत्। 'उपाक्षरा सहस्रिणी' (ऋ० ७.१५.९) इति च निगमः॥

(४७) मही[3]–व्युत्पादिता पृथिवीनामसु (१.१.१२)। मह्यते पूज्यतेऽनया, देवता इति वा। 'अमात्रं त्वा धिषणा तित्विषे मही' (ऋ० १.१०२.७) इत्यत्र वाङ्नामत्वमपि युज्यते॥

(४८) अदितिः[4]–व्युत्पादिता पृथिवीनामसु (१.१.१४)। अदीना, सर्वदा सर्वैः प्रयुज्यमानापि न क्षीयत इत्यर्थः। 'अनागसो अदितये स्याम' (ऋ० १.२४.१५) इति निगमः॥

(४९) शची[5]–अत्र क्षीरस्वामी–'शच श्वच गतौ' (अमर० १.१.४५)। शचतीति तु धातुपाठे गत्यर्थो न दृष्टः। 'शच व्यक्तायां वाचि' (भ्वा० आ० ९९) 'इन् सर्वधातुभ्यः' (उ० ४.११९)। 'कृदिकारात्०' (अ० ४.१.४५ ग० सू०) इति ङीष्। शचते गच्छति यज्ञम्, शच्यते गम्यते ज्ञायतेऽनयार्थः, शचते व्यक्तां वाचं करोतीति वा। 'शचीभिर्मदन्त उत दक्षिणाभिर्नेर्जिह्मायन्त्यो नरकं पताम' (निरु० १.११) इति निगमः॥

(५०) वाक्[6]–निरुक्ता पूर्वमेव (पृ० ५३)। 'यद्वाग् वदन्त्यविचेतनानि' (ऋ० ८.१००.१०) इति निगमः॥

---

१. तु०–'अक्षरं नक्षरं विद्यात्०' झभञ्सूत्रे भाष्ये पतञ्जलिः। (सु०)।

२. मृग्यम्। 'वेदैः' इति मुद्रितेषु वेङ्कटमाधवीयभाष्ये।

३. निघ० १.१ पृथिवीनामसु। निघ० २.११ गोनामसु। निघ० ३.३० द्यावापृथिवीनामसु। निरु० ४.२१ महीशब्दो महतीत्यर्थे। (सु०)।

४. निघ० १.१ पृथिव्यर्थे, गोनामसु, द्यावापृथिवीनामसु। निरु० ४.२३। देवमात्रर्थे निरु० ११.२३। (सु०)।

५. निघ० २.१ कर्मनामसु। ३.९ प्रज्ञानामसु। (सु०)।

६. निरु० ११.२७। (सु०)।

(५१) अनुष्टुप्[१]–स्तोभतिर्वृद्ध्यर्थः (सौत्रः)। क्विप्। अनुपूर्वेण क्रमेण, पूर्वमकारात्मना ततः स्पर्शादिभिर्व्यज्यमाना वर्द्धते। तथा चोपनिषत्–'अकारो वै सर्वा वाक् सैव स्पर्शोष्मभिर्व्यज्यमाना बह्वी नानारूपा' (ऐ० आ० २.३.६) 'परा' 'पश्यन्ती' 'मध्यमा' 'वैखरी' इति। तथा च 'विरूपं वक्ति वाक् तावकं वपुः'[२] इति संवित्प्रकाशे वामनदत्तः। 'ध्वनिः वर्णः पदं वाक्यमित्याहुः पदचतुष्टयम्। यस्याः सूक्ष्मादिरूपेण वाग्देवीं तामुपास्महे'[३] इति श्रीभोजदेवः। अतिस्तुतिषु 'च॒त्वारि॒ वाक्परि॑मिता प॒दानि॒'[४] (निरु० १३.९) इत्यत्र निरुक्त्या एव वा वृद्धिः प्रतिपादिता। यद्वा पूर्वं पञ्चाशदक्षरात्मना ततो गद्यपद्यादिरूपेण वर्द्धते। तथा हि–'परिमिता वर्णा अपरिमितां वाचो गतिमाप्नुवन्ति' (आ० श्रौ० १०.५.१६) इति भगवानाश्वलायनः। यद्वा स्तोभतिरर्चतिकर्मा (निघ० ३.१४)। आनुपूर्व्येण स्तौति देवताः। 'अ॒नु॒ष्टु॒भ॒मनु॒ चर्चूर्य्यमा॑ण॒मिन्द्र॒म्' (ऋ० १०.१२४.९) इति निगमः॥

(५२) धेनुः–'धेट् पाने' (भ्वा० प० ६४३)। 'धेट इच्च' (उ० ३.३४) इति नुप्रत्ययः, इकारोऽन्तादेशः। धयति तामिति धेनुः, पीयते हि वा तत्प्रवृत्तवृष्टिद्वारेण, धेनुवद्दोग्ध्री सर्वकामान् इति वा। 'अधे॑न्वा चरति मा॒यये॒ष वाचं॑ शुश्रु॒वाँ अ॑फ॒लाम॑पुष्पाम्' (ऋ० १०.७१.५) इति श्रुतिः।[५] 'गौर्गौः कामदुघा, सम्यक् प्रयुक्ता स्मर्य्यते बुधैः'[२] इति दण्डी। तथा चागमः–'एकः शब्दः सम्यग् ज्ञातः सुष्ठु प्रयुक्तः स्वर्गे लोके च कामधुग् भवति' (महाभाष्य ६.१.८४) इति। 'अ॒भि स॒प्त धे॒नव॑ः' (ऋ० ९.८६.२५), 'नेष्टुः॑ सचन्त धे॒नव॑ः' (ऋ० २.५.५) इति च निगमौ॥

(५३) वल्गुः–'वल संवरणे' (भ्वा० आ० ३३१)। 'वलेर्गुक् च' (उ० १.१९) इत्युप्रत्ययः। संवृणोत्याच्छादयति जगत्, व्याप्नोतीति यावत्। यद्वा वल्गतिः शब्दार्थः[६] (भ्वा० प० ८८), बाहुलकादुप्रत्ययः। गर्जितादिलक्षणं शब्दं करोति वल्गुः। 'अ॒यं नाभा॑ वदति व॒ल्गु वो॑ गृ॒हे' (ऋ० १०.६२.४) इति निगमः॥

(५४) गल्दा[७]–'गल अदने' भौवादिः (प० ३६७)। गलनं पूरणं

---

१. निरु० ७.१२ छन्दोविशेषार्थे। (सु०)। २. मृग्यम्।

३. मुद्रितसंस्करणयोः सरस्वतीकण्ठाभरणस्य नोपलभ्यते।

४. ऋ० १.१६४.४५। (सु०)।

५. निरु० १.२०। (सु०)।

६. पाणिनीयधातुपाठे तु गत्यर्थः।

७. निरु० ६.२४ गालनार्थे, धमन्यर्थे च। (सु०)।

कामानाम्, गलः पूरणार्थः स्कन्दस्वामिनोक्तः[१], तद्ददाति। 'आतोऽनुपसर्गे कः' (अ० ३.२.३) गल्दा। निगमोऽन्वेषणीयः[२]॥

(५५) सरः[३]–'सृ गतौ' (भ्वा० प० ६६९) असुन्प्रत्ययः (उ० ४.१९०)। गत्यर्था बुद्ध्यर्थाः। सरति जानाति सर्वं देवतात्वात्, ज्ञायते वा विद्वद्भिः, सरति गच्छत्येव व्याहृता। 'सरो॒ न पू॒र्णम॒भितो॒ वद॑न्तः' (ऋ० ७.१०३.७) इति निगमः। अत्र प्रकरणात् स्तोत्रशस्त्रात्मिका वागुच्यते, एवं माधव[४] ऐच्छत्॥

(५६) सुपर्णी–सुपर्णशब्दो रश्मिनामसु व्याख्यातः (१.५.१५)। 'पाककर्णपर्णपुष्पफलमूल०' (अ० ४.१.६४) इत्यादिना ङीष्। निगमोऽन्वेषणीयः[५]॥

(५७) बेकुरा–'भा दीप्तौ' (अदा० प० ४४) भां दीप्तिं[६] करोतीति कथञ्चिद्[७] विगृह्य करोतेरौणादिके कप्रत्यये कृते 'उदोष्ठ्यपूर्वस्य' (अ० ७.१.१०२) 'बहुलं छन्दसि' (अ० ७.१.१०३) इति ऋकारस्यानोष्ठ्यपूर्वस्यापि उकारो भकारस्य बकारेण आकारस्य एकारेण च व्युत्पत्तिश्छान्दसत्वात्। बेकुरा दीप्तिकारिणी प्रयोक्तुः। 'बेकुरानामासि जुष्टा' (ता० म० ब्रा० १.३.१) इति निगमः। छन्दोगानां सामकल्पे[८] पठितोऽयं मन्त्रः। 'व्यचेर्व्याप्तिकर्मणः बेकुरा'[९] इति भरतस्वामिभाष्यम्॥

इति सप्तपञ्चाशत् वाङ्नामानि॥ ११॥

---

१. स्कन्दटीका (निरु० ६.२४)।

२. वागर्थे गल्दाशब्दस्तु नैवोपलभ्यते वेदे। गर्दधातोरुत्पन्नः गर्दभशब्दस्तु तत्र दृश्यते। पंजाबीभाषायां वागर्थे 'गल्ल' शब्दः, हिन्दीभाषायां च निन्दितवागर्थे 'गाली, गरियाना' आदिशब्दा उपलभ्यन्ते। अतो वैदिकयुगे गल्दधातोरस्तित्वमनुमीयते। (सु०)।

३. निघ० १.१२ उदकनामसु निरु० ५.११ अथ च ९.२६। (सु०)।

४. द्र०–वेङ्कटमाधवभाष्यम् (ऋ० ७.१०३.७)।

५. तै० सं० ६.१.६.१। महाभारतेऽपि–यः सुपर्णो यजुर्नाम छन्दोगात्रस्त्रिवृच्छिराः। अनेन वेदवाचे सुपर्णीत्यनुमीयते। (सु०)।

६. 'कान्तिम्' इति मुद्रितेषु।

७. 'किञ्चिद्' इति मुद्रितेषु।

८. ताण्ड्यमहाब्राह्मणस्याध्यायत्रयं सामकल्पः। (सु०)।

९. मृग्यम्।

अर्ण॑ः (१)। क्षोद॑ः (२)। क्षद्म॑ः (३)। नभ॑ः (४)। अम्भ॑ः (५)। कव॑न्धम् (६)। स॒लि॒लम् (७)। वाः (८)। वन॑म् (९)। घृ॒तम् (१०)। मधु॑ (११)। पुरी॑षम् (१२)। पिप्प॑लम् (१३)। क्षी॒रम् (१४)। वि॒षम् (१५)। रेत॑ः (१६)। कश॑ः (१७)। जन्म॑ (१८)। बृबूक॑म् (१९)। बु॒सम् (२०)। तु॒ग्र्या॑ (२१)। बु॒र्बु॑रम् (२२)। सु॒क्षेम॑ (२३)। ध॒रुण॑म् (२४)। सि॒रा (२५)। अ॒र॒रिन्दा॑नि (२६)। ध्व॒स्म॒न्वत् (२७)। जा॒मि (२८)। आयु॑धानि (२९)। क्षप॑ः (३०)। अहि॑ः (३१)। अ॒क्षर॑म् (३२)। स्रोत॑ः (३३)। तृप्ति॑ः (३४)। रस॑ः (३५)। उ॒द॒कम् (३६)। प्रय॑ः[1] (३७)। सर॑ः (३८)। भे॒ष॒जम् (३९)। सह॑ः (४०)। शव॑ः (४१)। यह॑ः (४२)। ओज॑ः (४३)। सु॒खम् (४४)। क्ष॒त्रम् (४५)। आव॑याः (४६)। शुभ॑म् (४७)। या॒दुः (४८)। भू॒तम् (४९)। भुव॑नम् (५०)। भ॒वि॒ष्यत् (५१)। मह॑त् (५२)। आप॑ः (५३)। व्यो॑म (५४)। यश॑ः (५५)। मह॑ः (५६)। सर्णी॑कम् (५७)। स्वृती॑कम् (५८)। स॒ती॒नम् (५९)। गह॑नम् (६०)। ग॒भी॒रम् (६१)। गम्भ॑रम् (६२)। ई॒म् (६३)। अन्न॑म् (६४)। ह॒विः (६५)। सद्म॑ (६६)। सद॑नम् (६७)। ऋ॒तम् (६८)। योनि॑ः (६९)। ऋ॒तस्य॒ योनि॑ः (७०)। स॒त्यम् (७१)। नी॒रम् (७२)। र॒यिः (७३)। सत् (७४)। पू॒र्णम् (७५)। सर्व॑म् (७६)। अक्षि॑तम् (७७)। ब॒र्हिः (७८)। नाम॑ (७९)। स॒र्पिः (८०)। अ॒पः (८१)। प॒वित्र॑म् (८२)। अ॒मृत॑म् (८३)। इन्दु॑ः (८४)। हे॒म (८५)। स्व॑ः (८६)। सर्गा॑ः (८७)। शम्ब॑रम् (८८)। अभ्व॑म्

१. 'पयः' इत्येव प्रायिकः पाठः।

(८९)। वपुः (९०)। अम्बु (९१)। तोयम् (९२)। तूयम् (९३)। कृपीटम् (९४)। शुक्रम् (९५)। तेजः (९६)। स्वधा (९७)। वारि (९८)। जलम् (९९)। जलाषम् (१००)। इदम् (१०१)। इत्येकशतमुदकनामानि ॥ १२ ॥

'उदकनामान्युत्तराण्येकशतम्' (निरु० २.२४)–

(१) अर्णः[१]–'ऋ गतौ' (भ्वा० प० ६७०)। 'उदके नुट् च' (उ० ४.१९८) इति अर्त्तेरसुन् प्रत्ययः। अर्य्यते तत् प्राणिभिरित्यर्थः। ऋच्छति निम्नं प्रदेशमिति वा। अकारान्तोऽप्यस्ति। 'ॠ गतौ' (क्र्या० प० २८) पचाद्यच् (अ० ३.१.१३४)[२]। ॠणाति गच्छति दिवो भूमिं वृष्यमाणाम्[३]। 'सृजदर्णांस्यव यद्युधा' (ऋ० १.१७४.४), 'अग्ने दिवो अर्णमच्छा जिगासि' (ऋ० ३.२२.३) इति निगमौ॥

(२) क्षोदः–'क्षुदिर् सम्पेषणे' रुधादिः[४] स्वरितेत् (रु०उभ० ६)। असुन् (उ० ४.१९०)। क्षुद्यते क्षोदः। क्षुण्णं हि जलं पर्वतादिभ्यः शिलादिष्वधःपतनात्। 'नावा न क्षोदः प्रदिशः पृथिव्याः' (ऋ० १०.५६.७), 'याभी रसाङ्क्षोदसोद्नः पिपिन्वथुः' (ऋ० १.११२.१२) इति च निगमौ॥

(३) क्षद्म–'क्षद स्थैर्य्ये' (सौत्रः)[५] इति स्कन्दस्वामी। 'क्षद गतिहिंसनयोः' (सौत्रः)[५] इति सुबोधिनीकारः। 'अन्येभ्योऽपि दृश्यन्ते' (अ० ३.२.७५) इति मनिन्। क्षदिति पिपासादिनिवर्त्तने[६]। स्वकार्य्ये स्थिरं भवति, जलाशयं व्याप्य स्थिरं भवतीति वा। तथा च 'स्थावराद् गृह्णामि'[५] इति श्रुतिः। गतावर्णसोरसमित्यर्थः[७]। हिनस्ति पिपासामुष्णं वा अतीप्सितं वा पुरुषम्[८]। 'क्षद्मेवार्थेषु तर्तरीथ उग्रा' (ऋ० १०.१०६.७) इति निगमः॥

(४) नभः–'णह बन्धने' (दि० उभ० ५५) 'नहेर्दिवि भश्च' (उ० ४.२१२) इति विधीयमानोऽसुन् भकारादेशश्च बाहुलकादुदकेऽपि भवतः।

---

१. निरु० ११.२७। अर्णशब्दस्य जलार्थकत्वादेव अर्णवशब्दस्य समुद्रार्थकत्वम्। द्र०–'तिरः समुद्रमर्णवम्' (ऋ० १.१९.७)। (सु०)।

२. अस्मिन्नपि पक्षे नुडागमः।

३. 'वृषमाणम्' इत्यपपाठः मुद्रितेषु।

४. 'भौवादिः' इति मुद्रितेषु।

५. मृग्यम्।

६. 'क्षदीति पिपासादनिवर्त्तने' इति मुद्रितेषु।

७. इतः पूर्वं किञ्चिद् वाक्यं भ्रष्टं यस्यायमर्थ उदीर्यते।

८. अतीप्सितं वा पुरुषं हिनस्ति गच्छतीत्यर्थः स्यात्, पाठो वान्यथा कल्पनीयः।

नह्यते हि तन्मेघैर्दिवि भूमौ सेकादिभिः, नह्यति प्राणिनां मनांसीति वा। प्राणिनो हि यत्रोदकं विद्यते तत्रैव स्थातुं मनः कुर्वते। तथा–'नानामनसः खलु वै पशवो नानाव्रतास्तेऽएवाभि समनसः' (तै० सं० ५.३.१.३) इति श्रुतिः। न न भातीति वा, एकस्य नञो लोपः इतरस्य नलोपाभावः। भातेरसुनि टिलोपश्च बाहुलकात्। भात्येव स्वया दीप्त्या देवतात्वात्। यद्वा नभ इव नभः। तथाम्बरनिर्वचने 'अम्बुवद्राजते' (निघ० १.३.१) इत्यादिना ग्रन्थेन आकाशस्य जलसाम्यमुक्तम्[१], साम्यस्योभयनिष्ठत्वाद् अत्र जलमप्याकाशसदृशमित्युच्यते। 'मदुच्युतमौशानं नभोजाम्' (ऋ० १०.३०.९), 'नभो वसानः परियास्यध्वरम्' (ऋ० ९.८३.५) इति च निगमौ॥

(५) अम्भः[२]–'आप्लृ व्याप्तौ' (स्वा० प० १५)। 'उदके नुम्भौ च' (उ० ४.२११), अत्रापो ह्रस्वोऽसुन्निति (उ० ४.२०९) च वर्त्तते। व्याप्नोति सर्वमम्भः। तथा चाथर्वणी श्रुतिः–'सर्वमिदमम्भः'[३] इति, 'आपो वा इदं सर्वम्' (तै० आ० १०.२२.१) इत्यादिरनुवाकश्च। 'अम्भः किमासीद् गहनं गभीरम्' (ऋ० १०.१२९.१) इति निगमः॥

(६) कवन्धम्[४]–बन्धिरनिभृतत्वे (निरु० १०.४) निभृतं चञ्चलमतोऽन्यदनिभृतमचञ्चलं तदनिभृतं कबन्धं कमनीयञ्च तद्बन्धं चेत्यर्थः। कमेर्डप्रत्यये कः, बन्धेः पचाद्यचि बन्धः इति निर्वाहः। यद्वा कं सुखं बध्नाति स्नानपानादिना। कर्मण्यण् (अ० ३.२.१)। बवयोरविशेषात् वकारः, कवन्धम्। 'नीचीनबारं वरुणः कवन्धम्' (ऋ० ५.८५.३), 'अर्यमणो न मरुतः कवन्धिनः' (ऋ० ५.५४.८) इति च निगमौ॥

(७) सलिलम्[५]–'सल गतौ' (भ्वा० प० ३६८)। 'सलिकल्यनिमहिभडिभण्डिशण्डिपिण्डितुण्डिकुकिभूभ्य इलच्' (उ० १.५४)। सलति गच्छति निम्नं देशम्, गम्यते प्राणिभिरिति वा। 'गौरीर्मिमाय सलिलानि तक्षति' (ऋ० १.१६४.४१) इति निगमः॥

(८) वाः–'वृञ् वरणे' (स्वा० उभ० ८)। स्वार्थिकोऽण् छान्दसः, तदन्तात् क्विप्, अणो[६] लोपः, हल्ङ्यादिलोपः, रेफस्य विसर्जनीयः। वृतं हि तदिन्द्रेण। तथा च श्रुतिः–

---

१. आधारे आधेयस्याभेदोपचाराज्जलसाम्यम्। (सु०)।
२. अम्भसीशब्दः द्यावापृथिवीनामसु–निघण्टौ ३.३०। (सु०)।
३. मृग्यम्। 'आप एव सर्वम्' (गो० ब्रा० १.५.१५)।
४. निरुक्तं तु १०.४ मध्ये कवनम् उदकं धीयते अस्मिन् इति कवन्धं मेघमाह। (सु०)।
५. निघ० ३.१ बहुनामसु। (सु०)।
६. 'अणि' इति मुद्रितेषु।

अपकामं स्यन्दमाना अवीवरत वो हि कम्।
इन्द्रो वः शक्तिभिर्देवीस्तस्माद्वार्नाम वो हितम्।
(मै० सं० २.१३.१) इति।

'वार्ण पृथा रथ्यैव स्वानीत्' (ऋ० २.४.६) इति निगमः[१]॥

(९) वनम्[२]–'वन षण सम्भक्तौ' (भ्वा० प० ३१३)। 'पुंसि सञ्ज्ञायां घः प्रायेण' (अ० ३.३.११८)। वन्यते सेव्यते वनम्। 'यथा वातो यथा वनम्' (ऋ० ५.७८.८), 'सोमो विश्वान्यतसा वनानि' (ऋ० १०.८९.५) इति च निगमौ।

(१०) घृतम्[३]–'गृ घृ सेचने' (भ्वा० प० ६७१)। 'अञ्चिघृसिभ्यः क्तः' (उ० ३.८९) इति क्तप्रत्ययः। सेचयत्यनेन भूमिं वरुणः, सिञ्चत्यनेनेति वा। 'कृष्णं नियानं हरयः सुपर्णाः' (ऋ० १.१६४.४७) इत्यत्र 'घृतमित्युदकनाम जिघर्तेः सिञ्चतिकर्मणः' (निरु० ७.२४) इति भाष्यम्। यद्वा 'घृ क्षरणदीप्त्योः' (जु० प० १४)। गत्यर्थाकमकित्यादिनाकर्मकत्वात् कर्त्तरि क्तः (अ० ३.४.७२)। जिघर्त्ति क्षरति मेघात् पर्वतादिभ्यो वा, दीप्यते वा स्वया दीप्त्या। 'आदिद्घृतेन पृथिवी व्युद्यते' (ऋ० १.१६४.४७) इति निगमः[४]॥

(११) मधु–मेघोदरवर्त्ति सलिलं मध्वित्युच्यते। तत्र पुनर्वैद्युतात्मा दह्यमानं सरः स्वर्णेन तद्गतेनैव वायुना धमायमानं धमति (भ्वा० प० ६६१)। धमतिर्गतिकर्मा[५] (निघ० २.१४) वा अन्तर्णीतण्यर्थो निःकालने द्रष्टव्यः। निर्धाम्यते निःकल्यते हि तन्मेघात्। यद्वा 'मद तृप्तौ' (दि० प० ९८)[६]। अस्माद् बाहुलकादुप्रत्ययो धान्तादेशश्च। माद्यन्ति हि तेन पीतेन प्राणिनः। यद्वा मधुवत् स्वादुत्वात् मध्वित्युच्यते। इमानि स्कन्दस्वामिनिर्वचनानि[७]। वैयाकरणपक्षे तु 'मन ज्ञाने' (दि० आ० ६५) इति, अस्मात् निदिति (उ० १.९) वर्त्तमाने 'फलिपाटिनमिमनिजनां गुक्पटिनाकिधतश्च' (उ० १.१८) इत्युप्रत्ययो धोऽन्तादेशश्च। मन्यते अतिशयेन जनैः इति मधु। 'मननीयं मधु'[८] इति

---

१. लौकिकसंस्कृतेऽप्रयुक्तोऽप्यसौ 'वार्' शब्दः समुद्रार्थके 'वारांनिधि'शब्दे जीवग्राहं गृह्णाति। (सु०)। २. निरु० ५.१६। निरु० ८.४ मध्ये वनं वनोतेः। (सु०)।
३. निरु० १०.१६। (सु०)।
४. निरु० ७.२४ मध्ये व्याख्यातोऽयं मन्त्रः। (सु०)।
५. निरु० १०.३२। (सु०)।
६. निरुक्तेन २.२ मध्ये समर्थितैषा व्युत्पत्तिः। मदश्चातुत्वादेव निरु० ४.८ मध्ये मधु सोमम्। अथ च निरु० ८.७। (सु०)।
७. द्र०–स्कन्दटीका (निरु० ४.८)।
८. तु०–मन्यते मधु (तै०सं० २.३.२.९ भट्टभास्करभाष्यम्)।

भट्टभास्करमिश्रः। 'विद्वान् मध्व उर्ज्जभारा दृशे कम्' (ऋ० १०.५.५) इति निगमः॥

(१२) **पुरीषम्**[१]–'पृ पालनपूरणयोः' (जु० प० ४)। 'शृपृभ्यां किच्च' (उ० ४.२८) इति ईषन्प्रत्ययः। 'उदोष्ठ्यपूर्वस्य' (अ० ७.१.१०२) इति उद्रपरत्वम्। पूरयति जगत् प्रलयकाले, पूर्य्यतेऽनेन तडाकादि, पालकं वा जगतः शस्योत्पत्तिहेतुत्वात्। प्रीणातेर्वा (क्र्या० उभ० २) बाहुलकात् कीषन्प्रत्ययः, ईकारस्योकारादेशः स च पकारात् परो द्रष्टव्यः। प्रीणाति जगत् पुरीषम्। 'उद्यन्त्समुद्रादुत वा पुरीषात्' (ऋ० १.१६३.१) इति निगमः॥

(१३) **पिप्पलम्**–'पृ पालनपूरणयोः' (जु० प० ४)। 'कल पृतृपादिभ्यः'[२] इति कलप्रत्यये 'उदोष्ठ्यपूर्वस्य' (अ० ७.१.१०२) इति 'बहुलं छन्दसि' (अ० ७.१.१०३) इति बहुलवचनात् उत्वाभावे, बाहुलकत्वाद् द्वित्वे, अभ्यासस्य उरदत्वे, 'अर्त्तिपिपर्त्योश्च' (अ० ७.४.७७) 'बहुलं छन्दसि' (अ० ७.४.७८) इतीत्वे, उत्तरस्य पकारस्य द्वित्वमृकारलोपश्चापि। पिपर्त्ति पिप्पलम्। पुरीषेण समानार्थम्। 'अपिप्लव'[३] इति नैरुक्ताः' (अमर० २.४.२०) इति क्षीरस्वामी। प्लवतेऽपि। 'प्लुङ् गतौ' (भ्वा० आ० ६८४)। गच्छत्यपि। अपिशब्दात् तिष्ठतीति च गम्यते। तथाहि–जलं नदीषु प्रवाहवत्त्वात् गच्छति निम्नं प्रदेशं वा। 'जलाशयादिषु तीरादिनिरुद्धत्वान्न क्वचिद् गच्छति'[४] इति माधवः। अपि वा प्लवतेर्गत्यर्थाद् ऊर्णोतेर्डप्रत्ययो (उ० ५.४७) बाहुलकाद् भवति, टिलोपाभावो बाहुलकादेव। पकारस्य द्वित्वमकारोपजनश्च। 'वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः' (अ० ६.२.३७ न्यासः, पदमञ्जरी) इत्यपिशब्दस्याकारलोपः, पिप्पलम्, पृषोदरादिः (अ० ६.३.१०९)। 'तस्येदाहुः पिप्पलं स्वाद्वग्रे' (ऋ० १.१६४.२२) इति निगमः॥

(१४) **क्षीरम्**[५]–'घस्लृ अदने' (भ्वा० प० ४७४)। 'घसेश्चिच्च' (उ० ४.३५) इति ईरन् प्रत्ययः, चकारात् किच्चेति अनुवर्त्तते, कित्त्वात् 'गमहनजन०' (अ० ६.४.९८) इत्युपधालोपः, 'खरि च' (अ० ८.४.५४) इति चर्त्वं घकारस्य ककारः, 'शासिवसिघसीनाञ्च' (अ० ८.३.६०) इति षत्वम्। अदन्ति तदिति क्षीरम्। 'क्षर सञ्चलने' (भ्वा० प० ५९०) इत्यस्माद्

---

१ निरु० २.२२ पुरीषं पृणातेः पूरयतेर्वा। (सु०)।

२ उणादौ 'कलस्तृपश्च' (उ० १.१०४) इति पाठः। तदा तु 'वृषादिभ्यश्चित्' (उ० १.१०६) इति कलप्रत्ययेन भाव्यम्। (सु०)।

३. 'अपिप्लवते' इति मुद्रितेषु।

४ मृग्यम्।

५. निरु० २.५। (सु०)।

बाहुलकात् डीरन्प्रत्ययः टिलोपश्च। क्षरति हि तद् मेघात्। 'क्षीरेण स्नातः कुयवस्य योषे' (ऋ० १.१०४.३) इति निगमः॥

(१५) विषम्–'विष्लृ व्याप्तौ' (जु० उभ० १३)। 'विषेर्व्याप्तिकर्मणि'[१] इति कप्रत्ययः। वेवेष्टि व्याप्नोति सर्वं विषम्। यद्वा विपूर्वात् 'ष्णा शौचे' (अदा० प० ४५) इत्यस्मात् 'अन्येष्वपि दृश्यते' (अ० ३.२.१०१) इति जनेर्विधीयमानो डप्रत्ययो बाहुलकाद् भवति, णकारलोपोऽपि बाहुलकादेव। विशेषेण स्नात्यनेनेति विषम्[२], तद्धि प्रथमं शौचसाधनम्। विपूर्वात् सचतेर्वा पूर्ववत् डप्रत्ययः। तद्धि स्नानपानावगाहनार्थिभिः सेव्यते। 'जातं विष्वाचो अहतं विषेण' (ऋ० १.११७.१६), 'केश्य१ग्निं केशी विषम्' (ऋ० १०.१३६.१) इति च निगमौ॥

(१६) रेतः–'रि रीङ् स्रवणे' दैवादिकः (आ० २८)। 'स्रुरिभ्यां तुट् च' (उ० ४.२०३) इत्यसुन्प्रत्ययस्तुडागमश्च, गुणः। रीयते स्रवति रेतः। यद्वा वृष्टिलक्षणानामपां देवानां रेतस्त्वाद्रेत उच्यते। तथा चोपनिषत्–'देवानां रेतो वर्षम्' (ऐ० आ० २.१.३) इति। 'अस्मे रेतः सिञ्चतं यन्मनुर्हितम्' (ऋ० ६.७०.२), 'सप्तार्द्धगर्भा भुवनस्य रेतः' (ऋ० १.१६४.३६) इति निगमौ॥

(१७) कशः–'कश गतौ' (भ्वा० प० ५९९) 'कश शब्दे'[३] उभयोरसुन् (उ० ४.१९०)। कशति गच्छति निम्नं प्रदेशम्, मेघेभ्यः पतत् शब्दं करोतीति वा कशः। 'याभिर्महामतिथिग्वं कशोजुवम्' (ऋ० १.११२.१४) इति निगमः॥

(१८) जन्म–'जनी प्रादुर्भावे' (दि० आ० ४०)। 'अन्येभ्योऽपि दृश्यन्ते' (अ० ३.२.७५) इति मनिन्, औणादिको वा (उ० ४.१४६)। जायते सृष्टिकाले स्वकारणात्। 'अग्नेरापः' (तै० उ० २.१) इत्युपनिषत्। जायन्ते वास्मिन् जलचारिणो मत्स्यादयः। निगमोऽन्वेषणीयः॥

(१९) बृबूकम्[४]–ब्रवीतेः शब्दार्थात् (अदा० उभ० ३७), भ्रंशतेर्वाधःपतनार्थात् (भ्वा० आ० ५०६), उभाभ्यां समुदिताभ्याम् 'उलूकादयश्च' (उ० ४.४२) इति ऊकप्रत्यये निपातनाद् रूपसिद्धिः। 'ऊकप्रत्यये धातुद्वयस्य बृबूभावः'[५] इति श्रीनिवासः। क्रमेणार्थः–तद्धि विपतत्

---

१. उणादिवृत्तिः (७१७ श्वेत०)। 'विषेर्व्याप्तिकर्मणि कन्' (द० उ० ९.२०)। उभयत्र कन् विधीयते।

२. निरु० १२.२६। (सु०)।

३. पाणिनीये धातुपाठे नास्ति।

४. निरु० २.२२ (सु०)।

५. मृग्यम्।

साध्याकारं शब्दं[१] करोति, भ्रश्यति दिवोऽनावरणत्वात्, मेघभ्यो भ्रश्यति शब्दवच्चेति। 'द्वा बृबूकं वहतः पुरीषम्' (ऋ० १०.२७.२३) इति निगमः॥

(२०) बुसम्–विपूर्वात् स्नातेः (अदा० प० ४५) 'आतश्चोपसर्गे' (अ० ३.१.१३६) इति कप्रत्यये[२] उपसर्गेकारस्योकारो बाहुलकाद् भवति, धातोर्नकारलोपोऽपि बाहुलकादेव। विशेषेण स्नात्यनेनेति बुसम्[३]। तद्धि प्रथमं शौचसाधनम्। भ्रंशतेर्वा पचाद्यचि (अ० ३.१.१३४), पृषोदरादित्वाद् (अ० ६.३.१०९) ऊहनीयं रूपम्। पूर्ववदर्थः। यद्वा 'बुस उत्सर्गे' (दि० प० १०९)। 'गेहे कः' (अ० ३.१.१४४) इति बाहुलकादस्मादपि भवति। बुस्यते उत्सृज्यते मेघैरिति बुसम्। 'आविः स्वः कृणुते गूहते बुसम्' (ऋ० १०.२७.२४) इति निगमः॥

(२१) तुग्र्या–तुजतिर्हिंसायाम्[४] (भ्वा० प० १५०)। 'क्विप् च' (अ० ३.२.७६) इति क्विप्। तुजन्ति[४] हिंसन्ति तम औष्ण्येन जनानिति वा तुजो रश्मयः। तद्वान् तुग्र्यः। रो मत्वर्थीयोऽतिशायने। तुग्र आदित्यः, तत्र भवा तुग्र्या। 'भवे छन्दसि' (अ० ४.४.११०) इति यत्। 'आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः' (मनु० ३.७६) इति मनुः। यद्वा तुग्रशब्देन ग्रीष्म उच्यते, अतिशयेनादित्यकिरणवान् हि ग्रीष्मकालः। 'तत्र साधुः' (अ० ४.४.९८) इति यत्। तुग्र्या। 'अग्न्याकाशयज्ञवरिष्ठेषु तुग्रशब्दः' इति वृत्तिकारः[५]। तत्र भवे इत्यर्थे 'तुग्राद् घन्' (अ० ४.४.११५) इति घन्प्रत्यये प्राप्ते व्यत्ययेन 'भवे छन्दसि' (अ० ४.४.११०) इति यत्। 'तुग्र्या आपः', 'तुग्र्यमुदकम्' उभयमपि दृश्यते। 'अग्नेरापः' (तै० उ० २.१) इत्यपां कारणत्वेन अग्नेः श्रुतत्वात्, 'अग्नेर्वै धूमो जायते, धूमादभ्रम्, अभ्राद् वृष्टिः' (श० ब्रा० ५.३.५.१७) इति क्रमेण वा आकाशे वृष्टिलक्षणेनापां विद्यमानत्वात्, यज्ञस्यापि 'अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते। आदित्याज्जायते वृष्टिः' (मनु० ३.७६) इति पारम्पर्य्येण वृष्टिहेतुत्वात्। सर्वैश्वर्य्यवत्तया वरिष्ठ इन्द्रो विवक्षितः, वृष्टिप्रदानाच्च, तस्मात् तत्र भव इत्येषोऽर्थः। सर्वत्र यथाकथञ्चित् वक्तुं शक्यते। 'आवः शमं वृषभं तुग्र्यासु' (ऋ० १.३३.१५), 'उत यस्तुग्र्ये सचा' (ऋ० ८.३२.२०) इति च निगमौ॥

---

१. 'साकारशब्दम्' इति स्कन्दः (निरु० २.२२ टीका)।

२. बाहुलकात् करणे।

३. पूर्ववत् (१.१२.६) बकारः।

४. अयं तुदादिं मन्यते।

५. अष्टाध्यायी ४.४.११५ सूत्रे काशिका। (सु०)।

(२२) बुर्बुरम्–'पृ पालनपूरणयोः' (जु० प० ४)। 'गेहे कः' (अ० ३.१.१४४) इति बाहुलकात् कः। 'उदोष्ठ्यपूर्वस्य' (अ० ७.१.१०२)। पुरम्। वपुषः शरीरस्य पूरकं पालकं वा वपुः पुरं सत् पृषोदरादित्वात् (अ० ६.३.१०९) वकाराकारलोपेन पकारद्वयस्य बकारादेशो विसर्जनीयस्य रेफादेशेन बुर्बुरम्। बुर्बुरमस्मिन्नस्तीति वा मत्वर्थीयोऽकारः (अ० ५.२.१२७), बुर्बुरवत्। .... निगमोऽन्वेषणीयः[1]॥

(२३) सुक्षेम–'क्षि निवासगत्योः' (तु० प० ११६) 'क्षि क्षये' (भ्वा० प० १४५) इत्यस्माद् वा 'अर्त्तिस्तुसुहुसृधृक्षिक्षुभायावापदियक्षिनीभ्यो मन्' (उ० १.१४०)। 'बाहुलकादभिधानलक्षणाद्वा क्वचिन्नकारस्येत्सञ्ज्ञा न भवति'[2] इति उणादिवृत्तिः। क्षियन्ति निवसन्त्यनेन प्राणिनः, गच्छन्त्यनेन पन्थानमिति वा, उपरिभागेन क्षीयते वा। यद्वा पूर्वस्माद् धातुद्वयान्मनिनि रूपसिद्धिः। 'सुक्षोम'[3] इति माधवः पठति, निगमदर्शनान्निर्णयः। 'कृष्यै त्वा क्षेमाय त्वा' (मा० सं० ९.२२) इत्यत्र क्षेमशब्द उदकनामापि भवितुमर्हति॥

(२४) धरुणम्–'धृञ् धारणे' (भ्वा० उभ० ६४१)। 'हेतुमति च' (अ० ३.१.२६) इति णिच्। 'धारेर्णिलुक् च' (द० उ० ५.६०) उनन्प्रत्ययः। धारयति जगत् धरुणम्। 'पथां विसर्गे धरुणेषु तस्थौ' (ऋ० १०.५.६), 'धीरा इच्छेकुर्धरुणेष्वारभम्' (ऋ० ९.७३.३) इति निगमौ[4]॥

(२५) सिरा–'सृ गतौ' (भ्वा० प० ६६९)। पचाद्यचि (अ० ३.१.१३४), टाप् (अ० ४.१.४) सरा, अकारस्येकारो व्यत्ययेन (अ० ३.१.८५)। 'वृत्रमाशयानं सिरासु' (ऋ० १.१२१.११) इति निगमः। 'सरणशीलास्वप्सु' इति माधवभाष्यम्। 'सुरा' इति केचित् पठन्ति। 'षुञ् अभिषवे' (स्वा० उभ० १) 'अभिषवः क्लेदनम्'[5] इति तद्वृत्तिः। 'षु प्रसवे' भ्वादिरदादिश्च (प० ६७४, ३४)। 'सुसूधागृधिभ्यः क्रन्' (उ० २.२५) इति क्रन्प्रत्ययः। सुनोति क्लेदयति भूमिमिति। प्रसौति अनुजानाति सस्याद्युत्पत्तिं स्वसत्तया, सूयते वा परेषां स्वामिनां विनियोगाय। यद्वा 'सुर ऐश्वर्य्ये' तुदादिः (प० ५१)। सुरति ईश्वरो भवति, जगत् कर्त्तुं समर्थो भवतीत्यर्थः। निगमोऽन्वेषणीयः[6]॥

---

१. वैदिकवाङ्मये सम्प्रति नोपलभ्यते।

२. दशपाद्युणादि-(७.२६)-माणिक्यदेववृत्तिः।

३. मृग्यम्।

४. निरु० १२.३२ मध्ये व्याख्यायतेऽसौ मन्त्रः। (सु०)।

५. क्षीरतरङ्गिणी (५.१)।

६. द्र०–मा० सं० २१.३१,३८ दयानन्दभाष्यम्।

(२६) अररिन्दानि–'रा दाने' (अदा० प० ५०)। 'आदृगमहनजनः किकिनौ लिट् च' (अ० ३.२.१७१) इति किप्रत्ययः। लिड्वद्भावात् द्विर्वचनादिः। ररिर्दाता। ररिर्यस्य न विद्यते तदररि, अन्यैरदत्तमित्यर्थः। तद्ददाति 'आतोऽनुपसर्गे कः' (अ० ३.२.३) अररिदम्। नकार उपजनः अररिन्दम्। अथवा 'कृत्यल्युटो बहुलम्' (अ० ३.३.११३) इति कर्मणि किर्भवति। ररि-दत्तम्, न ररि अररि-अदत्तम् पृथिव्यादिभिः, किन्तत् ? सुखम्। अररि ददातीति पूर्ववत्। उदकेन यद्दीयते सुखादिकं तच्चान्यैः पृथिव्यादिभिः दातुमशक्यत्वाददत्तमित्युच्यते। 'अधा॑रयदर॒रिन्दा॑नि सु॒क्रतुः॑' (ऋ० १.१३९.१०) इति निगमः। अत्र 'अदत्तदानमुदकैः'[१] इति माधवनिर्वचनानुक्रमणी॥

(२७) ध्वस्मन्वत्–'ध्वंसु गतौ च' (भ्वा० आ० ५०५)। चकारादधः-पतनेऽपि। औणादिको मनिन् भावे (उ० ४.१४६)। बाहुलकाद् नलोपः (अ० ३.३.१)। ध्वस्म ध्वंसनं मेघेभ्यः पर्वतादिभ्यो वा अधःपतनं निम्न-प्रदेशगमनम्, जलार्थिकर्तृकं वा गमनमस्यास्तीति मतुप्, 'अनो नुट्' (अ० ८.२.१६) इति मतुपो नुडागमः, नुटोऽसिद्धत्वात् (अ० ८.२.१) तस्य च वत्वं भवति (अ० ८.२.९)। 'ध्वस्मन्वत् स्यात् ध्वंसनवत्'[१] इति माधवनिर्वचनानुक्रमणी। 'सं त्वा॑ ध्वस्म॒न्वद॒भ्ये॑तु॒ पाथः॑' (ऋ० ६.१५.१२) इति निगमः। माधवस्तु 'समभ्येतु त्वा ध्वंसनक्रियायुक्तमन्नं धनं च स्पृहणीयं सहस्रसङ्ख्याकं मदीये गृहे वर्त्तमानं त्वामनमभ्येतु धनं चेति'[२] इत्यभाषयत्॥

(२८) जामि–जामेर्गतिकर्मणः (निघ० २.१४) 'वसिवपियजि०' (उ० ४.१२६) इत्यादिना विहित इञ् बाहुलकाद् भवति। जमति गच्छति निम्नं प्रदेशम्, गम्यते वा जलार्थिभिः। यद्वा 'जनी प्रादुर्भावे' (दि० आ० ४०)। अस्मात् 'जनिघसिभ्यामिण्' (उ० ४.१३१) इति इण्प्रत्ययो बाहुलकान्मकारादेशश्च दीर्घः (अ० ३.३.१)। जायतेऽस्मात् पृथिव्यादि, जायते वा स्वकारणात् 'अग्नेरापः, अद्भ्यः पृथिवी' (तै० उ० २.१) इति श्रुतेः। 'जामिवत्' इत्यन्ये पठन्ति। निगमदर्शनान्निर्णेयः[३]॥

(२९) आयुधानि–'युध सम्प्रहारे' (दि० आ० ६२)। 'घञर्थे कविधानम्०' (अ० ३.३.५८ वा०) इति कः। आयुध्यन्तेऽनेनेत्यायुधम्। यद्वा

---

१. मृग्यम्।

२. 'समभ्येतु त्वां मदीये वर्द्धमानं ध्वंसनक्रियायुक्तं वचनं स्पृहणीयं सहस्रसंख्याकम्' इति कोशेषु। वेङ्कटमाधवभाष्यम् (ऋ० ६.१५.१२) अनुसृत्य शोधितम्।

३. ऋ० १.७५.४ दयानन्दः। (सु०)।

'इगुपधज्ञाप्रीकिरः कः' (अ० ३.१.१३५) इति कर्त्तरि कः। आयुध्यते सम्प्रहरति रक्षांसि। जसि आयुधानि। 'इन्द्रे सन्तिष्ठ जनयायुधानि' (ऋ० ९.९६.१२), 'जामि ब्रुवाण आयुधानि वेति' (ऋ० १०.८.७) इति च निगमौ॥

(३०) क्षपः–'क्षप प्रेरणे' (चु० प०)। कथादिष्वपठितोऽपि 'बहुलमेतन्निदर्शनम्' (चु० ग० सू०) इत्यस्योदाहरणत्वेन धातुवृत्तौ[1] पठ्यते। असुनि णिलोपः। क्षपयति प्रेरयति नाशयति पिपासाम्। 'क्षपो जिन्वन्तः पृषतीभिर्ऋष्टिभिः' (ऋ० १.६४.८) इति निगमः॥

(३१) अहिः–मेघनामसु निरुक्तम् (१.१०.२१)। गच्छति निम्नं प्रदेशम्, आभिमुख्येन हन्ति तापम्, अहिंसकं वा प्राणिनम्। 'पृथिव्या निरशशा अहिम्' (ऋ० १.८०.१) इत्यत्र 'शश प्लुतगतौ' (भ्वा० प० ४८१) सामर्थ्याच्चात्रान्तर्णीतण्यर्थः, निर्गमय भूमौ पातयेत्यर्थः। कम् ? उच्यते, अहिं मेघं वृष्टिमित्यर्थः'[2] इति स्कन्दस्वामिभाष्यम्। उदकं भवितुमर्हति। अन्वेषणीयो निगमः[3]॥

(३२) अक्षरम्[4]–निरुक्तं वाङ्नामसु (१.४१.४६)। व्याप्नोति जगत्, अश्यते भुज्यते वा प्राणिभिः, अनक्ति सेचयति भूमिं वा, न क्षरति क्षीयते कदाचिदपीति वा। 'ततः क्षरत्यक्षरम्' (ऋ० १.१६४.४२) इति निगमः॥

(३३) स्रोतः–'स्रु गतौ' (भ्वा० प० ६७३)। 'स्रुरीभ्यां तुट् च' (उ० ४.२०३) इत्यसुन्। स्रवति निम्नं देशम्। 'धन्वन् स्रोतः कृणुते गातुमूर्मिम्' (ऋ० १.९५.१०) इति निगमः॥

(३४) तृप्तिः–'तृप प्रेरणे' (दि० प० ८४)। क्तिन्। यद्वा 'क्तिच्क्तौ च सञ्ज्ञायाम्' (अ० ३.३.१७४) इति क्तिच्। तृप्यन्ति हि देवतास्तेन तर्पिताः, तृप्यन्ति तेन पीतेन प्राणिन इति वा। तथा च श्रुतिः–'मन्यै भेजानो अमृतस्य तर्हि हिरण्यवर्णा अतृपं यदा वः' (शौ० सं० ३.१३.६)। निगमोऽन्वेषणीयः[5]॥

(३५) रसः[6]–रसतिः शब्दार्थः (भ्वा० प० ४७२)। पचाद्यच् (अ० ३.१.१३४)। रसति हि तन्मेघपर्वतादिभ्यः पतत्। यद्वा 'रस आस्वादने' (चु० उभ० ३५८)। 'पुंसि सञ्ज्ञायां घः०' (अ० ३.३.११८)। रस्यते आस्वाद्यते

---

१. क्षीरतरङ्गिण्याम् (१०.३२५)।

२. स्कन्दस्वामिभाष्यानुसारी शोधः।

३. निरु० १०.४३। प्रासङ्गिकं स्पष्टमुदाहरणं तु–'वृत्रं यदिन्द्र शवसावधीरहिम्' (ऋ० १.५१.४) इति सम्पद्यते। (सु०)।

४. निरु० ११.४१। (सु०)।

५. 'विपीतिं तृप्तिमश्नुहि' (ऋ० ८.८२.६)। (सु०)।

६. निघ० २.७ अन्ननामसु। (सु०)।

जिह्वया लिह्यते इति रसः। यद्वा रसोऽपां गुणः, गुणगुणिनोरभेदोपचारेणाख्यायते, मत्वर्थीयस्य लुग् वा रसवान् रसः। यद्वा रसतिरर्चतिकर्मा (निघ० ३.१४), पचाद्यच् (अ० ३.१.१३४), अर्च्यते देवतात्वात्, अर्च्यतेऽनेन देवता इति वा। 'आ त्वा विशन्त्विन्दवः' (ऋ० ८.९२.२२) इति निगमः[1]॥

(३६) उदकम्–'उदकञ्च' (उ० २.४०) इत्युणादिसूत्रेण उदकशब्दो निपात्यते। क्वुन्प्रत्यये खनतेरुत्पूर्वस्य धातुलोपः। उत्खायते तद् वायुना विभज्यमानं कर्म, उत्खनति वा भूमिं स्वेन वेगेन कर्त्ता। उत्पूर्वस्य वाञ्चतेर्लोपः उदकमिति, उदञ्चतीत्युदकम्। 'उदानिषुर्महीरिति तस्मादुदकमुच्यते' (शौ० सं० ३.१३.४) इति, 'समानमेतदुदकम्' (ऋ० १.१६४.५१) इति, 'मण्डूका इवोदकान्' (ऋ० १०.१६६.५) इति, 'मण्डूका उदकादिव' (ऋ० १०.१६६.५) इति च निगमाः॥

(३७) प्रयः–'प्रीञ् तर्पणे' (क्र्या० उभ० २)। असुन् (उ० ४.१९०)। तृप्यन्तेऽनेन देवताः। यद्वा प्रपूर्वात् यच्छतेः[2] (भ्वा० प० ७१०) असुनि टिलोपो बाहुलकात्। प्रकर्षेण यच्छति[3] प्रयः। 'आपो न द्वीपं दधति प्रयांसि' (ऋ० १.१६९.३) इति निगमः॥

(३८) सरः–'सृ गतौ' (भ्वा० प० ६६९)। असुन् (उ० ४.१९०)। सरति स्रियते वा सरः। 'साकं सरांसि त्रिंशतम्' (ऋ० ८.७७.४) इति निगमः॥

(३९) भेषजम्[4]–'भिषज् चिकित्सायाम्' कण्ड्वादिः (प० १८)। 'पुंसि सञ्ज्ञायां घः०' (अ० ३.३.११८)। भिषज्यन्त्यनेन भेषजम्, 'अनन्तावसथेतिहभेषजात्०' (अ० ५.४.२३) इति निर्देशात् साधुः। 'आप इद्वा उ भेषजीरापो' (ऋ० १०.१३७.६) इति श्रुतिः। 'भेषं रोगं जयति' इति दुर्गः[5]। यद्वा भेषजमस्मिन्नस्तीति भेषजम्। अर्शआदित्वादच् (अ० ५.२.१२७)। तथा 'अप्सु मे सोमो अब्रवीदन्तर्विश्वानि भेषजा' (ऋ० १.२३.२०) इति श्रुतिः। निगमोऽन्वेषणीयः[6]॥

(४०) सहः[7]–सहिरभिभवार्थः (भ्वा० आ० ५९१), अभिभवति[8]

---

१. रसशब्दस्तु नात्रोपलभ्यते। अतः–'स्वादू रसो मधुपेयो वराय' (ऋ० ६.४४.२१) इति साधुतरमुदाहरणम्। (सु०)।

२. 'यमतेः' इति मुद्रितेषु।

३. 'गच्छन्ति' इति मुद्रितेषु।

४. निघ० ३.६ सुखनामसु। निरु० १०.७, १०.३६। (सु०)।

५. अमर० (२.६.५०) क्षीरस्वामी।

६. मा० सं० २१.३३, ३६ दयानन्दः।

७. निघ० २.९ बलनामसु। निरु० ५.२५ तदर्थे मन्त्रः। निरु० ११.९। (सु०)।

८. 'अभिभवते' इति मुद्रितेषु।

उष्णमग्निं वा। यद्वा सहो बलं (निघ० २.९), तदस्यास्तीति मत्वर्थीयस्य लुक् (अ० ५.२.९४ वा०)। बलवत् हि जलम्[1]। 'सहदानुं पुरुहूत क्षियन्तम्' (ऋ० ३.३०.८) इति निगमः। सकारलोपश्छान्दसः॥

(४१) शवः—'टुओश्वि गतिवृद्ध्योः' (भ्वा प० ७३६)। 'श्वेः सम्प्रसारणञ्च' (उ० ४.१९४) इत्यसुन्। श्वयति गच्छति वर्द्धते वा वर्षाकाले। शवतेर्वा गतिकर्मणः[2] (निघ० २.१४) असुन्। शवति गच्छति शवः। निगमोऽन्वेषणीयः। माधवेन स्वीये नामनिघण्टौ 'शवः' इत्येतन्नापाठि, 'शिवम्'[3] 'शापम्'[4] इत्येते पठिते। द्वितीयमाशस्ताशिवासु मातृषु प्रतीपं शपत्तद्यो वदन्ति[5]। शिवमिति सनिगमं दृष्टमपि भाषायामपि जलपर्य्यायत्वाद् अत्र तत्पर्य्यायेण तस्य पाठे प्रयोजनं मन्दम्। शापमित्येतत्त्वत्यन्ताप्रसिद्धम्, प्रायः पूर्वाचार्य्यैः समाम्नाये अपठितम्। अस्य च उदकनामत्वेनाप्रसिद्धत्वात्, शवस्य ओजः सहः इत्याभ्यां सह प्रसिद्धपाठेऽत्र दृष्टत्वात्, प्रायोऽक्षरसाम्याच्च लेखकैः प्रायेण शव इति लिखितमिति[6]। शपन्त्यनेनेति शापम्। 'अकर्त्तरि च कारके सञ्ज्ञायाम्' (अ० ३.३.१९) इति घञ्। हस्ते ह्युदकमादाय शपन्ति मुनय इति श्रूयते॥

(४२) यहः[7]—यातं प्राप्तं पिपासितैः, हुतं च यज्ञे देवतात्वात्। असुनि यातेर्ह्वयतेश्च द्विधातुजं रूपम्, पृषोदरादिः (अ० ६.३.१०९)। निगमोऽन्वेषणीयः॥

(४३) ओजः[8]—'उब्ज आर्जवे[9]' (तु० प० २०)। 'उब्जेर्बलोपश्च' (उ० ४.१९३) इत्यसुन्, बाहुलकादुदकेऽपि भवति। उब्जतेरुक्तपक्षे न्यग्भावार्थश्च। उब्जतेर्वा नैरुक्तधातोर्वृद्धिकर्मणोऽसुन्प्रत्ययः। उब्जत्यनेनेत्यूर्क्[10]। न्यग्भावयति वा स्ववेगेनानतप्रदेशम्, वर्द्धते वा वर्षासु बलवद्वा। निगमोऽन्वेषणीयः[11]॥

(४४) सुखम्—सुखावहत्वात् सुखम्। 'सुखं कस्मात्? सुहितं

---

१. 'बलम्' इत्यपपाठः मुद्रितेषु। २. निरु० २.२। (सु०)।
३. नामानुक्रमणी-पङ्क्तिः ११५। ४. नामानुक्रमणी-पङ्क्तिः १०५।
५. मृग्यम्।
६. 'द्वितीयमा...लिखितम्' इति सन्दर्भः क्वाचित्कः प्रतिभाति?
७. निघ० २.९ बलनामसु। (सु०)। ८. निघ० २.९ बलनामसु। (सु०)।
९. निरु० ६.८ बलार्थे मन्त्रपूर्वकं समर्थिता व्युत्पत्तिः। (सु०)।
१०. द्र०—निरु० ६.८ स्कन्दटीका।
११. ऋग्वेदभाष्ये (ऋ० २.२२.३) दयानन्दः। (सु०)।

खेभ्यः' (निरु० ३.१३) इति भाष्ये स्कन्दस्वामी–"सुष्ठु हितं खेभ्यः। नेयं हितयोगलक्षणा चतुर्थी (अ० २.३.१३ वा०), इन्द्रियाणामचैतन्यात् सुखादिभिरसम्बन्धात्, अत इयं हेतौ पञ्चमी (अ० २.३.२५), इन्द्रियविषयसन्निकर्षस्य सुखहेतुत्वात् उपपद्यते इन्द्रियाणां हेत्वर्थता। यथाश्रुतसम्बन्धानुपपत्तेश्च सबन्धयोगिपदान्तराध्याहारः। अतिशयेन हितं पुरुषस्य खेभ्यः खहेतुकमित्यर्थः। हितं वा पुरुषे आत्मधर्मत्वात् सुखादीनाम्, धर्म्यधिकरणत्वाच्च धर्माणाम्। अथवा खेभ्य इति चतुर्थ्येव, खशब्देन च "आत्मा मनसा संयुज्यते मन इन्द्रियेण" (न्या०वात्स्या० भा० १.१.४) इति सम्बन्धसम्बन्धात् पुरुष एवोच्यते इति यथाश्रुतसम्बन्धः। तथा चोपनिषद्वर्णः–'स एष इह प्रविष्ट आ नखाग्रेभ्यो यथा क्षुरः क्षुरधानेऽवहितः स्यात्' (बृ० उ० १.४.७) इत्युपक्रम्य 'प्राणन्नेव प्राणो नाम भवति' (बृ० उ० १.४.७) इति प्राणादिशब्दैस्तस्यैवाभिधानं दर्शयति। .... खं पुनः खनतेः (निरु० ३.१३) .... उत्पूर्वस्य उत्खनति विनाशयति, किम्? परब्रह्मप्राप्तिसुखम्। कथम्? तद्द्वारेण ग्राम्यसुखप्रवृत्तेरधोगमनात्"[१] इति सुखम्। निगमोऽन्वेषणीयः॥

(४५) क्षत्रम्–'क्षदिः सौत्रः'[२]। 'क्षद स्थैर्य्ये' इति स्कन्दस्वामी। माधवपक्षे क्षदिः शकलीकरणार्थो हिंसार्थश्च। 'क्षद गतिहिंसनयोः' इति सुबोधिनीकारः। 'गुधृवीपचिवचियमि-[मनि]-सदिक्षदिभ्यस्त्रः' (उ० ४.१६८)। वर्षाव्यतिरिक्तेषु ऋतुषु सूर्य्यरश्मिभिराहूता ह्यापो मेघेषु घनीभूताः पाषाणवत् स्थिरा भवन्ति, जलाशयं प्राप्य वा, अश्यते भुज्यते वा, अतिपीतं श्लेष्मादि जनयित्वा प्राणिनो हिनस्ति वा, गच्छति निम्नं गम्यते वा तदर्थिभिः। यद्वा क्षत्रशब्दो बलनाम। अर्शआद्यच् (अ० ५.२.१२७)। बलवद्धि जलम्। धननाम वा (निघ० २.१०), तद्धेतुत्वात्ताच्छब्द्यम्। क्षतादन्नवृष्टिकृतक्लेशात् त्रायन्ते इति वा क्षतशब्दात् त्रायतेश्च[३] क्षत्रम्, पृषोदरादिः (अ० ६.३.१०९)। 'युवं नो येषु वरुण क्षत्रम्' (ऋ० ५.६४.६)। बृहच्च बलमन्नं वेति[४] माधवभाष्यम्। 'उत द्यावापृथिवी क्षत्रमुरु' (ऋ० ६.५०.३) इत्यत्र च क्षत्रं धनमिति इष्टम्। उभयमप्युदकं भवितुमर्हति॥

---

१. अयं सुदीर्घसन्दर्भः स्कन्दटीकातः (निरु० ३.१३) उद्ध्रियते। मुद्रितमनुसृत्य समशोधि।

२. अ० ३.२.१३५ सूत्रे 'क्षदेश्च नियुक्ते' इति वार्त्तिकेन क्षत्ताशब्दनिर्माणाय प्रतिज्ञातो क्षदधातुः। (सु०)।

३. तु०–'क्षतात्किल त्रायत इत्युदग्रः क्षत्रस्य शब्दो भुवनेषु रूढः'–रघुवंशम् २.५३। (सु०)।

४. 'बलं महच्चान्नम्' इति वेङ्कटमाधवः (ऋ० ५.६४.६)।

(४६) आवयाः–आङ्पूर्वात् 'वी गतिव्याप्तिप्रजनकान्त्यसनखादनेषु' (अदा० प० ४१) इत्यस्मात् 'इणश्चासिः' (उ० ४.२२३) इति बाहुलकादसिप्रत्ययः। उपसर्गश्च धात्वर्थानुवर्त्तकः आभिमुख्यार्थो वा, अस्यते वीयते आभिमुख्येन गम्यते इति वा आवयाः। निगमोऽन्वेषणीयः॥

(४७) शुभम्–'शुभ दीप्तौ' (भ्वा० आ० ५०१)। क्विप्प्रत्ययः। शोभते दीप्यते स्वेन तेजसा देवतात्वात्। द्वितीयैकवचनस्य प्रयोगो यथादृष्टम्। 'शुभं पृक्षमिषमूर्जं वहन्ता' (ऋ० ६.६२.४), 'इषं जनाय वहथः शुभस्पती:' (ऋ० १०.४०.४), 'द्रवत्पाणी शुभस्पती' (ऋ० १.३.१) इति च निगमाः॥

(४८) यादुः–'या प्रापणे' (अदा० प० ४२)। 'भृमृशीतृदृचरित्सरितनिधनिमिमस्जिभ्य उः' (उ० १.७) इति बाहुलकादुप्रत्ययो दुडागमश्च। याति निम्नं प्रदेशं यादुः। 'यादुः स्याद् गमनक्रियम्'[1] इति माधवः। तदानीमुप्रत्ययो बाहुलकात्। 'ददाति मह्यं यादुरी' (ऋ० १.१२६.६) इत्यत्र स्कन्दस्वामी–'यादुरित्युदकनाम, रो मत्वर्थीयः'[2] इति॥

(४९) भूतम्–'भू सत्तायाम्' (भ्वा० प० १) निष्ठातकारः कर्त्तरि। पूर्वमेव सत् भूतं प्रथमदृष्टत्वात्। 'अप एव ससर्जादौ तासु बीजमवासृजत्' (मनु० १.८) इति मनुः। अथवा 'भू प्राप्तावात्मनेपदी' (चु० २७१) इति धातुः। प्राप्यं पिपासितैः। यद्वा पञ्चसु पृथिव्यादिषु महाभूतेष्वन्तर्भावात् भूतमित्युच्यते। 'मातान्तरिक्षं निर्मीयन्ते अस्मिन् भूतानि' (निरु० २.८) इति निरुक्त एवोदाहरणम्। निगमोऽन्वेषणीयः॥

(५०) भुवनम्[२]–'भू सत्तायाम्' (भ्वा० प० १)। 'भूसुधूभ्रस्जिभ्यश्छन्दसि' (उ० २.८१) इति क्युन्प्रत्ययः, उवङादेशः। भवन्त्यनेन सर्वे पदार्था इति भुवनम्। 'य इमा विश्वा भुवनानि जुह्वत्' (ऋ० १०.८१.१), 'इमा च विश्वा भुवनान्यस्य' (ऋ० ३.५५.१९) इति च निगमौ॥

(५१) भविष्यत्–भवतेरेव। 'लृट् शेषे च' (अ० ३.३.१३) इति लृट्, 'लृटः सद् वा' (अ० ३.३.१४), 'स्यतासी लृलुटोः' (अ० ३.१.३३) इडागमः (अ० ७.२.३५)। जलं हि आगामिन्यपि काले विद्यते, प्रलयेऽपि जलत्वस्य नाशाभावात्। निगमोऽन्वेषणीयः॥

(५२) महत्–'मह पूजायाम्' भूवादिः (प० ४८५) कथादिश्च (चु० उभ० २९२)। अस्मात् 'वर्त्तमाने पृषद्बृहन्महज्जगच्छतृवच्च' (उ० २.८५) इति निपातनम्। महति महयति वा देवतामनेन पुरुषस्येति महत्, मह्यते वा देवतात्वात्। यद्वा मानेन स्वगतेन परिमाणेन अन्यान् स्वस्मादूनप्रमाणान्

---

१. मृग्यम्। २. निरु० १०.५ लोकार्थे उद्ध्रियते मन्त्रः। (सु०)।

पदार्थान् जहाति अतिक्रामति 'दशोत्तराण्यावरणानि सप्त'[१] इत्यत्र विष्णुपुराणे सर्वमहत्त्वं जलतत्त्वस्योक्तम्। मानशब्दाज्जहातेश्च पृषोदरादित्वाद् (अ० ६.३.१०९) रूपसिद्धिः। 'महत्तदुल्बं स्थविरं तदासीत्' (ऋ० १०.५१.१) इति निगमः॥

(५३) आपः–एतदुक्तसमानार्थम्। कृत्स्नं ताभिर्हि व्याप्तम्, आप्नोतेः सङ्ग्रहकर्मकत्वात्। तथा चाथर्वणिका श्रुतिः–'आपो अग्रे विश्वमावन्' (शौ० सं० ४.२.६) इति। यद्वा कर्मणि क्विप्, इन्द्रेण आप्ता आपः, तदाप्नोतीन्द्रो वा। 'तदाप्नोदिन्द्रो वो यतीस्तस्मादापो अनु ष्ठन' (शौ० सं० ३.१३.२) इति श्रुतिः। 'आपो हि ष्ठा मयोभुवः' (ऋ० १०.९.१) इति निगमः॥

(५४) व्योम–निरुक्तमन्तरिक्षनामसु[२]। व्यवति प्राणिनः संवृणोति भूमिमिति वा। निगमोऽन्वेषणीयः॥

(५५) यशः[३]–'अशू व्याप्तौ' (स्वा० आ० १८) 'अश भोजने' (क्र्या० प० ५४)। 'अशेर्देवने युट् च' (उ० ४.१९२) इत्येतस्माद् बाहुलकादुदकेऽपि भवति। 'अशेर्युट् च'[४] इत्येव श्रीभोजदेवः। अश्नुते व्याप्नोति जगत्, अश्यते वा प्राणिभिः। 'तिर्य्यग् बिलश्चमस ऊद्ध्र्वबुध्नो यस्मिन् यशो निहितं विश्वरूपम्। अत्रासत ऋषयः सप्त साकं ये अस्य गोपा महतो बभूवुः' (शौ० सं० १०.२६.९) इति निगमः॥

(५६) महः–महदित्यनेन समानम्। अत्रासुन्प्रत्ययः (उ० ४.१९०)। 'मह्ना जिनोषि महिनि' (ऋ० ५.८४.१) इति निगमः। 'महो अर्णः' (ऋ० १.३.१२, निरु० ११.२७) इत्यत्र 'मह उदकनाम'[५] इति स्कन्दस्वामी। 'महोभ्यः स्वाहा' (तै० सं० ७.४.१४.१) इति च॥

(५७) सर्णीकम्–'सृ गतौ' (भ्वा० प० ६६९)। 'सर्त्तेर्नुम् च' (उ० ४.२४) इतीकन्प्रत्ययः। अधिकृतं कित्त्वन्तु बाहुलकान्न भवति, गुणः। धावति सर्णीकम्। 'सलिलाय त्वा सर्णीकाय त्वा सतीकाय त्वा'[६] इति निगमः॥

(५८) स्वृतीकम्–'स्वृ शब्दोपतापयोः' (भ्वा० प० ६६६) स्वर-

---

१. मृग्यम्। २. निघ० १.३.३। निरु० ११.४० अन्तरिक्षार्थे मन्त्रः। (सु०)

३. निघ० २.७ अन्ननामसु। तत्रैव २.९ धननामसु। (सु०)।

४. भोजीयव्याकरण इदं सूत्रं नास्ति। 'यजेः श च' (स० क० २.१.३२२) इति 'यशः' साध्यते तत्र। 'अशेर्धने युट् च' (द० उ० ९.५१) इति दशपाद्या माणिक्यदेववृत्तौ क्वचित् 'धने' पदं त्यज्यते। 'अशेर्भगे युट् च' (६२२) इति श्वे०।

५. 'महदत्र मेघ उदकमिति प्रज्ञायते' इति स्कन्दटीका (निरु० ११.२७)।

६. चतुर्विंशं ब्राह्मणम् ४.४.६.२। (सु०)।

तिर्गत्यर्थः (निघ० २.१४), अर्चतिकर्मा च (निघ० ३.१४)। 'अलीकादयश्च' (उ० ४.२६) इतीकन्प्रत्ययान्तेषु द्रष्टव्यः, निपातनात्तुगागमः। शब्दं करोति, गच्छति, पूज्यन्तेऽनेन देवताः, पूज्यते वा स्वयं देवतात्वात् इति स्वृतीकम्। निगमोऽन्वेषणीयः॥ 'सतीकम्' इति केचित् पठन्ति। 'षद्लृ विशरण-गत्यवसादनेषु' (भ्वा० प० ५९३) पूर्ववदीकन् (उ० ४.२६), दकारस्य तकारः। गच्छति अवसीदति कुड्यानि, अनेनेति वा। 'सतीकाय त्वा' (तै० सं० ४.४.६.२) इति पूर्वमुक्तो निगमः। अत्र सशब्देऽवग्रहकरणं[१] पदकाराणामभिप्रायस्य वैचित्र्यात्॥

(५९) सतीनम्–पूर्ववत् सर्वम्, दकारस्य तकारोऽपि निपातनात्। यद्वा सती शोभना असौ, सामर्थ्याद् माध्यमिका वाक्, सा ईना ईश्वरा अस्य तत् सतीनम्, 'सञ्ज्ञापूरण्योश्च' (अ० ६.३.३७) इति पुंवद्भावनिषेधः। 'अथो सतीनकङ्कतः' (ऋ० १.१९१.१) इति निगमः। 'सतीनसत्वा हव्यो भरेषु' (ऋ० १.१००.१) इति च॥

(६०) गहनम्–'गाहू विलोडने' (भ्वा० आ० ४३२)। 'युच् बहुलम्' (उ० २.७९) इति युच्प्रत्ययः, बहुलवचनाद्ध्रस्वत्वम्। अवगाह्यते प्राणिभिः गहनम्। 'अम्भः किमासीद् गहनं गभीरम्' (ऋ० १०.१२९.१) इति निगमः। अत्राम्भः गभीरमित्येते निरुक्त्या योजनीये॥

(६१) गभीरम्–गमेर्धातोः 'गभीरगम्भीरौ' (उ० ४.३६) इति नुगागमः ईरन्प्रत्ययो मकारलोपश्च निपात्यते। गच्छति यज्ञेष्वाहुतं वसतीवर्य्यादिरूपेण। 'पर्षि दीने गभीर आँ' (ऋ० ८.६७.११), 'न तं गूहन्ति स्रवतो गभीराः' (ऋ० १०.१०८.४) इति च निगमौ॥

(६२) गम्भरम्–'कृदरादयश्च' (उ० ५.४१) इत्यरप्रत्ययान्तेषु द्रष्टव्यः। निपातनाद् गमेररन् भडागमश्च। पूर्ववदर्थः। यद्वा 'ग्रह उपादाने' (क्र्या० उभ० ६४) पूर्ववदरन्, 'हृग्रहोर्भश्छन्दसि' (अ० ८.२.३२ वा०)। रेफस्य मकारो बाहुलकात् स चाकारात् परः। गृह्यते वसतीवर्य्यादित्वेन। 'गम्भरेषु प्रतिष्ठाम्' (ऋ० १०.१०६.९) इति निगमः॥

(६३) ईम्–अव्ययमिदम्। 'वि यदज्राँ अजथ नाव ईं यथा' (ऋ० ५.५४.४) इति निगमः। बहुषु पाठेषु 'कम्' इति दृश्यते, तल्लिपिभ्रमतः[२]। अतः ईमित्येव पठितव्यम्॥

---

१. 'सतीकायेति स-तीकाय' इति पदपाठः।

२. निरुक्तकारः स्वयमेव निरु० ४.१८ मध्ये कशब्दम् उदकार्थे निराह। (सु०)। क्वचित् 'कम्' इत्यधिकं पठ्यते।

(६४) अन्नम्–'अन प्राणने' (अदा० प० ६३)। 'कृवृजृसिद्रुपन्यभिस्वपिभ्यो नित्' (उ० ३.१०) इति नप्रत्ययः। अन्यते प्राण्यते प्रजाभिः, न हि कदाचिदपि जलेन विना जीवन्ति प्राणिनः।

अस्य शोषादयो दोषा भवन्ति यदलाभतः।

न हि तोयाद् विना तृप्तिः स्वस्थस्याप्यातुरस्य च॥ इति वाग्भटः।

अत्तेर्वा निष्ठातकारः, 'अन्नाण्णः'[1] (अ० ४.४.८५) इति निर्देशात् जग्ध्यादेशाभावः, अद्यते स्म। अन्नहेतुत्वाद्वा अन्नमित्युच्यते[2]। 'हिरण्यदा ददत्यन्नमस्मै' (ऋ० २.३५.१०) इति निगमः॥

(६५) हविः–'हु दानादनयोः' (जु० प० १)। 'अर्चिशुचिहुसृपिच्छादिच्छर्दिभ्य इसिः' (उ० २.११०) इति इसिप्रत्ययः। दीयते पिपासितेभ्यः, आदीयते वा जनैरुपभोगाय। अथवा हूयते देवतोद्देशेन, प्रक्षिप्यते वैश्वानरे हविरिदं जुहोमीत्यादिमन्त्रैः। 'हविषा जारो अपां पिपर्ति' (ऋ० १.४६.४), 'विश्वकर्मन् हविषा वावृधानः' (ऋ० १०.८१.६) इति च निगमौ॥

(६६) सद्म[3], **(६७) सदनम्**–'षद्लृ विशरणगत्यवसादनेषु' (भ्वा० प० ५९३)। पूर्वत्र 'मनिन्०' (उ० ४.१४६) इति मनिन्प्रत्ययः। उत्तरत्र 'युच् बहुलम्' (उ० २.७९) इति युच्। विशीर्य्यते शिलादिषु पातात्, विशीर्य्यन्तेऽनेन कुड्यादय इति वा, गच्छति वागच्छति निम्नम्, गम्यते वा प्राणिभिः, अवसादयति पिपासायुक्तं वा। 'हविर्हविष्मो महि सद्म दैव्यम्' (ऋ० ९.८३.५) इति निगमः॥

(६८) ऋतम्[4], **(६९) योनिः**–'यु मिश्रणे०' (अदा० प० २६)। 'वहिश्रिश्रुयुद्रुग्लाहात्वरिभ्यो नित्' (उ० ४.५२) इति नित्प्रत्ययः। युतं मिश्रितं[5] सम्पृक्तं सर्वपदार्थैः। यद्वा वेतेर्वकारस्य उकारः, स च ईकारात्परः यणादेशः, स एव प्रत्ययः। परिवीतं हि जलं वायुना तीरेण वा। यद्वा योनिः कारणमन्नस्य। 'वृष्टेरन्नं ततः प्रजाः' (मनु० ३.७६) इति हि स्मृतिः। 'चरत् प्रियस्य योनिषु प्रियः सन्' (ऋ० १०.१२३.५), 'त्वचं पृञ्चन्त्युपरस्य योनौ'

---

१. 'अन्नात्र' इति मुद्रितेषु। २. ...आयुर्घृतमितिवल्लक्षणावृत्त्या। (सु०)।

३. निघ० २.१७ संग्रामनामसु, नि० ३.४ गृहनामसु सद्मनी इति निघ० ३.३० द्यावापृथिवीनामसु। (सु०)।

४. ऋतमित्युदकनाम। देशं देशं प्रत्यृतत्वात्। अत एव ऋतावरीरिति नदीनाम। द्र०–मन्त्रपुरःसरं निरुक्तम् २.२५। (सु०)।

५. 'मितम्' इति मुद्रितेषु।

(ऋ० १.७९.३) इति च निगमौ॥

(७०) ऋतस्य योनिः–यज्ञस्य योनिः, नह्युदकेन विना कश्चिदपि यज्ञः कर्त्तुं शक्यते। ऋतस्य आगामिनो वर्षजलस्य योनिर्वा। आदित्यो भौमं रसं रश्मिनादत्ते पुनर्वर्षाकाले वर्षति। तथा [च] 'सहस्रगुणमुत्स्रष्टुमादत्ते हि रसं रविः'[१] इत्युक्तम्। 'अस्य योनिर्भवति'[२] इति माधवः। 'ऋतस्य योनिमासदः'[३] (ऋ० ५.२१.४), 'ऋतस्य योना गर्भे सुजातम्' (ऋ० १.६५.२) इति निगमौ॥

(७१) सत्यम्[४]–सत्सु भवम् 'भवेच्छन्दसि' (अ० ४.४.११०) इति यत्। यद्वा सत्सु साधुः 'तत्र साधुः' (अ० ४.४.९८) इति यत्। सतोऽर्हमिति वा 'छन्दसि च' (अ० ५.१.६६) इति यः। 'विद्युदसिविद्यामयाद्ध्यानभृतात्सत्यमुपैति'[२], 'ऋतात् सत्यमुपागात्'[२] इति च निगमौ[५]॥

(७२) नीरम्–'णीञ् प्रापणे' (भ्वा० उभ० ६४२)। 'स्फायितञ्चिवञ्चिशकि०' (उ० २.१३) इत्यादिना रन्प्रत्ययः। नयति प्रापयति शुद्धिम्, नीयते वा पुरुषेण स्वाभिमतकार्य्यसम्पादनाय। निगमोऽन्वेषणीयः॥

(७३) रयिः[६]–'रीङ् गतौ'[७] (दिवा० आ० २८)। 'अच इः' (उ० ४.१४०) इति इप्रत्ययः, गुणः। रीयते गच्छति रयिः। यद्वा रातेः (अदा० प० ५०) इप्रत्यये बाहुलकात् युगागमो धातोर्ह्रस्वश्च। दीयते पिपासितेभ्यः। निगमोऽन्वेषणीयः[८]॥

(७४) सत्–'अस भुवि' (अदा० प० ५८)। लटः शतरि 'श्नसोरल्लोपः' (अ० ६.४.१११) सत्। सर्वदा विद्यमानं प्रलयेऽपि नाशाभावात्। 'सदसि भूयाः'[२] इति निगमः॥

(७५) पूर्णम्–'पॄ पालनपूरणयोः' (जु० प० ४)। निष्ठातकारः। 'उदोष्ठ्यपूर्वस्य' (अ० ७.१.१०२), 'हलि च' (अ० ८.२.७७), 'रदाभ्याम्०' (अ० ८.२.४२) इति निष्ठानत्वम्, 'रषाभ्यां नो णः०' (अ० ८.४.१) इति

---

१. रघुवंशम् १.१८। (सु०)। २. मृग्यम्।

३. सातवळेकरसंस्करणे 'ससस्य योनिमासदः' इति पाठः 'ऋतस्य योनिमासदम्' (ऋ० ३.६२.१३) इति भवति निगमः। (सु०)।

४. निघ० ३.१० सत्यनामसु। (सु०)।

५. ऋ० १.१०५.१२ मन्त्रे दयानन्दः। (सु०)।

६. निघ० २.९ धननामसु, निरु० ४.१६। (सु०)।

७. 'रीङ् स्रवणे' इति पाणिनीये धातुपाठे।

८. 'एष वै रयि-(=जलं)-वैश्वानरः'–श० ब्रा० १०.६.१.५। (सु०)।

णत्वम्, पूर्णम्। रक्षितं सेत्वादिना, तदर्थिभिः पूरितं वा कटाहादिषु। यद्वा 'पूरी आप्यायने', दिवादिः (आ० ४२) चुरादिश्च (उभ० २२६)। 'वा दान्तशान्तपूर्णदस्त०' (अ० ७.२.२७) इत्यादिना निपातितम्, उपभोगक्षीणं आप्यायितम्। 'पूर्णं पूर्णेन सिच्यते' (शौ० सं० १०.८.२९) इति निगमः॥

(७६) सर्वम्–'सृ गतौ' (भ्वा० प० ६६९)। 'सर्वनिघृष्वरिष्वलष्व-शिवपट्वप्रह्वेष्वा अतन्त्रे' (उ० १.१५३) इति निपातितम्। अतन्त्रे अकर्त्तरीत्यर्थः। सृतमनेन। यद्वा बाहुलकात् कर्त्तरि भवति, सर्वम्। उभयत्रापि पचाद्यच् (अ० ३.१.१३४)। हिनस्ति पिपासामुष्णं वा। 'सर्वमसि सर्वं मे भूयाः' (तै० सं० १.६.५.१) इति निगमः॥

(७७) अक्षितम्–'क्षि क्षये' (भ्वा० प० १४५)। भावे निष्ठातकारः। क्षितं क्षयः, स यस्य न विद्यते, तदक्षितम्। सर्वदा सर्वैरुपभुज्यमानमपि स्वमहत्तया उपर्य्युपरि वर्षणाद् वा क्षयरहितमित्यर्थः। 'क्षियः, निष्ठायामण्यदर्थे, वाक्रोशदैन्ययोः' (अ० ६.४.५९-६१) इति विहितो दीर्घः। अत्र च भावो ण्यदर्थः, तस्मात् स न भवति। दीर्घाभावात् 'क्षियो दीर्घात्' (अ० ८.२.४६) इति निष्ठानत्वमपि न भवति। 'उत्समक्षितं व्यचन्ति' (शौ० सं० ४.२७.२), 'समानमर्थमक्षितम्' (ऋ० १.१३०.५), 'अक्षितमत्यै जुहोमि स्वाहा'[1] इति च निगमाः॥

(७८) बर्हिः[2]–निगमोऽन्वेष्यः। 'बृंहेर्नलोपश्च' (उ० २.१११) इत्यादिना पूर्ववत् साध्यम्॥

(७९) नाम[3]–नमतेः (भ्वा० प० ७०८), 'मनिन्०' (उ० ४.१४६) इति मनिन्प्रत्यये धातोर्मलोपो दीर्घश्च निपात्यते[4]। नम्यते पुरुषैर्देवतात्वात्। णिजन्ते वा निपातनम्। नमयति नदीतीरनिकटवर्त्तिनो वेतसादीन्। अथवा 'अम गत्यादिषु' भ्वादिः (प० ३१४) 'अम रोगे' चुरादिः (उभ० १८९), नञ्पूर्वः, अस्मान्निपातनं पूर्ववत्। न अमन्ति गच्छन्त्यनेन। न हि स्नानपानो-पयोगिजले विद्यमाने प्राणिनोऽन्यत्र गच्छन्ति। तथाहि– श्रोत्रियसजलनदीप्रभृतिषु विद्यमानेष्वेव वासो विधत्ते' इति स्मृतिः। न आमयत्यनेन, रोगी न भवत्यनेनेत्यर्थः। 'आपो अमीवचातनीः' (ऋ० १०.१३७.६) इति श्रुतिः। 'नामानि यह्वो अधि येषु वर्द्धते' (ऋ० ९.७५.१), 'दधाना नाम यज्ञियम्' (ऋ० १.६.४) इति च निगमौ॥

---

१. मृग्यम्। २. निघ० १.३ अन्तरिक्षनामसु। निरु० ८.९। (सु०)।
३. निरु० ३.२२, ४.२५। (सु०)।
४. 'नामन्सीमन्०' (उ० ४.१५२) इत्यनेन निपात्यते। (सु०)।

(८०) सर्पिः–'०सृप्लृ गतौ' (भ्वा० प० ७०९)। 'अर्चिशुचिहुसृपिच्छादिच्छर्दिभ्य इसिः' (उ० २.११०) इति इसिप्रत्ययः। सर्पति द्रवद्रव्यत्वात्। निगमोऽन्वेषणीयः॥

(८१) अपः–'आप्लृ व्याप्तौ' (स्वा० प० १५)। 'आपः कर्माख्यायां ह्रस्वो नुट् च वा' (उ० ४.२०९) इत्यसुन्प्रत्ययो बाहुलकात् जलेऽपि भवति, अपः। आप इत्यनेन समानार्थम्। 'बह्वीनां गर्भो अपसामुपस्थात्' (ऋ० १.९५.४), 'जामीनामग्निरपसि स्वसॄणाम्' (ऋ० ३.१.११) इति च निगमौ॥

(८२) पवित्रम्–'पूञ् पवने' (क्र्या० उभ० १०)। 'पुवः सञ्ज्ञायाम्' (अ० ३.२.१८५) इति करणे इत्रप्रत्ययः। पुनात्यनेनात्मानं स्नातः। अथवा 'कर्त्तरि चर्षिदेवतयोः' (अ० ३.२.१८६) इत्यपां देवतात्वात् कर्त्तरि इत्रप्रत्ययः। पुनाति पापकृतः। तथा च मनुः–

ज्ञानं तपोऽग्निराहारो मृन्मनो वार्युपाञ्जनम्।
वायुः कर्मार्ककालौ च शुद्धेः कर्त्तॄणि देहिनाम्॥ (५.१०५) इति।

'शतपवित्राः स्वधया मदन्तीः' (ऋ० ७.४७.३) इति निगमः॥

(८३) अमृतम्[1]–नञ्पूर्वात् म्रियतेर्धातोः (तुदा० आ० ११३) 'तनिमृङ्भ्यां किच्च' (उ० ३.८८) इति तन्प्रत्ययः। न म्रियन्ते हि प्राणिनोऽनेन पीतेन। अथवात्यन्तस्वादुरसत्वादमृतमित्युच्यते, तथा 'अमृता ह्यापः' (श० ब्रा० ३.९.४.१६) इति श्रुतिः। 'यत्रा सुपर्णा अमृतस्य भागम्' (ऋ० १.१६४.२१) इति निगमः॥

(८४) इन्दुः[2]–'ञिइन्धी दीप्तौ[3]' (रु० आ० ११) अस्मात् 'उन्देरिच्चादेः' (उ० १.१२) इति विधीयमान उप्रत्ययो बाहुलकाद् भवति, धकारस्य दकारश्च। इन्द्धे दीप्यते स्वेन तेजसा देवतात्वात्। यद्वा 'उन्दी क्लेदने' (रु० प० १९)। 'उन्देरिच्चादेः' (उ० १.१२) इत्युप्रत्ययः आदेरिदादेशश्च उनत्ति भूमिमिन्दुः। यद्वा 'इदि परमैश्वर्य्ये' (भ्वा० प० ५१)। अस्मादुप्रत्ययः। परमेश्वरो हि जलं देवतात्वात्, प्राणिनां प्राणनस्य जीवनस्य च तदायत्तत्वाच्च। निगमोऽन्वेषणीयः॥

(८५) हेम–हिरण्यनामसु व्याख्यातम्[4]। हिनोति गच्छति निम्नं

---

1. निघ० १.२ हिरण्यनामसु, निरु० २.२०, ३.११, ८.२०। (सु०)।
2. निघ० ३.१७ यज्ञनामसु। (सु०)।
3. चन्द्रार्थेऽपि इन्धधातोर्व्युत्पादित इन्दुः (निरु० १०.४२)। (सु०)।
4. निघ० १.२.१। (सु०)।

प्रदेशम्, गम्यते वा तदर्थिभिः, वर्द्धते वा [१]वर्षासु। निगमोऽन्वेषणीयः॥

(८६) स्वः[२]–सुपूर्वादर्त्तेरन्तर्भावितण्यर्थात् 'अन्येभ्योऽपि दृश्यन्ते' (अ० ३.२.७५) इति विच्, गुणः 'स्वरादिनिपातमव्ययम्' (अ० १.१.३६), सुपो लुक्, रेफस्य विसर्जनीयः। अनावृष्ट्यादिजनितं क्लेशं सुष्ठु शोभनं गमयति नाशयति, स्वः। यद्वा केवलादेव स्वार्थे णिच् 'अपिशब्दः सर्वोपाधि-व्यभिचारार्थः' (अ० ३.२.७५ काशिका) इत्युक्तेरिष्टार्थसिद्धिः। अरणं गमनं दोषरहितत्वेन शोभनं यस्य, सुष्ठु गच्छति निम्नं प्रदेशमिति वा, सुष्ठु प्राणिभिर्गम्यते इति वा, स्वः। अकारान्तमप्यस्ति। सुपूर्वाद्रमतेश्च बाहुलकाद् भवति। 'आविः स्वः कृणुते गूहते बुसम्' (ऋ० १०.२७.२४), 'स्वः सिषासन्नथिरो गविष्टिषु' (ऋ० ९.७६.२) इति च रेफान्तस्य निगमौ। 'आसु स्वासु वंसगः' (ऋ० १०.१४४.३) इत्यकारान्तस्य। समाम्नायपाठ उभयत्र समानः॥

(८७) सर्गाः–'सृज विसर्गे' (तु० प० १२४)। कर्मणि घञ्। सृज्यते मेघैर्विसृज्यत इति सर्गः, जसि सर्गाः[३]। यद्वा सर्गो वेगः, अर्शआदित्वादच् (अ० ५.२.१२७)। वेगवन्ति हि जलानि। 'सर्गासोऽवताँ इव' (ऋ० १०.२५.४) इति निगमः॥

(८८) शम्बरम्[४]–सम्पूर्वाद् वृणोतेः (स्वा० उभ० ८) 'ग्रहवृदृ-निश्चिगमश्च' (अ० ३.३.५८) इत्यप्। संव्रियते मेघैः। यद्वा पचाद्यच् (अ० ३.१.१३४), संवृणोति हि भूमिं संवरम्। पृषोदरादित्वात् (अ० ६.३.१०९) शम्बरम्। यद्वा शम्बो वज्रो निरुक्तो मेघनामसु (१.१०.१४)। तद्वानपीन्द्रः शम्बः, मत्वर्थीयस्य लुक्। 'रा दाने' (अदा० प० ५०) शम्बेनेन्द्रेण दीयते शम्बरः। 'घञर्थे कविधानम्०' (अ० ३.३.५८ वा०) इत्यस्योपलक्षणार्थत्वात् कः। यद्वा शञ्च तद्वरञ्च शम्बरः। शमनं च रोगाणामुत्कृष्टञ्च सर्वपदार्थेषु इत्यर्थः। 'शम्बरं सम्बरं जलम्'[५] इति माधवः। 'अतिथिग्वाय शम्बरं गिरेरुग्रो अवाभरत्' (ऋ० १.१३०.७) इति निगमः॥

---

१. हिरण्यवर्णानां सिकतानां वाहिनीत्वाद् हिरण्यवर्णा नद्यो निघण्टौ १.१७। तत्स्थं जलमपि हेम इति प्रतीमः। (सु०)।

२. निघ० १.४ साधारणनामसु। (सु०)।

३. वस्तुतस्तु सृष्ट्यादौ आप एव भूतानि सृजन्तीति ताः सर्गाः। यथोक्तम् ऋग्वेदे (१०.१२१.७)–'आपो ह यद्बृहतीर्विश्वमायन् गर्भं दधाना जनयन्तीरग्निम्'। मनुस्मृतौ (१.८)–'अप एव ससर्जादौ तासु बीजमवासृजत्'। (सु०)।

४. निघ० १.१० मेघनामसु। (सु०)। ५. मृग्यम्।

(८९) अभ्वम्[१]–आङ्पूर्वात् भवतेः क इत्येष बाहुलकाद् भवति, उपसर्गह्रस्वत्वञ्च। 'छन्दस्युभयथा' (अ० ६.४.८६) इति सुपि भूसुधि-योर्विधीयमानो यणादेशो व्यत्ययेन कप्रत्ययेऽपि भवति। आ समन्ताद् भवति विद्यते अभ्वम्। 'अभ्वमा भवति'[२] इति माधवः। 'सनेम्यभ्वं मरुतो जुनन्ति' (ऋ० १.१६९.३) इति निगमः॥

(९०) वपुः[३]–'डुवप बीजसन्ताने०' (भ्वा उभ० ७२९)। 'अर्त्तिपृवपियजितनिधनितपिभ्यो नित्' (उ० २.११९) इत्युसिप्रत्ययः। उप्यतेऽनेन बीजम्, बीजवपने हि जलं साधकतमं भवति। 'चरिष्ण्वं१ चिर्विपुषामिदेकम्' (ऋ० ४.७.९) इति निगमः॥

(९१) अम्बु–अन्तरिक्षनाम्नोऽम्बरशब्दस्य निर्वचने विस्तरेणोक्तम् (१.३.१)। निगमोऽन्वेषणीयः॥

(९२) तोयम्–तवतेर्वृद्धिकर्मणः (निरु० ९.२५) 'अघ्न्यादयश्च' (उ० ४.११३) इति यत्प्रत्ययो निपातितो द्रष्टव्यः। वर्द्धते वर्षासु। 'तुदति [तौति वा] तोयम्' (अमर० १.९.४) इति क्षीरस्वामी। तुदतेः पूर्ववद् यत्प्रत्यये निपातनाद् दकारलोपो गुणः[४]। यद्वा तुदः[५] सौत्र आवरणार्थः[६]। 'तोयेन जीवद्भ्यः ससर्ज भूम्याम्' (तै० आ० १०.१.१) इति निगमः॥

(९३) तूयम्–पूर्ववन्निपातनाद् रूपसिद्धिः। उकारस्य दीर्घः (अ० ६.३.१३६)। निगमोऽन्वेषणीयः॥

(९४) कृपीटम्–'कृपू सामर्थ्ये' (भ्वा० आ० ५१२)। 'कृतृकृपिभ्यः कीटन्' (उ० ४.१८६) इति कीटन्प्रत्ययः। 'कृपो रो लः' (अ० ८.२.१८) इत्यत्र, काशिकावृत्तिः–'कृपणकृपीटकर्पूरादयोऽपि क्रपेरेव[७] द्रष्टव्याः। 'उणादयो बहुलम्' (अ० ३.३.१) इति वा[८] कृपेरेव बाहुलकाल्लत्वाभावः। भाष्ये तु– 'कृपणादीनां प्रतिषेधो वक्तव्यः' (अ० ८.२.१८ म० भा०) इति लत्वाभावः। कल्पते तापनिवारणाय। 'यत्रा कृपीटमनु तद्दहन्ति' (ऋ० १०.२८.८) इति निगमः॥

(९५) शुक्रम्–'शुच दीप्तौ' (निघ० १.१७) अस्मात् 'ऋज्रेन्द्रा-

---

१. निघ० ३.३ महन्नामसु। (सु०)। २. मृग्यम्।
३. निघ० ३.१३ रूपनामसु। (सु०)।
४. तोयं न कदापि तुदति, न चापि व्यथते। अतः क्षिप्रार्थकात् त्वरतेस्तोयं साधुतरं स्यात्। तूयशब्दः क्षिप्रनामसु पठितोऽपि निघण्टौ २.१५। (सु०)।
५. 'तुदिः' इति कोशेषु। ६. द्र०–क्षीरस्वामिटीका (अमर० १.९.४)।
७. 'कृपेरेव' इत्यपपाठो मुद्रितेषु। ८. 'च' इत्यपपाठो मुद्रितेषु।

ग्रवज्रविप्र०' (उ० २.२९) इत्यादिना ककारान्तादेशो रप्रत्ययो गुणाभावश्च निपात्यते। शोचते शुक्रः। यद्वा शोचतेर्ज्वलतिकर्मणः (निघ० १.१७) सम्पदादित्वात् (अ० ३.३.९४ वा०) क्विप्। शुचि, तद्यस्य, रो मत्वर्थीयः। दीप्तमित्यर्थः[१]। शुक्रं तेजःशब्दो वा, रेतःपर्य्यायत्वात् 'देवानां वै रेतो वर्षम्' (ऐ० आ० २.१.३) इति श्रुतेः उदकनामत्वमपि बोद्धव्यम्। 'शुक्रासु ते शुक्र शुक्रमा धूनोमि' (तै० सं० ३.३.३.२) इति निगमः॥

(९६) तेजः–'तेज पालने' भूवादिः परस्मैपदी (१४०)। असुन् (उ० ४.१९०)। तेजयति पालयति प्राणिनः पिपासादिनिवारणात्। यद्वा 'तिज निशाने' (भ्वा० आ० ६९८) असुन्। अग्निजत्वादपां कार्य्यकारणयोरभेदोपचारात् तेज इत्युक्तिः[२]। निगमोऽन्वेषणीयः॥

(९७) स्वधा–स्वशब्द उपपदे 'डुधाञ् दानधारणयोः'[३] (जु० उभ० १०) इत्यस्मात् 'आतोऽनुपसर्गे कः' (अ० ३.२.३)। स्वमात्मानं सर्वान्तर्यामिणं भगवन्तं नारायणं धारयति–

आपो नारा इति प्रोक्ता आपो वै नरसूनवः।

अयनं तस्य ताः पूर्वं तेन नारायणः स्मृतः॥ (मनु० १.१०) इति।

स्वं धनं ददातीति वा, शस्योत्पत्तिहेतुत्वात्। निगमोऽन्वेषणीयः[४]॥

(९८) वारि–ऊर्णोतेः इण्प्रत्ययः। वार्य्यते तत् सेत्त्वादिभिः पुरुषैः। वाजसनेये सौत्रामणीप्रैषे–'देवं बर्हिर्वारितीनाम्' (मा० सं० २१.५७) इति निगमः। अत्र भाष्यकृदुवटः–'वारितीनामुदकवतीनां [वा] वारिप्रभवाणां वा [वरतराणां वा] ओषधीनां सम्बन्धि अध्वरे स्तीर्णम्' इत्यादि॥

(९९) जलम्–'जल घातने' (भ्वा० प० ५७५) 'घातनम् अतैक्ष्ण्यम्'[५] इति वृत्तिः। जलति शीतं भवति। यद्वा जायत इति जः। 'अन्येष्वपि दृश्यते' (अ० ३.२.१०१) इति डो निरुपपदादपि जनेर्भवति। जैः जातैः प्राणिभिः लायत आदीयत इति जलम्। 'ला आदाने' (अदा० प० ५१)।

---

१. रलयोरभेदात् शुक्लं जलम्। अत एव नैयायिका एवमामनन्ति। द्र०–'वर्णः शुक्लः०' (जलस्य) [मुक्तावली] ज्वलतिकर्मणोऽग्नेः भास्वरशुक्लम्, जलस्य तु अभास्वरशुक्लं रूपमिति विवेकः। (सु०)।

२. तु०–'अग्नेरापः' (तै० उ० २.१)। (सु०)।

३. 'धारणपोषणयोः' इति पाणिनीये धातुपाठे।

४. ऋ० १.१६५.६ दयानन्दः। (सु०)।

५. 'तैक्ष्ण्यम्' इति मुद्रितेषु 'जल घात्ये। घात्यं जडत्वम्। अतैक्ष्ण्यमित्यर्थः।' इति क्षीरतरङ्गिणी। 'घातनं तैक्ष्ण्यमिति स्वामी' इति धातुवृत्तौ सायणः।

निगमोऽन्वेषणीयः॥

(१००) जलाषम्–जैः जातैः लष्यते वाञ्छ्यते (भ्वा० उभ० ६२८) इति जलाषम्। जशब्द उपपदे लषेः कर्मणि घञ्। 'जलाषं लषितं[1] जातैः'[2] इति माधवः। यद्वा जलाषमिति सुखनाम, सुखहेतुत्वादपां तद्धेतौ ताच्छब्द्यम्। 'रुद्रं जलाषभेषजम्' (ऋ० १.४३.४) इति निगमः। 'जलाषमुदकनाम वा'[2] इति माधवोऽभाषयत्॥

(१०१) इदम्–'इदि परमैश्वर्य्ये' (भ्वा० प० ५१) इदित्वान्नुम्। 'इन्देः कमिर्नलोपश्च' (उ० ४.१५८) इति कमिप्रत्ययः। देवत्वादपां परमैश्वर्य्यं विद्यते। 'इणो दमिक्' (स० क० २.१.२९९) इति श्रीभोजदेवः, ईयते निम्नं प्रदेशं गम्यते वा। यद्वा इन्धेः कमिः[4] बाहुलकान्नलोपो धकारस्य दकारश्च। इन्धे दीप्यत इदम्। 'स्वसारो या इदं ययुः' (ऋ० २.५.५), 'ता जिह्वया सदमेदं सुमेधाः' (ऋ० ६.६७.८), 'रूपा मिनानो अकृणोदिदन्नः' (ऋ० ५.४२.१३) इति च निगमाः॥

इत्येकशतमुदकनामानि॥ १२॥

अवनयः (१)। यह्व्यः (२)। खाः (३)। सीराः (४)। स्रोत्याः (५)। एन्यः (६)। धुनयः (७)। रुजानाः (८)। वक्षणाः (९)। स्वादो अर्णाः (१०)। रोधचक्राः (११)। हरितः (१२)। सरितः (१३)। अग्रुवः (१४)। नभन्वः (१५)। वध्वः (१६)। हिरण्यवर्णाः (१७)। रोहितः (१८)। सस्रुतः (१९)। अर्णाः (२०)। सिन्धवः (२१)। कुल्याः (२२)। वर्य्यः (२३)। उर्व्यः (२४)। इरावत्यः (२५)। पार्वत्यः (२६)। स्रवन्त्यः (२७)। ऊर्जस्वत्यः (२८)। पयस्वत्यः (२९)। सरस्वत्यः (३०)। तरस्वत्यः (३१)। हरस्वत्यः (३२)। रोधस्वत्यः (३३)। भास्वत्यः (३४)। अजिराः (३५)। मातरः (३६)। नद्यः (३७)। इति सप्तत्रिंशन्नदीनामानि॥ १३॥

---

१. 'जलषितम्' इति मुद्रितेषु। २. मृग्यम्।
३. 'दमुग्' इति मुद्रितेषु। ४. 'कमिन्' इति मुद्रितेषु।

(१) अवनयः–पृथ्वीनामसु व्याख्यातः[१]। अवन्ति जगत् स्वोदकेन, अव्यन्ते प्राणिभिस्तीरादिनिर्माणेन। 'आसिञ्चन्तीरवनयः समुद्रम्' (ऋ० ५.८५.६), 'गा न व्राणा अवनीरमुञ्चत्' (ऋ० १.६१.१०) इति च निगमौ। निगमेषु बहुवचनान्तत्वेन प्रायशः श्रवणात् सर्वत्र बहुवचनान्तत्वम्[२]॥

(२) यह्व्यः[३]–'या प्रापणे' (अदा० प० ४२)। 'शेवयह्वजिह्वाग्रीवाप्वामीवाः' (उ० १.१५४) इति निपातनाद् वप्रत्ययो[४] धातोर्ह्रस्वत्वं हुगागमश्च[५]। बाहुलकादापः स्थाने ङीप् पिप्पल्यादित्वाद् (अ० ४.१.४१ ग० सू०) द्रष्टव्यम्। यान्ति तांस्तान् प्रदेशान्, प्राप्यन्ते वा प्राणिभिः। यद्वा 'यह्वः' इति महन्नाम (निघ० ३.३), पूर्ववद् ङीप्। यह्व्यः महत्यो नद्यः। द्विधातुजं वा इदं नाम–यातेर्ह्वेञः, पृषोदरादिः (अ० ६.३.१०९)। याताश्च प्राणिभिः, हूताश्च यज्ञेष्वित्यर्थः। 'स्वयमत्कैः परिदीयन्ति यह्वीः' (ऋ० २.३५.१४), 'अवर्द्धयन्त्सुभगं सप्त यह्वीः' (ऋ० ३.१.४) इति च निगमौ॥

केषुचित् कोशेषु 'यव्याः' इतीदं नाम दृष्टम्। 'यु मिश्रणे०' (अदा० प० २६) पृथग्भावोऽप्यस्यार्थः इति नैगमकाण्डे 'वियुते' (निरु० ४.२५) इत्यस्य निर्वचने स्कन्दस्वामिना प्रतिपादितः 'यु मिश्रणे' इति, अयं पठ्यते, प्रयुज्यते च 'जनयत्यै त्वा संयौमि' इति, तथापि पृथग्भावेऽपि वर्त्तते। न चायं वेरुपसर्गस्यार्थः, केवलस्यापि दर्शनात्–'युतं धनमस्य' 'युतं भोजनमस्य' 'युतोऽयम्' इति पृथग्भूत इति गम्यते[६] इति। अस्मात् 'आसुयुवपिरपिलपित्रपिचमश्च' (अ० ३.१.१२६) इति ण्यति प्राप्ते 'कृत्यल्युटो बहुलम्' (अ० ३.३.११३) इति 'अचो यत्' (अ० ३.१.९७), गुणे, 'वान्तो यि प्रत्यये' (अ० ६.१.७६)। वर्षासु मेघैरुदकेन मिश्रणीयाः, अन्येषु सूर्य्यरश्मिभिराकृष्टेन पृथग्भवन्त्यो वा। अथवा 'युज् बन्धने' (क्र्या० उभ० ७) अस्मात् अघ्न्यादित्वात् (उ० ४.११३) यग् द्रष्टव्यः। बध्यते आसु सेतुरिति यव्याः। यद्वा यवेभ्यो धान्यविशेषेभ्यो हिताः 'खलयवमाषतिलवृषब्रह्मणश्च' (अ० ५.१.७) इति यत्। नदीजवेनापि वर्धन्ते यवाः[७]। 'वार्ण त्वा यव्याभिः' (ऋ०

---

१. निघ० १.१.९। (सु०)।

२. एकवचनान्तास्तु प्रायशः पृथिवीवाचकाः। (सु०)।

३. निघ० ३.३ महन्नामसु। निरु० ८.८ महदर्थे मन्त्रः। (सु०)।

४. 'अप्रत्ययः' इत्यपपाठो मुद्रितेषु।

५. द्र०-द० उ० ८.१२८ माणिक्यदेववृत्तिः।

६. तु०-स्कन्दटीका (निरु० ४.२५)।

७. 'यव्याः' इत्यपपाठो मुद्रितेषु।

८.९८.८) इति निगमः। 'ह्रदमिव कुल्याभिः'[१] इति माधवभाष्यम्। अनयोर्युक्तं गृह्णन्तु सूरयः॥

(३) खाः–'खनु अवदारणे' (भ्वा० उभ० ६१८) 'अन्येष्वपि दृश्यते' (अ० ३.२.१०१) इत्यत्र 'अपिशब्दः सर्वोपाधिव्यभिचारार्थः (३.२.१०१ काशिका) इत्युक्तेर्निरुपपदादपि जनिव्यतिरिक्तादपि खनेर्डः प्रत्ययः, टाप्। वृत्रहननादिन्द्रेण खाताः। तथा च श्रुतिः–'अपां बिलमपिहितं यदासीद् वृत्रं जघन्वाँ अप तद्ववार' (ऋ० १.३२.११) इति, 'इन्द्रो अस्माँ अरदद् वज्रबाहुः' (ऋ० ३.३३.६) इति च नदीवाक्यम्। यद्वा खनन्ति भूमिं वेगेन वहन्त्यः। अथवा 'खै दाने'[२]। 'घञर्थे कविधानम्०' (अ० ३.३.५८ वा०) इत्यस्योपलक्षणार्थत्वात् कः, टाप्। 'खै स्थैर्ये हिंसायाञ्च'[२] इति वा। खायन्ति स्थिरा भवन्ति वृत्रेण रुद्धाः, हिंस्यन्ते वा तेन, खाः। 'स रायस्खामुप सृजा गृणानः' (ऋ० ६.३६.४), 'ऋध्याम ते वरुण खामृतस्य' (ऋ० २.२८.५) इति च निगमौ॥

(४) सीराः[३]–'षिञ् बन्धने' सौवादिकः[४] (उभ० २) क्रैयादिकश्च (उभ० ५)। 'शुसिचिमीनां दीर्घश्च' (उ० २.२६) इति रप्रत्ययः। सीयन्ते बध्यन्ते आसु सेत्वादितः शिलादिभिरवतारा वा[५]। 'सरणात् सीरः'[६] इति सर्त्तेर्धातोः 'कृपृशृकटिपटिशौटिभ्य ईरन्' (उ० ४.३१) इति बाहुलकाद् भवति टिलोपश्च। 'सीरशब्दो नदीवचनोऽन्तोदात्तः, हलवचन आद्युदात्तः'[७] इति माधवः। 'द्रवित्वः पृथिव्यां सीरा अधि' (ऋ० १०.४९.९), 'सीरा इन्द्रः स्रवितवे पृथिव्या' (ऋ० ४.१९.८) इति च निगमौ॥ 'सीरा युञ्जन्ति कवयः' (ऋ० १०.१०१.४) इति हलवचनः॥

(५) स्रोत्याः–स्रोतसि भवाः। 'स्रोतसो विभाषा ड्यड्ड्यौ' (अ० ४.४.११३) इति ड्यप्रत्ययः। स्रोतोऽनुसरणाद्धि नद्यो भवन्ति। 'नवतिं स्रोत्या नव च स्रवन्ती' (ऋ० १०.१०४.८) इति निगमः॥

(६) एन्यः–'इण् गतौ' (अदा० प० ३८)। 'वीज्याज्वरिभ्यो निः'

---

१. मृग्यम्।

२. 'खै खदने' (भ्वा० प० ६५१) इति पाणिनीये धातुपाठे। 'खदनं स्थैर्यं हिंसा च' इति सायणः (धातुवृत्तौ)। 'खद स्थैर्ये हिंसायां च' (भ्वा० प० ४०) इति पाणिनीये धातुपाठे।

३. लौकिकसंस्कृते तु लघुनाड्यर्थे सिराशब्दः प्रचचार। यथा–ध्मानाद्धमन्यः, स्रवणात् स्रोतांसि, सरणात् सिराः, इति चरके सूत्रस्थाने त्रिंशेऽध्याये। (सु०)।

४. 'भौवादिकः' इत्यपपाठो मुद्रितेषु।

५. 'वा' भिन्नक्रमः, शिलादिभिर्वेति।

६. निरु० ९.४०।

७. मृग्यम्।

(उ० ४.४९) इति बाहुलकान्निप्रत्ययः। 'कृदिकारात्०' (अ० ४.१.४५ ग० सू०) इति ङीष्। यन्ति एन्यः[१] गमनस्वभावा हि नद्यः, गम्यन्ते वा प्राणिभिः। 'वि यद् वर्त्तन्त एन्यः' (ऋ० ५.५३.७) इति निगमः। 'एनीशब्दो नदी-वचनोऽन्तोदात्तः अन्यत्राद्युदात्तः'[२] इति माधवः। 'एनीं त एते बृहती अभिश्रियां' (ऋ० १.१४४.६) इति अस्योदाहरणम्॥

(७) धुनयः–'धुञ् कम्पने' सौवादिकः[३] (उभ० ९)। बहुलानुवृत्तेः 'घृणिपृश्निपार्ष्णिचूर्णिभूर्णि०' (उ० ४.५३) इत्युक्तेर्निप्रत्ययः किच्च। धुन्वन्ति कम्पयन्ति तीरवृक्षादीनि, कम्पन्ते वा स्वयं गमनशीलत्वात्[४]। 'दिवेदिवे धुनयो यन्त्यर्थम्' (ऋ० २.३०.२) इति निगमः॥

(८) रुजानाः[५]–'रुजो भङ्गे' तुदादिः परस्मैपदी (१२६)। व्यत्ययेन शानच्, अत्र च प्रथमासमानाधिकरणे शानच् भवति, मुगागमस्तु न क्रियते आगमानित्यत्वेन व्यत्ययेन वा। रुजन्ति कूलानि। 'सं रुजानाः पिपिष इन्द्रशत्रुः' (ऋ० १.३२.६) इति निगमः॥

(९) वक्षणाः–'वक्ष रोषे' (भ्वा० प० ४४३)। 'क्रुधमण्डार्थेभ्यश्च' (अ० ३.२.१५१) इति युच्। वक्षन्ति क्रुध्यन्तीव हि ताः वर्षासमये वेगेन गच्छन्त्यः। चित्स्वरं (अ० ६.१.१५७) बाधित्वा व्यत्ययेन प्रत्ययस्वरः (अ० ३.१.३)। यद्वा 'वह प्रापणे' (भ्वा० उभ० ७३०) अस्माद् 'युच् बहुलम्' (उ० २.७९) इति युचि षुगागमो बाहुलकाद् भवति। स्वयं प्रवहन्ति हि ताः। 'वक्षतेः प्राप्तिकर्मणः स्यात्'[६] इति माधवः। युच्। प्राप्यन्ते हि ताः प्राणिभिः, प्राप्नुवन्ति वा समुद्रं निम्नं वा। 'प्र वक्षणा अभिनत् पर्वतानाम्' (ऋ० १.३२.१), 'महि ज्योतिर्निहितं वक्षणासु' (ऋ० ३.३०.१४) इति निगमौ॥

(१०) स्वादोअर्णाः–'स्वाद भक्षणे' (भ्वा० आ० २३)। कर्त्तर्य्यसुन् (उ० ४.१९०)। अर्णशब्दोऽकारान्तोऽपि निरुक्त उदकनामसु (१.१२.१)। स्वादो भक्ष्यमाणः। भक्षणेन चात्र बाधनं लक्ष्यते, तेन कूलं बाधमानोऽर्णो जलं यासामिति स्वादोअर्णाः, वेगवज्जला इत्यर्थः। 'प्रकृत्यान्तःपादमव्यपरे' (अ० ६.१.१११)। तथा च माधवः–'धन्वर्णसो नद्यः स्वादोअर्णाः' (ऋ०

---

१. 'एभ्यः' इत्यपपाठो मुद्रितेषु। २. मृग्यम्।

३. निरुक्ते समर्थ्यत एष धातुः–'धुनिर्धुनोतेः' ५.१२। (सु०)। 'भौवादिः' इत्यपपाठो मुद्रितेषु।

४. ध्वनधातोरपि सम्भाव्यते व्युत्पत्तिः। यतो हि 'धुनिमतीऋर्णोरपः' (ऋ० १.१७४.९) आदिषु शब्दायमाना इत्यर्थः। प्राकृतभाषासु 'धुन' शब्दे जीवत्यस्मिन्नर्थेऽसौ शब्दः। (सु०)।

५. निरु० ६.४ मध्ये व्याख्यातोऽनुमन्त्रं शब्दः। (सु०)। ६. मृग्यम्।

५.४५.२) इत्यत्र 'धन्वर्णसस्तद्वज्जलाः। स्वादोअर्णा जलान्विताः। स्वादो वेगवज्जलं यासां तास्तथोक्ता भक्षितकूलोदकाः'[१] इति। 'धन्वर्णसः' (ऋ० ५.४५.२) इत्ययं निगमः[२]। अत्रार्णश्शब्दो विशेषणम्, अन्यो वा निगमोऽन्वेषणीयः॥

(११) रोधचक्राः–'रुधिर् आवरणे' (रु० प० १) 'भावे' (अ० ३.३.१८) घञ्। 'डुकृञ् करणे' (तना० उभ० १०) 'घञर्थे कविधानम्०' (अ० ३.३.५८ वा०) इति कः। 'कृञादीनां के द्वे भवतः' (अ० ६.१.१२ वा०) इति द्वित्वम्। चक्रम् करणम्। रोधो रोधस्य निरोधस्य चक्रं करणं कृतिरासां विद्यते इति रोधचक्राः। नद्यो वृष्ट्या प्राणिनां स्वैरसञ्चरणनिरोधकारिणः। यद्वा रोधः[३] तीरम्, तस्य करणं निर्माणमासां विद्यते, तीरवत्यो हि नद्यः। सकारलोपश्छान्दसः। यद्वा रुधेः करणे घञि (अ० ३.३.१९) रुध्यतेऽनेन जलप्रवाह इति रोधः शब्दः[४] करणं निर्माणमासां विद्यते। 'समुद्रं न स्रवतो रोधचक्राः' (ऋ० १.१९०.७) इति निगमः॥

(१२) हरितः[५]–'हृञ् हरणे' भूवादिः (उभ० ६४०), 'हृ प्रसह्यकरणे' जुहोत्यादिः (प० १५)। 'हृसृरुहियुषिभ्य इतिः' (उ० १.९७)। हरन्ति वृक्षगुल्मादीनि वेगेन, प्रसह्य हरन्ति वा। निगमोऽन्वेषणीयः॥

(१३) सरितः–'सृ गतौ' (भ्वा० प० ६६९)। पूर्वेण सूत्रेण (उ० १.९७) इतिप्रत्ययः। एन्य इत्यनेन समानार्थः। 'सम्यक् स्रवन्ति सरितो न धेनाः' (ऋ० ४.५८.६), 'यो वां समुद्रान्त्सरितः पिपर्ति' (ऋ० ७.७०.२) इति निगमौ॥

(१४) अग्रुवः[६]–'अहि गतौ' (भ्वा० आ० ४२३)। 'जत्र्वादयश्च' (उ० ४.१०३) इति रुप्रत्ययान्तेषु निपातितेषु द्रष्टव्योऽयं शब्दः, निपातनान्नलोपः, '०तन्वादीनां छन्दसि बहुलम्०' (अ० ६.४.७७ वा०) इत्युवङ्। गच्छन्ति तांस्तान् प्रदेशान्। 'अग्रुवो गमनात् नद्यः'[१] इति माधवः। 'समग्रुवो न समनेष्वञ्जन्' (ऋ० ७.२.५) इति निगमः॥

(१५) नभन्वः–'णभ तुभ हिंसायाम्' भूवादिरात्मनेपदी (५०३), दिवादिः (१२७) क्र्यादिश्च परस्मैपदी (५२)। 'दाभाभ्यां नुः' (उ० ३.३२) इति बाहुलकात् नुप्रत्यये अकार[७] उपजनः। नभन्ते, नभ्यन्ति, नभ्नन्ति इति

१. मृग्यम्।
२. पूर्वोक्त एवायं निगमः। (सु०)।
३. असुन्प्रत्ययान्तः।
४. सन्दिग्धम्।
५. निघ० १.६ दिङ्नामसु। निघ० १.१५। (सु०)।
६. निघ० २.५ अङ्गुलिनामसु। (सु०)।
७. 'नकार' इत्यपपाठो मुद्रितेषु।

नभन्वः। 'जसादिषु छन्दसि वा वचनं प्राङ् णौ चङ्युपधायाः०' (अ० ७.३.१०९ वा०) इति विकल्पितत्वात् 'जसि च' (अ० ७.३.१०९) इति गुणाभावः। नद्यो हि बाधिकाः कूलादीनाम्। 'प्राग्रुवो नभन्वो३ न वक्वाः' (ऋ० ४.१९.७) इति स्त्रीलिङ्गो निगमः। 'प्र पर्वतस्य नभनूँरचुच्यवुः' (ऋ० ५.५९.७) इति पुँल्लिङ्गे। अत्र 'सिन्धवः स्युर्नभन्वः'[1] इति माधवनिर्वचनानुक्रमणी॥

(१६) वध्वः–'वह प्रापणे' (भ्वा० उभ० ७३०)। 'वहो धश्च' (उ० १.८३) इति ऊप्रत्ययः। वहन्ति उह्यन्ते वा भूम्याम्। यद्वा समुद्रस्य भार्य्यात्वाद् वध्व इत्युच्यते। सरित्पतिर्हि समुद्रः। निगमोऽन्वेषणीयः॥

(१७) हिरण्यवर्णाः–हिरण्यशब्दो निरुक्तः 'हर्य्यतेः कन्यन् हिरश्च' (१.२.५) इत्यादिना। 'वृञ् वरणे' (स्वा० उभ० ८)। 'ऋज्रेन्द्राग्रवज्र०' (द० उ० ८.४६, श्वे० १७७) इत्यादिना रन्प्रत्ययान्तो निपातितः[2]। वृणोति व्रियते वासाविति वर्णः श्वेतादिः। हिरण्यः कान्त इष्टो वर्णो यासां ताः। यद्वा हिता घर्मादौ, रमणीया मनःप्रह्लादजनयित्र्यः, वारिकाश्च तापादेर्भूम्या वा इति[3]। 'हिरण्यवर्णाः परियन्ति यह्वीः' (ऋ० २.३५.९) इति निगमः॥

(१८) रोहितः–'रुह बीजजन्मनि०' (भ्वा० प० ५९८)। 'हृसृरुहियुषिभ्य इतिः' (उ० १.९७)। रोहन्त्याभिर्बीजानि, तज्जलेन हि बीजानि प्ररोहन्ति। निगमोऽन्वेषणीयः[4]॥

(१९) सस्रुतः–सम्पूर्वात् 'स्रु गतौ' (भ्वा० प० ६७३) इत्यस्मात् 'क्विप् च' (अ० ३.२.७६) इति क्विप्प्रत्ययः। सङ्गताः सस्रुतः। समोऽन्तलोपश्छान्दसः। क्षुद्रनद्यो महानद्यश्च परस्परं सङ्गता भवन्ति, ततः सस्रुत इत्युच्यन्ते। 'सस्रुतः सङ्गताः'[1] इति माधवः। यद्वा स्रवतेः सम्पदादित्वात् (अ० ३.३.९४ वा०) क्विप्। स्रवणं स्रुतजलप्रवाहः स्रोत इत्यर्थः, तया सह वर्त्तन्ते इति सस्रुतः। 'सहस्य सः सञ्ज्ञायाम्' (अ० ६.३.७७) इति सः, सस्रुतः। 'सस्रुतः स्रोतसा युक्ताः'[1] इति च माधवः। 'ऋतस्य धेना अनयन्त सस्रुतः' (ऋ० १.१४१.१) इति निगमः॥

(२०) अर्णाः–'ऋणु गतौ' तनादिः (प० ५)। पचाद्यच् (अ०

---

१. मृग्यम्।
२. प्रत्ययस्य नकारादेशः।
३. यद्वा हिरण्यवर्णतटत्वात् तत्समीपो नदो लक्षणया हिरण्यवर्णः। परवर्तिनि युगेऽप्यत एव शोणो नदो हिरण्यवाहः। यथा 'यं (हिरण्यवाहं) जनाः शोण इति कथयन्ति' इति हर्षचरिते प्रथम उच्छ्वासे बाणभट्टः। (सु०)।
४. ऋ० ७.४२.२ भाष्ये दयानन्दः। (सु०)।

३.१.१३४) अर्णन्ति गच्छन्त्यर्णाः। यद्वा अर्ण इत्यकारान्तमप्युदकनामेत्युक्तम् (१.१२.१)। अर्शआदित्वादच् (अ० ५.२.१२७)। जलवत्यो हि नद्यः। 'अर्त्तेरर्णास्युपगाः'[1] इति माधवः। तत्र पक्षे 'धापॄवस्यज्यतिभ्यो नः' (उ० ३.६) इति नप्रत्ययः। यद्वा पचाद्यचि (अ० ३.१.१३४), अर्त्तेः 'उदके नुट् च' (उ० ४.१९८) इत्यसुनि विहितो नुडागमो बाहुलकाद् भवति। 'ऋ॒णोर॒पो अ॑नव॒द्यार्णा॑ः' (ऋ० १.१७४.२) इति निगमः॥

(२१) सिन्धवः[2]–'स्यन्दू प्रस्रवणे' (भ्वा० आ० ५११)। 'स्यन्देः सम्प्रसारणं धश्च' (उ० १.११) इत्युप्रत्ययः। स्यन्दन्ते इत्यर्थः। 'अधो अ॒क्षाः सिन्धवः स्रो॒त्याभि॑ः' (ऋ० ३.३३.९), 'यस्य॑ ते स॒प्त सिन्ध॑वः[3]' (ऋ० ८.६९.१२) इति च निगमौ॥

(२२) कुल्याः–'कुल संस्त्याने' (भ्वा० प० ५८३)। कोलन्ति संस्त्यायन्त्यस्मिन् शिलादय इति कुलं पर्वतः। कुले प्रधानभूते पर्वते भवाः कुल्याः। 'भवे छन्दसि' (अ० ४.४.११०) इति यत्। कुलिशनिर्वचने 'कुलशातनः' (निरु० ६.१७) मेघस्य पर्वतस्य वा समुच्छ्रिताः प्रदेशाः, कुलाः, तेषां च शातनः इत्युक्तेः[4]। मेघस्य पर्वतस्य वा समुच्छ्रिते प्रदेशे कुले भवन्तीति कुल्याः। क्षीरस्वामी तु 'कुलिनः पर्वतान् श्यति पक्षच्छेदेन तनूकरोति कुलिशम्'[5] इत्युक्तवान्। यद्वा 'कुल्याल्पा कृत्रिमा सरित्' (अमर० १.९.३४) इत्यत्र क्षीरस्वामिनो व्याख्या–'कृत्रिमा अल्पा च क्षेत्रसेकार्था कुल्या। कुले साधुः 'तत्र साधुः' (अ० ४.४.९८) इति यत्। यदाहुः– 'कुल्यादानं जलं विद्यात् कुल्यो मान्ये व्यवस्थितः। दाम्पत्यं कुलमित्यन्ये हलं वा कुलमुच्यते'[6] इति। 'स्यन्द॑न्तां कु॒ल्या विषि॑ताः पु॒रस्ता॑त्' (ऋ० ५.८३.८), 'ह्र॒दं कु॒ल्या इ॑वाशत' (ऋ० ३.४५.३) इति च निगमौ॥

(२३) वर्य्यः–'वृञ् वरणे' (स्वा० उभ० ८), 'वृङ् सम्भक्तौ' (क्र्या० आ० ४२)। 'अच इः' (उ० ४.१४०) इति इप्रत्यय., 'कृदिकारात्०' (अ० ४.१.४५ ग० सू०) इति ङीष्। वरणीयाः सम्भजनीया वा वर्य्यः। निगमोऽन्वेषणीयः[7]॥

---

१. मृग्यम्। २. निरु० १०.५। (सु०)।
३. निरु० ५.२७ मध्ये व्याख्यायतेऽसौ मन्त्रः। (सु०)।
४. द्र०–स्कन्दटीका (निरु० ६.१७)। तत्र मूले टीकायां च 'कूल'शब्दः प्रयुज्यते।
५. अमर० १.१.४७ क्षीरस्वामिटीका।
६. क्षीरस्वामिटीका (अमर० १.९.३४) स्वल्पपाठभेदेन।
७. शब्दोऽयं सोमयागेषु प्रसिद्धे 'वसतीवरी'शब्दे जीवग्राहं गृह्णातीति प्रतीमः। सोमयागपूर्वरात्रौ निर्झरादानीतं वसतिपूर्वकं जलमिति हि तस्यार्थः। (सु०)।

इदं नाम माधवः 'ऋतावर्य्यः'[१] इत्यपठत्। ऋतमित्युदकनाम (निघ० १.१२.६८। निरु० २.२५) 'छन्दसीवनिपौ च' (अ० ५.२.१०९ वा०) इति मत्वर्थीयो वनिप्, 'वनो र च' (अ० ४.१.७) इति ङीब्रेफौ, 'अन्येषामपि दृश्यते' (अ० ६.३.१३६) इति दीर्घः, ऋतावर्य्यः। 'ऋतावरीरुप मुहूर्त्तमेवैः' (ऋ० ३.३३.५) इति निगमः॥ अत्र स्कन्दस्वामिना 'नदीनाम' इति नोक्तम्, युक्तं गृह्णन्तु सूरयः॥

(२४) **उर्व्यः**–'ऊर्णुञ् आच्छादने' (अदा० उभ० ३२) इत्यस्माद् वृणोतेः (स्वा०उभ० ८) च। उर्व्य इति पृथिवीनामसु व्याख्यातम् (१.१.१०)। महत्यो नद्यः, छादयित्र्यो वा भूमेः स्वेनोदकेन॥

एतदादीनामुत्तरेषां नाम्नां निगमा अन्वेषणीयाः प्रायेण॥

(२५) **इरावत्यः**–'इण् गतौ' (अदा० प० ३८)। 'ऋज्रेन्द्राग्रवज्रविप्र०' (उ० २.२९) इत्यादिना रप्रत्ययो गुणाभावो निपात्यते। इरा बलम्, तदासामस्ति मतुप्, वत्वम्, ङीप्'[२]॥

(२६) **पार्वत्यः**–पर्वतशब्दो निरुक्तो मेघपर्वतानां नामत्वेन (१.१०.९)। 'तस्यापत्यम्' (अ० ४.१.९२) इत्यण्, ङीप् (४.१.१५)॥

(२७) **स्रवन्त्यः**–'स्रु गतौ' (भ्वा० प० ६७३)। लट्, शतृतो ङीप्। सर्वदा गमनस्वभावाः। 'नवतिं स्रोत्या नवं च स्रवन्तीः' (ऋ० १०.१०४.८) इति निगमः। अत्र स्रोत्या इति विशेषणम्॥

अस्य स्थाने 'रेवत्यः' इति केषुचित् कोशेषु दृश्यते। तदा 'रयिः' इत्युदकनाम (१.१२.७३)। रयिरासामस्तीति मतुप्, 'रयेर्मतौ बहुलम्' (अ० ६.१.३७ वा०) इति सम्प्रसारणम्। 'पतिः सिन्धूनामसि रेवतीनाम्' (ऋ० १०.१८०.१) इति निगमः। सिन्धुशब्दो विशेषणम्।

(२८) **ऊर्जस्वत्यः**–'ऊर्ज बलप्राणनयोः' चुरादिः (प० १७)। असुन् (उ० ४.१९०)। ऊर्जयतीत्यूर्जो बलं तेन तद्वत्यः। 'अस्मायामेधास्रजो विनिः' (अ० ५.२.१२१) 'बहुलं छन्दसि' (अ० ५.२.१२२) इत्युक्तेर्मतुप्, 'तसौ मत्वर्थे' (अ० १.४.१९) इति भसञ्ज्ञा। बलवत्यो हि नद्यः, यतः स्ववेगेन स्थिरानपि वृक्षादीन् हरन्ति। 'ओजसा वा एता वहन्तीरिवोहतीरिव आकूलन्तीरिव धावन्तीरिव' इति श्रुतिः[३]।

---

१. नामानुक्रमणी-पङ्क्तिः ९४।

२. इरावती-गङ्गा (ऐतरेयब्राह्मणम् ७.१३) महाभारतेऽपि। (सु०)।

३. नोपलभ्यते क्वापि वैदिकसाहित्ये। (सु०)।

(२९) पयस्वत्यः[१]–'पा पाने' (भ्वा० प० ६५९)। 'पिबतेरी च'[२] (श्वे० ६२१, द० उ० ९.५०) असुन्। पीयत इति पयः। प्यायतेर्वा (भ्वा० आ० ३२८) असुनि, बाहुलकात् 'प्यायः पी' (अ० ६.१.२८) इति निष्ठायां विहितः पीभावो भवति। वर्द्धन्तेऽनेन पीतेन प्राणिन इति पयः। उदकम्, तद्वत्यः॥

(३०) सरस्वत्यः–सर इत्युदकनाम्नि निरुक्तम् (१.१२.३८), तद्वत्यः सरस्वत्यः[३]॥

(३१) तरस्वत्यः–'तॄ प्लवनसन्तरणयोः' (भ्वा० प० ६९६)। असुन् (उ० ४.१९०)। तरन्त्यनेनापदमिति तरो बलम्, तद्वत्यः॥

(३२) हरस्वत्यः–'हृञ् हरणे' (भ्वा० उभ० ६४०)। असुन् (उ० ४.१९०)। 'उदकं हर उच्यते' इति निरुक्तम् (४.१९)। तद्धि[४] हरति सर्वम्, ह्रियते वा प्राणिभिरुपभोगाय, तद्वत्यः[५]॥

(३३) रोधस्वत्यः–रोधसा तीरेण तद्वत्यः। 'चि॒त्रा रोध॑स्वती॒रनु॑' (ऋ० १.३८.११) इति निगमः॥

(३४) भास्वत्यः[६]–'भा दीप्तौ' (अदा० प० ४४)। असुन् (उ० ४.१९०)। भा दीप्तिः, तद्वत्यः, दीप्तिमत्यो हि नद्यः॥

(३५) अजिराः[७]–'अज गतिक्षेपणयोः' (भ्वा० प० १३९)। 'अजिरशिशिरशिथिलस्थिरस्फिरस्थविरखदिराः' (उ० १.५३) इति किरच्प्रत्ययो वीभावाभावश्च निपात्यते। अजन्ति गच्छन्ति, क्षिप्यन्ते प्रेर्य्यन्ते आसु नाव इति। यद्वा 'अजिरम्' इति क्षिप्रनाम (निघ० २.१५), अजिराः शीघ्रगाः[८]॥

(३६) मातरः–'मा माने' (अदा० प० ५५)। तृन्तृचौ, 'शंसिक्षदादिभ्यः

---

१. निघ० १.७ रात्रिनामसु। नद्यर्थे ऋ० ४.५७.७ भाष्ये दयानन्दः। पाणिनिस्तु असन्ताद्विन्प्रत्ययेन (अ० ५.२.१२१) पयस्विनीशब्दमन्वशात्। शब्दादस्मादपभ्रष्टः 'पैसुनी' शब्दो नदीविशेषोऽनुचित्रकूटं दृश्यतेऽद्यापि। तुषारवत्त्वात् रात्रिः पयस्वती, जलवत्त्वात्तु नदी इति विवेकः। तु०–ऊधस्शब्दनिर्वचनम् निरु० ६.१८। (सु०)।

२. श्वेतवनवासिवृत्तौ 'पिबतेरिः' इति पाठान्तरम्। 'पिबतेरि च' इति दशपाद्याम् (९.५०)।

३. 'सर॑स्वती॒मा वि॑वासेम धी॒तिभिः॑' (ऋ० ६.६१.२) इति निगमः। (सु०)।

४. 'बहवः' इत्यधिकं कोशेषु। तु०–स्कन्दटीका (निरु० ४.१९)।

५. 'तं म॑र्मर्तु दु॒च्छुना॒ हर॑स्वती' (ऋ० २.२३.६) इति निगमः। (सु०)।

६. निघ० १.८ उषोनामसु। (सु०)।

७. निघ० २.१५ क्षिप्रनामसु। (सु०)।

८. अत एव पाणिनिरपि अ० ६.३.११९ सूत्रे अजिरवतीम् अन्वशात्। नदीयम् अनुश्रावस्तीनगरमासीत्। अद्यत्वे 'राप्ती' इत्येवं लोकविश्रुता। (सु०)।

सञ्ज्ञायां तृन्तृचौ०' (उ० २.९५) इति वचनात्। 'न षट्स्वस्रादिभ्यः' (अ० ४.१.१०) इति ङीप्प्रतिषेधः। निर्मीयते प्रजापतिना, मान्ति आसु आप इति वा, मातृवल्लोकस्य रक्षिका इति वा, नदीमातृक इति हि देशस्य व्यपदेशः[1]। 'ज॒ज्ञा॒नं स॒प्त मा॒तरः॑' (ऋ० ९.१०२.४), 'द्वि॒तीय॑मा स॒प्तशि॑वासु मा॒तृषु॑' (ऋ० १.१४१.२) इति च निगमौ॥

(३७) नद्यः–'णद अव्यक्ते शब्दे' (भ्वा० प० ४४)। पचाद्यच् (अ० ३.१.१३४)। तत्र[2] च 'नदट्' इति टिदयं पठ्यते ततो ङीप् (अ० ४.१.१५)। नदन्ति नद्यः। 'सो अ॒र्ण॒वो न न॒द्यः॑ समु॒द्रियः॑' (ऋ० १.५५.२), 'प्रती॒पं शापं॑ न॒द्यो॑ वहन्ति' (ऋ० १०.२८.४) इति च निगमौ॥

इति सप्तत्रिंशन्नदीनामानि॥ १३॥

अत्यः (१)। हयः (२)। अर्वा॑ (३)। वा॒जी (४)। सप्तिः (५)। वह्निः (६)। द॒धि॒क्राः (७)। द॒धि॒क्रावा॑ (८)। एतग्वा (९)। एतशः (१०)। पैद्वः (११)। दौ॒र्गा॒हः (१२)। औ॒च्चैः॒श्र॒व॒सः (१३)। तार्क्ष्यः॑ (१४)। आ॒शुः (१५)। ब्र॒ध्नः (१६)। अ॒रु॒षः (१७)। मांश्चत्वः (१८)। अ॒व्य॒थयः (१९)। श्ये॒नासः (२०)। सु॒प॒र्णाः (२१)। प॒त॒ङ्गाः (२२)। नरः (२३)। ह्वा॒र्याणाम् (२४)। हं॒सासः (२५)। अश्वाः (२६)। इति षड्विंशतिरश्वनामानि॥ १४॥

(१) अत्यः–'अत सातत्यगमने[3]' (भ्वा० प० ३१)। 'कृत्यल्युटो बहुलम्' (अ० ३.३.११३) इति कर्त्तरि यत्। अथवा 'अघ्न्यादयश्च' (उ० ४.११३) इति यत्प्रत्ययो द्रष्टव्यः। अतति सततं गच्छति, गच्छत्यनेनाश्वारोह इति वा। 'वा॒मत्या॒ अपि॒ कर्णे॑ वहन्तु' (ऋ० ५.३१.९) इति निगमः॥

(२) हयः–'हय गतिविक्रान्ते[4]' (भ्वा० प० ३४२)। पचाद्यच् (अ० ३.१.१३४)। हयति गच्छत्यध्वानम्, विक्रमते वा। 'अश्वादीनां गतिविशेषो

---

१. देशो नद्यम्बुवृष्ट्यम्बुसम्पन्नो व्रीहिपालितः। स्यान्नदीमातृको देवमातृकश्च यथाक्रमम्– अमरकोशः २.१.१२। (सु०)।

२. पचादिगणे (अ० ३.१.१३४)।

३. अतनशीला आदित्यस्याश्वा इति निरु० ४.१३। (सु०)।

४. 'हय गतौ' इति पाणिनीये धातुपाठे। 'हय गतिक्रान्त्योः' इति क्षीरतरङ्गिणी।

विक्रमणम्'[१] इति वृत्तिः। 'हयो न विद्वाँ अयुजि स्वयं धुरि' (ऋ० ५.४६.१), 'हयोऽसि' (ता० ब्रा० १.१.७) इति च निगमौ॥

(३) **अर्वा**–'ऋ गतिप्रापणयोः' (भ्वा० प० ६७०)। 'स्नामदि-पद्यर्त्तिपृशकिभ्यो वनिप्' (उ० ४.११४) इति वनिप् प्रत्ययः। गच्छत्यध्वानं प्रापयत्यध्वनः पारमिति वा। 'अर्वेरणवान्'[२] (निरु० १०.३१) इति भाष्ये स्कन्दस्वामी 'भाष्ये तु अर्वेरणवान्[२] इत्यर्थप्रासवचनं द्रष्टव्यम्। अर्त्तेरन्तर्णीतण्यर्थाद्वा 'अन्येभ्योऽपि दृश्यन्ते' (अ० ३.२.७५) इति वनिपि रूपम्[३]। प्रेर्य्यति कशादिना प्रतिक्षणं पार्ष्ण्यादिनेति वा। यद्वा अन्यमाश्रित अस्वतन्त्र इत्यर्थः अश्वो ह्यारोहिपरतन्त्रः। 'द्र्वन्नो वन्वन् क्रत्वा नार्वा' (ऋ० ६.१२.४) इति निगमः॥

(४) **वाजी**[४]–'वज गतौ' (भ्वा० प० १५४)। घञ्। वाजो वेगः। 'रंहस्तरणिः प्रसभो वेगो रपो जवो वाजः'[५] इति निघण्टुः। 'अजिव्रज्योश्च' (अ० ७.३.६०) इत्यत्र न्यासः–'चकारस्यानुक्तसमुच्चयार्थत्वाद् वजेरपि कुत्वप्रतिषेधसिद्धेः[६] भवति वाजः वाज्यम्' इति। वाजोऽस्यास्ति 'अत इनिठनौ' (अ० ५.२.११५) वाजी। वेगवान् ह्यश्वः। यद्वा वाजोऽन्नम्, देवतात्वे हविर्लक्षणेन, अश्वजातीयत्वे तज्जात्युचितमुद्गाद्यन्नेन तद्वान्। 'वाजाः पक्षा अभूवन्नस्येति वाजी' (अमर० २.८.४५) इति क्षीरस्वामी। वेजनवान् वा। वेजनं कम्पनं कम्पितः स्वयम्, कम्पयिता वा परेषामित्यर्थः। अत्र 'ओविजी भयचलनयोः' (रु० प० २२) इत्यस्माद् वाजशब्दः पृषोदरादित्वात् (अ० ६.३.१०९) सिद्धः। 'विमोचनं वाजिनो रासभस्य' (ऋ० ३.५३.५) इति निगमः॥

(५) **सप्तिः**–'षप समवाये' (भ्वा० प० २८४)। 'वितसिवसिसपिप-दिभ्यस्तिप्'[७] (स० क० २.१.१८४) इति श्रीभोजदेवः। सपति सङ्ग्रामेषु सह समवैति[८]। गतिकर्मणो वा सप्तिः। 'सपतेः स्पर्शार्थात्'[५] इति माधवः। '०सृप्लृ गतौ'[९] (भ्वा० प० ७०९) अस्माद्वा तिप्रत्यये गुणे च रेफलोपो बाहुलकात्, सर्पति सप्तिः। 'जुषाण इन्द्र सप्तिभिर्न आ गहि' (ऋ० ८.१३.१३) इति निगमः॥

---

१. काशिका (१.३.४१)। २. 'अर्वेररणवान्' इत्यपपाठो मुद्रितेषु।

३. स्कन्दटीका (निरु० १०.३१) स्वल्पपाठान्तरेण व्यत्यासेन च।

४. निरु० ७.२०, १०.२९, १२.४४ व्याख्यातोऽत्र मन्त्रपूर्वकम्। (सु०)।

५. मृग्यम्। ६. 'प्रतिषेधः' इति मुद्रिते न्यासे।

७. 'सपिनसिवसिपदिभ्यस्तिप्' इत्यपपाठो मुद्रितेषु।

८. 'सहसामेवैति' इत्यपपाठो मुद्रितेषु। ९. तु०–सप्तेः सरणस्य निरु० ९.३। (सु०)।

(६) वह्निः[१]–'वह प्रापणे' (भ्वा० उभ० ७३०)। 'वहिश्रिश्रुयुद्रुग्लाहात्वरिभ्यो नित्' (उ० ४.५५) इति निप्रत्ययः। 'ये त्वा वहन्ति वह्नयः' (ऋ० १.१४.६) इति निगमः॥

(७) दधिक्राः[२]–'तत्र दधिक्रा इत्येतद् दधत् क्रामतीति वा दधत् क्रन्दतीति वा दधदाकारी भवतीति वा' (निरु० २.२७) इत्यत्र स्कन्दस्वामी–'दधिक्राः, दधत् धारयन् स्वारोहिणं क्रामति, दधत् क्रन्दति हर्षाद् ह्रेषारवं करोति, दधदाकारी भवति अधिष्ठितः ईषदवनतमध्यभागः, उद्धतकन्धरः, कुञ्चितघोणः, स्तिमितचक्षुः कर्णशुक्तिकाकारो भवति'[३] इति। सर्वत्र दधच्छब्दः पूर्वपदं तस्य पृषोदरादित्वात् (अ० ६.३.१०९) तकारलोप इकारान्तादेशश्च। क्रामतेः क्रन्दतेराङ्पूर्वात् करोतेर्वोत्तरपदम्। तत्र क्रामतेः 'जनसनखनक्रमगमो विट्' (अ० ३.२.६७) इति विट्, 'विड्वनोरनुनासिकस्यात्' (अ० ६.४.४१) इत्यात्वम्। क्रन्देः 'अन्येभ्योऽपि दृश्यन्ते' (अ० ३.२.७५) इति विच्, व्यत्ययेनानुनासिकस्यात्वम्, दकारलोपश्च पृषोदरादित्वेन, करोतेः क्विप् (अ० ३.२.७६), तुक् च निवर्त्तते[४]। आङ् च धातोः परः, यणादेशः, दधिक्राः। 'क्रतुं दधिक्रा अनु सन्तवीत्वत्' (ऋ० ४.४०.४) इति निगमः॥

(८) दधिक्रावा–अत्र 'अन्येभ्योऽपि दृश्यन्ते' (अ० ३.२.७५) इति वनिप्। अन्यत्सर्वं पूर्वेण समानम् अर्थश्च। 'दधिक्रावेषमूर्जं स्वर्जनत्' (ऋ० ४.४०.२) इति निगमः॥

(९) एतग्वा–'इण् गतौ' (अदा० प० ३८)। 'हसिमृग्रिण्वामिदमिलूपूधूर्विभ्यस्तन्' (उ० ३.८६) इति तन्प्रत्ययः कर्मणि। 'भूतेऽपि दृश्यन्ते' (अ० ३.३.२) इत्युक्तेः भूतेऽपि भवन्ति। एतं प्राप्तम्। 'गम्लृ० गतौ' (भ्वा० प० ७०९) 'इण्शीभ्यां वन्' (उ० १.१५२) इति बाहुलकाद् वन्प्रत्ययः टिलोपश्च। गम्यत इति ग्वः गन्तव्यो देशः। एतः प्राप्तो गन्तव्यो येन स एतग्वः। अश्वस्तु शैघ्र्यातिशयेन गमनारम्भ एवाविलम्बितं गन्तव्यदेशं प्राप्नोतीति एत उच्यते। 'एतग्वाः प्राप्तगन्तव्याः'[५] इति माधवः। यद्वा एतशब्दः शुक्लपर्यायः, गमेः क्विप्, 'गमः क्वौ' (अ० ६.४.४०) इत्यनुनासिकलोपः, 'ऊङ् च गमादीनाम्०' (अ० ६.४.४० वा०) इत्यूकारोऽन्तादेशः। आगमनमागूः। धातूपसर्गयोः स्थानविपर्य्ययः प्राप्तः। एतस्य शुक्लवर्णस्या-

---

१. 'वह्नयः वोढारः' मन्त्रपूर्वकं व्याख्यातः निरु० ८.४। (सु०)।

२. निरु० २.२७, १०.३१–अनुमन्त्रं व्याख्यायते। (सु०)।

३. स्कन्दटीका (निरु० २.२७) स्वल्पपाठान्तरेण।

४. 'क्विप् युक् चानुवर्तते' इति मुद्रितेषु। ५. मृग्यम्।

गमनमस्यास्ति, मत्वर्थीयस्य लुक्। एतग्वाः शुक्लवर्णा अश्वाः। यद्वा एतः शुक्लवर्णोऽस्यास्तीति 'केशाद्वोऽन्यतरस्याम्' (अ० ५.२.१०९) 'अन्येभ्योऽपि दृश्यते' (अ० ५.२.१०९ वा०) इति वप्रत्ययः, गकार उपजनः। 'एतस्य श्वेतवर्णस्य ग्वो मत्वर्थीयो भवति'[१] इति माधवः। सर्वेषामश्वानां यत्र क्वापि शौक्ल्यमस्ति रूपेण वा। एतग्वशब्दोऽश्वे वर्त्तते। तथा च 'विशाखाषाढादण् मन्थदण्डयोः' (अ० ५.१.१०९) इत्यत्र पदमञ्जरी-'विशाखाषाढशब्दौ रूढिरूपेण मन्थदण्डयोर्वर्त्तेते, तेन यथाकथञ्चित् साधुत्वानुशासनार्थं व्युत्पत्तिः क्रियते' इति। तेनामत्वर्थेऽपि न दोषः। 'एतग्वा' इत्याकारान्तपाठो यथादृष्टम्। 'एतग्वा चित्र सुयुजा युजानः' (ऋ० ७.७०.२), 'एतग्वा चिद्य एतशा युयोजते' (ऋ० ८.७०.७) इति च निगमौ। 'सुपां सुलुक्०' (अ० ७.१.३९) इति विभक्तेराकारः॥

(१०) एतशः-'इण् गतौ' (अदा० प० ३८)। 'इणस्तशन्तशसुनौ' (उ० ३.१४९) इति तशन्प्रत्ययः। एतशः गमनकुशलः। यद्वा एतशब्दात् लोमादित्वात् (अ० ५.२.१००) शः। यद्वा[२] एतच्छरीर एतशः, पृषोदरादित्वात् (अ० ६.३.१०९) सर्वसिद्धिः। 'एतशो वहति धूर्षु युक्तः' (ऋ० ७.६३.२), 'यदेतशेभिः पतरै रथर्य्यसि' (ऋ० १०.३७.३) इति च निगमौ॥

(११) पैद्वः-'पद गतौ' (दि० आ० ५८)। 'कृगृशृदृभ्यो वः' (उ० १.१५५) इति वप्रत्ययो बाहुलकात्, अकारस्यैकारः पृषोदरादित्वात् (अ० ६.३.१०९)। पद्यते गच्छति, पद्यतेऽनेनेति वा[३]। 'पदेः पैद्वो गतिक्रियायाम्'[१] इति माधवः। 'पैद्वो न हि त्वमहिनाम्नां हन्ता' (ऋ० ९.८८.४) इति निगमः॥

(१२) दौर्गहः-दुर्शब्द उपपदे गृह्णातेः (क्र्या० उभ० ६४), गाहेर्वा (भ्वा० आ० ४३२) 'ईषद्दुःसुषु कृच्छ्राकृच्छ्रार्थेषु खल्' (अ० ३.३.१२६), रेफलोपः, पृषोदरादित्वात् (अ० ६.३.१०९) गृह्णातेः, गाहेर्ह्रस्वत्वम्। अश्व-हृदयानभिज्ञैर्ग्रहीतुमशक्यत्वात् दुर्गह इत्युच्यते। दुर्गह एव दौर्गहः, प्रज्ञादित्वादण् (अ० ५.४.३८)। यद्वा 'दुःखेन गाहितव्यत्वात् दुर्गाहं जलमुच्यते'[१] इति माधवः, तत्र भवो दौर्गहः, 'तत्र भवः' (अ० ४.३.५३) इत्यण्[४], 'अप्सु योनिर्वा अश्वः' (श० ब्रा० १३.२.२.१९) इति श्रुतिः। 'सप्त ऋषयो दौर्गहे

---

१. मृग्यम्। २. 'एतद्वा' इति मुद्रितेषु।

३. अश्विनौ पेदुनामधेयाय राज्ञेऽश्वं प्रायच्छताम्। अतोऽश्वः पैद्वः। द्र०-ऋ० १०.३९.१०। (सु०)।

४. वस्तुतस्तु दुःखितं गहनम् अत एव दुर्गहे स्थाने गच्छतीति दौर्गहोऽश्वः। अर्थेऽस्मिन् दुर्गहशब्दो भृशं प्रोक्तो वेदे। यथा-ऋ० १०.९८.१२। (सु०)।

बुध्यमाने' (ऋ० ४.४२.८) इति निगमः॥

(१३) औच्चैःश्रवसः–अमृतमन्थने जातोऽश्व उच्चैःश्रवाः। उच्चैर्महच्छ्रवः कीर्त्तिरस्येति, 'तस्यापत्यम्' (अ० ४.१.९२) इत्यण्। तत्कुलीना ह्यश्वाः सर्वे। निगमोऽन्वेषणीयः[1]॥

(१४) तार्क्ष्यः[2]–तूर्णमश्नुते गन्तव्यम्, तीर्णे अन्तरिक्षे क्षियतीति तार्क्ष्यः। तूर्णशब्दात् तीर्णशब्दाद् वा पूर्वपदम्, अश्नोतेः क्षीयतेर्वोत्तरपदम्, पृषोदरादिः (अ० ६.३.१०९)। अश्वो हि वेगवशादाकाशे गच्छन्निव हि दृश्यते प्रेक्षकैः। यद्वा वेगेन तार्क्ष्यसादृश्यात्[3] तार्क्ष्य इत्युच्यते। 'तुरङ्गगरुडौ तार्क्ष्यौ' (अमर० ३.३.१४५) इत्यत्र तृक्षस्यापत्यं तार्क्ष्यः, गर्गादित्वात्[4] (अ० ४.१.१०५), इति क्षीरस्वामी। निगमोऽन्वेषणीयः॥

(१५) आशुः–'अशूङ् व्याप्तौ' (स्वा० आ० १८)। 'कृवापाजिमिस्वदिसाध्यशूभ्य उण्' (उ० १.१)। अश्नुतेऽध्वानम्। अश्नातेर्वा बाहुलकादुण् (अ० ३.३.१)। अश्नाति महाशनो भवति। आशुरिति क्षिप्रनाम (निघ० २.१५), शीघ्रो वा। 'द्रवच्चक्रेष्वाशुषु' (ऋ० ८.३४.१८) इति निगमः॥

(१६) ब्रध्नः[5]–अत्र भास्करमिश्रेण–'ब्रध्नं परिवृढम्, अरुषमारोचनम्'[6] इति व्याख्यातम्। वाजसनेये तु 'युञ्जन्ति ब्रध्नमरुषञ्चरन्तम्' (मा० सं० २३.५) इत्यत्र उवटः–'अश्वं युनक्ति युञ्जन्ति ब्रध्नमिति, अश्वोऽत्रादित्यवत् स्तूयते'[7] इति वा॥

(१७) अरुषः–'ऋ गतिप्रापणयाः' (क्र्या० प० २८)। ऋणाति अभ्यामुखं गच्छति, अर्य्यते वा तदर्थिभिः। यद्वा अरुषमिति रूपनाम (निघ० ६.७), मत्वर्थीयोऽकारः, प्रशस्तरूप इत्यर्थः। 'हरिं मृजन्त्यरुषो न युज्यते' (ऋ० ९.७२.१) इति निगमः॥

(१८) मांश्चत्वः–'मन ज्ञाने' (दि० आ० ६५)। पदस्य नलोपाभावः पृषोदरादित्वात् (अ० ६.३.१०९)। 'महीमे अस्य वृषनाम शूषे मांश्चत्वे वा पृशने वा वधत्रे' (ऋ० ९.९७.५४) इत्यत्र माधवस्य प्रथमभाष्यम्–'मही

---

१. अथर्ववेदः २०.१२८.१५। (सु०)।
२. व्युत्पत्तिमन्त्रपूर्वकं व्याख्यातोऽसौ शब्दः। निरु० १०.२८। (सु०)।
३. वायुसादृश्यादित्यर्थः। द्र०–'तार्क्ष्यो वायुः' (निरु० १०.२८)। (सु०)।
४. 'गर्गादित्वात्' इति नास्ति मुद्रितायां क्षीरस्वामिटीकायाम्।
५. निघ० ३.३ महन्नामसु। तत्त्वादेवासौ ब्रध्नः। (सु०)।
६. 'ब्रध्नं परिवृढमश्वमरुषमरोषणम्' (तै० सं० ७.४.२०.१) इति भट्टभास्करभाष्यम्।
७. उवटभाष्यं (मा० सं० २३.५) यथामुद्रितं संशोधितम्।

महती, इमे, अस्य सोमस्य, श्रूषे सुखकरे [वर्षणनमने, शराणां वर्षणं शत्रूणां नमनम्] भवतः। ये च कर्मणी मांश्चत्वे। अश्वनामैतत्। मङ्क्षु चरतीति। अश्वैः क्रियमाणे युद्धे [अपि वा स्पर्शनसाध्ये] बाहुयुद्धे, वधत्रे शत्रूणां हिंसनशीले भवतः। सोऽयम्–अस्वापयच्छत्रून्त्स्नेहयच्च। स्नेहनं प्रद्रावणम्। अथ प्रत्यक्षकृतः'[1] इत्यादि। अत्र मांश्चत्वस्य। ....समाम्नायपाठेषु मंश्चत्व इति दृश्यते। 'ब्रध्नं मंश्चतोर्वरुणस्य बभ्रुम्' (ऋ० ७.४४.३) इत्यत्र माधवः– 'मंश्चतुरित्यश्वनाम मन्यमानानभिगच्छतीति। इह तु वरुणविशेषणम्, मंश्चतोर्वरुणस्य महान्तं बभ्रुम्'[2] इत्यभाषयत्, निरूपणीयम्[3]॥

(१९) अव्यथयः–'तेषामष्टावुत्तराणि बहुवदित्युक्तम्' (निरु० २.२७) [तत्त्वकथनम्] असन्देहार्थम्। एतदादीनि बहुवचनान्तानि नामानि। 'व्यथ भयचलनयोः' (भ्वा० आ० ५१५)। 'इन् सर्वधातुभ्यः' (उ० ४.११९) इतीन्प्रत्ययः, नञ्समासः। न व्यथन्तेऽभिसङ्ग्रामेषु[4] अव्यथयः। दृष्टे भयेऽप्यव्यथः स्यादिति भावः। यद्वा व्यथिरिति क्रोधनाम (निघ० २.१३), आरोहणताडनबन्धनादिभिर्न क्रुध्यन्तीत्यर्थः। 'पतत्रिभिरश्रमैरव्यथिभिः' (ऋ० ७.६९.७) इति निगमः॥

(२०) श्येनासः[5]–'श्येनः शंसनीयं गच्छति' (निरु० ४.२४) इति भाष्ये। जसि 'आज्जसेरसुक्' (अ० ७.१.५०)। 'श्येनासो न दुवसनासो अर्थम्' (ऋ० ४.६.१०) इति निगमः॥

(२१) सुपर्णाः–'पृ पालनपूरणयोः' (जु० प० ४)। 'धापृवस्यज्यतिभ्यो नः' (उ० ३.६) इति नप्रत्ययः। सुपाल्यन्ते यवसादिप्रदानेन, पूरयन्ति वा नभः ह्लेषारवादिना सङ्ग्रामसाधनत्वात्। पततेर्वा बाहुलकात् नप्रत्ययस्तकारस्य रेफः, शोभनगमना इत्यर्थः। निगमोऽन्वेषणीयः[6]॥

(२२) पतङ्गाः[7]–'पत्लृ गतौ' (भ्वा० प० ५८४)। 'पतेरङ्गच्०' (उ० १.११९)। यद्वा 'खच्प्रकरणे गमेस्तु सुप्युपसंख्यानम्' (अ० ३.२.३८ वा०)

---

१. यथावेङ्कटमाधवभाष्यं (ऋ० ९.९७.५४) शोधितम्।
२. वेङ्कटमाधवभाष्यम् (ऋ० ७.४४.३) अनुसृत्य शोधितम्।
३. अनन्वितम्।
४. 'व्यथन्त्यभि०' इति मुद्रितेषु।
५. श्येन इवासौ शीघ्रं धावति। श्येन इवासावुपमीयते वेदे–'श्येनस्येव ध्रजतो अङ्कसं परि'। (ऋ० ४.४०.३) अत एवासौ श्येनः। (सु०)।
६. पक्षिणां शोभनं पक्षमिवासौ प्रोच्यते वेदे 'पर्णं न वेरनु वाति प्रगर्धिनः' (ऋ० ४.४०.३)। सुपर्णः सुपतन इति निरुक्तकृदपि। अत एवाश्वः सुपर्णः। (सु०)।
७. पूर्वोक्तहेतुना पतङ्गोऽप्यश्वः। (सु०)।

इति खच्, 'खच्च ड्डिद्वा वक्तव्यः' (अ० ३.२.३८ वा०), 'खित्यनव्ययस्य' (अ० ६.३.६५) इति मुम्, पतङ्गा इति। 'अश्वाः पूर्वं पक्षिणोऽभूवन्'[१] इति श्रूयते। 'रथे युक्तास आशवः पतङ्गाः' (ऋ० १.११८.४) इति निगमः। आशुशब्दो विशेषणम्॥

(२३) नरः–'णीञ् प्रापणे' (भ्वा० उभ० ६४२)। 'नयतेर्डिच्च' (उ० २.१०२) इति ऋन्प्रत्ययः। जसि नरः। नयन्ति आरोहिणम्, कर्मणां नेतारो वा नरः। 'त्वं सूरो हरितो रामयो नॄन्' (ऋ० १.१२१.१३) इति निगमः। 'नॄन् अश्वान्'[२] इति माधवः॥

(२४) ह्वार्य्याणाम्–'ह्वृ कौटिल्ये' (भ्वा० प० ६६५)। 'ऋहलोर्ण्यत्' (अ० ३.१.१२४)। खलीनाद्याकर्षणे मुखादिष्वङ्गेषु कुटिलीक्रियन्ते ह्यश्वाः। यद्वा ह्वरतिरत्तिकर्मा (निघ० २.८), 'कृत्यल्युटो बहुलम्' (अ० ३.३.११३) इति ण्यत्। ह्वरन्त्यर्थम् अश्वाः ह्वार्य्याः। 'ह्वरि गतौ'[२] इति माधवः। 'ह्वार्य्याणाम्' इति यथादृष्टपाठः। 'पुत्रो न ह्वार्य्याणाम्' (ऋ० ५.९.४) इति निगमः॥

(२५) हंसासः–'हन हिंसागत्योः' (अदा० प० २)। 'वृतॄवदिहनिकमिकषियुमुचिभ्यः सः' (द० उ० ९.२१) इति सप्रत्ययः। घ्नन्ति गच्छन्त्यध्वानम्[३], गच्छन्तः पद्भिरध्वानं हिंसन्ति वा[४]। 'हंसासो ये वां मधुमन्तो अस्रिधः' (ऋ० ४.४५.४) इति निगमः॥

(२६) अश्वाः–'अशूङ् व्याप्तौ' (स्वा० आ० १८)। 'अशूप्रुषिलटिकणिखटिविशिभ्यः क्वन्' (उ० १.१५१) इति क्वन्प्रत्ययः। अश्नातेर्वा बाहुलकात् (अ० ३.३.१)। अश्नुवतेऽध्वानं[५] महाशना भवन्तीति च[६]। 'यदाक्षिषुर्दिव्यमज्ममश्वाः' (ऋ० १.१६३.१०) इति निगमः॥

इति षड्विंशतिरश्वनामानि॥ १४॥

'दशोत्तराण्यादिष्टोपयोजनानीत्याचक्षते साहचर्य्यज्ञानाय' (निरु० २.२८) इतिहासपक्षे [नैरुक्तपक्षे]ऽपि पूर्वपक्षापरपक्षावहोरात्रे वा[७]॥

---

१. मृग्यम्। २. तु०–वेङ्कटमाधवभाष्यम् (ऋ० ५.९.४)।
३. निरु० ४.१३। (सु०)। ४. तु०–ऐ० ब्रा० ५.१.१।
५. क्षिप्रमिति शेषः। य एवाशुस्स एवाश्वः नान्यः कश्चन। निरु० १.१३ मध्ये इदमेव निगूढमाकूतम्। (सु०)।
६. निरु० २.२७। ७. द्र०–स्कन्दटीका (निरु० २.२८)।

हरी इन्द्रस्य (१)। रोहितोऽग्नेः (२)। हरित आदित्यस्य (३)। रासभावश्विनोः (४)। अजाः पूष्णः (५)। पृषत्यो मरुताम् (६)। अरुण्यो गाव उषसः (७)। श्यावाः सवितुः (८)। विश्वरूपा बृहस्पतेः (९)। नियुतो वायोः (१०)। इति दशादिष्टोपयोजनानि ॥ १५ ॥

" १. **हरी इन्द्रस्य**–सोमपानादिक्रियायाः साधनत्वात्॥

२. **रोहितोऽग्नेः**–नित्यपक्षे ज्वाला अश्वा व्याप्तिमत्यः॥

३. **हरित आदित्यस्य**–हरितवर्णा रश्मयः प्रातरादित्यस्य॥

४. **रासभावश्विनोः**–अश्विभोगकाले रासभवर्णौ, तत्कालोचितेन श्यामलेन वर्णेनायं व्यपदेशः॥

५. **अजाः पूष्णः**–अजा अजनात्। पूष्णः काले रश्मयो गच्छन्ति॥

६. **पृषत्यो मरुताम्**–प्रावृषि सर्वतः पृषत्यो विचित्रा मेघमाला मरुताम्॥

७. **अरुण्यो गाव उषसः**–उषसः काले तमोऽभिभवे अरुणिमाया-मागन्त्र्यः॥

८. **श्यावाः सवितुः**–सवितुः काले श्यामवर्णा भवन्ति॥

९. **विश्वरूपा बृहस्पतेः**–'छन्दांसि वै विश्वरूपाणि'[१] इति श्रुतेः॥

१०. **नियुतो वायोः**–वायोः प्रवृत्तौ तृणपर्णपांस्वादेः सञ्चरणान्मिश्रणा-न्नियुतः॥"[२] इति स्कन्दस्वामिग्रन्थाः॥

शब्दव्युत्पत्तिस्तावत् प्रदर्श्यते–

(१) हरी–'हृञ् हरणे' (भ्वा० उभ० ६४०)। 'हृपिषिरुहिवृतिविदि-छिदिकीर्त्तिभ्यश्च' (उ० ४.१२०) इतीन्प्रत्ययः। हरतो रथम्। अत्र ताण्ड्यकम्–'पूर्वपक्षापरपक्षौ वा इन्द्रस्य हरी, ताभ्यां हीदं सर्वं हरति' (ष० ब्रा० १.१.१३) इति, अस्मिन् पक्षे करणे इन्। 'ऋक्सामे वा इन्द्रस्य हरी' (ऐ० ब्रा० २.२४) इत्यैतरेयब्राह्मणम्। 'ऋक्सामे वै हरी' (श० ब्रा० ४.४.३.६) इति यजुर्ब्राह्मणम्। 'इन्द्रो हरी युयुजे अश्विना रथम्' (ऋ० १.१६१.६) इति निगमः॥

(२) रोहितः–'हसृरुहियुषिभ्य इतिः' (उ० १.९७) इति इतिप्रत्ययः। रोहन्ति आरोहन्ति रथं वहन्त्यादिवमिति रोहितः[३]। 'रोहिदश्व शुचिव्रत' (ऋ०

---

१. मृग्यम्। २. द्र०–स्कन्दटीका (निरु० २.२८)।

३. वस्तुतस्तु लोहित इत्यर्थः। रलयोरभेदात्। अत एव 'यदग्ने रोहितं रूपं तेजसस्तद्रूपम्' (छान्दोग्यो० ६.४.१) इत्यौपनिषदं वचस्संगच्छते। (सु०)।

८.४३.१६) इति निगमः॥

(३) हरितः–पूर्ववत् इतिः (उ० १.९७)। हरन्ति रथं तमो वा स्वभासा। यद्वा हरिच्छब्दः पीतवर्णवचनो हरिद्वर्णो वा। 'युदेदयुक्त हुरितः सुधस्थात्' (ऋ० १.११५.४) इति निगमः॥

(४) रासभौ–'रासृ शब्दे' (भ्वा० आ० ४१६)। 'रासिवल्लिभ्याञ्च' (उ० ३.१२५) इत्यभच्प्रत्ययः। रासते शब्दं करोतीति रासभः, तौ रासभौ। 'गर्दभरथेनाश्विना उदजयताम्' (ऐ० ब्रा० ४.९) इति ब्राह्मणम्। 'युञ्जाथां रासभं रथे' (ऋ० ८.८५.७), 'तद्रासभो नासत्या सहस्रंभाज' (ऋ० १.११६.२) इति च निगमौ॥

(५) अजाः[1]–'अज गतिक्षेपणयोः' (भ्वा० प० १३९)। पचाद्यच् (अ० ३.१.१३४)। वीभावाभावो व्यत्ययेन। अजन्ति गच्छन्ति सर्वतः, क्षिपन्ति वा तमः। 'अहेळमानो ररिवाँ अजाश्व श्रवस्युतामजाश्व' (ऋ० १.१३८.४) इति निगमः॥

(६) पृषत्यः–'पृषु वृषु सेचने' (भ्वा० प० ४६८)। 'वर्त्तमाने पृषद्बृहन्०' (उ० २.८५) इत्यादिना सिद्धम्। 'पृषत्यः सह सङ्गताः'[2] इति माधवः। तदा 'पुंयोगादाख्यायाम्' (अ० ४.१.४८) इति ङीष्। 'उपो रथेषु पृषतीरयुग्ध्वम्' (ऋ० १.३९.६) इति निगमः॥

(७) गावः–व्याख्याता रश्मिनामसु (१.५.३)। गन्त्र्यः। 'युङ्क्ते गवामरुणानामनीकम्' (ऋ० १.१२४.११) इति निगमः॥

(८) श्यावाः–'श्यैङ् गतौ' (भ्वा० आ० ६९०)। 'कृगृशृदृभ्यो वः' (उ० १.१५५) इति बाहुलकाद् वप्रत्ययः। श्यावो धूसरारुणो वर्णः, तद्-वन्तोऽपि श्यावाः, 'गुणवचनेभ्यो मतुपो लुग्वक्तव्यः' (अ० ५.२.९४ वा०)। 'वि जनाञ्छ्यावाः शितिपादो अख्यन्' (ऋ० १.३५.५) इति निगमः॥

(९) विश्वरूपाः–नानावर्णाश्वाः। 'बृहस्पतिश्च सविता च विश्वरूपैरिहागतम्' (तै० आ० १.१२.५), 'बृहस्पतिर्विश्वरूपामुपाजत' (ऋ० १.१६१.६) इति च निगमौ॥

(१०) नियुतः[3]–निपूर्वात् 'यु मिश्रणे०' (अदा० प० २६) इत्यस्मात्

---

१. अजा अजनाः निरु० ४.२६ प्रेरका इत्यर्थः। अश्वाजनी कशेतिवत्। (निरु० ९.२०)। (सु०)।

२. मृग्यम्।

३. अत एव नियुत्वान् वायुः–'वायुः पूषा स्वस्तये नियुत्वान्' (ऋ० ७.३९.२) इति मन्त्रस्य व्याख्याने निरु० ५.२७। (सु०)।

क्विप्। नियुवन्ति मिश्रयन्ति तृणपर्णादीनि, आत्मानं रथेन वा। यद्वा निपूर्वात् 'यमु उपरमे' (भ्वा० प० ७१०) इत्यस्मात् 'मृग्रोरुतिः' (उ० १.९४) इति बाहुलकात् उतिप्रत्ययष्टिलोपश्च। नियम्यन्ते सारथिना नियुतः। 'नियुद्भिर्वा यविष्ट्यै दुरोणे' (ऋ० ७.९२.३) इति निगमः॥

इति दशादिष्टोपयोजनानि॥ १५॥

भ्राजते (१)। भ्राशते (२)। भ्राश्यति (३)। दीदयति (४)। शोचति (५)। मन्दते (६)। भन्दते (७)। रोचते (८)। द्योतते (९)। ज्योतते (१०)। द्युमत् (११)। इत्येकादशज्वलतिकर्माणः॥ १६॥

(१) भ्राजते–'टुभ्राजृ दीप्तौ' (भ्वा० ५७०) भूवादिरात्मनेपदी। 'भ्राजते श्रेणिदन्' (ऋ० १०.२०.३) इति निगमः॥

(२) भ्राशते, (३) भ्राश्यति–'टुभ्राशृ टुभ्लाशृ दीप्तौ' (भ्वा० ५७०) भूवादी आत्मनेपदिनौ। 'वा भ्राशभ्लाशभ्रमुक्रमुक्लमुत्रसित्रुटिलषः' (अ० ३.१.७०) इति पक्षे श्यन्, परस्मैपदित्वं छान्दसम्। 'नि तिग्मानि भ्राशयन् भ्राश्यानि' (ऋ० १०.११६.५) इति निगमः। 'भ्राश्यति शिलाजितादीनि'[1] इति माधवः। भ्लाश्यतीति पाठान्तरम्। भ्राश्यतीतिवत् प्रक्रिया॥

(४) दीदयति–नैरुक्तो धातुः (निरु० १०.१९)। यद्वा 'दीधीङ् दीप्तिदेवनयोः' (अदा० आ० ६९) इत्यस्य धकारस्य दकारो व्यत्ययेन, 'बहुलं छन्दसि' (अ० २.४.७३) इति शपो लुगभावः, परस्मैपदित्वं छान्दसम्। 'यो अनिध्मो दीदयदप्स्व१न्तः' (ऋ० १०.३०.४) इति निगमः॥

(५) शोचति–'शुच शोके' (भ्वा० १११) भूवादिः परस्मैपदी, दीप्त्यर्थत्वं त्वनेकार्थत्वाद्धातूनाम्। 'अजस्रेण शोचिषा शोशुचानः' (ऋ० ७.५.४) इति निगमः॥

(६) मन्दते[2]–'मदि स्तुतिमोदमदस्वप्नकान्तिगतिषु' (भ्वा० १२) अत्र दीप्त्यर्थः। भूवादिरात्मनेपदी। निगमोऽन्वेषणीयः॥

(७) भन्दते[2]–'भदि कल्याणे सुखे च' (भ्वा० ११) भूवादिरात्मनेपदी दीप्त्यर्थत्वं पूर्ववत्। निगमोऽन्वेषणीयः॥

---

१. मृग्यम्।

२. निघ० ३.१४ अर्चतिकर्मणि। (सु०)।

(८) रोचते[१]–'रुच दीप्तौ०' (भ्वा० ४९८) भूवादिरात्मनेपदी, द्युतादिश्च।[२] 'वि यत् सूर्यो न रोचते बृहद्भाः' (ऋ० ७.८.४) इति निगमः॥

(९) द्योतते–'द्युत दीप्तौ' (भ्वा० ४९३) भूवादिरात्मनेपदी। 'अदिद्युतत् स्वपाको विभावा' (ऋ० ६.११.४) इति निगमः॥

(१०) ज्योतते–'युतृ जुतृ दीप्तौ' (भ्वा० २६) भूवादिरात्मनेपदी। यकारश्छान्दसः। यद्वा द्युतेर्विगृहीतः। 'द्युतेरिसिन्नादेश्च जः' (उ० २.११२) इति इसिन्प्रत्यये विहितो जो बाहुलकादत्रापि भवति। निगमोऽन्वेषणीयः[३]॥

केचिदस्य स्थाने 'छन्दते'[४] इति पठन्ति। 'छदि संवरणे' (चुरा० ४६) इति चुरादिः परस्मैपदी, व्यत्ययेनात्मनेपदं णिलोपः[५]। 'छन्दस्युभयथा' (अ० ३.४.११७) इत्यार्द्धधातुकत्वाद्वा णिलोपः[५]। निगमदर्शनान्निर्णयः॥

(११) द्युमत्–द्योतते द्युत्, सम्पदादित्वात् (अ० ३.३.९४ वा०) क्विप्। द्युदस्यास्तीति[६] मतुप्, पृषोदरादित्वात् (अ० ६.३.१०९) तकारलोपः। यद्वा 'दिवु क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिमोदमदस्वप्नकान्तिगतिषु' (दि० प० १) इत्यस्मात् दीप्त्यर्थात् दिवेर्दीव्यतीति विचि प्रत्यये द्योतनं दिव्, ततो मतुपि 'दिव उत्' (अ० ६.१.१२७) इत्युत्वं दीप्तिमदित्यर्थः। समाम्नाये यस्य पदार्थस्य यद् वाचकमाख्यातं नाम च तत्सहैवान्यत्रापि पठ्यते। तथाहि–कान्तिकर्मसु (निघ० २.६) उशिगादि, व्याप्तिकर्मसु (निघ० २.१८) आप्नुवान[७] इत्यादि, महन्नामसु (निघ० ३.३) ववक्षिथ विवक्षसे, पश्यतिकर्मसु (निघ० ३.११) विचर्षणिरित्यादि। एवमिहापि द्युमदिति नामपदस्य धातुमध्ये पाठः किञ्चित् द्योततेर्विकृतत्वाद्विशेषचानेकार्थत्वात् ज्वलनार्थत्वख्यापनार्थम्। 'द्युमदमीवचातनं रक्षोहा' (ऋ० ७.८.६) इति निगमः॥

इत्येकादश ज्वलतिकर्माणो धातवः॥ १६॥

---

१. निरु० ११.४१। (सु०)।

२. 'चुरादिरात्मनेपदी कथादिश्च' इत्यपपाठो मुद्रितेषु।

३. 'ज्योतयैनं महते सौभगाय' (अथर्व० ७.१६(१७).१) प्राकृतविकारत्वाल्लोके वेदे च विरल एतादृशः प्रयोगः प्राकृतभाषासु तु बहुलमुपलभ्यते। (सु०)।

४. 'छन्द्यते' इति मुद्रितेषु।

५. 'टिलोपः' इति मुद्रितेषु।

६. 'द्युरस्तीति' इत्यपपाठो मुद्रितेषु।

७. व्याप्तिकर्मसु 'आप्नुवानः' इति नास्ति। आक्षाणः, आपानः इत्यन्यतरः पाठोऽत्र स्यात्।

जमत् (१)। कल्मलीकिनम् (२)। जञ्जणाभवन् (३)। मल्मलाभवन् (४)। अर्चिः (५)। शोचिः (६)। तपः (७)। तेजः (८)। हरः (९)। घृणिः (१०)। शृङ्गाणि शृङ्गाणि (११)। इत्येकादश ज्वलतो नामधेयानि नामधेयानि॥ १७॥

गौर्हेमाम्बरंस्वा१ःखेदंयआताश्यावींविभावरीवस्तोरद्रिः श्लोकोऽर्णोऽवनयोऽत्योहरीइन्द्रस्यभ्राजतेजमदिति सप्तदश॥

इति निघण्टौ प्रथमोऽध्यायः समाप्तः॥ १॥

(१) जमत्–अत्र स्कन्दस्वामी–'तावन्त्येवोत्तराणि जमदित्यादीनि ज्वलतो दीप्तिमतः सत्त्वस्य नामधेयानि [दीप्त्या भक्षयदिव जमत्][1] इति। 'जमु अदने' (भ्वा० प० ३१७)[2]। 'गृणाना जमदग्निना' (ऋ० ३.६२.१८) इत्यादिषु जमच्छब्द उदाहरणम्॥

(२) कल्मलीकिनम्[3]–....[4].... 'कल्मलीकं भवेत्'[5] इति माधवः। पृषोदरादिः (अ० ६.३.१०९), उत्तरे च। 'नमस्या कल्मलीकिनं नमोभिः' (ऋ० २.३३.८) इति निगमः॥

(३) जञ्जणाभवन्[6]– 'अर्चिषा जञ्जणाभवन्' (ऋ० ८.४३.८) इति निगमः॥

(४) मल्मलाभवन्[7]– 'मल्मलाभवन्तीं त्वा सादयामि'[8] इति निगमः॥

---

१. स्कन्दटीका (निरु० २.२८)।

२. धातुपाठे भक्षणार्थे 'जमु' धातुरप्यस्त्येव! यस्मात् प्राकृतभाषासु 'जीमना' इत्यादयः प्रयोगा निःसृताः। (सु०)।

३. कर्मशब्दस्य लत्वापत्त्या कल्म। महाभाष्यानुसारेण अपरिसमाप्तं कर्म कल्म। तत् लाति आदत्ते इति कल्मलिः। प्रवर्तौ कल्मलिर्मणिः (अथर्व० १५.२.५) इत्युदाहरणम्। तद्वान् कल्मलीकी सायणाचार्यस्तु-कलयत्यपगमयति मलमिति कल्मलीकं तेजः, तद्वन्तम्। (सु०)।

४. 'अपकालितमलं कल्मलीकिनम्' इति स्कन्दटीका (निरु० २.२८) शोधिता।

५. मृग्यम्।

६. 'जनं पराभावयति शोभयति शब्दानुकरणं वा जञ्जणाभवन्' इति स्कन्दटीका (निरु० २.२८)।

७ 'तमः पापादिमलं मलभावान्नयतीति मल्मलाभवन् पूर्ववद्वानुकरणम्। मलमलायतेऽग्निरिति।' इति स्कन्दटीका (निरु० २.२८)।

८. तै० सं० १.४.३४.१। (सु०)।

(५) अर्चिः–'अर्च पूजायाम्' (भ्वा० प० १२०) ।'अर्चिशुचिहुसृपिछादिछर्दिभ्य इसिः' (उ० २.११०) इतीसिप्रत्ययः । अर्च्यते देवताद्यर्चनसाधनत्वाद्वा अर्चिरग्न्यादिज्वालादिः । 'अयो॑ दंष्ट्रो अ॒र्चिषा॑ यातु॒धाना॒न्' (ऋ० १०.८७.२) इति निगमः॥

(६) शोचिः–शोचतेर्ज्वलतिकर्मणः (निघ० १.१६) पूर्वसूत्रेण इसिः (उ० २.११०) । शोचति शोचिः । 'यद॑स्य॒ वातो॑ अनु॒वाति॑ शो॒चिः' (ऋ० ४.७.१०) इति निगमः॥

(७) तपः–'तप सन्तापे' (भ्वा० प० ७११) । 'तप दाहे' (चुरा० उभ० २४२) वा । असुन् (उ० ४.१९०) । शरीरादि तपतीति । 'परा॑ शृणीहि॒ तप॑सा यातु॒धाना॒न्' (ऋ० १०.८७.१४), 'अग्ने॒ यत्ते॒ तप॒स्तेन॒ तं प्रति॑ तप॒' (शौ० सं० २.१९.१) इति च निगमौ॥

(८) तेजः–'तिज निशाने' (भ्वा० आ० ६९८) । असुन् (उ० ४.१९०) । निश्यति तनूकरोति तमः पापं वा । यद्वा 'तेज पालने' (भ्वा० प० १४०) । असुन् । तेजति पालयति प्राणिनः प्रकाशदानेन । 'अग्ने॒ यत्ते॒ तेज॒स्तेन॒' (शौ० सं० २.१९.५) इति निगमः॥

(९) हरः[१]–'हृञ् हरणे' (भ्वा० उभ० ६४०) । असुन् (उ० ४.१९०) । हरति तमः । 'अग्ने॒ यत्ते॒ हर॒स्तेन॒' (शौ० सं० २.१९.२), 'रक्षो॒ हर॑सा शृणीहि' (ऋ० १०.८७.१४) इति च निगमौ॥

(१०) घृणिः[२]–'घृणिपृश्निपार्ष्णिचूर्णिभूर्णि०' (श्वेत० ४८०, उ० ४.५३) इति । 'घृ क्षरणदीप्त्योः' (जु० प० १४) इत्यस्मान्निप्रत्यये गुणाभावो निपात्यते । जिघर्त्ति दीप्यते । यद्वा 'घृणु दीप्तौ' (तना० उभ० ७) । 'इगुपधात् कित्' (उ० ४.१२१) इति इप्रत्ययः । दीप्यते घृणिः । 'उप॑च्छा॒यामि॑व॒ घृणे॒ः' (ऋ० ६.१६.३८) इति निगमः । 'आ घृ॑णे॒ सं स॑चावहै' (ऋ० ६.५५.१) इति च॥

'ह्रणिः' इति केषुचित् कोशेषु दृश्यते, तदयुक्तम्[३], नैगमकाण्डे 'आघृणिः' (निरु० ५.९) इत्यत्र, 'ज्वलन्नामसु क्रोधनामसु (निघ० २.१३)

---

१. निघ० २.१३ क्रोधनामसु । निरु० ४.१९ हरतेः । (सु०) ।

२. निघ० १.९ दिननामसु । (सु०) ।

३. सत्यमेतत् । आधुनिकभाषावैज्ञानिकानां मतेनापि घकारविरचितं रूपं प्राचीनम् । हकारसम्पन्नन्तु अर्वाक्कालिकम् । यद्यपि केवलमेकत्र 'हृ॒णी॒यमा॑नः' (ऋ० ५.२.८) उपलभ्यते । लौकिकसंस्कृते तु नामधातुरूपं कण्ड्वादिगणीयं हृणीङ्धातुं मत्वा बहवः प्रयोगा उपलभ्यन्ते । (सु०) ।

च पाठादनेकार्थत्वम्'[१] इति स्कन्दस्वामिवचनात्॥

(११) शृङ्गाणि–शृङ्गाणिशब्देन[२] अत्र शृङ्गस्थानीयत्वाद् दीप्तय उच्यन्ते। 'श्रिञ् सेवायाम्' (भ्वा० उभ० ६३८), 'शॄ हिंसायाम्' (क्र्या० प० १७)। 'शृणातेर्ह्रस्वश्च' (उ० १.१२६), गन् (१२३), कित् (१२४), नुट् (१२५) च इति अधिक्रियते, श्रियतेर्बाहुलकात् सम्प्रसारणादि च भवति। श्रितं हि तदाश्रितं मण्डले, हिनस्ति तद् ग्रीष्मे प्राणिनः। 'शृङ्गं श्रयतेः' (निरु० २.७) इत्यत्र 'स्नातेर्वा' इति निर्वचनस्य पाठः श्रीनिवासीये व्याख्याने[३] दृष्टः। 'शमु हिंसायाम्' क्र्यादिः[४]। अस्मात् गः, अकारस्य ऋकारः। पूर्ववदर्थः। यद्वा द्विधातुजम्, शरणाय हिंसायै गतं मस्तकादेरुद्गतम् ऊद्ध्र्वगतमित्यर्थः। 'शृणातेर्ह्रस्वश्च' (उ० १.१२६) इति गन्प्रत्यये नुटि च रूपम्। अथवा शरणं रक्षणं तदर्थमुद्गतम्, रक्षति तत् प्राणिनस्सस्यनिष्पत्त्यादिना। शिरसो निर्गतमिति वा शिरःशब्दान्निर्गमिश्च शृङ्गम्, शिरस आदित्याद्[५] निर्गतमित्यर्थः, 'असावादित्यः शिरः प्रजानाम्' (तै० ब्रा० १.२.३.३) इति श्रवणात्। शिर उपपदे गमेर्डे, शिरसः शृभावे, मकारे चोपजने रूपम्। पृषोदरादित्वात् (अ० ६.३.१०९) सर्वत्र रूपसिद्धिः, शृङ्गम्। तेजांसि शृङ्गाणि। 'यत्र गावो भूरिशृङ्गा अयासः' (ऋ० १.१५४.६), 'वि शृङ्गिणमभिनच्छुष्णमिन्द्रः' (ऋ० १.३३.१२) इति च निगमौ॥

'अध्यायपरिसमाप्तिसूचनं द्विर्वचनम्, श्रुतौ तथा दर्शनात्'[६] इत्यत्र स्कन्दस्वामी। अन्यत्रापि स[७] एव सर्वत्र। यद्वा द्विरुक्तपदस्य शब्दशास्त्रे 'तस्य परमाम्रेडितम्' (अ० ८.१.२) इति महासञ्ज्ञाकरणस्य प्रयोजनं वर्णितम्–अन्वर्थसञ्ज्ञानम्, आम्रेड्यते अधिकमुच्यते[८] इति। तेनैवञ्जातीयकद्विर्वचनानि जायन्त इति शब्दविदो विदाञ्चक्रुः। यथा–'अहो दर्शनीया अहो दर्शनीया'[८] इति॥

इत्येकादश ज्वलतो नामानि।

इति श्री देवराजयज्वविरचिते नैघण्टुककाण्डनिर्वचने प्रथमोऽध्यायः॥ १॥

---

१. स्कन्दटीका (निरु० ५.९) स्वल्पपाठान्तरेण।
२. 'शृगि शब्दे' इति मुद्रितेषु। ३. अनुपलब्धम्।
४. पाणिनीयधातुपाठे न संगृह्यते। निरुक्तप्रयोगात् (२.७) क्र्यादित्वं कल्प्यते।
५. निरु० ४.१३। ६. स्कन्दटीका (निरु० २.२८) स्वल्पपाठभेदेन।
७. सः=अभ्यासः=द्विर्वचनम्। ८. तु०–न्यासः (अ० ८.१.३)।

द्वितीयोऽध्यायः

'कर्मनामान्युत्तराणि' (निरु० ३.१) इति भाष्ये स्कन्दस्वामी–'ज्वलनकर्मसम्बन्धादाह कर्मनामान्युत्तराण्येभ्यः षड्विंशतिः, अपः अप्नः, इत्यादीनि। क्रियते इति कर्म [कारक इत्यर्थः]। अनाश्रितविशेषाणां [च] कर्मणां नामधेयानि सति साधारण्ये, असाधारणानि च निर्णेतव्यानि वाक्यार्थवशात्'[1] इति॥

अपः (१)। अप्नः (२)। दंसः (३)। वेषः (४)। वेपः (५)। विष्टवी (६)। व्रतम् (७)। कर्वरम् (८)। शक्म (९)। क्रतुः (१०)। करुणम् (११)। करणानि (१२)। करांसि (१३)। करन्ती (१४)। करिक्रत् (१५)। चक्रत् (१६)। कर्त्वम् (१७)। कर्त्तोः (१८)। कर्त्तवै (१९)। कृत्वी (२०)। धीः (२१)। शची (२२)। शमी (२३)। शिमी (२४)। शक्तिः (२५)। शिल्पम्। (२६)। इति षड्विंशतिः कर्मनामानि॥ १॥

(१) अपः, (२) अप्नः[2]–'आप्लृ व्याप्तौ' (स्वा० प० १५)। 'आपः कर्माख्यायां ह्रस्वो नुट् च वा' (उ० ४.२०९) इत्यसुन् विकल्पेन नुडागमश्च। आप्नुवन्ति हि तत् कर्त्तारः[3], आप्नोति वा तान् फलरूपेण। 'इन्द्रं सोमैभिस्तदपो वो अस्तु' (ऋ० २.१४.११), 'ते सौभगं वीरवद्गोमदप्नः' (ऋ० १०.३६.१३) इति च निगमौ॥

(३) दंसः–'दसि दंसनदर्शनयोः' चुरादिरात्मनेपदी (१४६), असुन् (उ० ४.१९०)। दर्शयति हि तत्तत्कारणेन, दृश्यते दृष्टिभिरिति वा। अथवा, 'दसि मोक्षणे'[4] चुरादिः परस्मैपदी, असुन् (उ० ४.१९०)। दंसयति मोक्षयति पाप्मनः पुरुषं संसारादापदो वा। यद्वा 'तसु उपक्षये', 'दसु च' (दि० प० १०२, १०३) अत्रान्तर्णीतण्यर्थः। कर्मण्यसुनि बाहुलकान्नुम्। उपक्षपयितव्यं[5] हि तत्, अन्तन्नेतव्यम्[6] इत्यर्थः। 'दस्मस्य चारुतममस्ति दंसः' (ऋ०

---

१. स्कन्दटीका (निरु० ३.१) किञ्चित्पाठान्तरेण।

२. निघ० २.२ अपत्यनामसु। (सु०)। ३. 'कर्तारम्' इति मुद्रितेष्वपपाठः।

४. पाणिनीये धातुपाठे न संगृह्यते। ५. 'उपक्षिपयितव्यम्' इत्यपपाठो मुद्रितेषु।

६. 'अन्तर्नेतव्यम्' इति मुद्रितेषु।

१.६२.६) इति निगमः॥

(४) वेषः–'विष्लृ व्याप्तौ' (जु० उभ० १३) पचाद्यच् (अ० ३.१.१३४)। वेवेष्टि व्याप्नोति कर्तॄन्, व्याप्तं विस्तृतं वा। यद्वा 'वेवेष्टि' इत्यत्तिकर्मसु (निघ० २.८) पठ्यते। परिवेवेष्टि भोजयति स्वफलं कर्तॄन्। 'कर्मणे वां वेषाय वाम्' (मा० सं० १.६) इति निगमः॥

(५) वेपः–'विपिः प्रेरणार्थः'[१] इति माधवः। असुन् (उ० ४.१९०)। प्रेर्य्यन्तेऽस्मिन् कर्मकराः। यद्वा 'वेपृ कम्पने' (भ्वा० आ० २५६) असुन् (उ० ४.१९०), वेपः। 'खं वेपसा तुविजात स्तवानः' (ऋ० ४.११.२) इति निगमः॥

(६) विष्ट्वी–'विष्लृ व्याप्तौ' (जु० उभ० १३)। 'जॄगॄस्तृजागृभ्यः क्विन्' (उ० ४.५५) इति बाहुलकात् क्विन् तुडागमश्च। वेषसमानार्थम्। यथादृष्टं पाठः। 'विष्ट्वी शमीभिः सुकृतः सुकृत्यया' (ऋ० ३.६०.३), 'विष्ट्वी शमी तरणित्वेन वाघतः' (ऋ० १.११०.४) इति च निगमौ[२]। उभयत्रापि शमीति विशेषणम्।.........॥

(७) व्रतम्[३]–अत्र भाष्यम् (निरु० २.१३)–'व्रतमिति कर्मनाम–वृणोतीति सतः' इत्यादि। अत्र स्कन्दस्वामी–'व्रतमिति कर्मनामेति। कर्त्तरि सत इति कृतव्याख्यानम्। तद् द्विविधम्। शुभमशुभं वा वृणोति निबध्नाति कर्त्तारम्। तथा च श्रुतिः–'तं विद्याकर्मणी समन्वारभेते पूर्वप्रज्ञा च' (बृ० उ० ४.४.२) इति। इदमपीतरद् व्रतं गुडलवणस्त्र्यादिविषयनिवृत्तिरूपं कर्म एतस्मादेव रूपसामान्यात्। प्रसक्तं व्रतं निरुच्यते–वारयतीति सतः। निवृत्तिरूपो हि सङ्कल्पः, तदतिक्रम्य प्रमादात् प्रवर्त्तमानं पुरुषं वारयति सत इति। अन्येषां पाठोऽर्थश्च–'व्रतमिति कर्मनाम निवृत्तिकर्म वारयतीति सतः' (निरु० २.१३) इति। व्रतं कर्मोच्यते। कस्मात्? वारयतेः। तद्धि सङ्कल्पपूर्वकं प्रवृत्तिरूपमग्निहोत्रादिकर्मप्रत्यवायं वारयतीति पुरुषः प्रवर्त्तमानो निवर्त्तमानश्च प्रकृतेनाभिसम्बन्धः, तेनाव्रतेन निवार्य्यत इति व्रतस्यैव प्राधान्यात् हेतुकर्तृत्वेन विवक्षा। भोजनमपि व्रतं क्षुदादिनिवारणात्।'[४] वृणोतेर्धातोः (स्वा० उभ० ८) 'पृषिरञ्जिभ्यां कित्' (उ० ३.१११) इति विधीयमानोऽतच्प्रत्ययो बाहुलकाद्

---

१. मृग्यम्।

२. निरु० ११.१६ व्याख्यायतेऽसौ मन्त्रः। (सु०)। तत्र 'विष्ट्वी विष्ट्वा व्याप्य कृत्वेत्यर्थः। शमीति कर्मनाम' इति स्कन्दस्वामी।

३. निरु० ११.२३, १२.३२, १२.४६। (सु०)।

४ स्कन्दस्वामिटीका (निरु० २.१३) स्वल्पपाठान्तरेण।

भवति, कित्त्वाद् गुणाभावः, यणादेशः। वारयतेर्वा तत्–इत्यत्र लुगिति[१] लुगपि बाहुलकात्। 'व्रतेः' इति श्रीभोजदेवः, इति क्षीरस्वामी[२]। व्रत्यते वर्ज्यते सर्वभोगोऽत्रेति सुबोधिनीकारः[३]। व्रतेर्धातोः 'पुंसि सञ्ज्ञायां घः प्रायेण' (अ० ३.३.११८) इति घप्रत्ययः। व्रतिश्च वर्जनार्थः। 'अथा वयमादित्य व्रते तव' (ऋ० १.२४.१५), 'ब्राह्मणा व्रतचारिणः' (ऋ० ७.१०३.१) इति च निगमौ। 'अग्ने व्रतपते व्रतं चरिष्यामि' (मा० सं० १.५) इत्यादौ व्रतशब्दे निवृत्तिकर्मता॥

(८) कर्वरम्–कर्वतेर्धातोः (भ्वा० प० ३८८) 'पुंसि सञ्ज्ञायां घः प्रायेण' (अ० ३.३.११८) इति घप्रत्ययः[४], कर्वरम्। 'कॄ विक्षेपे' (तुदा० प० ११८) 'कृञ् हिंसायाम्' (स्वा० उभ० ७)। 'कॄगॄशॄवृञ्चतिभ्यः ष्वरच्' (उ० २.१२३)। किरति फलम्, कीर्य्यतेऽस्मिन् पात्रादीति वा, हिनस्ति तत् शुभं पुरुषभावमशुभं पुण्यम्। 'अर्त इनोषि कर्वरा पुरूणि' (ऋ० १०.१२०.७) इति निगमः॥

(९) शक्म–'शक्लृ शक्तौ' (स्वा० प० १६)। 'अशिशकिभ्यां छन्दसि' (उ० ४.१४८) इति मनिन्प्रत्ययः। शक्यते अनेनाभिमतं प्राप्तुम्, शक्नोतीष्टं साधयितुं वा, शक्यते कर्त्तुमिति वा। 'मध्या कर्त्तोर्न्यधाच्छक्म धीरः' (ऋ० २.३८.४) इति निगमः॥

(१०) क्रतुः[५]–करोतेः (तना० उभ० १०) 'कृञः कतुः' (उ० १.७६) इति कतुप्रत्ययः। क्रियते द्विजातिभिः। 'क्रतुं दधिक्रा अनु सन्तवीत्वत्'[६] (ऋ० ४.४०.४), 'शतक्रतो मादयस्वा सुतेषु' (ऋ० ६.४१.५) इति च निगमौ॥

(११) करुणम्–'कॄ विक्षेपे' (तुदा० प० ११८) 'कृञ् हिंसायाम्' (स्वा० उभ० ७)। 'कॄवृदारिभ्य उनन्' (उ० ३.५३)। कर्वरेण समानार्थम्। 'स विश्वस्य करुणस्येश एकः' (ऋ० १.१००.७) इति निगमः॥

(१२) करणानि–करोतेः (तना० उभ० १०) 'युच् बहुलम्' (उ० २.७९) इति युच् क्रियते, ल्युट् वा। करणं साधनमिति प्राप्ते जसि पाठो यथादृष्टम्। 'कर्मवाचि करणमाद्युदात्तम्'[३] इति माधवः। 'प्र ते पूर्वाणि करणानि

---

१. संदिग्धम्। भ्रष्टं वा किञ्चित् ?
२. व्रत्यते वर्ज्यतेऽन्नादि यत्र (अमर० टीका २.७.३७)। अत्र भोजो न स्मर्यते।
३. मृग्यम्।
४. बाहुलकादरच् प्रत्ययोऽत्र युक्तः स्यात् ? कर्वोपपदे वा रातेः कः ?
५. निघ० ३.१७ प्रज्ञानामसु। निरु० १०.१०। (सु०)।
६. निरु० २.२८ व्याख्यायतेऽसौ मन्त्रः। (सु०)।

वोचुम्' (ऋ० ५.३१.६), 'प्र ते पूर्वाणि करणानि विप्र' (ऋ० ४.१९.१०) इति च निगमौ॥

(१३) करांसि–करोतेरसुन् (उ० ४.१९०)। 'भूतेऽपि दृश्यन्ते' (अ० ३.३.२) इति भूते वा भविष्यति वा। अर्थः पूर्ववत्। 'करांसीति कृतानि स्युः क्रियमाणानि केचन'[१] इति माधवः। 'आविद्वाँ आह विदुषे करांसि' (ऋ० ४.१९.१०) इति निगमः॥

(१४) करन्ती–'कृञ् करणे' भूवादिः (उभ०)। शतरि ङीप्। करणमभिमतं कर्त्तुः। यथादृष्टं पाठः। निगमोऽन्वेषणीयः[२]॥

(१५) करिक्रत्–'दाधर्त्तिदर्धर्त्तिदर्द्धर्षि०' (अ ७.४.६५) इत्यादिसूत्रेण छन्दोविषयेण करोतेर्यङ्लुगन्तस्य शतरि चुत्वाभावोऽभ्यासस्य रिगागमोऽपि निपात्यते। अत्र न्यासः–'यणादेशे कृते अनृकारान्तत्वादङ्गस्याभ्यासस्य रिगागमो न प्राप्नोतीति सोऽपि निपात्यते'[३] इति। पुनःपुनः करोतीष्टप्राप्तिमनिवारञ्च। निगमोऽन्वेषणीयः॥

(१६) चक्रत्–'कृञ् करणे' भूवादिः (उभ०)। शतृ। 'जुहोत्यादिभ्यः श्लुः' (अ० २.४.७५) 'बहुलं छन्दसि' (अ० २.४.७६) इति शपः श्लुर्द्विर्वचनादिः, यणादेशः। करोत्यभीष्टम्। निगमोऽन्वेषणीयः। केषुचित् कोशेषु चक्रतुरिति दृष्टम्, निगमदर्शनान्निर्णयः। अस्य स्थाने चर्कृत्यमिति माधवीये[१] दृष्टम्। 'चर्कृत्यानि कृण्वतः' (ऋ० ८.१०३.३) इत्यत्र 'कर्माणि चर्कृत्यानि'[१] इति भाष्यञ्च॥

(१७) कर्त्वम्–करोतेः 'अन्येभ्योऽपि दृश्यन्ते' (उ० ४.१०६) इति त्वन्प्रत्ययः[४] क्रियते। यद्वा 'कृत्यार्थे तवैकेन्केन्यत्वनः' (अ० ३.४.१४) इति त्वन्प्रत्ययः, कृत्यार्थत्वं भावकर्म। 'तद्देवानां देवतमाय कर्त्वम्' (ऋ० २.२४.३) इति निगमः। अत्र स्कन्दस्वामिभाष्यम्–'कर्त्वमिति कर्मनाम'[१] इति॥

(१८) कर्त्तोः–करोतेः 'सितनिगमिमसिसच्यविधाञ्क्रुशिभ्यस्तुन्' (उ० १.६९) इति बाहुलकात् तुन्प्रत्ययः। अर्थः पूर्ववत्। षष्ठ्येकवचनस्य पाठो यथादृष्टम्। 'मध्या कर्त्तोर्विततं सञ्जभार' (ऋ० १.११५.४), 'मध्या

---

१. मृग्यम्।

२. सामश्रमिणोद्धृते 'ग' संस्करणे 'करन्ति' इति पाठः। तस्मिन् 'करन्ति' इति पाठे सामश्रमी 'किमु त्रयः करन्ति' (ऋ० १०.४८.७) इति निगमम् उदाजहार। (सु०)।

३. न्यासे (अ० ७.४.६५) स्वल्पः पाठभेदः। रिगागमो हरदत्तस्य न रोचते।

४. 'वन्प्रत्ययः' इत्यपपाठो मुद्रितेषु।

कर्त्तोन्यंधाच्छक्म धीरः' (ऋ० २.३८.४) इति च निगमौ॥

(१९) कर्त्तवै—करोतेः 'कृत्यार्थे तवैकेन्केन्यत्वनः' (अ० ३.४.१४) इति तवैप्रत्ययः। 'कृन्मेजन्तः' (अ० १.१.३८) इत्यव्ययत्वम्। निगमोऽन्वेषणीयः॥

(२०) कृत्वी—करोतेः 'पः किच्च' (उ० १.७१) इति विधीयमानस्तुप्रत्ययो बाहुलकाद् भवति। क्रियते कृतु। 'शिल्पावन्ये कृतुर्यकम्'[१] इत्यत्र माधवेनापि कर्मनामसु पठितः। 'सुपां सुलुक्०' (अ० ७.१.३९) इत्यत्र 'इयाडियाजीकाराणामुपसङ्ख्यानम्' (अ० ७.१.३९ वा०) इति विभक्तेरीकारादेशः[२]। 'त्वं रथमेतशं कृत्व्ये धने' (ऋ० १.५४.६) इति निगमः। अत्र स्कन्दस्वामिभाष्यम्—'कृत्वीति कर्मनाम, कर्मणि धने निमित्ते [एषा सप्तमी]। धनार्थं यत् कर्मेत्यर्थः। कर्मात्र संग्रामः[३], संग्रामार्थमाजिः स्यात्'[४] इति। 'कृत्वी सवर्णामदर्दुर्विवस्वते' (ऋ० १०.१७.२) इत्यत्र तु त्वान्तम्, तथा स्कन्दस्वामिना व्याख्यातत्वात्॥

(२१) धीः[५]—'धृङ् आधारे' दिवादिः (आ० १२१)। धारयति कर्त्तारं फलप्रदानेन। यद्वा दधातेः क्विपि 'घुमास्थागापाजहातिसां हलि' (अ० ६.४.६६) इतीत्वे रूपम्। ईत्वञ्च क्विब्लोपेऽपि। धारयति कर्त्तारमिति पूर्ववद्। ददाति वा फलं धीः कर्म। 'दधातेर्निहितं द्रव्येषु तत्'[१] इति माधवः। यद्वा ध्यायतेः सम्प्रसारणत्वे क्विपि रूपम्[६]। ध्यायते चिन्त्यते कर्तृभिरेवं कर्त्तव्यमिति। 'धियंधियं सीषधाति प्र पूषा' (ऋ० ६.४९.८) इति निगमः[७]॥

(२२) शची[८]—'शच व्यक्तायां वाचि' भूवादिरात्मनेपदी (९९)। 'इन् सर्वधातुभ्यः' (उ० ४.११९)। 'कृदिकारात्०' (अ० ४.१.४५ ग० सू०) इति ङीष्। शचन्ते व्यक्ता वाचः कुर्वन्त्यस्यामिति शची। क्षीरस्वामी तु 'शचते शची, शच श्वच गतौ'[९] इति व्याख्यत्। गत्यर्थः शचिर्धातुपाठे न दृष्टः। 'यद् देवयन्तमवथः शचीभिः' (ऋ० ७.६९.४) इति निगमः॥

(२३) शमी[१०]—'शम उपशमे' (दि० प० ९१) अस्माद् इन्, ङीष्

---

१. मृग्यम्। २. संदिग्धम्।
३. 'संश्रीमः' इत्यपपाठो मुद्रितेषु।
४. मुद्रिते स्कन्दस्वामिभाष्ये पाठभेदेनायमर्थोऽभिधीयते।
५. निघ० ३.९ प्रज्ञानामसु। निरु० १२.३०। (सु०)।
६. 'ध्यायतेः सम्प्रसारणं च' (अ० ३.२.१७८ वा०)। (सु०)।
७. निरु० १२.१९ व्याख्यायतेऽसौ मन्त्रः। (सु०)।
८. निघ० १.११ वाङ्नामसु, ३.९ प्रज्ञानामसु। (सु०)।
९. अमर० १.१.४५ अमरकोशोद्घाटनम्। १०. निरु० ११.१६। (सु०)।

च पूर्ववत्। शाम्यत्यनयानिष्टानि। णिजन्ताद्वा पूर्ववद् इन्ङीषौ। शमयत्यनिष्टव्याध्यादीनि। 'शमी॒मदु॑र्मखस्य वा' (ऋ० ८.७५.१४) इति निगमः॥

(२४) शिमी[१]–शाम्यतेः पूर्ववन्निर्वाहोऽर्थश्च। बाहुलकादकारस्येकारः। शक्नोतेर्वा ककारस्य मकारः, अकारस्येकारश्च शक्मेत्यनेन समानार्थः। 'धुनि॒ः शमी॑वा॒ञ्छरु॑माँ ऋजी॒षी' (ऋ० १०.८९.५) इति निगमः॥

(२५) शक्तिः–शक्नोतेः 'स्त्रियां क्तिन्' (अ० ३.३.९४)। शक्यते कर्त्तुम्, शक्यते वानया परलोकं जेतुम्। 'अजी॑जन॒ञ्छक्ति॑भी रोदसि॒प्राम्' (ऋ० १०.८८.१०) इति निगमः[२]॥

(२६) शिल्पम्–'शील उपधारणे' चुरादिः (प० ३०३), 'शील समाधौ' भूवादिः (प० ३५०)। अनयोः 'खष्पशिल्पशष्पबाष्परूपपर्पतल्पाः' (उ० ३.२८) इति पप्रत्यये णिलोपे (अ० ६.४.५१) च उपधाया ह्रस्वत्वं निपात्यते। शीलयति शीलतीति वा शिल्पम्। 'यत् कुम्भकारादिकर्म'[३] इत्युणादिवृत्तिः। शीलयन्ति पुनः पुनरभ्यस्यन्ति तदिति शिल्पम्। यद्वा शिनोति कर्त्तारं तनूकरोति दुष्करत्वेनातिक्लेशकरत्वादिति निपातनाद्रूपसिद्धिः। 'शिञ् निशाने' (स्वा० उभ० ३) 'निशानं तनूकरणम्'[४] इति सुबोधिनीकारः। 'यत्ते॒ शि॒ल्पं क॑श्यप रोच॒नाव॒त्' (का० सं० ३७.९), 'दि॒वः शिल्प॒मव॑ततम्' (तै० ब्रा० ३.३.२.१) इति च निगमौ॥

इति षड्विंशतिः कर्मनामानि॥ १॥

तुक् (१)। तो॒कम् (२)। तन॑यः (३)। तो॒क्म॑ (४)। तक्म॑ (५)। शेष॑ः (६)। अप्न॑ः (७)। गय॑ः (८)। जाः (९)। अप॑त्यम् (१०)। य॒हुः (११)। सू॒नुः (१२)। नपा॑त् (१३)। प्र॒जा (१४)। बीज॑म् (१५)। इति पञ्चदशापत्यनामानि॥ २॥

(१) तुक्–'तुज हिंसायाम्' (भ्वा० प० १५०) क्विप् तोजति हिनस्ति

---

१. निरु० ५.१२ शमयतेर्वा, शक्नोतेर्वा। (सु०)।

२. निरु० ७.२८ व्याख्यातोऽसौ मन्त्रः। (सु०)।

३. 'यत् कुम्भकारादीनां कौशलं तच्छिल्पमित्यर्थः' इति माणिक्यदेवः (दशपाद्युणादिवृत्तिः ७.७)।

४. मृग्यम्।

मातापितरौ गर्भवासादिना। तथा च मन्त्रः[१]–'यदा पिपेष मातरं पितरं पुत्रः' (तै० ब्रा० ३.७.१२.४) इत्यादिः। 'तुजिर्गत्यर्थः प्रेरणार्थश्च'[२] इति माधवः। क्विप्। गच्छत्यनेन पितृलोकं पिता, गच्छत्यनेनानृण्यं पितृभ्य इति वा, प्रेर्य्यते प्रसवकाले वायुनापि वा। यद्वा 'ष्टुच प्रसादे' (भ्वा० आ० १०६)। क्विप्, पृषोदरादित्वात् (अ० ६.३.१०९) सकारलोपः। प्रसाद्यतेऽनेन पिता वा। 'तुचे तु नो भवन्तु वरिवोविदः' (ऋ० ८.२७.१४), 'तुचे तनाय तत्सु नो' (ऋ० ८.१८.१८) इति च निगमौ। उभयत्र चतुर्थी।

(२) तोकम्[३]–'तुद व्यथने' (तुदा० प० १) 'पुंसि सञ्ज्ञायां घः०' (अ० ३.३.११८), पृषोदरादित्वात् (अ० ६.३.१०९) दकारस्य ककारः[४]। तुद्यतेऽनेन माता गर्भवासकाले, तुद्यते व्याध्यादिभिरिति वा। यद्वा 'ष्टुञ् स्तुतौ' (अदा० उभ० ३६), 'कृदाधारार्चिकलिभ्यः कः' (उ० ३.४०) इति बाहुलकात् कप्रत्ययः, सलोपश्च, स्तूयते तोकम्। तथा च हरिश्चन्द्रोपाख्याने 'ऋणमस्मिन्त्सन्नयत्यमृतत्वं च गच्छति' (ऐ० ब्रा० ७.१३) इत्यादिभिर्गाथाभिः प्रशस्यते पुत्रः। यद्वा 'तु' इति सौत्रो धातुर्वृद्ध्यर्थः[५], कप्रत्ययः पूर्ववत्। वर्द्धते हि तत्, वर्द्ध्यते वा मातापितृभ्याम्। यद्वा सर्वेभ्य एव धातुभ्यो घञि रूपम्, अर्थश्च स एव। तुदेस्तु ककारो बाहुलकात्, ष्टुञः सकारलोपश्च। 'मा नस्तोकेषु तनयेषु रीरिषः' (ऋ० ७.४६.३) इति निगमः॥

(३) तनयः–'तनु विस्तारे' (तना० प० १) 'वलिमलितनिभ्यः कयन्' (उ० ४.१००), इति कयन्प्रत्ययः। कुलं तनोति विस्तारयति। 'मा नस्तोके तनये मा न आयौ' (ऋ० १.११४.८) इति निगमः॥

(४) तोक्म–तुजेः, स्तुचेः, तनोतेः, तुदतेर्वा मनिनि (उ० ४.१४६) ककारोऽन्तादेशः, तवतेः कुगागमः पृषोदरादित्वात् (अ० ६.३.१०९)। निगमोऽन्वेषणीयः[६]॥

---

१. 'यदा पिपेष मातरं पुत्रः प्रमुदितो धयन्' इति तु (मा० सं० १९.११)। (सु०)।

२. मृग्यम्।

३. अनुमन्त्रं निरुक्त एष शब्दः–निरु० १०.७, १२.६। (सु०)।

४. यद्यपि नेदं मौलिकं प्रवृत्तिनिमित्तम्। तुदधातोस्तु तोदः व्युत्पादितः (निरुक्त ५.७)। कथमनेनैव तोकः स्यात् 'आत्मा वै पुत्रनामासि' इत्यादिभिः सर्वदा प्रसादहेतुरसौ पुत्रः। अतः तोकम्, तोक्म, तुक्, तुचे इत्यादिभिः 'तुच्' धातुः शक्यते कल्पयितुम्। रुक्, रुक्म, रुचे इत्यादिवत् Taoxman इत्याद्यवेस्ताशब्दा अपि सन्त्यस्मिन्नर्थे प्रमाणम्। (सु०)।

५. 'तुरुस्तुशम्यमः सार्वधातुके' (अ० ७.३.९५) सूत्रे। (सु०)।

६. 'मनुस्तोक्मैव रोहतु' (ऋ० १०.६२.८) इति निगमः। (सु०)।

(५) तक्म–तकतेर्गतिकर्मणः[१] (निघ० २.१४), मनिन् (उ० ४.१४६), तुजेर्गत्यर्थाद् वा मनिन् (उ० ४.१४६), अत्त्वमुकारस्य (अ० ६.३.१०९)। पूर्वेण तुचा समानार्थः। निगमोऽन्वेषणीयः॥

(६) शेषः–'शिष असवर्णोपयोगे' चुरादिः (प० २४१) भूवादिश्च (प० ४६२), असुन् (उ० ४.१९०)। म्रियमाणे पितरि कुलसन्तानार्थं परिशेषयति, परिशिष्यते वा पित्रादिभिः सह न म्रियते स्वयमवतिष्ठत इत्यर्थः। यद्वा 'शिष्लृ विशेषणे' रुधादिः परस्मैपदी (१४) असुन् (उ० ४.१९०)। विशिष्यते पित्राद्यात्मनोऽतिशयितं करोति हि विद्यादिभिः। 'पुनातु पित्रा प्रजा मे पतच्छ्रेयसीमात्मनः कुरुते'[२] इति ब्राह्मणम्। तथा 'पुत्रमेवैकमिच्छन्त्यात्मनो गुणवत्तरम्'[२] इति महाभारतम्। यद्वा 'शिष हिंसार्थः' भूवादिः परस्मैपदी (४६२), शेषति हिनस्ति मातापितरौ। 'यदा पिपेष' (तै० ब्रा० ३.७.१२.४) इति मन्त्रः पूर्वमेव दर्शितः। 'न शेषो अग्ने अन्यजातमस्ति' (ऋ० ७.४.७), 'मा शेषसा मा तनसा' (ऋ० ५.७०.४) इति च निगमौ॥

(७) अप्नः–कर्मनामसु व्याख्यातम् (२.१.२) बाहुलकादपत्येऽपि भवति। 'आप्नोतेर्ह्रस्वश्च नुट् वा'[३] इति भोजराजेन कर्माख्याग्रहणं न कृतम्। आप्नोत्यनेन सर्वान् कामान् पिता, आप्यते वा महता पुण्येन। 'यच्चित्रमप्न उषसो वहन्ति' (ऋ० १.११३.२०)। 'आप्यम् धनम्'[२] इति माधवः, अपत्यं भवितुमर्हति॥

(८) गयः[४]–गमेः 'अघ्न्यादयश्च' (उ० ४.११३) इति यक्प्रत्ययान्तो निपात्यते, निपातनान्मकारलोपः। 'गाङ् गतौ' (भ्वा० आ० ६८१) अस्माद्वा यक्प्रत्यये ह्रस्वत्वम्। गतावर्थः पूर्वमुक्तः (२.१.१)। गीयते स्तूयते देवभट्टारकेत्येवमादिभिः। 'इन्द्रो वसुभिः परि पातु नो गयम्' (ऋ० १०.६६.३) इति निगमः, 'गयस्फानः प्रतरणः सुवीरः' (ऋ० १.९१.१९) इति च। 'गृहापत्ययोर्नाम'[२] इति हरदत्तः, 'गृहम्'[२] इति तु माधवः॥

(९) जाः[५]–'जनी प्रादुर्भावे' (दि० आ० ४०) 'अन्येष्वपि दृश्यते'

---

१. निरुक्तम् ११.२५ गतिकर्मणस्तकतेः तक्मशब्दं निर्ब्रुवन् उष्णमर्थमस्य निर्दिशति। अस्ति च वेदे सर्वत्रापि तक्मशब्दो ज्वरार्थे। अथर्ववेदेऽनेकत्र तक्मनाशनविधयः निर्दिष्टाः, पुत्रार्थकः तक्मशब्दस्तु न वेदे, नापि च लौकिकसंस्कृतसाहित्ये क्वाप्युपलभ्यते। नापि च भारोपीयभाषास्वस्य प्रतिरूपम्। अतस्सर्वथा संदिग्धोऽयं शब्दः। (सु०)।

२. मृग्यम्।

३. 'आपो ह्रस्वो नुट् च बा' (स० क० २.१.३४०) इति मुद्रितपाठः।

४. निघ० २.९ धननामसु, ३.४ गृहनामसु। (सु०)।

५. तुलनामर्हति उत्तरोक्तेन प्रजाशब्देन। (सु०)।

(अ० ३.२.१०१) इत्यत्र अपिशब्दस्य सर्वोपाधिव्यभिचारार्थत्वात् केवलाज्जनेर्डः, टाप्, जस्। जायते मातापितृभ्यां सकाशात्। 'सोमः परि क्रतुना पश्यते जाः' (ऋ० ९.७१.९), 'अनमीवो रुद्र जासु नो भव' (ऋ० ७.४६.२) इति च निगमौ॥

(१०) अपत्यम्[१]–अपपूर्वात् तनोतेः नञ्पूर्वात् पततेर्वा 'अघ्न्यादयश्च' (उ० ४.११३) इति यक्प्रत्ययान्तो निपात्यते, तनोतेष्टिलोपः। 'कुवेरपत्यमा दुहे' (ऋ० ९.१०.८) इति निगमः॥

(११) यहुः–यातेर्ह्वयतेश्चौणादिके मृगय्वादित्वात् (उ० १.३७) कुप्रत्यये निपातनाद्रूपसिद्धिः। यातः प्राप्तः पुण्यवशेन, स्वनाम्ना हूयते च। 'यहुर्यातश्चाहूतश्च'[२] इति माधवः। 'ईशानः सहसो यहो' (ऋ० १.७९.४) इति निगमः।

(१२) सूनुः[३]–'षूङ् प्राणिप्रसवे' (दिवा० आ० २२) 'सुवः कित्' (उ० ३.३५) इति नुप्रत्ययः। सूयते मात्रा। 'अग्निं सूनुं सनश्रुतं सहसो जातवेदसम्' (ऋ० ३.११.४) इति निगमः॥

(१३) नपात्[४]–नञ्पूर्वात् पतेर्ण्यन्तात् 'बहुलमन्यत्रापि सञ्ज्ञाच्छन्दसोः' (उ० २.२३) इति णिलोपः। 'नभ्राण्नपात्०' (अ० ६.३.७४) इत्यादिसूत्रेण नञः प्रकृतिभावः। न पातयति, न तेन पततीत्युक्तम् (निरु० ३.१)। 'एहि वां विमुचो नपात्' (ऋ० ६.५५.१) इति निगमः॥

(१४) प्रजा–प्रपूर्वाज्जनेः 'उपसर्गे च सञ्ज्ञायाम्' (अ० ३.२.९९) इति डः, टाप्। 'प्रजां देवि दिदिड्ढि नः' (ऋ० २.३२.६, २.४१.१७) इति निगमः॥

(१५) बीजम्–'वी गतिव्याप्तिप्रजनकान्त्यसनखादनेषु' (अदा० प० ४१) इत्यस्माद् जक्प्रत्ययः[५]। तथा च भोजराजीये 'वियो जक्' (स० क० २.२.८६) इति व्युत्पादितम्। बवयोरभेदः। वेति प्रजायते गच्छत्यनेनानृण्यं

---

१. न पतति वंशो येनेति विग्रहेण नञ्पूर्वात् पततेर्यगित्यन्ये व्युत्पत्तिकृतः। व्युत्पत्तिरेषा उत्तरवर्ति 'नपात्'शब्देन तुलनामर्हति। (सु०)।

२. मृग्यम्। ३. निरु० ५.२५। (सु०)।

४. निरुक्तकारस्तु ८.५ मध्ये 'निर्णततमा'शब्दात् पौत्रार्थे नपात्शब्दं निर्ब्रवीति। अस्य प्रतिरूपं 'नप्तृ' शब्दः प्रयुज्यते लौकिकसंस्कृते, 'नाती' इति रूपेण प्राकृतभाषासु च। स्त्रीलिङ्गे वेदे नप्तीशब्दः प्रयुज्यते (ऋ० ८.२.४२ इत्यादयः) लौकिकसंस्कृते तु नप्त्रीशब्दः। (सु०)।

५. 'वीज प्रजननकान्त्यसनखादनेषु इत्यस्मादच्प्रत्ययः' इत्यपपाठः कोशेषु।

पितेति वा। अत्र क्षीरस्वामी–'वीज्यते [ऽनेन] वेति वा बीजं वाजिलौंकिकः[१]' (अमर० १.३.२८ अ० उ०) इति। 'वीजिः स्यात् प्रेरणक्रिया'[२] इति माधवः। ....प्रेर्य्यते हि कार्य्यकारणाय वा बीजम्। यथा धान्यादिबीजमुत्तरोत्तरं स्वाभिवृद्धये भवति, एवमपत्यमपि पितॄणामभिवृद्धिहेतुरिति बीजमित्युच्यते। 'यस्यां बीजं मनुष्याइ वपन्ति' (ऋ० १०.८५.३७) इति। बीजमपत्यार्थमिति दृष्टम्॥

इति पञ्चदशापत्यनामानि॥ २॥

मनुष्याः (१)। नरः (२)। धवाः (३)। जन्तवः (४)। विशः (५)। क्षितयः (६)। कृष्टयः (७)। चर्षणयः (८)। नहुषः (९)। हरयः (१०)। मर्याः (११)। मर्त्याः (१२)। मर्ताः (१३)। व्राताः (१४)। तुर्वशाः (१५)। द्रुह्यवः (१६)। आयवः (१७)। यदवः (१८)। अनवः (१९)। पूरवः (२०)। जगतः (२१)। तस्थुषः (२२)। पञ्चजनाः (२३)। विवस्वन्तः (२४)। पृतनाः (२५)। इति पञ्चविंशतिर्मनुष्यनामानि॥ ३॥

(१) मनुष्याः–'मत्वा कर्माणि सीव्यन्ति' (निरु० ३.७) इति भाष्यस्य स्कन्दस्वामी–'मत्त्वेत्यादिना मनेः सीवेश्च द्विधातुजत्वं प्रदर्शयति–ज्ञात्वानेनेदमिति साध्यसाधनभावं कर्माणि सीव्यन्ति सन्तन्वन्ति न यथा पश्वादयः। मनस्यमानेन वा प्रजापतिना सृष्टाः। मनस्यतिः कस्मिन्नर्थे? इत्याह–मनस्वीभावे, प्रशंसायां मत्वर्थीयः। प्रशस्तं मनः प्रसन्नं सत्त्वप्राधान्यात्। अतः प्रसन्नमनस्केन सृष्टा इत्यर्थः। तथा च श्रुतिः–'स पितॄन् सृष्ट्वामनस्यत्। तदनु मनुष्यानसृजत'[३] इति। नित्यपक्षेऽप्यसति स्त्रष्टरि, कार्य्ये सौमनस्यं दृष्ट्वा [कारणमनुमास्यते] कारणानुविधायित्वात् कार्य्यस्य। 'मनोर्जातावञ्यतौ षुक् च' (अ० ४.१.१६१) इति वैयाकरणाः। जातिश्च प्रत्ययान्तोपाधिः। मनोरपत्यं जातिश्चेत्येतौ। अपत्यमात्रविवक्षायामन्तरेण च जातिं भवति[४] मानव इति। मनुषो वा षकारान्तमेव प्रातिपदिकमस्ति, अतस्तदन्तात्

---

१. 'वाजिलौकिकः' इति कोशेषु। अमरकोशोद्घाटने मुद्रितेऽयं पाठो नास्ति।

२. मृग्यम्।

३. तैत्तिरीयब्राह्मणम् २.३.८.३। (सु०)।

४. '०विवक्षायामणेव' इति मुद्रितायां स्कन्दटीकायाम्।

व्युत्पादयति, न अञ्यत्प्रत्ययसन्नियोगेन षुगिति स्मरणान्तरम्। विनापि प्रत्ययेन षकारान्तप्रयोगदर्शनात्–'समिद्धो अद्य मनुषो दुरोणे' (ऋ० १०.११०.१)[१] इति। पृषोदरादित्वात् (अ० ६.३.१०९) सर्वं सिद्धम्। अत्र श्रीनिवासः–'मनेर्मनुः·········मनेरुसि मनुषीति। यत्। सा चास्या मनुष्यगीः'[२] इति। 'स्पार्हा वसु मनुष्या ददीमहि' (ऋ० २.२३.९), 'दैव्याः शमितार आरभध्वमुत मनुष्याः' (ऐ० ब्रा० २.६) इति च निगमौ॥

(२) **नरः**–'णीञ् प्रापणे' (भ्वा० उभ० ६४२) 'नयतेर्डिच्च' (उ० २.१०२) इति ऋन्प्रत्ययः, जस्। नयन्ति संसारचक्रम्, पदार्थत्वात् देशान्तरं नीयन्ते वा स्थानोत्तरकालेन[३]। यद्वा 'नृती गात्रविक्षेपे' (दि० प० १०) बाहुलकादृन् डिच्च[४]। नृत्यन्ति गात्रविक्षेपं कुर्वते हि नियमेन गात्राणि विक्षिप्यन्ति कर्मसु तानि कुर्वन्तः। 'तं त्वा नरः प्रथमं देवयन्तः' (ऋ० ६.१.२), 'त्वां वृत्रेष्विन्द्र सत्पतिं नरः' (ऋ० ६.४६.१) इति च निगमौ॥

(३) **धवाः**[५]–'धूञ् कम्पने' (स्वा० उभ० ९) 'धुञ्' वा (क्र्या० उभ० १६)। पचाद्यच् (अ० ३.१.१३४)। धूनयति। धूनोति स्वावयवान् धवः, जस् धवाः। यद्वा मनुष्या मृत्युतो वेपन्ते। यद्वा 'धावु गतिशुद्ध्योः' (भ्वा० उभ० ३९७) अस्मात् पचाद्यचि (अ० ३.१.१३४) पृषोदरादित्वात् (अ० ६.३.१०९) ह्रस्वः। इतश्चेतः शरणार्थिनो धावन्ति धवाः। 'को वां शयुत्रा विधवेव देवरम्' (ऋ० १०.४०.२) इति निगमः॥

(४) **जन्तवः**–'जनी प्रादुर्भावे' (दि० आ० ४०) 'कमिमनिजनिगाभा-याहिभ्यश्च' (उ० १.७३) इति तुप्रत्ययः। जायन्ते जन्तवः। 'इरज्यन्नग्ने प्रथयस्व जन्तुभिः' (ऋ० १०.१४०.४) इति निगमः॥

(५) **विशः**[६]–'विश प्रवेशने' (तु० प० १३३) क्विप्। विशन्ति अनुप्रविशन्ति सर्वकर्मस्वधिकारित्वेन। यद्वा अनुप्रविष्टा आत्मीयभूराजादेः श्रिता इत्यर्थः। 'विशो राजानमुपतस्थुर्ऋग्मियम्' (ऋ० ६.८.४) इति निगमः॥

(६) **क्षितयः**–'क्षि निवासगत्योः' (तु० प० ११६) 'क्तिच्क्तौ च

---

१. स्कन्दटीकायाम् (निरु० ३.७) अयं सन्दर्भः स्वल्पपाठान्तरेण वर्तमानोऽत्र किञ्चित् संशोध्योद्धृतः।

२. मृग्यम्।

३. कदाचिदत्र 'परार्थत्वाद् देशान्तरं नीयन्ते वा स्नानोत्तरकालम्' इति पाठः स्यात्?

४. नृत्यन्ति कर्मसु (निरु० ५.१)। (सु०)।

५. निरु० ३.१५। (सु०)।

६. निरु० १०.८ मनुष्यमात्रार्थे व्याख्यातो निगमः। ब्राह्मणादिवर्णनिर्धारणप्रसङ्गे तु ब्राह्मणराजादिभिन्नाः विशः। अत एव राज्ञे विशाम्पतिरिति प्रयोगः संगच्छते। (सु०)।

सञ्ज्ञायाम्' (अ० ३.३.१७४) इति क्तिच्। क्षियन्ति निवसन्ति भूमौ, गच्छन्ति वा तस्याम्। 'अनु क्रोशन्ति क्षितयो भरैषु' (ऋ० ४.३८.५) इति निगमः॥

(७) कृष्टयः–'कृष विलेखने' (भ्वा० प० ७१६) भावे क्तः। कर्षणं कृष्टम्। कर्षणेन कर्मविशेषेण चात्र सामान्यतः कर्ममात्रं लक्ष्यते, कृष्टं कर्म, तदस्यास्तीति 'लुगकारेकाररेफाश्च वक्तव्याः' (अ० ४.४.१२८ वा०) इति इकारप्रत्ययः। तथा च भाष्यकारः–'कृष्टय इति मनुष्यनाम कर्मवन्तो भवन्ति' (निरु० १०.२२) इति। तथा च श्रीभगवद्गीतायाम्–'नैव कश्चित् क्षणमपि जातु तिष्ठत्यकर्मकृत्' (भगवद्गीता ३.५) इति। यद्वा शुद्धोऽपि कृषिर्विपूर्वस्यार्थे वर्त्तते। कर्मणि क्तः। विविधं कृष्टो विक्षिप्तःपरिकण्डूयनाद्यभिलषितक्रियानुष्ठान-समर्थः। क इत्यपेक्षायां विकृष्टसामर्थ्याद्देहः[१], स एषामस्तीति पूर्ववन्मत्वर्थीयः[२]। तथा च भाष्यम्–'विकृष्टदेहा वा' (निरु० १०.२२) इति। 'कृषन्ति प्रान्तं पदाभ्याम्'[३] इति माधवः। 'कर्षन्ति वशीकुर्वन्ति'[३] इति भट्टभास्करमिश्रः। 'मित्रः कृष्टीरनिमिषाभिचष्टे' (ऋ० ३.५९.१), 'सद्यश्चिद्यः शवसा पञ्च कृष्टीः'[४] (ऋ० १०.१७८.३) इति च निगमौ॥

(८) चर्षणयः[५]–चरतेर्धातोः (भ्वा० प० ३७६) 'अर्त्तिसृधृधम्यश्य-वितृभ्योऽनिः' (उ० २.१०४) इति बहुलवचनादनिप्रत्यये षुगागमश्च चरणवन्तः चरणशीलाः। यद्वा 'कृषेरादेश्च चः' (द० उ० १.४, श्वेत० २५१) इति अनिप्रत्यये कृषेरेतद्रूपम्। 'आकर्षन्ति वशीकुर्वन्ति इत्यर्थः'[३] इति भट्टभास्करमिश्रः। यद्वा चर्षणयः 'चायितारो द्रष्टारः सर्वेषां पदार्थानाम्'[६]। यद्यपि पश्यतिकर्मसु (निघ० ३.११) विचर्षणिरिति पठितम्, तथापि 'पिता कुटस्य चर्षणिः' (ऋ० १.४६.४) इत्यत्र 'चायिता द्रष्टा'[७] इति स्कन्दस्वामिना व्याख्यातम्। 'प्र चर्षणिभ्यः पृतनाहवेषु' (ऋ० १.१०९.६), 'महाँ इन्द्रो नृषदा चर्षणिप्राः' (ऋ० ६.१९.१) इति च निगमौ॥

(९) नहुषः–'णह बन्धने' (दि० उभ० ५५)। 'जनेरुसिः' (उ० २.११७) इति बाहुलकाद् उस्प्रत्ययः, जस्, नहुषः। नह्यन्ते कर्मभिः पूर्वकृतैः संसारे, नह्यन्ति वा नहनीयम्। 'सचा सनेम नहुषः सुवीराः' (ऋ०

---

१. 'विकृष्टदेहत्वं कृष्टसामर्थ्याद् देहम्' इति मुद्रितेषु।

२. अत्र स्कन्दटीका (निरु० १०.२२) अनुसन्धेया। सर्वमेतत् तत एवोद्धृतम्, लिपिकरदोषात् पाठवैकल्यम्।

३. मृग्यम्।

४. व्याख्यायतेऽसौ मन्त्रः (निरु० १०.२९)। तथा च 'पञ्च कृष्टयः' इति 'पञ्च जनाः' इत्यस्य प्रतिरूपम्। (सु०)।

५. निरु० १२.२१। (सु०)।

६. —निरु० ५.२४। (सु०)।

७. स्कन्दटीका (निरु० ५.२४)।

१.१२२.८), 'आ यातं नहुषस्परि' (ऋ० ८.८.३) इत्यादयो निगमाः॥

अकारान्तमिदं नाम केषुचित् कोशेषु दृश्यते। तदा 'ऋनहिभ्यामुषन्' (द० उ० ९.१३) इति उषन्प्रत्ययः। पूर्ववदर्थः। 'प्रसर्त्तीणस्य नहुषस्य शेषः' (ऋ० ५.१२.६) इति निगमः॥

(१०) हरयः–'हृञ् हरणे' भूवादिः (उभ० ६४०) 'हृ प्रसह्यकरणे' जुहोत्यादिः (प० १५)। 'इन् सर्वधातुभ्यः' (श्वेत० ५५२, उ० ४.११९) इतीन्प्रत्ययः। हरन्ति पदार्थान्, प्रसह्यीक्रियन्ते वा मृत्युनेति वा। तथा च मृत्युवाक्यम्–'अहं प्रजाश्चाक्रुशतीर्हरामि'[१] इति। निगमोऽन्वेषणीयः॥

(११) मर्याः[२], **(१२) मर्त्याः**–'मृङ् प्राणत्यागे' (तु० आ० ११३), 'अघ्न्यादयश्च' (उ० ४.११३) इति यत्प्रत्ययान्तं निपात्यते, तुडागमस्तु विकल्पेन, गुणः। म्रियन्ते मर्याः। 'छन्दसि निष्टर्क्यदेवहूयप्रणीयोन्नीयोच्छिष्यमर्य०' (अ० ३.१.१२३) इत्यादिना यत्प्रत्ययान्तं निपातितम्। 'को नु मर्या अमिथितः' (ऋ० ८.४५.३७), 'मर्यीयेव कन्या शश्वचै तें' (ऋ० ३.३३.१०), 'मर्यन्न योषा कृणुते सधस्थ आ' (ऋ० १०.४०.२) इति निगमाः। यद्वा 'मृङ् प्राणत्यागे' (तु० आ० ११३) 'हसिमृग्रिण्वामिदमिलूपूधूर्विभ्यस्तन्' (उ० ३.८६) इति तन्प्रत्ययः। अर्थः पूर्ववत्। मर्त्तशब्दात् 'वस्वमर्त्तयविष्टेभ्यश्छन्दसि'[३] इति स्वार्थिकस्तद्धितो यत्। 'यो मर्त्येष्वमृत ऋतावा' (ऋ० ४.२.१) इति निगमः॥

(१३) मर्त्ताः–व्याख्याताः (२.३.१२)। 'मा नो मर्त्ता अभिद्रुहन्' (ऋ० १.५.१०), 'तं मर्त्ता अमर्त्त्यम्' (ऋ० १०.११८.६) इति च निगमौ॥

(१४) व्राताः[४]–'वृञ् वरणे' (स्वा०उभ० ८) 'तातव्रातलातसुतपुतपित्त०' (स० क० २.२.१३४) इत्यादिसूत्रेण भोजराजेन क्तप्रत्यये आडागमो निपात्यते। वृण्वन्ति स्वमभिमतं देवताभ्यः तपसाराधिताभ्यः, प्रव्रियन्ते वा यज्ञादौ। यद्वा व्रातो धान्यादिसञ्चयः। तद्वन्तो व्राताः। मत्वर्थीयोऽकारः। यद्वा व्रतमिति कर्मनाम (निघ० २.१.७) अन्नं वा। अन्नमपि व्रतमेतस्मादेवेत्युक्तेः (निरु० २.१३)। तदीयाः, 'तस्येदम्' (अ० ४.३.१२०) इत्यण्। 'कर्मणा जायते जन्तुः कर्मणैव प्रमुच्यते'[१] इत्युक्तेः

---

१. मृग्यम्। २. निरु० ३.१४। (सु०)। ३. द्र०–महाभाष्यम् ५.४.३०।

४. लौकिकसंस्कृते संघवाचको व्रातः। यथा महाभाष्यम्–'नानाजातीया अनियतवृत्तय उत्सेधजीविनः संघाः व्राताः' (अ० ५.२.२१ म० भा०)। ऋग्वेदेऽपि प्रतीयते मनुष्यसंघार्थः, यथा–'व्रातंव्रातं गणंगणं सुशस्तिभिरग्नेर्भामं मरुतामोज ईमहे' (ऋ० ३.२६.६)। (सु०)।

कर्मणामधिकारित्वाच्च मनुष्याणां कर्मसम्बन्धित्वम्। 'अथो अन्नाद् भूतानि जायन्ते जातान्यन्नेन वर्द्धन्ते' (तै० उ० २.२) इति, 'अन्नाद् रेतो रेतसः पुरुषः' (तै० उ० १.१) इति च श्रुतेः मनुष्याणामन्नसम्बन्धित्वम्। 'पञ्च व्राता अपस्यवः' (ऋ० ९.१४.२) इति निगमः॥

(१५) तुर्वशाः–'तुर्वी हिंसायाम्' (भ्वा० प० ३८२)। 'कलेरशच्' (स० क० २.३.१४१) इति बाहुलकाद् अशच्प्रत्ययः। भोजराजीयमिदं सूत्रम्। हिंसन्ति प्राणिनः, हिंस्यन्ते व्याध्यादिभिर्वा। यद्वा 'तूर त्वरणहिंसनयोः' (दि० आ० ४३) अस्मात् क्विपि तूर्। अश्नोतेः पचाद्यच् (अ० ३.१.१३४)। तूर्णमश्नुवते पृषोदरादित्वात् (अ० ६.३.१०९) पूर्वपदस्य ह्रस्वत्वं वकारश्चोपजनः। तूस्तूर्णमश्नुते। 'प्राप्यम्'[1] इति माधवः। यद्वा तूर्वशः काम एषामिति तुर्वशाः, पूर्ववत् पूर्वपदस्य ह्रस्वत्वम्। 'वश कान्तौ' (अदा० प० ७२) इत्यस्मात् 'वशिरण्योरुपसङ्ख्यानम्' (अ० ३.३.५८ वा०) इत्यप्। यद्वा चतुर्षु धर्मार्थकाममोक्षेषु वश एषामिति चतुर्वशाः सन्तः चकारलोपेन तुर्वशाः। 'तुर्वशेष्वमन्महि' (ऋ० ८.४.१९) इति निगमः॥

(१६) द्रुह्यवः–'द्रुह जिघांसायाम्' (दि० प० ८६) औणादिकः क्विप्[2], द्रुह्[3]। द्रुहं[3] परेषामिच्छन्ति 'छन्दसि परेच्छायामपि' (अ० ३.१.८ वा०) इति क्यच्, 'क्याच्छन्दसि' (अ० ३.२.१७०) इत्युप्रत्ययः। परहिंसारुचयो हि प्रायेण मनुष्याः। 'श्रुष्टिं चक्रुर्भृगवो द्रुह्यवश्च' (ऋ० ७.१८.६) इति निगमः॥

(१७) आयवः–'इण् गतौ' (अदा० प० ३८), 'छन्दसीणः' (उ० १.२) इत्युण्प्रत्ययः। गच्छन्ति ग्रामाद् ग्रामम्, गमनशीलाः। 'बाहुभ्यामग्निमायवोऽजनन्त' (ऋ० १०.७.५), 'आयोर्ह स्कम्भ उपमस्य नीळे' (ऋ० १०.५.६) इति च निगमौ। 'अन्तोदात्त आयुशब्दो मनुष्यवचनः'[1] इति माधवः॥

(१८) यदवः–'यमु उपरमे' (भ्वा० प० ७१०) 'यमेर्दुक्' (स० क० २.१.६८) इति श्रीभोजदेवः। 'अनुदात्तोपदेशवनतितनोत्यादीनाम्०' (अ० ६.४.३७) इत्यादिना अनुनासिकलोपः। यम्यन्ते नियम्यन्ते आचार्य्येण अपथप्रवृत्ताः, राज्ञा वा। 'यो अस्ति याद्वः पशुः' (ऋ० ८.१.३१) इति निगमः। अत्र माधवः–'यदुषु भवो याद्वो यदुरिति मनुष्यनाम'[4] इति॥

(१९) अनवः–'अन प्राणने' (अदा० प० ६३) 'अणश्च' (उ०

---

१. मृग्यम्। २. बाहुलकात् (उ० २.५८)।
३. 'द्रोहः। द्रोहम्' इत्यपपाठो मुद्रितेषु। ४. वेङ्कटमाधवभाष्यम् (ऋ० ८.१.३१)।

१.८) इति विधीयमान उप्रत्ययो बाहुलकाद् भवति। अनन्त्यनवः। ज्ञानवत्त्वादेतेषां धर्माद्यनुष्ठानात् प्राणनस्य फलवत्त्वाद् अनन्तीत्युच्यन्ते। इतरे पश्वादयो ज्ञानहीनत्वात् निष्फलप्राणनाः। तथा चोपनिषदि–'तस्य य आत्मानं विस्तरं वेद'[१] इत्यत्र प्रकरणे ज्ञानवत्त्वात् पुरुषस्य वैशिष्ट्यं प्रतिपादितम्। 'रोधाय विद्वदनवाय'[१] इति निगमः। अत्र माधवः–'अनुरिति मनुष्यनाम'[१] इति। 'अनवस्ते रथमश्वाय तक्षन्' (ऋ० ५.३१.४) इति च। अत्र 'अनवः ऋभवः ते च मनुष्याः'[१]। 'मर्त्तासः सन्तो अमृतत्वमानशुः' (ऋ० १.११०.४) इति श्रुतिः। तथा ब्राह्मणमपि–'आर्भवं शंसत्यृभवो वै देवेषु तपसा सोमपीथमभ्यजयन्' (ऐ० ब्रा० ३.३०) इत्यादि, 'तेभ्यो वै देवा अपैवाबीभत्सन्त मनुष्यगन्धात्' (ऐ० ब्रा० ३.३०) इति च॥

(२०) पूरवः–'पूरी आप्यायने' (दि० आ० ४२) 'भृमृशीङ्तॄचरित्सरि०' (उ० १.७) इत्यादिना बाहुलकाद् उप्रत्ययः। पूरयितव्याः कामानाम्। 'रुपूभ्यां कुः' (स०क० २.१.९३) इति श्रीभोजदेवः। पूताः शुद्धाः स्नानार्थिभिरित्यर्थः। 'यं पूरवो वृत्रहणं सचन्ते' (ऋ० १.५९.६) इति निगमः॥

(२१) जगतः[२]–'गम्लृ गतौ' (भ्वा० प० ७०९)। 'वर्त्तमाने पृषद्-बृहन्महज्जगच्छतृवच्च' (उ० २.८५) इति क्विप्प्रत्ययान्तो निपात्यते। प्रत्ययस्यादादेशः, द्विर्वचनम्, टिल्लोपश्च[३] निपात्यते। गच्छति ग्रामाद् ग्रामान्तरम्। 'यदेषामग्रं जगतामिरज्यसि' (ऋ० १०.७५.२) इति निगमः॥

(२२) तस्थुषः[२]–'ष्ठा गतिनिवृत्तौ' (भ्वा० प० ६६२)। 'छन्दसि लुङ्लङ्लिटः' (अ० ३.४.६)। क्वसुः (अ० ३.२.१०७)। 'वस्वेकाजाद्घसाम्' (अ० ७.२.६७) इति इडागमः। 'आतो लोप०' (अ० ६.४.६४)। 'लिटि धातो०' (अ० ६.१.८) इति द्वित्वम्। 'शर्पूर्वाः खयः' (अ० ७.४.६१) इति थकारस्य शेषः। 'अभ्यासे चर्च' (अ० ८.४.५३) इति तकारः। तस्थिवस् इति स्थिते जसः स्थाने व्यत्ययेन शस् (अ० ३.१.८५)। 'वसोः सम्प्रसारणम्' (अ० ६.४.१३१)। 'शासिवसिघसीनाञ्च' (अ० ८.३.६०) इति षत्वम्। तिष्ठन्ति स्वस्मिन् धर्मे। 'चरन्तं परि तस्थुषः' (ऋ० १.६.१) इति निगमः। अत्र वाजसनेयभाष्यकृदुवटः 'तस्थुषो मनुष्याः ऋत्विग्यजमाना इत्यर्थः'[४] इति॥

---

१. मृग्यम्।

२. शब्दद्वयस्य प्रवृत्तिनिमित्तं स्पष्टतो भिन्नमेव। परिव्राजकाः जगतः, नियतवृत्तयो यजमानादयस्तु तस्थुषः। (सु०)।

३. 'नञि लोपश्च' इत्यपपाठो मुद्रितेषु।

४. उवटस्तु 'परि तस्थुषः सर्वतः स्थिता ऋत्विग्यजमानाः' (मा० सं० २३.५ भाष्ये) इत्याह।

(२३) पञ्चजनाः–अत्र भाष्यम्–'तत्र पञ्चजना इत्येतस्य निगमा भवन्ति। तदुद्य वाचः प्रथमं मंसीय०–०जुषध्वम्' (ऋ० १०.५३.४)। तदद्य वाचः परमं मंसीय येनासुरानभिभवेम देवाः। असुरा असुरताः स्थानेष्वस्ताः स्थानेभ्य इति वापि वासुरिति प्राणनामास्तः शरीरे भवति, तेन तद्वन्तः। सोऽदेवानसृजत तत्सुराणां सुरत्वमसोरसुरानसृजत तदसुराणामसुरत्वमिति विज्ञायते। ऊर्जाद उत यज्ञियासः। अन्नादाश्च यज्ञियाश्चोर्गित्यन्ननामोर्जयतीति सतः, पक्वं सुप्रवृक्णमिति वा। पञ्चजना मम होत्रं जुषध्वम्। गन्धर्वाः पितरो देवा असुरा रक्षांसीत्येके, चत्वारो वर्णा निषादः पञ्चम इत्यौपमन्यवः। निषादः कस्मात्? निषदनो भवति। निषण्णमस्मिन् पापकमिति नैरुक्ताः। 'यत् पाञ्चजन्यया विशा' (ऋ० ८.६३.७)। पञ्चजनीनया विशा। पञ्च पृक्ता सङ्ख्या लिङ्गत्रययोगेष्वविशिष्टा'[१] (निरु० ३.७,८) इति। अस्य स्कन्दस्वामी–"पञ्चजना इत्येतस्य सन्दिग्धस्य विवेकार्थं निगमा भवन्ति। सन्देहश्च मनुष्य-[मात्र]-नामसु पाठात्। पञ्च-[शब्दश्च जन]-शब्देन समानाधिकरणः। तत्र यदि देवदत्तादिमनुष्यविषयः[२] स्याद् गन्धर्वादिपञ्चकविषयो वा, न मनुष्यमात्रनामविषयतास्य स्यात्, मनुष्यमात्रनामैतदित्याचार्य्य-[मतं तत्सिद्ध्यर्थं]-मतान्तरप्रदर्शनाय पदद्वयमिदम्मनुष्यपदार्थे वर्त्तते इति वैचित्र्यप्रदर्शनार्थ उपन्यासः। न [नु मनुष्यमात्रनामत्वे पञ्चशब्दस्य परिमाणावधृतसंख्येयविशेषविषयता प्रसिद्धा बाध्येत? उच्यते। अवयवप्रसिद्धेः समुदाय-प्रसिद्धिबलीयस्त्वाद् (परि० ९८) अश्वजकर्णादिवद् वासायामप्यदोष औपमन्यवदर्शनेन पञ्चजनशब्दो न समानाधिकरणो मनुष्यसन्तति-विषयोऽन्वर्थप्रायो] मनुष्यनामत्वेन च द्रष्टव्यः। एकीयमतेन चाष्टौ देवनिकाया उच्यन्ते। तत्र पक्षे नागानां गन्धर्वेषु, यक्षाणामसुरेषु, पिशाचानां रक्षः-स्वन्तर्भावादष्टत्वाविरोधः। 'तदद्य वाचः'। सौचीकस्याग्नेर्विश्वेषां देवानां संवादो होतृजपश्चायम्। तद् अद्य अस्मिन् कर्मणि, वाचो माध्यमिकायाः, प्रथममुत्कृष्टं स्वरसौष्ठवार्थसतत्त्वदेवताविशिष्टम्, मसीय जानीयाम्, येन ज्ञानेन असुरान् यज्ञविघ्नं कुर्वतः, हे देवाः! अभ्यसाम अभिभवेम। [किं च यूयमपि] हे ऊर्जादः! अन्नादाः, उत अपि, यज्ञियासः यज्ञस्य सम्पादयितारः, पञ्चजना आचार्य्यस्य मतेन ऋत्विङ्मनुष्याः। औपमन्यवस्य निषादस्थपतीष्टौ निषादानां यज्ञसम्पादित्वमस्ति। शूद्रस्याप्योदनसवे[३] 'आयुरसीति शूद्राय

---

१. 'स्त्रिपुंनपुंसकेष्वविशिष्टा' इति निरुक्तपाठो मुद्रितेषु।

२. 'देवदत्तादिपञ्चकविषयः' इति मुद्रितेषु।

३. तै० ब्रा० २.७.७, आप० श्रौ० २२.२५.१–२२.२७.१।

प्रयच्छति, तत्ते प्रयच्छामीति शूद्रः प्रतिगृह्णाति' इत्येवमादिना। तथा 'दासी पिनष्टि पत्नी वा'[१] इत्यत्र दास्यादेर्व्यापारादप्यस्त्येव यज्ञसम्पादित्वम्। एकीयमतेन पञ्च यज्ञाङ्गभूता देवगन्धर्वादयः साधनभावेन यज्ञसम्पादिनः। अत उच्यते– 'मम होत्रं जुषध्वम्'। होतृकर्म जुषध्वम्, सम्पादयतेत्यर्थः। अन्ये मन्यन्ते– यदेकीयमतं यच्चौपमन्यवस्य तदुभयमप्याचार्य्यस्येति। तथा च मन्त्रव्याख्यानम्– ऊर्जादो ब्राह्मणादयो यज्ञियाः गन्धर्वादयः सर्वेऽपि मम होत्रं स्वेन स्वेन व्यापारेण सेवध्वमिति। ....सम्प्रत्यसाधारणं मनुष्यमात्रनामत्वेनैव निगमं दर्शयति 'यद् पाञ्चजन्यया विशा' (ऋ० ८.६३.७)। प्रगाथस्यार्षम्। यत् यदा पाञ्चजन्यया पञ्चजनेषु मनुष्येषु भवया विशेति [स्त्रीलिङ्गनिर्देशो जात्यपेक्षः] पञ्चभिरपि मनुष्यजातैरित्यर्थः" इत्यादि। ....पञ्चेति निर्वाच्यम्, पृक्तेति निर्वचनम्। सङ्ख्येति विषयकथनं सम्बन्धात् सर्वलिङ्गैरित्याह– लिङ्गत्रययोगेऽप्यविशिष्टा इति। ननु षडादीन्यप्यविशिष्टानि? उच्यते– प्रत्ययोपात्तरूढ्यर्थसम्बन्धस्वार्थाभिधानाददोष इत्युक्तम्। अपि च न या पृक्ता सा पञ्चेति, किन्तु या पञ्च सा पृक्तेति[२]। तदन्यत्र एकपद-निरुक्तव्याख्यानम्। यत् पञ्चजन्ययेत्यस्य द्वितीयपादादिव्याख्यानं चास्माकमत्रानुपयुक्तत्वान्न लिखितम्। 'पृची सम्पर्के' (रु० प० २४)। 'कनिन् युवृषि०' (उ० १.१५६) इत्यत्र प्राक्प्रत्ययनिर्देशस्याधिकविध्यर्थत्वात्[३] कनिनि बाहुलकाद् ऋकारस्याकारो नकार उपजनश्च। भोजराजस्तु– 'युवृषितक्षिराजिधन्विपचिद्युप्रतिदिविभ्यः कनिन्' (स० क० २.१.७४)[४] इत्याह, तदा 'पचि विस्तारे' (चु० प० ११९) इति धातुः। एकादिभ्यो विस्तीर्णा पञ्च सङ्ख्या। जायन्ते जनाः। पचाद्यच् (अ० ३.१.१३४)। 'पञ्चभिर्भूतैर्जाताः पञ्चजनाः' (अमर० २.६.१ अ० उ०) इति क्षीरस्वामी॥

(२४) विवस्वन्तः[५]–'वस निवासे' (भ्वा० प० ७३१) इत्यस्मात् 'अन्येभ्योऽपि दृश्यन्ते' (अ० ३.२.७५) इति विच्, दृशिग्रहणात् भावे भवति। विविधं वसनं विवः, तद्वन्तो विवस्वन्तः। सर्वस्यापि मनुष्यस्य यत् किञ्चिद् विवसनमस्ति। 'विवस्वच्छब्द आदित्यवाच्याद्युदात्तः, अन्यत्र

---

१. आप० श्रौ० १.२१.८।

२. अयं सुदीर्घः सन्दर्भो मुद्रितस्कन्दस्वामिटीकायां (निरु० ३.७,८) वर्तते। स्वल्पपाठान्तरेणात्रोद्धृतः। बहुशः शोधितः।

३. तु०–द० उ० ६.५ माणिक्यदेववृत्तिः।

४. 'वृषितक्षिराजिघसिपचिप्रतिहिविभ्यः कन्' इत्यपपाठो मुद्रितेषु।

५. निरु० ७.२६ आदित्यार्थे। (सु०)।

मनुष्यविशेषे यजमाने द्वितीयाक्षरमुदात्तम्'[१] इति माधवः। 'आविर्भव सुक्रतूया विवस्वते' (ऋ० १.३१.३), 'शिवो दूतो विवस्वतः' (ऋ० ८.३९.३) इति च निगमौ। अत्र 'विवस्वान् यजमानः'[१] इति माधवभाष्यम्। 'महो जाया विवस्वतो ननाश' (ऋ० १०.१७.१) इत्यादित्यवचनस्योदाहरणम्॥

(२५) पृतनाः[२]–'पृङ् व्यायामे' (तु० आ० ११२)। 'त्वयाध्यक्षेण पृतना जयेम' (ऋ० १०.१२८.१) इति निगमः॥

मनुष्याणां बहुत्वम्, ततो बहुवचनान्तत्वम्, तथा निघण्टुष्वपि। 'मनुष्या मानुषा मर्त्या मनुजा मानवा नराः। स्युः पुमांसः पञ्चजनाः पुरुषाः पूरुषा विशः॥' (अमर० २.६.१) इत्यादिषु च बहुवचनान्तता दृश्यते॥

इति पञ्चविंशतिर्मनुष्यनामानि॥ ३॥

आयती (१)। च्यवाना (२)। अभीशू (३)। अप्नवाना (४)। विनङ्गृसौ (५)। गभस्ती (६)। कुरस्नौ (७)। बाहू (८)। भुरिजौ (९)। क्षिपस्ती (१०)। शक्वरी (११)। भरित्रे (१२)। इति द्वादश बाहुनामानि॥ ४॥

(१) आयती[३]–'यती प्रयत्ने' (भ्वा० आ० २५) गतिकर्मा वा (निघ० २.१४) 'इन् सर्वधातुभ्यः' (४.११९ उ०) इतीन्प्रत्ययः। आभिमुख्येन यतेते[४] कार्य्येषु, गच्छतो[५] वा साधनत्वम्। बाह्वोर्द्वित्वात् सर्वत्र द्विवचनान्तता। निगमोऽन्वेषणीयः॥

(२) च्यवाना–'च्युङ् गतौ' (भ्वा० आ० ६८४)। 'सम्यानच् स्तुवः' (उ० २.९०) इत्यत्र प्राक्प्रत्ययनिर्देशोऽधिकविध्यर्थः[६] इत्युक्तेरानच्प्रत्ययः। 'सुपां सुलुक्०' (अ० ७.१.३९) इत्यादिना द्विवचनस्याकारः। गच्छतः कर्मणामन्तम्[७]। निगमोऽन्वेषणीयः॥

(३) अभीशू–व्याख्यातो रश्मिनामसु (१.५.५)। अभ्यश्नुवाते

---

१. मृग्यम्। २. निघ० २.१७ संग्रामनामसु। (सु०)।

३. आयतिशब्दो विस्तारार्थे प्रसिद्धो वेदे। ऋ० १.१३९.९ इति यथा। आयामशब्दोऽपि तथैव। एवं विस्तृतत्वाद् बाहू अपि आयती। सायणस्तु सर्वत्रैव शतृप्रत्ययान्तं शब्दं मत्वा 'आगच्छन्ती' इत्यर्थं स्वीचकार। (सु०)।

४. 'यतते' इत्यपपाठो मुद्रितेषु। ५. 'गच्छन्तौ' इति मुद्रितेषु।

६. तु०–द०उ० १.१०७ माणिक्यदेववृत्तिः। ७. 'कर्मणामन्तः' इति मुद्रितेषु।

कर्माणि, अभिनयन्ति[१] वा कर्माण्यतः, अभीशाते कर्माणि कर्तुमिति वा। निगमोऽन्वेषणीयः[२]॥

(४) अप्रवाना–'आप्लृ व्याप्तौ' (स्वा० प० १५) 'ताच्छील्यवयोवचन-शक्तिषु चानश्' (अ० ३.२.१२९)। अस्य सार्वधातुकत्वात् श्नुः, 'छन्दस्युभयथा' (अ० ३.४.११७) इत्यार्द्धधातुकत्वाद् गुणः, धातोर्ह्रस्वत्वं पृषोदरादित्वात् (अ० ६.३.१०९)। आप्नुतः कर्माणि। यद्वा अप्र इति कर्मनामसु व्याख्यातम्, (२.१.२) तदस्यास्ति 'छन्दसीवनिपौ०' (अ० ५.२.१०९ वा०) इति वनिपि विभक्तेराकारः पूर्ववत्, सकारलोपश्छान्दसः। कर्मवन्तौ हि बाहू। नकारान्तो वेति सन्देहः। निगमदर्शनान्निर्णेयः॥

(५) विनङ्गृसौ–बाहुनाम। विनम्य ग्रसतोऽन्नादिकमिति[३] माधवः। पृषोदरादित्वात् (अ० ६.३.१०९) पूर्वपदे म्यलोपो नुक्, 'ग्रस अदने' (भ्वा० आ० ४२०) इत्यस्मात् पचाद्यच् (अ० ३.१.१३४), सम्प्रसारणञ्च। 'अन्वस्मै जोषमभरद्विनङ्गृसः' (ऋ० ९.७२.३) इति निगमः॥

(६) गभस्ती–व्याख्यातो रश्मिनामसु (१.५.७)। पुरुषा अदन्त्याभ्यामन्नादीन्।[४] 'ग्रहेर्गभस्ती बाहू, गृह्णाति पदार्थानाभ्यां पुरुषः'[३] इति माधवः। 'शर्य्याभिर्न भरमाणो गभस्त्योः' (ऋ० ९.११०.५) इति निगमः॥

(७) करस्नौ–करांसीति कर्मनामसु (२.१.१३) करःशब्दो व्याख्यातः। तस्मिन्[५] कर्मण्युपपदे 'ष्णै वेष्टने' (भ्वा० प० ६५७) इत्यस्मात् 'आतोऽनुपसर्गे कः' (अ० ३.२.३), 'आतो लोप इटि च' (अ० ६.४.६४)। 'कर्मणां प्रस्नातारौ' (निरु० ६.१७) वेष्टयितारौ कर्मकरावित्यर्थः[६]। 'सृप्रकरस्नमूतये' (ऋ० ८.३२.१०) इति निगमः॥

(८) बाहू–'बाधृ विलोडने' (भ्वा० आ० ५)। 'अर्जिदृशिकम्यमि-पंसिबाधामृजिपशितुक्धुक्दीर्घहकाराश्च' (उ० १.२७) इत्युप्रत्ययो होऽन्ता-देशश्च। गमयत्याभ्यां कर्माणि, बाधते परानाभ्यामिति वा। 'ऋष्वा त इन्द्र

---

१. 'अभिनयन्तः' इति मुद्रितेषु। २. ऋ० १.३८.१२ भाष्ये दयानन्दः। (सु०)।

३. मृग्यम्।

४. वस्तुतस्तु गभीरावकाशार्थकाद् गभश्शब्दात्तिप्रत्ययः क्षिपस्ति, पुलस्ति, अगस्त्यादिशब्दैः सकारान्तात्तिप्रत्ययम् अनुमिनुमः। एतत्तु रश्म्यर्थे। बाह्वर्थे तु ग्रहेर्गभश्शब्दात्तिप्रत्ययः। ग्रहशब्दाद् गभायादिप्रयोगा दृश्यन्ते। (सु०)।

५. वस्तुतस्तु स्नप्रत्ययो स्नुप्रत्ययो वा दृश्यते वेदे। क्वचिल्लोकेऽपि। यथा–कृत्स्नः, मृत्स्ना इत्यादयः। वेदे घृतस्नुरपि। अतः स्नप्रत्ययान्तः करस्न इति प्रतीमः। (सु०)।

६. तु०–स्कन्दटीका (निरु० ६.१७)।

स्थविरस्य बाहू' (ऋ० ६.४७.८) इति निगमः॥

(९) भुरिजौ–'हृञ् हरणे' (भ्वा० उभ० ६४०) 'डुभृञ् धारणपोषणयोः' (जु० उभ० ५) 'भृञ उच्च' (उ० २.७३) इति इजिप्रत्ययः। हरतो विभृतो वा पदार्थान् कर्मकरणसामर्थ्यं वा। 'तमीं हिन्वन्ति भुरिजोर्धियां' (ऋ० ९.२६.४) इति निगमः॥

(१०) क्षिपस्ती–'क्षिप प्रेरणे' तुदादिः (प० ५), 'वसवितसेस्तिः' (द० उ० १.७४)[1] इति बाहुलकात् तिप्रत्ययः, धातोरसुगागमो गुणाभावश्च। प्रेर्य्यते कर्मसु पुरुषैः। 'क्षिपन्ती' इति पाठान्तरम्। तदा शतरि ङीपि 'आच्छीनद्योर्नुम्' (अ० ७.१.८०), 'वा छन्दसि' (अ० ६.१.१०२) इति द्विवचनस्य पूर्वसवर्णः। क्षिपतः पदार्थान् इतश्चेतश्च कर्मसु। यद्वा क्षिपेः 'रुहिनन्दिजीविप्राणिभ्यः षिदाशिषि' (उ० ३.१२७) इति बाहुलकात् झच्प्रत्ययः झोऽन्तादेशः। क्षिपतः पदार्थान्। निगमदर्शनान्निर्णेयः॥

(११) शक्वरी[2]–'शक्लृ शक्तौ' (स्वा० प० १६) 'स्नामदिपद्यर्त्तिपृशकिभ्यो वनिप्' (उ० ४.११४) इति वनिप्प्रत्ययः, 'वनो र च' (अ० ४.१.७) इत ङीब्रौ च। पूर्ववत् पूर्वसवर्णादेशः। शक्नुतः कर्माणि कर्त्तुम्। 'अङ्गुलयः शक्वरयो दिशश्च मे यज्ञेन कल्पन्ताम्' (मा० सं० १८.२२) इति निगमः॥

(१२) भरित्रे–बिभर्त्ति रश्मीनादित्य इव। 'अशित्रादिभ्य इत्रोत्रौ' (उ० ४.१७४) इति इत्रप्रत्ययः। भूरिग्वदर्थः[3]। 'अंशुं दुहन्ति हस्तिनो भरित्रैः' (ऋ० ३.३६.७) इति निगमः॥

इति द्वादश बाहुनामानि॥४॥

अग्रुवः (१)। अण्व्यः (२)। विशः (३)। क्षिपः (४)। शर्याः (५)। रशनाः (६)। धीतयः (७)। अथर्यः (८)। विपः (९)। कक्ष्याः (१०)। अवनयः (११)। हरितः (१२)। स्वसारः (१३)। जामयः (१४)। सनाभयः (१५)। योक्त्राणि (१६)। योजनानि (१७)। धुरः (१८)। शाखाः (१९)। अभीशवः (२०)। दीधितयः (२१)। गभस्तयः (२२)। इति द्वाविंशतिरङ्गुलिनामानि॥५॥

---

१. 'वसेस्तिः, वौ तसेः' इति पञ्चपाद्याम् (४.१८१,१८३)। दशपाद्यां तु 'वसेस्तिः' इति।

२. निरु० १.८ ऋगर्थे। (सु०)।

३. 'भूरिवदर्थः' इत्यपपाठो मुद्रितेषु।

(१) अग्रुवः[१]–'जत्र्वादयश्च' (उ० ४.१०३) इति रुप्रत्ययान्तेषु निपातनेषु[२] द्रष्टव्यः। 'अगि गतौ' (भ्वा० प० ८८) इति धातुः, निपातनान्नलोपः, तन्वादित्वादुवङ् (अ० ६.४.७७ वा०)। गच्छन्ति कर्माणि प्रति। यद्वा अग्रशब्द उपपदे गमेः पूर्ववन्निपातनाद् रुप्रत्यये पूर्वपदग्रलोपः गमेष्टिलोपश्च। अग्रे गच्छन्ति ताः। 'तमीँ हिन्वन्त्यग्रुवः' (ऋ० ९.१.८) इति निगमः। अङ्गुलीनां बहुत्वात् सर्वत्र बहुवचनान्तता॥

(२) अण्व्यः[३]–अणतिः शब्दार्थः (भ्वा० प० ३०३), 'अणश्च' (उ० १.८) इति उप्रत्ययः। 'वोतो गुणवचनात्' (अ० ४.१.४४) इति ङीष्। अणन्ति स्फोटनादिशब्दं कुर्वन्ति, तालादिशब्दं कुर्वन्त्याभिरिति वा। यद्वा अण्व्यः हस्तपरिमाणापेक्षयाल्पपरिमाणाः। 'तमीमण्वीः समर्य आ' (ऋ० ९.१.७) इति निगमः॥

(३) व्रिशः–'विश प्रवेशने' (तु० प० १३३)। 'क्विब् वचि०' (द० उ० १०.२) इत्यत्र 'प्राक् प्रत्ययनिर्देशादिष्टसिद्धिः'[४] इत्युक्तेः क्विपि रेफ उपजनः। विशन्ति साधनभावं कार्येषु। 'तमीँ हिन्वन्ति धीतयो दश व्रिशः' (ऋ० १.१४४.५) इति निगमः। 'कर्मसु धीयमाना दशाङ्गुलयः'[५] इति माधवभाष्यम्॥

(४) क्षिपः[६]–'क्षिप प्रेरणे' (दि० प० १५) औणादिकः क्विप्। क्षिप्यन्ते प्रेर्य्यन्ते पुरुषेण कर्मसु, निक्षिपन्त्यास्वङ्गुलीयकादीन् इति वा। 'मृजन्ति त्वा दश क्षिपः' (ऋ० ९.८.४) इति निगमः॥

(५) शर्य्याः[७]–'शॄ हिंसायाम्' (क्र्या० प० १७)। अघ्न्यादेराकृतिगणत्वाद् यत् (उ० ४.११३)। शृणन्ति पापान्[८]। 'आ यः शर्याभिस्तुविनृम्णो अस्य' (ऋ० १०.६१.३) इति निगमः॥

(६) रशनाः–रशिबन्धनार्थो धातुरित्युक्तं[९] रश्मिनिर्वचने (१.५.४)। 'युच् बहुलम्' (उ० २.७९) इति युच्। बध्नन्ति बध्ननीयम्, बध्यते आभिरिति वा। युच्प्रकरणे 'अशे रश च' (स० क० २.२.१८६) इति श्रीभोजदेवः। अश्नुवते कर्माणि। 'रशनाभिर्दशभिरभ्यधीताम्' (ऋ० १०.४.६),

---

१. निघ० १.१३ नदीनामसु। (सु०)। २. 'निपातेषु' इत्यपपाठो मुद्रितेषु।
३. निरु० ६.२२ अनुशब्दस्य णकारापत्त्या अणुः। (सु०)।
४. तु०–माणिक्यदेवकृता दशपाद्युणादिवृत्तिः। ५. मृग्यम्।
६. क्षिपोऽङ्गुलयः। अत एव तद्वन्तौ बाहू क्षिपस्ती। मत्वर्थे तिः। (सु०)।
७. निरु० ५.४। (सु०)। ८. 'शृणाति पापात्' इति मुद्रितेषु।
९. बन्धनार्थे धातुरयं प्राकृतभाषायां 'रस्सा'शब्दे जीवति। (सु०)।

'अच्छा बर्हीं रशनाभिर्नयन्ति' (ऋ० ९.८७.१) इति च निगमौ॥

(७) धीतयः[१]–धी (दि० आ० २६) धातोः 'क्तिच्क्तौ च सञ्ज्ञायाम्' (अ० ३.३.१७४) इति क्तिच्। व्यत्ययेन दधातेरपि भवति 'घुमास्थागापाजहाति०' (अ० ६.४.६६) इतीत्वम्। धीयन्ते विधीयन्ते पुरुषैः कर्मसु, धारयन्ति कर्मसाधनानि वा। अत्रान्तर्णीतण्यर्थो दधातिः। 'स सुप्त धीतिभिर्हितः' (ऋ० ९.९.४) इति निगमः॥

(८) अथर्यः[२]–'अत सातत्यगमने' (भ्वा० प० ३१) 'इन् सर्वधातुभ्यः' (उ० ४.११९) इतीन्प्रत्ययो बाहुलकात्, धातोरथरादेशः, 'कृदिकारादक्तिनः' (अ० ४.१.४५ ग० सू०) इति ङीष्, जस्। 'उषर्बुधमथर्यो३ न दन्तम्' (ऋ० ४.६.८) इत्यत्र 'अथर्यो न स्त्रियः इव'[३] इति माधवः। अथर्य इति तेनाप्यपाठि अङ्गुलिनामसु।

'अथर्यवः' इति पाठो बहुषु दृष्टः। तद् बाहुनामकरणं स्पष्टम्। निगमदर्शनान्निर्णयः॥

(९) विपः[४]–'विप प्रेरणे'[५] क्विपि, प्रेर्य्यन्ते पुरुषैः कार्य्येषु। 'विपो न द्युम्ना नियुवे जनानाम्' (ऋ० ८.१९.३३) इति निगमः॥

(१०) कक्ष्याः–'दशावनिभ्यः' (ऋ० १०.९४.७) इत्यत्र 'कक्ष्याः प्रकाशयन्ति कर्माणि' (निरु० ३.९) इति भाष्यम्। 'कक्ष्याः प्रकाशयन्त्यनुष्ठानेन फलेन वा कर्माणि। ख्यातेः कक्ष्यशब्दनिर्वचनम्'[६] इति स्कन्दस्वामी। 'गाहतेः क्स इति नामकरणः ख्यातेर्वा' (निरु० २.२) कक्ष्यशब्दनिर्वचनपरे भाष्ये स्कन्दस्वामिग्रन्थः–'ख्या प्रकथने' (अदा० प० ५३) इत्यस्मात् सप्रत्यये निरर्थको निर्निमित्तकोऽसौ सः यकाराकारयोर्लोपोऽभ्यासविकारश्च द्रष्टव्यः'[७] इति। अयमभिप्रायः–प्रायेण 'वृतृवदिवचिवसिहनिकमिकषिभ्यः सः' (उ० ३.६२) इति ख्यातेर्बाहुलकात् सप्रत्यये, बाहुलकादेव द्विर्वचने, हलादिशेषे ह्रस्वत्वे 'कुहोश्चुः' (अ० ७.४.६२) न भवति बाहुलकादेव, 'अभ्यासे चर्च' (अ० ८.४.५३) इति चर्त्वम्, उत्तरस्य ख्या इत्यस्य यकाराकारयोर्लोपः, 'खरि च' (अ० ८.४.५४) इति चर्त्वम्, 'आदेशप्रत्यययोः' (अ० ८.३.५९) इति षत्वम्। प्रकथनेन प्रकाशनं लक्ष्यते। अंसेन नित्यं प्रच्छादनात् प्रकाश्यते

---

१. 'धीतिभिः=कर्मभिः' निरु० २.२३। (सु०)। २. निरु० ५.११। (सु०)।

३. 'अथर्यः स्त्रियः मैथुनेऽधरा भवन्तीति स्त्रिय इव' इति वेङ्कटमाधवभाष्यम् (ऋ० ४.६.८)।

४. निघ० ३.१५ मेधाविनामसु। (सु०)। ५. धातुपाठेषु न दृश्यते।

६. स्कन्दटीका (निरु० २.९)। 'कक्ष्या इत्युक्तनिर्वचनम्' इति स्कन्दपाठः।

७. स्कन्दटीका (निरु० २.२) स्वल्पपाठान्तरेण।

पुरुषेण। कक्षो बाहुतलम्। 'तत्र भवः' (अ० ४.३.५३) इत्यर्थे 'शरीरावयवाच्च' (अ० ४.३.५५) इति यत्प्रत्ययः। अङ्गुलयोऽपि परम्परया कक्षे भवा इति वक्तुं शक्यते। अंसेन नित्यं प्रच्छादितत्वात्, प्रकाश्यो हि सर्वदा कक्षः[१], तत्र भवाः, अङ्गुलयः। यद्वा न[२] प्रकाश्याः किन्तु प्रकाशयन्ति कर्माणि अनुष्ठानेन फलेन वा, यथा चाधारस्थिते अरणी अग्निना प्रकाश्ये तत्र भवोऽग्निः प्रकाशको भवति तद्वत्। यद्वा कक्ष्या रज्जुः, तद्बन्धनसाधनत्वात् कक्ष्याशब्देनोच्यन्ते[३]। 'परिष्वजध्वं दश कुक्ष्याभिः' (ऋ० १०.१०१.१०), 'दशावनिभ्यो दशकक्ष्येभ्यः' (ऋ० १०.९४.७) इति च निगमौ॥

(११) अवनयः—व्याख्यातं पृथिवीनामसु (१.१.९)। अवन्ति कर्माणि, अव्यन्ते वा। 'सुनात् सनीळा अवनीरवाताः' (ऋ० १.६२.१०), 'दशावनिभ्यः' (ऋ० १०.९४.७) इति च निगमौ॥

(१२) हरितः—व्याख्यातं नदीनामसु (१.१३.१२)। हरन्त्याभिः पदार्थान्। 'एतं त्यं हुरितो दश' (ऋ० ९.३८.३) इति निगमः॥

(१३) स्वसारः—स्वशब्द उपपदे 'असु क्षेपणे' (दि० प० ९९) इत्यस्मात् 'सावसेर्ऋन्' (उ० २.९८) इति ऋन्प्रत्ययः। सुष्ठु अस्यते क्षिप्यते पदार्थ आभिः, कार्य्येषु क्षेप्तव्या वा। यद्वा स्वशब्द उपपदे 'षद्लृ विशरणे' (भ्वा० प० ५९३) इत्यस्माद् बाहुलकादृन्[४] बाहुलकात् टिलोपश्च। स्वं स्वं व्यापारं गच्छन्ति प्राप्नुवन्ति, स्वस्मिन् स्वस्मिन् हस्ते सीदन्तीति वा। यद्वा परस्परं भगिनीव दृश्यन्ते[५], एकहस्तप्रभवत्वात् स्वसार उच्यन्ते। 'न षट्-स्वस्रादिभ्यः' (अ० ४.१.१०) इति स्त्रीप्रत्ययनिषेधः। 'दुवस्यन्ति स्वसारो अह्रयाणम्' (ऋ० १.६२.१०) इति निगमः॥

(१४) जामयः[६], सनाभयः—अनयोः........मर्थोऽनुसन्धेयः। जमतेर्गतिकर्मणः (निघ० २.१४) 'जनिघसिभ्यामिण्' (उ० ४.१३१) इति बाहुलकादिण्प्रत्ययः। 'अलिशलिपलिमलिघसिजम्यणिपणिभ्य इण्' (स० क० २.१.१६८) इति श्रीभोजदेवः। जमन्ति गच्छन्ति कर्माणि प्रति, अदन्त्याभिरन्नादीनि वा। जनेरेव वा बाहुलकान्नकारस्य मकारः, जाताः स्वकारणात्। 'तं सानावधि जामयः' (ऋ० ९.२६.५) इति निगमः॥

(१५) सनाभयः—'णह बन्धने' (दि० उभ० ५५) 'नहो भश्च' (उ०

---

१. 'कक्ष्यः' इत्यपपाठो मुद्रितेषु। २. 'अङ्गुलयस्तद्वन्तः' इत्यपपाठो मुद्रितेषु।
३. कक्ष्याः (अङ्गुलयः) इति शेषः। ४. 'बाहुलकादर्' इति मुद्रितेषु।
५. भगिन्यर्थे प्रोक्तो निगमः व्युत्पत्तिश्च (निरु० ११.३२)। (सु०)।
६. निघ० १.१२ उदकनामसु। (सु०)।

४.१२७) इति इञ्प्रत्ययो भोऽन्तादेशः। नह्यतेऽनया गर्भ इति नाभिः। समाना नाभिरासामिति सनाभयः। 'ज्योतिर्जनपद०' (अ० ६.३.८४) इत्यस्मात् समान-शब्दस्य[१] सभावः। समाना हि मातुर्नाभिस्तासाम्, समा नाभिः मूलमासामिति वा। 'सनाभयो वाजिनमूर्जयन्ति' (ऋ० ९.८९.४) इति निगमः॥

(१६) योक्त्राणि, (१७) योजनानि–'युजिर् योगे' (रु० उभ० ७)। 'दाम्नीशसयुयुजस्तुतुदसि०' (अ० ३.२.१८२) इति ष्ट्रन्प्रत्ययः पूर्वत्र। युच् बहुलम् (उ० २.७९) इति युच्। युञ्जन्ति पदार्थानाभिरिति, युक्ता वा हस्तेन, संयम्यन्ते आभिः केशादय[२] इति वा। शब्दस्वाभाव्यात् नपुंसकलिङ्गता। 'दशयोक्त्रेभ्यो दशयोजनेभ्यः' (ऋ० १०.९४.७) इति निगमः॥

(१८) धुरः–धूर्वतेर्वधकर्मणः (निघ० २.१९) कर्त्तरि क्विपि (अ० ३.२.१७७), 'राल्लोपः' (अ० ६.४.२१) इति वलोपे रेफस्य विसर्जनीयः, जसि धुरः। धूर्वन्ति[३] घ्नन्त्युपक्षयन्ति कर्माणीत्यर्थः। हिंसन्ति परानाभिरिति वा। धारयतेर्वा औणादिके क्विपि, बाहुलकाद् आकारस्य उकारः। अङ्गुल्या हि धार्य्यं सुवर्णादि धारयति। 'दश धुरो दश युक्ता वहद्भ्यः' (ऋ० १०.९४.७) इति निगमः॥

(१९) शाखाः–'अशू व्याप्तौ' (स्वा० आ० १८) अस्मात् खप्रत्यये प्रकृते[४] 'अश्नोतेर्डित्' (स० क० २.२.५१) इति श्रीभोजदेवेन खप्रत्यये खशब्दो[५] व्युत्पादितः। व्याप्तं हि सर्वम्। खशब्दाधिकरण उपपदे शेतेः 'अधिकरणे शेतेः' (अ० ३.२.१५) इति अच्प्रत्ययः। अङ्गुल्यो हि हस्ताग्रभागत्वात् स्वे आकाशे शेरते व्यवतिष्ठन्ते। आकाशस्यावकाशरूपत्वाद् उपपन्नं हि तत्र शयनम्। खशयाः सत्यः पृषोदरादित्वात् (अ० ६.३.१०९) यकारलोपेन शकाराकारयोः सवर्णदीर्घत्वे खशा इति भवति, ततोऽक्षरद्वयस्य स्थानविनिमयः, टाप्, शाखाः। शक्नोतेर्वा[६] पचाद्यचि (अ० ३.१.१३४) उपधादीर्घः, ककारस्य खकारश्च। शक्नुवन्ति हि ता अङ्गुल्यः पुस्तकादि धारयितुं कार्य्याणि कर्त्तुं वा। यद्वा 'शाखृ व्याप्तौ' (भ्वा० प० ८७) पचाद्यच् (अ० ३.१.१३४)। शाखन्ति व्याप्नुवन्ति कर्माणि। यद्वा 'शीङ् स्वप्ने' (अदा० आ० २५), अस्मात् 'वृक्षावयव आ च' (द० उ० ३.५६)[७] इति खप्रत्ययो बाहुलकाद् हस्तावयवेऽपि भवति। शेरतेऽवतिष्ठन्ते आसु नखादय

१. '०पदेऽन्यस्मात् सहशब्दस्य' इत्यपपाठो मुद्रितेषु।
२. 'क्लेशादयः' इत्यपपाठो मुद्रितेषु।
३. निरु ३.९। (सु०)।
४. 'विकृते' इत्यपपाठो मुद्रितेषु।
५. 'शाखशब्दः' इत्यपपाठो मुद्रितेषु।
६. निरु० १.४, ६.३२। (सु०)।
७. 'वृक्षावयवाच्च' इत्यपपाठो मुद्रितेषु।

इति शाखाः। 'श्यतेरिच्च वा' (स० क० २.२.४८) इति श्रीभोजदेवः, खप्रत्ययोऽधिकृतः, इकारादेशस्य विकल्पितत्वात् पक्षे शाखानिष्पत्त्या, शाखास्थानीयत्वाद्वा शाखा इष्यन्ते। तथा चामरसिंहः—'अङ्गुल्यः करशाखाः स्युः' (अमर० २.६.८२) इति।'हस्ताभ्यां दशशाखाभ्याम्' (ऋ० १०.१३७.७) इति निगमः॥

(२०) अभीशवः—व्याख्याता रश्मिनामसु (१.५.५)। अभ्यश्नुवते कर्माणि, अभीशते वा कर्माणि कर्तुम्। 'दशाभीशुभ्यो अर्चताजरेभ्यः' (ऋ० १०.९४.७) इति निगमः॥

(२१) दीधितयः—व्याख्याता रश्मिनामसु (१.५.६)। अङ्गुलीयकादिधारणाद् दीप्यन्ते। दीव्यन्ति क्रीडन्त्याभिरिति वा दीधीतेर्व्युत्पन्नो[1] दीधितिशब्दः। 'अग्निं नरो दीधितिभिररण्योः' (ऋ० ७.१.१) इति निगमः॥

(२२) गभस्तयः—व्याख्याता रश्मिनामसु (१.५.७)। गृह्णन्ति पदार्थानाभिः पुरुषा इति गभस्तयः। 'दीप्यते मधोरंशुषु गभस्तिभिः' इति निगमः[2]॥

'सुहस्त्याः' इति केचित्। एतस्य स्थाने 'सस्रुतः' इति च केचित् पठन्ति। ताश्च व्याख्याता नदीनामसु (१.१३.१९)। संसरन्ति सह गच्छन्ति कर्माणि प्रति, सङ्गता वा। स्पष्टनिगमदर्शनान्निर्णयः॥

इति द्वाविंशतिरङ्गुलिनामानि॥ ५॥

वश्मि (१)। उश्मसि (२)। वेति (३)। वेनति (४)। वेसति (५)। वाञ्छति (६)। वष्टि (७)। वनोति (८)। जुषते (९)। हर्यति (१०)। आ चके (११)। उशिक् (१२)। मन्यते (१३)। छन्त्सत् (१४)। चाकनत् (१५)। चकमानः (१६)। कनति (१७)। कानिषत् (१८)। इत्यष्टादश कान्तिकर्माणः॥ ६॥

'कान्तिकर्माणः' (निरु० ३.९) इच्छार्था धातवः[3]—

(१) वश्मि—'वश कान्तौ' अदादिः परस्मैपदी (७२)। लडुत्तमैकवचनम्। 'तदहं वश्मि पवमान सोम' (ऋ० ९.९६.४) इति

---

१. 'दधातेर्व्युत्पन्नः' इत्यपपाठो मुद्रितेषु। २. नोपलभ्यते वैदिकसाहित्ये। (सु०)।
३. द्र०—स्कन्दटीका (निरु० ३.९)।

निगमः॥

(२) उश्मसि–वशेर्लडुत्तमपुरुषबहुवचने मसि 'सार्वधातुकमपित्' (अ० १.२.४) इति ङिद्वद्भावात् 'ग्रहिज्या०' (अ० ६.१.१६) इत्यादिना सम्प्रसारणम्, 'इदन्तो मसिः' (अ० ७.१.४६) इति इकारः। 'ता वां वास्तून्युश्मसि गमध्यै' (ऋ० १.१५४.६) इति निगमः॥

(३) वेति[1]–'वी गतिव्याप्तिप्रजनकान्त्यसनखादनेषु' अदादिः परस्मैपदी (४१)। 'वेषि होत्रमुत पोत्रं यजत्र' (ऋ० १.७६.४) इति निगमः॥

(४) वेनति–नैरुक्तो धातुः। 'पुराणाँ अनु वेनति' (ऋ० १०.१३५.१), 'नासत्या मा वि वेनतम्' (ऋ० ५.७५.७) इति च निगमौ॥

(५) वेसति–अयमपि नैरुक्तो धातुः। 'वेशति' इति पाठान्तरम्। निगमदर्शनान्निर्णयः॥

(६) वाञ्छति–'वाछि इच्छायाम्' भौवादिकः (प० १२३)। 'विशस्त्वा सर्वा वाञ्छन्तु' (ऋ० १०.१७३.१) इति निगमः॥

(७) वष्टि–वशेः परस्मैपदप्रथमपुरुषैकवचनम्। 'समर्यो गा अजति यस्य वष्टि' (ऋ० १.३३.३) इति निगमः॥

(८) वनोति–'वनु धावने'[2] तनादिः (प० ८), अनेकार्थत्वाद्धातूनामत्र कान्त्यर्थः। एवमन्यत्रापि। 'स्पार्हं यद्रेक्णः परमं वनोषि तत्' (ऋ० १.३१.१४) इति निगमः॥

(९) जुषते–'जुषी प्रीतिसेवनयोः' तुदादिरात्मनेपदी (८), अत्र कान्तिकर्मा। 'स पुष्टिं याति जोषमा चिकित्वान्' (ऋ० १.७७.५) इति निगमः। 'जुषते हर्यति इति पाठात् जोषः कामः'[3] इति स्कन्दस्वामिभाष्यम्॥

(१०) हर्यति[4]–'हर्य गतिकान्त्योः' भूवादिः परस्मैपदी (३४४)। 'ता जुषाणो हर्यति जातवेदाः' (ऋ० ४.५८.८) इति निगमः॥

(११) आचके–'चक तृप्तौ' भूवादिरात्मनेपदी (७३), लडुत्तमपुरुषैकवचनम्। 'अनाम्योज आचके' (ऋ० ३.६२.५) इत्यत्र 'कमेर्लिटि उत्तम इटि मलोपश्छान्दसः'[5] इति भानुदत्तः। 'त्वामवस्युराचके'

---

१. निघ० २.१४ गतिकर्मसु। (सु०)। २. 'याचने' इति पाणिनीये धातुपाठे।

३. 'जुषते हर्यति इति कान्तिकर्मसु पाठाद् जोषशब्दोऽत्र कामवचनः' इति स्कन्दस्वामिभाष्यम् (ऋ० १.७७.५)।

४. हर्यतिः प्रेप्साकर्मार्थे–निरु० २.१०, ७.१७। निघ० २.१४ गतिकर्मार्थे। (सु०)।

५. मृग्यम्।

(ऋ० १.२५.१९) इति निगमः। 'यस्तै शत्रुत्वमाचके' (ऋ० ८.४५.५) इति तु 'लोपस्त आत्मनेपदेषु' (अ० ७.१.४१)। यथादृष्टं पाठः॥

(१२) उशिक्[१]–वष्टेः 'वशः कित्' (उ० २.७२) इति इजिप्रत्ययः, कित्त्वात् सम्प्रसारणम्। 'उशिक् पावको अरतिः सुमेधाः' (ऋ० १०.४५.७) इति निगमः॥

(१३) मन्यते–'मन ज्ञाने' दिवादिरात्मनेपदी (६५)। 'आध्रश्चिद्यं मन्यमानस्तुरश्चित्' (ऋ० ७.४१.२), 'यदि मन्येतोपमुस्यमित्योदनैः'[२] इति च निगमौ॥

(१४) छन्त्सत्–'छदि संवरणे' चुरादिः (४६)। पञ्चमलकारः, तिप्, 'लेटोऽडाटौ' (अ० ३.४.९४), 'सिब्बहुलं लेटि' (अ० ३.१.३४) 'इतश्च लोपः परस्मैपदेषु' (अ० ३.४.९७)। 'वृषा छन्दुर्भवति हर्यतः' (ऋ० १.५५.४) इत्यत्र मन्यते छन्त्सत् चाकनत् इति कान्तिकर्मसु पाठात्, 'तदिन्मे छन्त्सद् वपुषः' (ऋ० १०.३२.३) इति प्रयोगदर्शनाच्च 'छदिः कान्त्यर्थः'[३] इति स्कन्दस्वामिभाष्यम्[४]। 'दूरे चत्ताय च्छन्त्सत्' (ऋ० १.१३२.६) इति, 'अच्छान्त्सुः पञ्च कृष्टयः' (ऋ० १०.११९.६) इति च निगमौ॥

(१५) चाकनत्[५]–'कनी दीप्तिकान्तिगतिषु' (भ्वा० प० ३११) यङ्लुगन्तः। नुगतोऽनुनासिकान्तस्य (अ० ७.४.८५) न भवति व्यत्ययेन। पञ्चमलकारः, 'लेटोऽडाटौ' (अ० ३.४.९४) 'इतश्च लोपः परस्मैपदेषु' (अ० ३.४.९७)। 'ब्रह्मेदिन्द्रस्य चाकनत्' (ऋ० ८.३१.१), 'ये निः शचिष्ठ चाकनत्'[२] इति च निगमौ॥

(१६) चकमानः–'चक तृप्तौ' भूवादिरात्मनेपदी (७३)। 'ताच्छील्यवयोवचनशक्तिषु चानश्' (अ० ३.२.१२९)। 'चकमानः पिबतु दुग्धमंशुम्' (ऋ० ५.३६.१) इति निगमः॥

(१७) कनति[६]–'कनी दीप्तिकान्तिगतिषु' (भ्वा० प० ३११) भूवादिः परस्मैपदी। 'भानत् कनति नुदतम्'[२], 'इन्द्रः सोमस्य काणुका' (ऋ० ८.७७.४) इति च निगमौ।

(१८) कानिषत्–कनतेर्लेटि परस्मैपदप्रथमपुरुषैकवचने 'सिब्बहुलं

---

१. निघ० ३.१५ मेधाविनामसु। (सु०)। २. मृग्यम्।

३. स्वल्पपाठभेदेन स्कन्दस्वामिभाष्यम् (ऋ० १.५५.४)।

४. लौकिकसंस्कृते च कान्ते शोभने स्वाभिप्राये सम्प्रवर्तते छन्दः, स्वच्छन्दशब्दश्च। (सु०)।

५. निघ० ३.११ पश्यतिकर्मसु। (सु०)।

६. लौकिकसंस्कृते स्वर्णार्थके 'कनक'शब्दे जीवत्यसौ धातुः। (सु०)।

लेटि' (अ० ३.१.३४), इडागमः, उपधावृद्धिर्बाहुलकात्[१], इकारलोपः पूर्ववत्। 'अग्ने तृतीये सवने हि कानिषः' (ऋ० ३.२८.५) इति निगमः॥

इत्यष्टादश कान्तिकर्माणो धातवः॥६॥

अन्धः (१)। वाजः (२)। पयः (३)। प्रयः (४)। पृक्षः (५)। पितुः (६)। वयः (७)। सिनम् (८)। अवः (९)। क्षु (१०)। धासिः (११)। इरा (१२)। इळा (१३)। इषम् (१४)। ऊर्क् (१५)। रसः (१६)। स्वधा (१७)। अर्कः (१८)। क्षद्म (१९)। नेमः (२०)। ससम् (२१)। नमः (२२)। आयुः (२३)। सूनृता (२४)। ब्रह्म (२५)। वर्चः (२६)। कीलालम् (२७)। यशः (२८)। इत्यष्टाविंशतिरन्ननामानि॥७॥

(१) अन्धः[२]–'अन्ध इत्यन्ननाम। आध्यानीयं भवति' (निरु० ५.१) इति भाष्यम्। 'आभिमुख्येन हि ध्यातव्यं सर्वेणान्नं प्रीतेः शरीरस्थितेश्च तदायत्तत्वात्'[३] इति स्कन्दस्वामी। आङ्पूर्वात् ध्यायतेरसुनि बाहुलकात् यकाराकारयोर्लोपः, उपसर्गस्य ह्रस्वत्वं नुडागमश्च धातोः। यद्वा 'अद भक्षणे' (अदा० प० १) इत्यस्मात् 'अदेर्नुम् धश्च' (उ० ४.२०७) इति कर्मणि कर्त्तरि वा कारके असुनि नुमागमो धकारश्चान्तादेशः। अद्यते प्राणिभिः, तान् वा स्वयमत्ति। तथा च श्रुतिः–'अद्यतेऽत्ति च भूतानि' (तै० उ० २.२) इति। 'अनित्यनेनान्धः' (अमर० २.९.४८ अ० उ०) इति क्षीरस्वामी। अनितेरसुनि बाहुलकाद् धुगागमः। अनित्यन्नं हि प्राणनम्[४]। 'आमत्रेभिः सिञ्चता मद्यमन्धः' (ऋ० २.१४.१), 'इन्द्रेहि मत्स्यन्धसः' (ऋ० १.९.१) इति च निगमौ॥

(२) वाजः[५]–'वज गतौ' (भ्वा० प० १५४)। 'अकर्त्तरि च कारके सञ्ज्ञायाम्' (अ० ३.३.१९) इति घञ्। 'अजिव्रज्योश्च' (अ० ७.३.६०) इति चकारस्यानुक्तसमुच्चयार्थत्वात् कुत्वाभावः। तथा च तत्र न्यासकारः–

---

१. 'सिब्बहुलं छन्दसि णित्' (३.१.३४ महाभाष्य-वा०)।

२. अनुमन्त्रं व्याख्यायतेऽसौ शब्दः–निरु० ५.१। (सु०)।

३. स्कन्दटीका (निरु० ५.१)।

४. तु०–श० ब्रा० २.२.१.६।

५. निघ० २.१७ संग्रामनामसु। निरु० १०.३३ अन्नार्थे मन्त्रः, निरु० १०.२६ अपि। (सु०)।

'चकारस्यानुक्तसमुच्चयार्थत्वाद्व्रजेरपि कुत्वप्रतिषेधः सिद्धो भवति वाजः'[१] इति। निगम्यते अभिगम्यते हि तत्सर्वैः। गच्छत्यनेनादत्तेन सुखानि, भुक्तेन तृप्तिं वा। गच्छत्यनेन शुद्धेन सत्त्वशुद्धिं भोक्ता। यदाहुः–'आहारशुद्धौ सत्त्वशुद्धिः' (छा०उ० ७.२६.२) इति। यद्वा गत्यर्था बुद्ध्यर्थाः, जानात्यनेन भुक्तेन धर्मम्।

'दश धर्मान् न जानन्ति धृतराष्ट्र निबोध तान्।
मत्तः प्रमत्त उन्मत्तः श्रान्तः क्रुद्धो बुभुक्षितः॥'

इति श्रीमहाभारतम्[२]।

सर्वत्रान्ननामसु गत्यर्थाद् व्युत्पादितेष्वेवमर्थो बोद्धव्यः। 'सुतानां वाजिनीवसू' (ऋ० १.२.५), अन्यत्र 'वाजं हवनस्यदं रथम्' (ऋ० १.५२.१) इति च निगमौ[३]॥

(३) पयः–व्याख्यातं रात्रिनामसु[४] पय इत्यत्र (निघ० १.५.२१, निरु० २.५)। यद्वा 'अय पय गतौ' (भ्वा० आ० ३२०) इत्यस्मादसुन्। पीयते ह्यन्नम्। तद्धि चतुर्विधं पेयचोष्यलेह्यचर्व्यभेदेन। वर्द्धन्ते हि तेन भुक्तेन। 'जातान्यन्नेन वर्द्धन्ते' (तै० उ० २.२) इति श्रुतिः। 'पयस्वानग्न आगहि' (ऋ० १.२३.२३), 'यदीं मृतस्य पयसा पियानः' (ऋ० १.७९.३) इति च निगमः॥

(४) प्रयः–व्याख्यातमुदकनामसु (१.१२.३७) 'उपप्रयोभिरागतम्' (ऋ० १.२.४), 'प्रयो न हर्मि स्तोमं माहिनाय' (ऋ० १.६१.१), 'प्रयस्वन्तः प्रति हर्यामसि त्वा' (ऋ० १०.११६.८) इति च निगमाः॥

(४) श्रवः–'श्रु श्रवणे' (भ्वा० प० ६७५)। कर्मण्यसुन्। श्रूयते ह्यन्नं वर्ण्यमानं श्रवो यशः[५]। तद्धर्मात्ताच्छब्द्यं वा। 'सत्यश्चित्रश्रवस्तमः' (ऋ० १.१.५) 'मर्तं दधासि श्रवसे दिवे दिवे' (ऋ० १.३१.७), 'अभिश्रव ऋज्यन्तः' (ऋ० ६.३७.३) इति च निगमाः। 'उप प्रयोभिरागतम्' (ऋ० १.२.४) इत्यादिषु निरुक्तटीकायां स्कन्दस्वामिना प्रय इत्यन्ननामेत्युच्यते[६]। तथा च 'अक्षिति श्रवः' (ऋ० १.४०.४) इत्यादिनिगमेषु वेदभाष्ये 'श्रव इत्यन्ननाम'[७] इति स्पष्टमुच्यते। निरुक्तटीकायान्तूभयथा (निरु० १०.३)।

---

१. न्यासे (अ० ७.३.६०) स्वल्पपाठान्तरम्। २. मृग्यम्।
३. वाजपेयनाम्नि यज्ञे पेयशब्देन सामानाधिकरण्यात् स्पष्टमसावन्नार्थकः। प्राकृतभाषासु 'वाजपेयी' शब्दे दीर्घं प्राणित्यसौ शब्दः। (सु०)।
४. निघ० १.१२ उदकनामस्वपि। (सु०)।
५. निरु० ४.२४ अस्मिन्नर्थे मन्त्रपूर्वकम्। निरु० ९.११ अपि प्रशंसार्थे। निरु० ११.१० अपि यशोऽर्थे। उच्चैःश्रवसादिशब्देषु च प्रशस्तख्यात्यर्थे सम्प्रवर्तते 'श्रवस्'शब्दः। (सु०)। ६. स्कन्दटीका (निरु० १.५)।
७. स्कन्दस्वामिभाष्यम् (ऋ० १.१.५, १.४०.४)।

अतः प्रयःश्रवःशब्दयोः उभयोरप्यन्ननामत्वं स्पष्टम्। तत्रैकतमस्य पाठो विद्वद्भिर्निर्णीयताम्॥

(५) पृक्षः–'पृची सम्पर्के' (रु० प० २४)। औणादिके क्विपि धातोः सुगागमः[१]। सम्पृक्तं हि तज् ज्ञातृभिः। पृञ्चतिर्दानार्थः[२] इति वा। 'वायो तव प्र पृञ्चती' (ऋ० १.२.३) इत्यादौ माधवेनोक्तम्[३]। तत्र क्विपि बाहुलकान्नलोपः। दीयते ह्यन्नमर्थिभ्यः। 'त्रिः पृक्षो अस्मे अक्षरेव पिन्वतम्' (ऋ० १.३४.४) इत्यत्र स्कन्दस्वामिभाष्यम् 'पृक्ष अन्ननामैतत् पठन्ति। 'पृक्षो भरन्त वाम्' (ऋ० ५.७३.८) इत्यादिषु बहुवचनान्तस्य सामानाधिकरण्यदर्शनाद् बहुवचनान्तं द्रष्टव्यम्'[४] इति। 'अग्निं विश्वा अभि पृक्षः सचन्ते' (ऋ० १.७१.७), 'पृक्षो वहतमश्विना' (ऋ० १.४७.६) इति च निगमौ। 'त्वं शर्द्धो मारुतं पृक्ष ईशिषे' (ऋ० २.१.६) इत्यादौ तु षष्ठ्येकवचनान्तमपि दृश्यते॥

(६) पितुः[५]–'पा रक्षणे' (अदा० प० ४९)। 'कमिमनिजनिगाभा-पायाहिभ्यश्च' (द०उ० १.७३) इति तुप्रत्ययो बाहुलकादिकारः। रक्षितव्यं ह्यन्नम्। प्यायतेर्बाहुलकात् तुप्रत्ययो धातोः पिभावश्च। 'पितुं नु स्तोषम्' (ऋ० १.१८७.१), 'प्रमन्दिने पितुमदर्चता वचः' (ऋ० १.१०१.१) इति निगमौ॥

(७) वयः[६]–'वी गतिव्याप्तिप्रजनकान्त्यसनखादनेषु' (अदा० प० ४१)। असुन्। गत्यादिसर्वोऽप्यर्थोऽत्रानुगुणः कारकभेदेन। 'वय गतौ' (भ्वा० आ० ३२०) इत्यस्मादसुन् वा। 'बृहदस्मै वय इन्द्रो दधाति' (ऋ० १.१२५.२), 'परि ग्रंसमोमना वां वयो गात्' (ऋ० ७.६९.४) इति च निगमौ॥

केचिदस्य स्थाने 'सुतः' इति पठन्ति। तत्र 'षूङ्[७] प्राणिप्रसवे' (दिवा० आ० २२)। 'तातव्रातलातसुत०' (स० क० २.२.१३४) इत्यादिना क्तप्रत्ययः षूङो[७] ह्रस्वत्वञ्च निपात्यते। सूयते वृष्ट्या। 'आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः' (मनु० ३.७६) इति हि स्मृतिः। यद्वा 'सु षु गतौ'[८] इत्येतद्विषयं निपातनम्। निगमोऽन्वेषणीयः॥

(८) सिनम्[९]–'षिञ् बन्धने' (क्र्या० उभ० ५)। 'इणसिञ्दीङुष्यविभ्यो नक्' (उ० ३.२)। 'सिनाति भूतानि' (निरु० ५.५) इति भाष्यम्। 'सिनाति

---

१. 'कुगागमः' इत्यपपाठो मुद्रितेषु।
२. पाणिनीये धातुपाठे न संगृह्यते।
३. मृग्यम्।
४. द्र०–स्कन्दस्वामिभाष्यम् (ऋ० १.३४.४)।
५. व्याख्यायतेऽसौ शब्दः, मन्त्रव्युत्पत्तिपूर्वकम् (निरु० ९.२५)। (सु०)।
६. निरु० ६.४। (सु०)।
७. 'षूञ्' इत्यपपाठो मुद्रितेषु।
८. पाणिनीये धातुपाठे न दृश्यते।
९. निरु० ५.५। सिनीवालीशब्दोऽप्यनेन सिनशब्देन व्याख्यायते निरुक्ते ११.३२। (सु०)।

बध्नाति क्षुधा विनश्यन्ति भूतानि धारयति'[१] इति स्कन्दस्वामी। सीयते अनेनेति वा। अन्नेन हि भृत्यादयो बध्यन्ते। 'येन स्मा सिनं भरथः सखिभ्यः' (ऋ० ३.६२.१) इति निगमः॥

(९) अवः[२]–'अव रक्षणगति-[कान्ति]-प्रीतितृप्त्यवगमप्रवेशश्रवण-स्वाम्यर्थयाचनक्रियेच्छादीप्त्यवाप्त्यालिङ्गनहिंसादानभागवृद्धिषु' (भ्वा० प० ३९६)। असुन्। धात्वर्थेषु योगः सर्वाङ्गीकर्त्तव्यः। 'श्रवद् ब्रह्मण्यवसागमत्' (शां० श्रौ० सू० ८.१६.१), 'अग्निर्गिरोऽवसा वेतु धीतिम्' (ऋ० १.७७.४) इति निगमौ॥

(१०) क्षु–'टुक्षु शब्दे' (अदा० प० २९)–'क्षि निवासगत्योः' (तु० प० ११६)। '०खनिशृभ्यां डिच्च' (उ० १.३३) इति विधीयमानो डित्कुप्रत्ययो बाहुलकादाभ्यामपि भवति। क्षूयते शब्द्यते स्तोतृभिः स्तूयते देवतात्वादन्नं सूक्तादिभिः, गुणवत्तया वा लोकैः, निवसत्यनेन वा। 'त्वं वाजस्य क्षुमतो राय ईशिषे' (ऋ० २.१.१०), 'आ तू न इन्द्र क्षुमन्तम्' (ऋ० ८.८१.१) इति च निगमौ॥

(११) धासि–'प्लुषिकुषिशुषिभ्यः क्सिः' (उ० ३.१५५) इति बाहुलकाद् धाञोऽपि भवति, बाहुलकादेव ईत्वं न भवति। दीयतेऽर्थिभ्यो, धारयति प्राणान् वा। 'विदत् सरमा तनयाय धासिम्' (ऋ० १.६२.३) अत्र 'धासिरन्ननाम इह तु पयआद्यन्नकारणत्वाद् गोषु प्रयुक्तः'[३] इति स्कन्दस्वामी॥

(१२) इरा–व्याख्यातं नदीनामसु (१.१३.२५)॥

(१३) इळा–ईड्यते, दीप्यते भुक्तेन जाठरोऽग्निः, क्षिप्यत उदरे, स्वपित्यनेन भुक्तेन, न हि बुभुक्षितस्य निद्रास्ति[४]। 'तस्मा इळां सुवीरामा यजामहे' (ऋ० १.४०.४) इति निगमः॥

(१४) इषम्[५]–'इषु इच्छायाम्' (तु० प० ६१)। औणादिकः क्विप्। इष्यत इति। यद्वा 'इष गतौ' (दि० प० १९) क्विप्। वेदे प्राचुर्य्येण दर्शनाद् द्वितीयैकवचनान्तम्। 'इषं स्तोतृभ्य आभर' (ऋ० ५.६.१), 'अश्विना यज्वरीरिषः' (ऋ० १.३.१) इति च निगमौ॥

---

१. स्कन्दटीका (निरु० ११.३१) पाठान्तरेण।

२. अवसशब्दोऽकारान्तोऽपि पथ्यदनार्थे (निरु० १.१७)। (सु०)।

३. स्कन्दस्वामिभाष्ये (ऋ० १.६२.३) स्वल्पपाठान्तरम्।

४. निघ० १.१.१५ निर्वचनानि द्रष्टव्यानि।

५. निरु० ६.२६। (सु०)।

(१५) ऊर्क्[१]–'ऊर्गित्यन्ननाम। ऊर्जयतीति सतः, पक्वं सुप्रवृक्णमिति वा' (निरु० ३.८) इति भाष्यम्। 'ऊर्जयति प्रबलयति प्राणयति बलवन्तं प्राणवन्तं वा करोतीत्यर्थः। पक्वमिति वा पक्वशब्दस्य पकारलोपं कृत्वा क्वशब्दं व्यत्यस्य वकारस्योठि कृते रुगागमे चोर्गिति भवति। सुप्रवृक्णमिति वा व्रश्चे रशब्दलोपे कृते, संयोगादिलोपे कृते, वकारस्योठि रुकि कुत्वे च कृते ऊर्गिति भवति। सुच्छेदं हि तद्भवति मृदुत्वात्'[२] इति स्कन्दस्वामिग्रन्थः। ....'ऊर्ज्यते प्राण्यते जीव्यतेऽनया'[३] इति भट्टभास्करमिश्रः। अत्र 'ऊर्ज बलप्राणनयोः' (चु० प० १७) इत्यस्मादेव करणे क्विप्। 'यंसि त्मनूमूर्जं न विश्वध क्षरध्यै' (ऋ० १.६३.८) इति निगमः॥

(१६) रसः–व्याख्यातमुदकनामसु (१.१२.३५)। 'महे यत् पित्र ईं रसं दिवे कः' (ऋ० १.७१.५) इति निगमः॥

(१७) स्वधा[४]–स्वशब्द उपपदे दधातेः (जु० उभ० १०) 'गेहे कः' (अ० ३.१.१४४) इति कप्रत्ययो[५] बाहुलकाद् भवति। स्वेभ्यो दीयते, स्वस्मिन् धीयते वा, स्वेन धनेन धीयते वा। 'विश्वा हि माया अवसि स्वधावः' (ऋ० ६.५८.१), 'आदह स्वधामनु' (ऋ० १.६.४) इति च निगमौ॥

(१८) अर्कः[६]॥ **(१९) क्षद्म**–व्याख्यातमुदकनामसु (१.१२.३)। क्षुन्निवर्त्तनादिके स्वकार्य्ये स्थिरं भवति, स्थिरो भवत्यनेन भोक्तेति वा, 'अहमन्नमन्नमदन्तमद्मि' (तै० उप० ३.१०.६) इति श्रुतिः। माधवपक्षे[३] क्षदिरशनार्थः (सौ०), अश्यते बुभुक्षितैः। 'स्वादुक्षद्मा यो वसतौ स्योनकृत्' (ऋ० १.३१.१५) इति निगमः॥

(२०) नेमः–'णीञ् प्रापणे' (भ्वा० उभ० ६४२)। 'अर्त्तिस्तुसुहुसृधृक्षिक्षुभायावापदियक्षिनीभ्यो मन्' (उ० १.१४०)। नमयति सुगतिं दातारम्, नीयते देहयात्रा अनेनेति वा॥

'नेमा' इति नकारान्तं केचित् पठन्ति। तदा बाहुलकादभिधानलक्षणाद् वा नकारस्येत्सञ्ज्ञाया अभावः[७]। एवमेवास्मिन् सूत्रे वृत्तिकारेणोक्तम्। यद्वा

---

१. निरु० ९.४३। (सु०)। २. स्कन्दस्वामिटीकाम् (निरु० ३.८) अनुसृत्य शोधितः पाठः।

३. मृग्यम्।

४. निघ० १.१२ उदकनामसु, ३.३० द्यावापृथिवीनामसु। (सु०)।

५. पूर्वम् उदकनामसु (१.१२.९७) 'आतोऽनुपसर्गे कः' (अ० ३.२.३) इति कः प्रत्ययो निर्दिष्टः।

६. निघ० २.२० वज्रनामसु। निरु० ५.४ अन्नार्थे व्याख्यातः। (सु०)।

७. स्वल्पपाठभेदेनात्र माणिक्यदेवीया दशपाद्युणादिवृत्तिः (द० उ० ७.२६) निर्दिष्टा।

मनिनि रूपसिद्धिः। निगमदर्शनान्निर्णयः।

(२१) ससम्[१]–'सस स्वप्ने' (अदा० प० ७१)। 'पुंसि सञ्ज्ञायां घः प्रायेण' (अ० ३.३.११८)। स्वपन्त्यनेन भुक्तेन, न हि क्षुधितस्यातिनिद्रास्ति। 'ससेन चिद्विमदायावहो वसु' (ऋ० १.५१.३) इति निगमः॥

(२२) नमः–'णम प्रह्वत्वे०' (भ्वा० प० ७०८)। असुन्। उपनतं जातमात्रेभ्यो भूतेभ्यः पूर्वजन्मकृतकर्मवशात्, नम्यते देवतात्वात्, नमन्त्यनेन हेतुना तद्वन्तः, प्रयोजनस्य च हेतुत्वेन विवक्षा। 'प्र वो महे महि नमो भरध्वम्' (ऋ० १.६२.२), 'एना वो अग्निं नमसा' (ऋ० ७.१६.१) इति च निगमौ॥

(२३) आयुः[२]–अननं प्राणनमस्ति[३]। 'पाहि सदमिद् विश्वायुः' (ऋ० १.२७.३) इति निगमः॥

(२४) सूनृता–व्याख्यातमुषोनामसु (१.८.१४)। सुष्ठु नयन्ति क्षुत्प्रयुक्तान्, अर्थ्यते वा तदर्थिभिः। यद्वा शोभना नरः सुनरः 'अन्येषामपि दृश्यते' (अ० ६.३.१३६) इति दीर्घः, सूनृषु तायते विस्तीर्य्यते पुण्येन, 'अन्येषामपि दृश्यते' (अ० ६.३.१३६) इति दीर्घः[४]। वा टाप्। 'पुरुणीथे जरते सूनृतावान्' (ऋ० १.५९.७), 'अश्विना सूनृतावती' (ऋ० १.२२.३) इति च निगमौ॥

(२५) ब्रह्म–'दृहि बृहि वृद्धौ' (भ्वा० प० ४८८) 'बृंहे रम् नलोपश्च' (श्वेत० ५८२)[५] इति मनिन्। परिवृढं भवति सर्वप्राणिभिः सर्वदा भुज्यमानमप्यनुपक्षीयमाणत्वात्, स्वभावतो वा परिवृद्धं सर्वस्य जगतो भरणात्, वर्द्धन्तेऽनेन भूतानीति वा। 'जातान्यन्नेन वर्द्धन्ते' (तै० उ० २.२) इति श्रुतिः। 'उप ब्रह्माणि वाघतः' (ऋ० १.३.५) इति च निगमः॥

(२६) वर्चः–'वर्च दीप्तौ' (भ्वा० आ० ९६)। असुन्। दीप्तिकरं ह्यन्नं शरीरादेः। 'तं मा संसृज वर्चसा' (ऋ० १.२३.२३), 'सं माग्ने वर्चसा सृज' (ऋ० १.२३.२४), 'आयुषा सह वर्चसा' (ऋ० १०.८५.३९) इति निगमाः॥

(२७) कीलालम्[६]–'कल गतौ' (प० २९०) चौरादिकः, 'कील

---

१. निरु० ५.३। (सु०)। २. निरु० १०.३५। (सु०)।

३. सन्दिग्धम् इदं निर्वचनम्। अयनं प्राणयापनमनेनास्तीत्यभिप्रायः स्यात् ?

४. इदमपि सन्दिग्धम्। ५. 'बृंहेर्नोऽच्च' (उ० ४.१४७)।

६. वैदिकयुगे शब्दोऽयमैकान्तिकरूपेणान्नरसमध्वाद्यर्थं ब्रवीति। यथा–'अन्नस्य कीलालः' (मा०सं० ३.४३)। परवर्तिसंस्कृते तु कीलालशब्दो जलार्थे रुधिरार्थे च भुवि परिवृढः। अत एव 'शोणितेऽम्भसि कीलालम्।' इति ३.३.२०० मध्ये अमरः। (सु०)।

बन्धने' (भ्वा० प० ३५१) 'कील खण्डने'[१]। कील बन्धन इति व्युत्पत्तौ सिनवदर्थः। कील खण्डन इति तु सुच्छेदमित्यर्थः। अपि वा कीला जाठराग्नेर्ज्वाला, तां लाति 'कर्मण्यण्' (अ० ३.२.१)। 'कीलालपे सोमपृष्ठाय वेधसे' (ऋ० १०.९१.१४) इति निगमः॥

(२८) **यशः**–व्याख्यातमुदकनामसु (१.१२.५५)। यशो यशेर्दीप्त्यर्थात्[२]। कीर्त्तिकरं वेति माधवः[३]। तदा वर्चस्वदर्थः। 'यशो न पक्वं मधु गोष्वन्तरा' (ऋ० १०.१०६.११), 'तुविद्युम्न यशस्वता' (ऋ० ३.१६.६) इति निगमौ॥

इत्यष्टाविंशतिरन्ननामानि॥ ७॥

आवयति (१)। भर्वति (२)। बभस्ति (३)। वेति (४)। वेवेष्टि (५)। अविष्यन् (६)। बप्सति (७)। भसथः (८)। बब्धाम् (९)। ह्वरति (१०)। इति दशात्तिकर्माणः॥ ८॥

(१) **आवयति**–आङ्पूर्वात् वेतेः (अदा० प० ४१) 'बहुलं छन्दसि' (अ० २.४.७३) इति शपो लुगभावः। यद्वा 'वेञ् तन्तुसन्ताने' (उभ० ७३२) भूवादिः, अनेकार्थत्वात् धातूनामत्रात्तिकर्मत्वम्। एवमन्येष्वपि द्रष्टव्यम्। 'आ तु नः स वयति गव्यमश्व्यम्' (ऋ० ८.२१.१०) इति निगमः॥

(२) **भर्वति**–'भर्व हिंसायाम्' भूवादिः परस्मैपदी (३८७)। 'पृथून्यग्रिरनुयाति भर्वन्' (ऋ० ६.६.२), 'तेन सूभर्वं शतवत् सहस्रम्' (ऋ० १०.१०२.५) इति निगमौ॥

(३) **बभस्ति**–'भस भर्त्सनदीप्त्योः'[४] जुहोत्यादिः परस्मैपदी (१७)। 'हरी इवान्धांसि बप्सता' (ऋ० १.२८.७) इति निगमः॥

(४) **वेति**[५]–वी गत्यादौ अदादिः परस्मैपदी (४१)। 'वीतं पातं पयस उस्रियायाः' (ऋ० १.१५३.४) इति निगमः॥

---

१. पाणिनीये धातुपाठे न संगृह्यते।
२. अशेर्व्याप्त्यर्थात् ?
३. मृग्यम्।
४. अत्र हि विरुद्धार्थका अनेके धातवस्सांकर्यं भजन्ते। भसधातुरनुनिघण्टुं भक्षणार्थे। भस भक्षणदीप्त्योः इति सायणेन ऋ० १२.८.७ मध्ये प्रोक्तमपि। भर्त्सनार्थे तु भष्धातुः। भाष्धातोः ह्रसितं रूपम्। दीप्त्यर्थे तु भास्धातुः। (सु०)।
५. 'वेवेष्टि-वेति' इति व्याख्याक्रमः मुद्रितेषु।

(५) वेवेष्टि–'विष्लृ व्याप्तौ'[१] (जु० उभ० १३)। 'जुहोत्यादिभ्यः श्लुः' (अ० २.४.७५)। 'स्वतैदयोयथातिथि ज्योतिष्कृत्या परिवेवेष्टि', 'यदा त्वा अतिथयः परिवेष्टि', 'मरुतः परिवेष्टारः' इति च निगमाः। प्रयोजकव्यापारे प्रयुक्तत्वात् निरूपणीयम्॥

(६) अविष्यन्–अवतेर्वर्त्तमाने व्यत्ययेन लृट्, 'लृटः सद्वा' (अ० ३.३.१४)। 'तृष्वविष्यन्नतसेषु तिष्ठति' (ऋ० १.५८.२) इति निगमः। अत्र च 'अविष्यन्नत्तिकर्मा भक्षयन्नित्यर्थः'[२] इति स्कन्दस्वामी। तस्मादविष्ठादिति पाठो न युक्तः॥

(७) बप्सति–भसेः [लटि] प्रथमपुरुषे बहुवचने 'घसिभसोर्हलि च' (अ० ६.४.१००) इत्युपधालोपे रूपम्। 'दद्भिर्वनानि बप्सति' (ऋ० ८.४३.३) इति निगमः॥

(८) भसथः[३]–भसेर्लटि थसि 'बहुलं छन्दसि' (अ० २.४.७६) इति शपः श्लुर्न भवति। 'न दैवा भसथश्चन' (ऋ० ६.५९.४) इति निगमः॥

(९) बब्धाम्–भसेर्लोटि तसस्तामि श्लौ द्विर्वचनत्वानित्यत्वात्[४] उपधालोपः प्राप्नोति छान्दसत्वान्न, 'घसिभसोर्हलि च' (अ० ६.४.१००) इत्युपधालोपः। 'धि च' (अ० ८.२.२५) इत्यादिसूत्रेषु सिचो लोप इति पक्षे सकारलोपश्छान्दसः, सकारमात्रलोप इति पक्षे 'झलो झलि' (अ० ८.२.२६) इति सलोपः, भश्त्वजश्त्वे। बब्धामिति पृथक्पाठे प्रयोजनं मृग्यम्। 'बब्धां ते हरीधानाः'[५] इति निगमः॥

(१०) ह्वरति–'ह्वृ कौटिल्ये' भूवादिः परस्मैपदी (६६५)। 'अपामतिष्ठद्धरुणह्वरन्तमः' (ऋ० १.५४.१०), 'उप ह्वरे यदुपरा अपिन्वन्' (ऋ० १.६२.६) इति निगमौ॥

इति दशात्तिकर्माणः॥ ८॥

---

१. वेदे भक्षणार्थे प्रसिद्धोऽप्ययं धातुः लौकिकसंस्कृते केवलं व्याप्त्यर्थे प्रयुज्यते। परं णिजन्तविष्धातोः 'परिवेषयति' इत्यादिप्रयोगा लौकिकसंस्कृतेऽपि भक्षणार्थे प्रसिद्धाः। अस्मादेव शब्दात् प्राकृतभाषासु 'परोसना' इत्यादिशब्दा विनिःसृताः। (सु०)।

२. स्कन्दस्वामिभाष्यम् (ऋ० १.५८.२) नोपलभ्यते।

३. लौकिकसंस्कृते भस्धातुः 'भस्म' शब्दे जीवति। यद्धि भक्षितं निगीर्णं रूपान्तरितम् अतएव भसितं तदेव भस्म। भस्त्राशब्दोऽप्येवम्। यद्धि भसनं भक्षणं वा निर्मिमीते अतएव त्रायते। (सु०)।

४. 'द्विर्वचनान्तत्वानित्यत्वात्' इत्यपपाठो मुद्रितेषु।

५. नोपलभ्यते क्वापि वेदे तच्छाखासु च। ऋते निरुक्तात् ५.१२। (सु०)।

ओजः (१)। वाजः (वा) पाजः (२)। शवः (३)। तरः (४)। तवः (५)। त्वक्षः (६)। शर्द्धः (७)। बाधः (८)। नृम्णम् (९)। तविषी (१०)। शुष्मम् (११)। शुष्णम् (१२)। शूषम् (१३)। दक्षः (१४)। वीळु (१५)। च्यौत्नम् (१६)। सहः (१७)। यहः (१८)। वधः (१९)। वर्गः (२०)। वृजनम् (२१)। वृक् (२२)। मज्मना (२३)। पौंस्यानि (२४)। धर्णसिः (२५)। द्रविणम् (२६)। स्यन्द्रासः (२७)। शम्बरम् (२८)। इत्यष्टाविंशतिर्बल-नामानि॥ ९ ॥

(१) **ओजः**–व्याख्यातमुदकनामसु (१.१२.४३)। उब्जन्त्यनेन, बलवत्सन्निधौ हि ऋजवो भवन्ति भीत्या, न्यग्भावयत्यनेन वा शत्रून्। वर्द्धतेऽनेन ऐश्वर्य्यादि, वर्द्धते व्यायामादिना। इमावर्थान्तरावपि वृद्ध्यर्थेषु बोद्धव्यौ। 'उर्वधिकम्'[१] इति माधवः। हिंस्यन्तेऽनेन शत्रवो वा[२]। 'उषेर्जश्च' (स० क० २.१.३२५)[३] इति श्रीभोजदेवः। असुनि गुणः। ओषति दहति शत्रून्। 'ओजसो जातमुत मन्य एनम्' (ऋ० १०.७३.१०), 'वसूनि जाते जनमान ओजसा' (ऋ० ८.९९.३) इति निगमौ॥

(२) **वाजः**–व्याख्यातमन्ननामसु (२.७.२)। गच्छन्त्यनेन शत्रून् प्रति जिगीषवः। गम्यतेऽधिगम्यते व्यायामादिना यत्तेन। इमावर्थावुत्तरत्रापि गत्यर्थेषु बोद्धव्यौ। 'वाजो बलम्, वाजयतेः प्रेरणार्थात्'[१] इति माधवः। अनेन शत्रून् प्रेरयति विद्रावयतीति। 'परिवाजेषु भूषथः' (ऋ० ३.१२.९) इति निगमः॥

पाजः[४]–'पा रक्षणे' (अदा० प० ४९)। 'पातेर्बले जुट् च' (उ० ४.२०४)[५] इत्यसुन्। बलेन हिंस्यते सर्वम्। 'कृणुष्व पाजः प्रसितिं न पृथ्वीम्' (ऋ० ४.४.१) इति निगमः। 'समिद्धस्य रुशदददर्शि पाजः' (ऋ० ५.१.२) इत्यत्र स्कन्दस्वामिना 'पाजो बलम्'[६] इत्येतावदेवोक्तं न तु बलनामेति। वाजशब्दे तु 'परिवाजेषु भूषथः' (ऋ० ३.१२.९) इत्यत्र बलनामैतदित्युक्तम्[७],

---

१. मृग्यम्। २. ऊर्वति हिंसार्थस्य ? ३. 'उषेर्जुट् च' इति मुद्रितेषु।
४. पाजः पालनात्–अनुमन्त्रं व्याख्यायते –निरु० ६.१२। (सु०)।
५. 'पातेर्जुट् च' इति कोशेषु। ६. 'अपठितमपि बलनाम' इत्युभयत्र स्कन्दभाष्ये।
७. स्कन्दटीका (निरु० ६.१३)।

'अत्यं न मिहे वि नयन्ति वाजिनम्' (ऋ० १.६४.६) इत्यत्र 'अत्यं न वाजं हवनस्यदं रथम्' (ऋ० १.५२.१) इत्यादौ च ऋग्भाष्ये वाजशब्दोपरि 'अपि बलनाम'[1] इत्युच्यते। अतो वाजपाजशब्दयोरुभयोरपि बलनामत्वं स्पष्टम्, तत्रैकतमस्य पाठो विद्वद्भिरधीयताम्॥

(३) शवः—व्याख्यातमुदकनामसु (१.१२.४१) 'मा भेम शवसस्पते' (ऋ० १.११.२) इति निगमः॥

(४) तरः—'तॄ प्लवनसंतरणयोः' (भ्वा० प० ६९६)। असुन्। तरत्यनेन आपदम्। 'यावत्तरो मघवन् यावदोजः' (ऋ० १.३३.१२) इति निगमः॥

(५) तवः—तवतिर्वधार्थः,[2] असुन्। 'अपादमिन्द्र तवसा जघन्थ' (ऋ० ३.३०.८), 'योगेयोगे तवस्तरम्' (ऋ० १.३०.७) इति च निगमौ॥

(६) त्वक्षः—'तक्षू त्वक्षू तनूकरणे' (भ्वा० प० ४३८)। असुन्। तनूक्रियन्ते तेन शत्रवः। 'स प्र रिक्वा त्वक्षसा क्ष्मो दिवश्च' (ऋ० १.१००.१५) इति निगमः॥

(७) शर्द्धः—'शर्द्धतिरुत्साहार्थः'[3] इति स्कन्दस्वामी, असुन्। शत्रुजयादावनेन उत्साहितत्वात्। 'अभ्राजि शर्द्धो मरुतो यदर्णसम्' (ऋ० ५.५४.६) इति निगमः॥

(८) बाधः—'बाधृ विलोडने' (भ्वा० आ० ५) 'अकर्त्तरि च कारके सञ्ज्ञायाम्' (अ० ३.३.१९) इति घञ्। बाध्यन्तेऽनेन शत्रवः। निगमोऽन्वेषणीयः॥

(९) नृम्णम्—'नृम्णं नॄन् नतम्' (निरु० ११.९) इति भाष्यम्। 'नॄन् शत्रुभूतान् प्रति नमति, [अन्तर्णीत]-ण्यर्थो वा नमिः, नमयति प्रह्वीकरोति'[4] इति स्कन्दस्वामी। 'इन्द्र नृम्णं हि ते शवः' (ऋ० १.८०.३) इत्यत्र ऋग्भाष्ये—'यस्माच्छत्रुभूतानां मनुष्याणामपि नमनकरणं तव बलम्'[5] इति स एव। तत्र पृषोदरादित्वेन (अ० ६.३.१०९) नृनमनशब्दस्य वर्णलोपादौ नृम्णमिति द्रष्टव्यम्। 'श्रवो नृम्णं च रोदसी सपर्यतः' (ऋ० १०.५०.१),

---

१. स्कन्दटीका (निरु० ७.१०)।

२. 'तु' धातुरिति तात्पर्यम्। धातुरयं क्षीरस्वाम्यादिभिः गतिवृद्धिहिंसासु सौत्ररूपेण पठ्यते। अस्य तुजादिगणे परिगणनादेव तूताव इत्यादिप्रयोगेषु (अ० ६.१.७) इति भवति दीर्घः। (सु०)।

३. स्कन्दटीका (निरु० ४.१९)।

४. स्कन्दटीका (निरु० ११.९)।

५. स्कन्दभाष्यम् (ऋ० १.८०.३)।

'महि श्रवस्तुविनृम्णम्' (ऋ० १.४३.७) इति च निगमौ॥

(१०) तविषी[१]–तविः सौत्रो धातुर्वृद्ध्यर्थः[२]। तवेष्टिषन्प्रत्ययः। टित्त्वात् ङीप्। 'कृष्णा रजांसि तविषीं दधानः' (ऋ० १.३५.४), 'युष्माकमस्तु तविषी पनीयसी' (ऋ० १.३९.२) इति निगमौ॥

(११) शुष्मम्[३]–'शुष शोषणे' (दि० प० ७२)। 'अविसिविसिशुषिभ्यः कित्' (उ० १.१४४) इति मन्प्रत्ययः। शुष्यत्यनेनारिः। 'शुषिः प्रीणनार्थः'[४] इति माधवः। प्रियं हि बलम्। 'शुष्ममिति बलनाम, शोषयतीति सतः' (निरु० २.२४) इति भाष्यम्। 'परस्य सांयोगिकमपि बलं विशोषयति उपक्षपयतीत्यर्थः'[५] इति स्कन्दस्वामी। तत्र शोषयतेर्मनिन् 'बहुलमन्यत्रापि सञ्ज्ञाच्छन्दसोः' (उ० २.२३) इति [णेः] लुक्। 'शुष्मा इन्द्रमवाता अह्रुतप्सवः' (ऋ० १.५२.४), 'यस्य शुष्माद्रोदसी अभ्यसेताम्' (ऋ० २.१२.१) इति निगमौ॥

(१२) शुष्णम्[६]। **(१३) शूषम्**[७]–'शुष शोषणे' (दि० प० ७२)। यूषशूषार्कलूषकारूषकोरदूषाटरूषशैलूषादयः' (स० क० २.३.१६६) इति 'आदिग्रहणात् दूषप्रत्यूषाभ्यूषादयोऽपि भवन्ति'[८] इति दण्डनाथवृत्तिः। ऊषन्प्रत्ययष्टिलोपश्च[९] निपात्यते। शुष्मवदर्थः। 'इन्द्राय शूषमर्चति' (ऋ० १.९.१०), 'इनतमः सत्वभिर्यो ह शूषैः' (ऋ० ३.४९.२) इति निगमौ॥

(१४) दक्षः–'दक्ष शैघ्र्ये च' (भ्वा० आ० ४०३) चकाराद् वृद्धौ। 'दक्ष गतिहिंसनयोः' (भ्वा० प० ५२१)। 'दक्षतिरुत्साहार्थः'[४] इति स्कन्दस्वामी। असुन्। शत्रुविजये क्षिप्रो भवत्यनेन, हिंस्यन्ते वानेन शत्रवः, प्रोत्साहितो वा भवति शत्रुविजये। 'मित्रं हुवे पूतदक्षम्' (ऋ०१.२.७) इति भाष्ये स्कन्दस्वामी– 'दक्ष इति सकारान्तं बलनाम-[सु पठितम्]'। अकारान्तमपि [तु] तस्यैव पर्यायान्तरं[१०] द्रष्टव्यम्। 'जज्ञाना पूतदक्षसा' (ऋ० १.२३.४) इति निगमः॥

(१५) वीळु–वीळयति संस्तम्भकर्मा। 'भृमृशीङ्तृचरित्सरितनिधनिमिमस्जिभ्य उः' (उ० १.७) इति उप्रत्ययो बाहुलकादस्मादपि भवति। संस्तब्धो दृढो भवति अनेन, संस्तभ्यन्तेऽनेन शत्रव इति वा। निगमोऽन्वेषणीयः॥

---

१. निरु० ९.२५ तवतिर्धातुरपि तत्र प्रोच्यते। (सु०)।

२. तव गत्यामिति सौत्रो धातुरिति वोपदेवः। (सु०)।

३. निरु० २.२३। (सु०)। ४. मृग्यम्। ५. उभयपाठतुलनया संशोधितः पाठः।

६. शोषयिता निरु० ५.१६, ६.२०। (सु०)। 'तृषिशुषिरसिभ्यः कित्' (उ० ३.१२) इति- निरुक्तिः। ७. निघ० ३.६ सुखनामसु। (सु०)।

८. बहुधाशुद्धः कोशगतसूत्रवृत्तिपाठः साम्बशिवसंस्करणमनुसृत्य शोधितः।

९. अन्तोदात्तत्वमपि। १०. 'तस्यैवमर्थान्तरे' इति मुद्रितेषु।

(१६) च्यौत्नम्–'च्युङ् गतौ' (भ्वा० आ० ६८४)। अन्तर्णीतण्यर्थो वा। च्यवन्ति च्यावयन्ति शत्रूननेन राज्यात्। 'प्रच्यौत्नेन मघवा सत्यराधाः' (ऋ० १०.४९.११) इति निगमः॥

(१७) सहः[1]–'षह मर्षणे' (भ्वा० आ० ५९१) छन्दस्यभिभवार्थः। असुन्। सहतेऽनेन[2] शत्रून्। 'ये सहांसि सहसा सहन्ते' (ऋ० ६.६६.९) इति निगमः[3]॥

(१८) यहः–व्याख्यातमुदकनामसु (१.१२.४२)। प्राप्यते आहूयते वा अनेन शत्रुः। निगमोऽन्वेषणीयः॥

(१९) वधः–'हन हिंसागत्योः' (अदा० प० २)। 'हनश्च वधः' (अ० ३.३.७६) इत्यप्। हन्यतेऽनेन शत्रुः। निगमोऽन्वेषणीयः[4]।

(२०) वर्गः, (२१) वृजनम्, (२२) वृक्–'वृजी वर्जने' (रु० प० २३)। घञ्। 'कृपृवृजिमन्दिनिधाञः क्युः' (उ० २.८२) 'क्विप् च' (अ० ३.२.७६)। वर्ज्यन्तेऽनेन प्राणैः। 'जरयन्ती वृजनं पद्वदीयते' (ऋ० १.४८.५), 'प्रतीचीनं वृजनं दोहसे गिरा' (ऋ० ५.४४.१) इति च निगमौ। माधवस्तु–'मध्योदात्तन्तु वृजनं वर्त्तते बलयुद्धयोः'। 'वृजनेन वृजिनान्त्सम्पिपेष' (ऋ० ३.३४.६), 'त्वं शुष्णं वृजने पृक्ष आणौ' (ऋ० १.६३.३), 'जरयन्ती वृजनं' (ऋ० १.४८.५) 'तु वर्त्तते उपद्रवे'[5] इति। तदान्वेषणीयौ निगमौ॥

(२३) मज्मना–'टुमस्जो शुद्धौ' (तु० प० १२५)। औणादिको मनिन् (उ० ४.१४६)। 'झलां जश् झशि' (अ० ८.४.५२) [दत्वे], श्चुत्वम्, तृतीयैकवचनम्। मज्जयति शत्रून्। 'नाभा पृथिव्या भुवनस्य मज्मना' (ऋ० १.१४३.४), 'स इन्महानि समिथानि मज्मना' (ऋ० १.५५.५), 'वि रोदसी मज्मना बाधते शवः' (ऋ० १.५१.१०) इति निगमाः। निगमेषु तृतीयैकवचनान्तस्य प्रायशो दर्शनात् तदन्तः पठितः॥

(२४) पौंस्यानि[6]–'पुंस अभिवर्द्धने' (प० १०४) चुरादिः।'अघ्न्याद-

---

१. निघ० १.१२ उदकनामसु। सहसः=बलस्य पुत्र इति निरु० ५.२५, ११.१०। (सु०)। २. 'सहत्यनेन' इत्यपपाठः कोशेषु।

३. लौकिकसंस्कृते प्रायशोऽप्रयुक्तोऽपि 'साहसम्', 'सहसा' इत्यादिशब्देषु जीवत्ययं शब्दः। यद्धि सहसा बलेन क्रियेत तदकस्मात् सम्पद्यते। अतः तृतीयान्तः सहसाशब्दोऽकस्मादर्थस्य वाचकः। (सु०)।

४. निघ० २.१७। संग्रामनामसु। (सु०)। ५. मृग्यम्।

६. ऋ० ६.३६.३ भाष्ये दयानन्दः। अ० ४.१.८७ सूत्रेण पुंस्शब्दात् स्नञ्प्रत्ययविधानेन लौकिकसंस्कृते पौंस्नशब्दः सर्वथा लुप्त एव। यद्यपि लोके पौंस्यशब्दस्यापि नातिबहुलः प्रयोगः। (सु०)।

यश्च' (उ० ४.११३) इति यत्प्रत्ययान्तेषु निपातितेषु द्रष्टव्यः। 'पौंस्यानि नियुतः सश्चुरिन्द्रम्' (ऋ० ६.३६.३), 'यस्मिन् विश्वानि पौंस्या' (ऋ० १.५.९), 'महत्तदस्य पौंस्यम्' (ऋ० १.८०.१०) इति निगमाः॥

(२५) धर्णसि–'धृञ् धारणे' (भ्वा० उभ० ६४१)। 'सानसिवर्णसिपर्णसि०' (उ० ४.१०८) इत्यसिप्रत्ययो नुमागमोऽपि निपात्यते गुणः। ध्रियतेऽनेन राज्यादि। निगमोऽन्वेषणीयः॥

(२६) द्रविणम्–'द्रु गतौ' (भ्वा० प० ६७७)। 'द्रुदक्षिभ्यामिनन्' (उ० २.५१)। 'स नो ददातु द्रविणम्'[१] इति निगमः॥

(२७) स्यन्द्रासः–'स्यदि किञ्चिच्चलने'[२]। 'अन्ध्ररन्ध्रसिलिन्ध्रोड्रपुण्ड्रतीव्रनीप्रशीघ्रोग्रगौरेराभद्रसान्द्रगुन्द्रादयः' (स० क० २.३.३०)[३] इति रन्प्रत्ययान्तो निपात्यते। तस्मात् जसेरसुक् (अ० ७.१.५०)। स्यन्दतेऽनेन शत्रून्। निगमोऽन्वेषणीयः॥

(२८) शम्बरम्–व्याख्यातमुदकनामसु (१.१२.८८)। संव्रियतेऽनेन शत्रुः, संवृणोति वा तत्त्वत आपदम्। शमनमुपद्रवाणामुत्कृष्टं च युद्धादौ, शम्बेनेन्द्रेण दीयते[४] वा। बलाधिदेवता हीन्द्रः। 'या च का च बलकृतिरिन्द्रकर्मैव तत्' (निरु० ७.१०) इति भाष्यम्। निगमोऽन्वेषणीयः॥

इत्यष्टाविंशतिर्बलनामानि॥ ९॥

मघम् (१)। रेक्णः (२)। रिक्थम् (३)। वेदः (४)। वरिवः (५)। श्वात्रम् (६)। रत्नम् (७)। रयिः (८)। क्षत्रम् (९)। भगः (१०)। मीळ्हुम् (११)। गयः (१२)। द्युम्नम् (१३)। इन्द्रियम् (१४)। वसु (१५)। रायः (१६)। राधः (१७)। भोजनम् (१८)। तना (१९)। नृम्णम् (२०)। बन्धुः (२१)। मेधा (२२)। यशः (२३)। ब्रह्म (२४)। द्रविणम् (२५)। श्रवः (२६)। वृत्रम् (२७)। वृतम् (२८)। इत्यष्टाविंशतिरेव धननामानि॥ १०॥

(१) मघम्–मंहतिर्दानकर्मा (३.२०.१०)। 'घञर्थे कविधानम्०'

---

१. मृग्यम्। २. पाणिनीये धातुपाठे न संगृह्यते। 'स्पदि किञ्चिच्चलने' 'स्यन्दू प्रस्रवणे' (भ्वा० आ० १३, ५११) इति तत्र पठ्येते।
३. 'अन्ध्ररन्ध्रसिलिन्ध्रेध्रपुण्ड्रतीव्रशीघ्रगोरेन्द्राभद्रस्यन्द्रकुलीरादयः' इति मुद्रितेषु। यथासाम्बशिवसंस्करणं शोधितम्। ४. '०द्रेणादीयते' इति मुद्रितेषु।

(अ० ३.३.५८ वा०) इत्यत्र परिगणितस्य प्रायिकत्वात् कप्रत्यये, पृषोदरादित्वात् (अ० ६.३.१०९) [नकार]-लोपो हकारस्य घकारश्च। दीयतेऽर्थिभ्यः। 'तेभिरिन्द्रं चोदय दातवे मघम्' (ऋ० ९.७५.५), 'यदिन्द्र दक्षिणा मघोनी' (ऋ० २.११.२१) इति निगमौ॥

(२) रेक्णः–'रिचिर् विरेचने' (रु० उभ० ४)। 'रिचेर्धने घिच्च' (उ० ४.२००) इत्यसुन्, नुडागमो गुणश्च, घित्त्वात् 'चजोः कु घिण्ण्यतोः' (अ० ७.३.५२) इति कुत्वम्। रेक्ण इति धननाम, रिच्यते प्रयतः (निरु० ३.२) इति भाष्यम्। रिच्यते अवतिष्ठते[1] प्रयतः म्रियमाणस्य धनं धनिना सह न म्रियत इत्यर्थः[2]। 'रेक्णो धनं रिचेः प्रेरणार्थात्'[3] इति माधवः। प्रेर्य्यतेऽनेन दत्तेन भृत्यादिः कर्मसु। 'स्पार्हं यद्रेक्णः परमं वनोषि तत्' (ऋ० १.३१.१४), 'परिषद्यं ह्यरणस्य रेक्णः' (ऋ० ७.४.७) इति च निगमौ॥

(३) रिक्थम्–रिचेः (रु० उभ० ४) 'पातृतुदिवचिरिचिसिचिभ्यस्थक्' (उ० २.७) इति थक्। पूर्ववदर्थः। 'न जामये तान्वो रिक्थमारैक्' (ऋ० ३.३१.२) इति निगमः॥

(४) वेदः–'विद्लृ लाभे' (तुदा० उभ० १४१)। असुन्। विन्दन्त्येतत्[4], लभ्यते वानेन धर्मादिः। 'होतारं विश्ववेदसम्' (ऋ० १.१२.१) इति निगमः॥

(५) वरिवः–'वृञ् वरणे' (स्वा० उभ० ८)–अस्माद् यङ्लुगन्ताद् असुनि बाहुलकाट्टिलोपः[5]। भृशं व्रियते, वरिवसो हेतुत्वाद्वा वरिवः–

'वित्तं बन्धुर्वयः कर्म विद्या भवति पञ्चमी।
एतानि मान्यस्थानानि गरीयो यद्यदुत्तरम्॥'

(मनु० २.१३६) इति मनुः।

'युधा देवेभ्यो वरिवश्चकर्थ' (ऋ० १.५९.५), 'अंहो राजन् वरिवः पूरवे कः' (ऋ० १.६३.७) इति निगमौ॥

(६) श्वात्रम्[6]–आशुशब्द उपपदे 'अत सातत्यगमने' (भ्वा० प०

---

१. प्रयतो म्रियमाणात् पुरुषात् रिच्यते पृथग्भूयते इत्यर्थो न्याय्यः। रिचिर्धातुर्विरेचनार्थे पठितः, न त्ववस्थानार्थे। अस्माद्धातोरेव 'रिक्तम्', प्राकृते 'रीता' इत्यादयः शब्दा उपलभ्यन्ते। अतो म्रियमाणात् पृथग्भूयते, उत्तराधिकारिभ्यो दायरूपेण प्राप्यते यद् धनं स रेक्णः। (सु०)।

२. स्कन्दटीकाम् (निरु० ३.२) अनुवदते। ३. मृग्यम्।

४. 'विदन्त्येतत्' इति मुद्रितेषु। ५. 'बाहुलकादिलोपः' इति मुद्रितेषु।

६. श्वभिस्त्रायते इति श्वात्रम् इति साधुतरम्, उत्तरवर्तिक्षत्रमितिवत्। धनरक्षणाय श्वानः पाल्यन्ते स्म इति 'कौलेयक' शब्देनापि व्यज्यते। तथा च जातकेऽपि– 'ये कुक्कुरा राजकुलम्हि बद्धाः' (कुक्कुरजातक १.२२)। (सु०)।

३१) इत्यस्मात् 'दादिभ्यश्छन्दसि' (द० उ० ८.९०) इति त्रप्रत्ययः[१], पृषोदरादित्वेन (अ० ६.३.१०९) आशुशब्दश्च व्यापत्स्यते, यणादेशसवर्णदीर्घौ[२]। आशु अतति, आशु गच्छति,[३] चञ्चलं हि धनम्। निगमोऽन्वेषणीयः॥

(७) रत्नम्–'रमु क्रीडायाम्' (भ्वा० आ० ५९२) 'रमेस्त च' (उ० ३.१४) इति नप्रत्ययः तकारश्चान्तादेशः। रमणीयं हि तत्। 'रमन्तेऽस्मिन्' (अमर० २.९.९३ अ० उ०) इति क्षीरस्वामी। 'वित्ते रमस्व बहु मन्यमानः'[४] इति श्रुतिः। 'धा रत्नं महिं स्थूरं बृहन्तम्' (ऋ० ६.१९.१०), 'होतारं रत्नधातमम्' (ऋ० १.१.१) इति निगमौ॥

(८) रयिः[५]–व्याख्यातमुदकनामसु (१.१२.७३)। गम्यते प्राप्यते पुण्येन, गच्छत्यनेन तृप्तिं भोगसाधनत्वात्, यशो वादत्ते, दीयतेऽर्थिभ्य इति वा। 'अग्निना रयिमश्नवत्' (ऋ० १.१.३) इति निगमः॥

(९) क्षत्रम्–व्याख्यातमुदकनामसु (१.१२.४५)। पूर्वजन्मसुकृतवशेन तद्वति स्थिरं भवति, गृह्यत उपभोगसाधनत्वात्, हिनस्ति दारिद्र्यम्। गतावपि [रयि]-शब्दवदर्थः। क्षतात् पापात् त्रायते[६]। क्षत्रशब्दात् त्रायतेश्च पृषोदरादित्वात् (अ० ६.३.१०९) क्षत्रम्। धनैरेव पापं नरा निस्तरन्तीत्युच्यते। 'नहि ते क्षत्रं न सहो न मन्युम्' (ऋ० १.२४.६), 'सुक्षत्रासो रिशादसः' (ऋ० १.१९.५) इति च निगमौ॥

(१०) भगः[७]–'भज सेवायाम्' (भ्वा० उभ० ७२४)। 'पुंसि सञ्ज्ञायां घः प्रायेण' (अ० ३.३.११८) 'चजोः कु घिण्ण्यतोः' (अ० ७.३.५२)। भज्यते सेव्यते भोगार्थिभिः। यद्वा सेव्यतेऽनेन हेतुना तद्वान्। भगशब्दः पुँल्लिङ्गो धनवचनः। 'शिक्षा स्तोतृभ्यो माति धग्भगो नः' (ऋ० २.११.२१) इति निगमः॥

(११) मीळ्हुम्–'मिह सेचने' (भ्वा० प० ७१८)। ढत्वचर्त्वष्टुत्वढलोपदीर्घाः, ळ्हकारभावश्च। सिच्यतेऽर्थिभ्यो दातृभिः। मीळ्हुष्टम[८] शिवतम

---

१. 'आदित्यश्चिदसि इति कृत्प्रत्ययः' इत्यपपाठो मुद्रितेषु।
२. स्कन्दटीका (निरु० ५.३) अत्रानुसन्धेया।
३. अनया व्युत्पत्त्या क्षिप्रनामार्थे व्याख्यायते निरुक्ते ५.३। (सु०)। ४. मृग्यम्।
५. रयिशब्दो रैशब्दश्चोभयमुपलभ्यते वेदे। परवर्तियुगे तु रयिशब्दः प्रायशोऽप्रयुज्यमानतां गतः। अत एव पाणिनिः अ० ७.२.८५ आदिसूत्रेषु केवलं रैशब्दमन्वशात्। (सु०)।
६. तु०–'क्षतात् किल त्रायत इत्युदग्रः क्षत्रस्य शब्दो भुवनेषु रूढः'–रघुवंशम् २.५३। (सु०)। ७. निरु० १.७, ९.३१, १२.१४। (सु०)।
८. 'सहस्रमीळ्हुष्टम' इति कोशेषु। तादृक्पाठो न क्वचित् श्रूयते।

इत्यत्र भट्टभास्करमिश्रभाष्येऽपि 'मीळ्हु इति धननाम'[1] इति दृश्यते। ततो निष्कृत्य उकारान्तनिगमदर्शनाभावात् अकारान्तनिगमदर्शनात् उकारान्ताकारान्तद्वयोरपि स्वीकारोऽस्माकम्। 'रुद्रस्य ये मीळ्हुषः सन्ति पुत्राः' (ऋ० ६.६६.३), 'ताँ आ रुद्रस्य मीळ्हुषः' (ऋ० ७.५८.५) इत्यादौ निर्वाहकृच्छ्रत्वात् 'मीळ्हुम्' इति पठितव्यमिति केचिदाहुः। अन्ये तु 'मीळ्हः' इति सकारान्तमपि। तेषां मीळ्हांसमिति[2] निर्वाहः। उभयेषामपि 'सहस्रमीळ्हे' (ऋ० १.११२.१०) इत्यकारान्तस्य पाठोऽपेक्षणीयः। बहुभ्यस्तु निर्णयः॥

(१२) गयः—व्याख्यातमपत्यनामसु (२.२.८)। इहापि तदर्थः। गीयते स्तूयते होतृभिः। 'अरक्षद्दाशुषे गयम्' (ऋ० १.७४.२) इति निगमः॥

(१३) द्युम्नम्[3]—'राम्नासास्नासुम्नद्युम्ननिम्न०' (स० क० २.२.१८४)[4] इत्यादिना 'द्युत दीप्तौ' (भ्वा० आ० ४९३) इत्यस्मात् नप्रत्ययो मकारश्चान्तादेशो निपात्यते। तेन तद्वान्। दीप्यते द्युम्नम्। '[द्यूयते द्युम्नम्] द्यु अभिगमने' (अदा० प० ३३) इति क्षीरस्वामी (अमर० २.९.९० अ० उ०)। अत्र धातोर्मगागमो निपात्यते। 'द्युम्नं सहस्रसातमम्' (ऋ० १.९.८), 'द्युम्नावाजेभिरागतम्'[5] इति च निगमौ॥

(१४) इन्द्रियम्[6]—'इन्द्रियमिन्द्रलिङ्गमिन्द्रदृष्टमिन्द्रसृष्टमिन्द्रजुष्टमिन्द्रदत्तमिति वा' (अ० ५.२.९३) इति घच्प्रत्ययान्तमन्तोदात्तं निपात्यते। इन्द्रः—'इदि परमैश्वर्य्ये' (भ्वा० प० ५१) परमैश्वर्य्ययुक्त उच्यते। इन्द्रस्य लिङ्गम्। धनेन हि ऐश्वर्य्ययुक्त इति व्यज्यते। अत्र षष्ठीसमर्थात् लिङ्गार्थे घच्। यद्वा इन्द्रेण दृष्टम् इन्द्रियम्। यद्वा इन्द्र आत्मा, तत्कृतेन शुभाशुभेन कर्मणा सृष्टम्। इन्द्रजुष्टं वा, आत्मना सेवितम्, तद्द्वारेण भोगोत्पत्तेः। इन्द्रदत्तं वा, इन्द्रेण पूर्वकर्मणा वा अस्त्युपदत्तम्। सृष्टजुष्टदत्तार्थेषु तृतीयासमर्थात्। 'दक्षिणं पादमवनेनिजेऽस्मिन्राष्ट्र इन्द्रियं दधामि' (ऐ० ब्रा० ८.२७) इति निगमः॥

---

१. 'अतिशयेन सेक्तः' भट्टभास्करभाष्यम् (रुद्राध्यायः १०.१०)।

२. 'मीळ्हासम्' इति मृग्यम्।

३. निरु० ५.६ यशोऽर्थे, अन्नार्थे च। पुराकाले धान्यमेवासीद् धनम्, इत्यतोऽन्नार्थेऽप्यस्य सुकरः प्रयोगः। (सु०)।

४. 'द्युम्नसुम्ननिम्न०' इत्यपपाठो मुद्रितेषु। ५. मृग्यम्।

६. धनार्थे इन्द्रियशब्दे इन्द्र इन्द्रदेवः। तथा च इन्द्रदेवेण जुष्टं धनम् इत्यर्थे इन्द्रियं साधुतरम्। अत एव वेदे—'इन्द्र इन्द्रियैर्मरुतो मरुद्भिरादित्यैर्नो अदितिः शर्म यंसत्' (ऋ० १.१०७.२) ज्ञानेन्द्रियाद्यर्थे इन्द्रियशब्दे-तु आत्मार्थे इन्द्रशब्दः समीचीनं व्याख्यायते व्याख्याकारैः। (सु०)।

(१५) वसु[१]–रात्रिनामसु 'वस्वी' इत्यत्र (१.७.२३) व्याख्यातम्। वस्ते आच्छादयति तिरोभावयति दारिद्र्यम्। 'अहं भुवं वसुनः पूर्व्यस्पतिः' (ऋ० १०.४८.१) इति निगमः॥

(१६) रायः[२]–'रा दाने' (अदा० प० ५०)। 'रातेर्डैः' (उ० २.६७)। जस्। दीयतेऽर्थिभ्यः, तदेव प्राप्यते वा पूर्वकृतेन पुण्येन। 'अनामृणः कुविदादस्य रायः' (ऋ० १.३३.१) इति निगमः॥

(१७) राधः[३]–'राध साध संसिद्धौ' (स्वा० प० १७)। असुन्। 'राध्नुवन्ति साध्नुवन्ति[४] धर्मादीन् पुरुषार्थान्' इति स्कन्दस्वामी। राध्यतेऽनेन धर्मादिरिति वा। राधिर्हिंसार्थोऽपि (दिवा० प० ८२)। हिनस्ति दारिद्र्यम्। 'राध इन्द्र वरेण्यम्' (ऋ० १.९.५), 'राधस्तन्नो विदद्वस उभयाहस्त्या भर' (ऋ० ५.३९.१) इति निगमौ॥

(१८) भोजनम्–'भुज पालनाभ्यवहारयोः' (रु० प० १७)। ल्युट् 'कृत्यल्युटो बहुलम्' (अ० ३.३.११३) इति। यद्वा अभ्यवहारार्थे[५] भवति भुज्यते तद्वद्भिः[६] भुज्यन्तेऽनेन विषया इति वा, पाल्यतेऽनेन वा। 'शत्रूयतामा भरा भोजनानि' (ऋ० ५.४.५), 'मा नः प्रिया भोजनानि प्र मोषीः' (ऋ० १.१०४.८) इति निगमौ॥

(१९) तना–'तनु विस्तारे' (त० प० १)। पचाद्यच् (अ० ३.१.१३४)। तनोति विस्तारयति त्रिवर्गसाधनं हि धनम्। तृतीयैकवचनस्य 'सुपां सुलुक्०' (अ० ७.१.३९) इत्याकारः। 'विह्वयन्ते तना गिरा' (ऋ० ८.४०.७), 'आ वो मक्षू तनाय कम्' (ऋ० १.३९.७) इति निगमौ॥

(२०) नृम्णम्–व्याख्यातं बलनामसु (२.९.९)। नमति प्रह्वीकरोत्यर्थिभ्यस्तद्वस्तु। 'हस्ते दधानो नृम्णा विश्वानि' (ऋ० १.६७.३) इति निगमः॥

(२१) बन्धुः–'बन्ध बन्धने' (क्र्या० प० ४१)। 'भृस्वृश्लिहित्रप्यसिवसिहनिक्लिदिबन्धिमनिभ्यश्च' (उ० १.१०) इति उप्रत्ययः। बध्नात्यनेन भृत्यादीन्। यद्वा, बन्धुरिव बन्धुः। 'अबन्धुना सुश्रवसोपजग्मुषः' (ऋ०

---

१. निरु० ५.१९, ९.४३, १२.४२। एवं धनवत्त्वादेव लोके पृथिवी वसुमती। (सु०)।

२. निरु० ३.२, ४.७ अनुमन्त्रं व्याख्यायते। (सु०)।

३. निरु० ४.४, ११.२४। प्राकृतभाषायां सर्वातिशयिता संसिद्धिः पचनमेवेति मत्वा पचनार्थे 'राँधना' इत्यादयश्शब्दाः प्रयुज्यन्ते। (सु०)।

४. 'साधयन्ति एतेन' इति स्कन्दटीका (निरु० ४.४)।

५. 'अभिमतार्थे' इति कोशेषु।

६. 'तद्वहिः' इति मुद्रितेषु।

१.५३.९) इति निगमः॥

(२२) मेधा–'मिधृ मेधृ सङ्गमे च' (भ्वा० उभ० ६११) चकारात् हिंसामेधयोश्च। 'मिधिः सङ्गत्यर्थः'[1] इति माधवः। घञ्। सङ्गच्छतेऽनेन सर्वं तद्वता, हिंस्यते वा तद्वान् चौरादिभिः, 'घ्नन्ति चैवार्थकारणात्'[1] इति महाभारतम्। यद्वा, मतौ धीयते अर्जयितव्यं रक्षितव्यं दातव्यमिति धनवता बुद्धौ धनं धार्य्यते। तत्र मतिशब्द उपपदे धाञः[2] 'घञर्थे कविधानम्०' (अ० ३.३.५८ वा०) इति कः, पृषोदरादित्वात् (अ० ६.३.१०९) मतिशब्दस्य मेभावः। 'मेधाकारं विदथस्य प्रसाधनम्' (ऋ० १०.९१.८) इति निगमः॥

(२३) यशः–व्याख्यातमन्ननामसु (२.७.२८)। 'उत त्या मे यशसा श्वेतनायै' (ऋ० १.१२२.४) इति निगमः॥

(२४) ब्रह्म–व्याख्यातमन्ननामसु (२.७.२५)। वर्द्धन्तेऽनेन धर्मादयः, बृंहकं वा भोगानाम्। 'अस्माकं ब्रह्म पृतनासु सह्या' (ऋ० १.१५२.७) इति निगमः॥

(२५) द्रविणम्–व्याख्यातं बलनामसु (२.९.२६)। रयिवदर्थः। 'त आयजन्त द्रविणं समस्मै' (ऋ० १०.८२.४) इति निगमः॥

(२६) श्रवः–व्याख्यातमन्ननामसु (२.७.४)। 'अस्मे पृथुश्रवो बृहत्' (ऋ० १.९.७), 'बृहच्छ्रवा असुरो बर्हणा कृतः' (ऋ० १.५४.३) इति निगमौ॥

(२७) वृत्रम्–व्याख्यातं मेघनामसु (१.१०.२८)। आच्छादयति दारिद्र्यम्, आच्छाद्यते वा राजतः करादिभयात्। गत्यर्थे रयिवदर्थः। वृद्धौ ब्रह्मवदर्थः। 'वृत्रं पुरुकुत्साय रन्धीः' (ऋ० १.१७४.२) इति निगमः। अत्र स्कन्दस्वामिना 'वृत्रं धननाम'[3] इति व्याख्यातत्वात् केषुचित् कोशेषु दृश्यमानमपि 'वित्तम्' इति न पठनीयम्॥

(२८) वृतम्–'वृङ् सम्भक्तौ' (क्र्या० आ० ४२)। 'दुतनिभ्यां दीर्घश्च' (उ० ३.९०) इति चकारस्यानुक्तसमुच्चयार्थत्वात् क्तप्रत्ययः। सम्भज्यते सर्वैः। 'वृतञ्चयः सहुरिर्विक्ष्वारितः' (ऋ० २.२१.३) इति निगमः॥

इत्यष्टाविंशतिरेव धननामानि॥ १०॥

---

१. मृग्यम्। २. 'धातोः' इति मुद्रितेषु।

३. स्कन्दटीका (निरु० ६.३१)।

अघ्न्या (१)। उस्रा (२)। उस्रिया (३)। अही (४)। मही (५)। अदितिः (६)। इळा (७)। जगती (८)। शक्वरी (९)। इति नव गोनामानि॥ ११ ॥

(१) अघ्न्या–'अहन्तव्या भवतीत्यघघ्नीति वा' (निरु० ११.४३) इति भाष्यम्। अघस्य दुर्भिक्षादेर्हन्त्री वा, अहन्तव्या। अघशब्दे नञि वा उपपदे हन्तेः 'अघ्न्यादयश्च' (उ० ४.११३) इति यत्प्रत्ययान्तं निपात्यते। 'नहि मे अस्त्यघ्न्या' (ऋ० ८.१०२.१९), 'अद्धि तृणमघ्न्ये विश्वदानीम्' (ऋ० १.१६४.४०) इति निगमौ॥

(२) उस्रा–व्याख्यातं रश्मिनामसु (१.५.९)। वसति क्षीरादि हविरस्याम्। 'उस्रियेति गोनामोत्स्राविणोऽस्यां भोगा उस्रेति च' (निरु० ४.१९) इति भाष्यम्। 'उत्स्राविणोऽस्यां भोगास्ते ऊर्ध्वं स्रवन्ति गच्छन्ति क्षीरदधिनवनीतक्रमेण'[1] इति स्कन्दस्वामी। 'मयोभूर्वातो अभिवातूस्राः' (ऋ० १०.१६९.१), 'उस्रः पितेव जारयायि यज्ञैः' (ऋ० ६.१२.४) इति च निगमौ॥

(३) उस्रिया–उस्रशब्दात् पृषोदरादित्वेन (अ० ६.३.१०९) स्वार्थे घः। अर्थः पूर्ववत्। 'अविन्द उस्रिया अनु' (ऋ० १.६.५), 'समुस्रियाभिर्वावशन्त नरः' (ऋ० १.६२.३) इति च निगमौ॥

(४) अही–अहिशब्दो व्याख्यातो मेघनामसु (१.१०.२१)। 'कृदिकारात्०' (अ० ४.१.४५ ग०सू०) इति ङीष्। गम्यतेऽनया क्षीरादि हविः, गम्यते दत्तया पुण्यम्, अंहति शृङ्गादिना मनुष्यान्, न हन्तव्या वा। निगमोऽन्वेषणीयः। 'ईक्षेण्यासो अह्यो३ न चारवः' (ऋ० ९.७७.३) इति भाष्यं[2] द्रष्टव्यम्॥

(५) मही, (६) अदितिः, (७) इळा–व्याख्यातानि पृथिवीनामसु (१.१.१२, १४, १५)। तत्र द्यतेः क्तिनि, 'द्यतिस्यति०' (अ० ७.४.४०) इतीत्वे दितिः, नञ्समासः, इत्यदितिशब्दस्य व्युत्पत्तिः। मह्यते पूज्यते सर्वदेवतात्मकत्वाद् उपभोगसाधनत्वाद्वा। मह्यन्तेऽनया देवाः पयआदीनां हविषां तदायत्तत्वात्। 'देवाश्च याभिर्यजते ददाति च'[3] इति श्रुतिः। पुनःपुनः दुह्यमानापि न क्षीयते। न द्यति, अखण्डनीया वा। ईड्यते स्तूयते देवतात्वात्,

---

१. स्कन्दटीका (निरु० ४.१९)।

२. 'अह्यः स्त्रिय आहननात्। आहन्ति हि पुमांसम्' इति वेङ्कटमाधवः।

३. मृग्यम्।

दीप्यते वा चारुतया। गम्यते तदर्थिभिरिति वा। 'महीनां पयोऽसि' (मा० सं० ४.३) इति, 'अदित एहि सरस्वत्येहि' (मा० सं० ३८.२) इति, 'मिमिक्ष्वा समिळाभिरा' (ऋ० १.४८.१६), 'इडे रन्ते हव्ये काम्ये' (मा० सं० ८.४३) इति च निगमाः॥

(८) जगती–मनुष्यनामसु 'जगतः' इत्यत्र व्याख्यातम् (२.३.२१)। शतृ। 'उगितश्च' (अ० ४.१.६) इति डीप्। गम्यते तदर्थिभिः। जगत्या छन्दसा आहार्यत्वाद् अत्राहार्याहरणयोरभेदेन वा जगती। 'जागता हि पशवो जगती हि तानाहरत्'[१] इति हि ब्राह्मणम्। 'जागताः पशवः' (ऐ० ब्रा० ४.३) इति च। 'समोषधयो रसेन। सꣳरेवतीर्जगतीभिः' (मा० सं० १.२१) इति निगमः॥

(९) शक्वरी[२]–व्याख्यातं बाहुनामसु (२.४.११)। शक्नोति क्षीरादिप्रदानेन तद्वन्तं प्रीणयितुम्, स्पर्शनेन वा पापमपनेतुम्। शक्वरीशब्द-सम्बन्धादभेदेन वा शक्वरी। 'पशवो वै शक्वर्यः पशूनेवावरुन्धे' (तै० ब्रा० १.७.५.४) इति श्रुतिः। निगमोऽन्वेषणीयः॥

इति नव गोनामानि॥ ११॥

रेळते (१)। हेळते (२)। भामते (३)। ह्रणीयते (४)। भ्रीणाति (५)। भ्रेषति (६)। दोधति (७)। वनुष्यति (८)। कम्पते (९)। भोजते (१०)। इति दश क्रुध्यतिकर्माणः॥ १२॥

(१) रेळते–अयं नैरुक्तो धातुः। 'अरेळता मनसा देवान् गच्छ' (मै० सं० १.४.१) इति निगमः॥

(२) हेळते[३]–'हेडृ अनादरे क्रोधे[४] च' भूवादिरात्मनेपदी (१८३)। 'अहेळमानो ररिवाँ अजाश्व' (ऋ० १.१३८.४), 'अहेळमानो वरुणेह बोधि' (ऋ० १.२४.११) इति निगमौ॥

(३) भामते–'भाम क्रोधे' भूवादिरात्मनेपदी (३००)। 'देव जुष्टोच्यते भामिने गीः' (ऋ० १.७७.१), 'स्वयम्भूर्भामो अभिमातिषाहः' (ऋ०

---

१. मृग्यम्।

२. 'पशवः शक्वर्यः' (तां० ब्रा० १३.१.३) इति ब्राह्मणेष्वसकृत् प्रोक्तम्। इह तु पशुविशेषः प्रोच्यते। (सु०)।

३. लौकिकसंस्कृते प्रायशोऽप्रयुक्तोऽप्येष धातुः 'अवहेलना' आदिशब्देषु जीवनं लभते। (सु०)।

४. पाणिनीये धातुपाठे 'क्रोधे च' इति नास्ति।

१०.८३.४) इति निगमौ॥

(४) हृणीयते–'हृणीङ् रोषे वैमनस्ये[१] च' कण्ड्वादिः (३१)। 'पुनः प्रायच्छदहृणीयमानः' (ऋ० १०.१०९.२), हृणीयमानो अप हि मदैयेः' (ऋ० ५.२.८) इति निगमौ॥

(५) भ्रीणाति–'भ्री भये' क्र्यादिः परस्मैपदी (३८)। अनेकार्थत्वात् क्रुध्यतिकर्मा। एवमुत्तरत्रापि। 'एनः कृण्वन्तमसुर भ्रीणन्ति' (ऋ० २.२८.७) इति निगमः॥

(६) भ्रेषति–'भ्रेषृ बलने'[२] भूवादिः स्वरितेत् (६२४)। निगमोऽन्वेषणीयः॥

(७) दोधति–नैरुक्तो धातुः[३]। 'इन्द्रौ वृत्रस्य दोधतः' (ऋ० १.८०.५) इति निगमः॥

(८) वनुष्यति–'वनुष्यतिर्हन्तिकर्मा' (निरु० ५.२) इत्यत्र स्कन्दस्वामी[४]–'वनोतेः कण्ड्वादिप्रक्षेपाद् यक्प्रत्ययः, तत्सन्नियोगेन च वनुष्भावो द्रष्टव्यः'[५] इति। निगमोऽन्वेषणीयः[६]॥

(९) कम्पते–'कपि चलने' भूवादिरात्मनेपदी (२६१)। निगमोऽन्वेषणीयः॥

(१०) भोजते–'भुजो कौटिल्ये' तुदादिः परस्मैपदी (१२७)। 'छन्दस्युभयथा' (अ० ३.४.११७) इत्यार्द्धधातुकत्वात् गुणः। व्यत्ययेनात्मनेपदम्। निगमोऽन्वेषणीयः[७]॥

इति दश क्रुध्यतिकर्माणः॥ १२॥

हेळः (१)। हरः (२)। घृणिः (३)। त्यजः (४)। भामः

---

१. 'लज्जायाम्' इति पाणिनीये धातुपाठे।

२. 'गतौ' इति पाणिनीये धातुपाठे।

३. धातुपाठे त्वस्य स्थाने 'दुह प्रपूरणे' (अदा०उभ० ४) धातुः संवर्तते। (सु०)।

४. मुद्रितस्कन्दटीकापाठः (निरु० ५.२) त्रुटिबहुलः।

५. सर्वथानावश्यकमेतत् क्लिष्टकल्पनम्। वेदे हिंसकार्थे वनुष्शब्दस्य बहुलं समाचारः। 'जहि वर्धर्वनुषो मर्त्यस्य' (ऋ० ४.२२.९) इत्यादि निदर्शनम्। अस्मादेव वनुष्शब्दात् कण्ड्वादित्वाद् यक्प्रत्ययेन सिद्धः 'वनुष्यति' इति। (सु०)।

६. 'इन्धानो अग्निं वनवद् वनुष्यतः' (ऋ० २.२५.१), अत्र भाष्ये वनुष्यतः=हिंसन्तम् इति दयानन्दः। (सु०)।

७. 'येना नु कं मानुषी भोजते विट्' (ऋ० १.७२.८) इति निगमः। (सु०)।

(५)। एहः (६)। ह्वरः (७)। तपुषी (८)। जूर्णिः (९)। मन्युः (१०)। व्यथिः (११)। इत्येकादश क्रोधनामानि॥ १३॥

(१) हेळः–हेळतेर्भावे असुन्। 'देवस्य हेळोऽवयासिसीष्ठाः' (ऋ० ४.१.४) इति निगमः॥

(२) हरः–'हृञ् हरणे' (भ्वा० उभ० ६४०) असुन्। हरति कृत्याकृत्यविवेकम्, ह्रियते वानेन पुरुषः स्ववशम्, दुर्जयोऽन्तरः शत्रुः क्रोधः। निगमोऽन्वेषणीयः॥

(३) घृणिः–ज्वलन्नामसु व्याख्यातम् (१.१७.१०)। क्षरत्यनेन स्वेदादिः, दीप्यतेऽनेन वा, क्रुद्धोऽग्निरिव ज्वलति हि प्रसिद्धः। 'आघृणे संसचावहै' (ऋ० ६.५५.१) इति निगमः। 'मा हृणानस्य' (ऋ० १.२५.२) इत्यत्र भाष्ये–'हृणिरिति क्रोधनामसु पाठाद् हरतिः क्रोधार्थोऽपि गम्यते' इति स्कन्दस्वामी, तत् कथमिति विचिन्त्यम्[1]॥

(४) त्यजः–'त्यज हानौ' (भ्वा० प० ७१२)। असुन्। त्यज्यते सत्पुरुषैः, त्यज्यन्तेऽनेन प्राणा इति वा, त्यज्यते वा स्वधर्मः।

'क्रुद्धः पापं किन्न कुर्य्यात् क्रुद्धो हन्याद् गुरूनपि।
क्रुद्धः परुषया वाचा नरः साधूनपि क्षिपेत्'॥[2]

[इति हि महाभारतम्।]

'महश्चिदसि त्यजसो वरूता' (ऋ० १.१६९.१), 'किं देवेषु त्यज एनश्चकर्थ' (ऋ० १०.७९.६) इति निगमौ॥

(५) भामः[3]–भामतेर्भावे घञ्। यद्वा 'भा दीप्तौ' (अदा० प० ४४)। 'अर्त्तिस्तुसुहुसृधृक्षिक्षुभायावापदियक्षिनीभ्यो मन्' (उ० १.१४०) इति मन्। दीप्यते तेन तद्वान्। 'देवजुष्टोच्यते भामिने गीः' (ऋ० १.७७.१), 'स्वयम्भूर्भामो

---

१. वस्तुतो भौवादिको हरतिः क्रोधार्थे नास्त्येव। परं वेदे 'हृणानस्य मन्यवे' (ऋ० १.२५.२) इत्यादिप्रयोगदर्शनात् श्नाविकरणवतो हरतेरस्तित्वमनुमीयते। यद्यपि नास्य धातोर्बहुलं समाचारः। अयमेव क्रोधार्थः। अस्मादेव धातोरिप्रत्ययेन बाहुलकत्वात् श्नाविकरणेन हृणिरिति सिद्धिः, हृणिशब्दाच्च नामधातुरूपेण हृणीयते इत्यादिसिद्धिः। एषैव कथा कण्ड्वादिभावेन समर्थ्यते। (सु०)।

२. मृग्यम्।

३. लौकिकसंस्कृते शब्दस्यास्य विरलः प्रयोगः। अमरकोशः केवलं स्त्रीलिङ्गे भामिनीशब्दं गणयामास। शब्दरत्नावली तु भगिनीपतिरित्यर्थे भामशब्दं ब्रवीति। तथा च देवीभागवतम् (६.१६.४९)–'गुरुं मित्रं तथा भामं पुत्रञ्च भगिनीं तथा'। किं ते क्रोधशीला भवन्तीत्यर्थे तु देवाः प्रमाणम्!! वस्तुतस्तु दीप्तत्वात्ते भामा इति वक्तुं पार्यन्ते। (सु०)।

अभिमातिषाहः' (ऋ० १०.८३.४) इति निगमौ॥

(६) एहः–'हन हिंसागत्योः' (अदा० प० २) असुन्। 'नञि हन एह च' (उ० ४.२२५) इति नञ्युपपदे विधीयमान एहादेशो बाहुलकाद् नञा विनापि भवति। 'अनेहसस्ते हरिवो अभिष्टौ' (ऋ० १०.६१.२२) इति निगमः॥

(७) ह्वरः–'ह्वृ कौटिल्ये' (भ्वा० प० ६६५) अत्तिकर्मा (२.८.१०) च। असुन्। ह्वरति कुटिलो भवत्यनेन, अत्ति वा।

(८) तपुषी। (९) जूर्णिः–'जूर्णिर्जवतेर्वा द्रवतेर्वा जीर्यतेर्वा' इति भाष्यम् (निरु० ६.४)। गच्छत्यनेन दुःखम्, लोकगर्हां वा, हिनस्ति परान् वा। निगमोऽन्वेषणीयः[1]॥

(१०) मन्युः[2]–'मन ज्ञाने' (दिवा० आ० ६५)। 'यजिमनिशुन्धिदसिजनिभ्यो युच्' (उ० ३.२०) इति युच्। बाहुलकादनादेशाभावः। ज्ञायते त्याज्यत्वेन। यद्वा मन्यतेर्दीप्तिकर्मणो (२.६.१३) युच्। दीप्यतेऽनेन तद्वान्। 'न हि ते क्षत्रं न सहो न मन्युम्' (ऋ० १.२४.६), 'मा हृणानस्य मन्यवे' (ऋ० १.२५.२) इति निगमौ॥

(११) व्यथिः–'व्यथ भयसंचलनयोः' (भ्वा० आ० ५१५)। 'इन् सर्वधातुभ्यः' (उ० ४.११९) इति इन्। बिभेत्यस्मात् सज्जनः, चलति वानेन स्वधर्मात्। 'पतत्रिभिरश्रमैरव्यथिभिः' (ऋ० ७.६९.७), 'अग्रे माकिष्टे व्यथिरा दधर्षीत्' (ऋ० ४.४.३) इति च निगमौ॥

इत्येकादश क्रोधनामानि॥१३॥

वर्तते (१)। अयते (२)। लोटते (३)। लोठते (४)। स्यन्दते (५)। कसति (६)। सर्पति (७)। स्यमति (८)। स्रवति (९)। स्रंसति (१०)। अवति (११)। श्चोतति (१२)। ध्वंसति (१३)। वेनति (१४)। मार्ष्टि (१५)। भुरण्यति (१६)। शवति (१७)। कालयति (१८)। पेलयति (१९)। कण्टति (२०)। पिस्यति (२१)। बिस्यति (२२)। मिस्यति (२३)। प्रवते (२४)। प्लवते (२५)।

---

१. 'क्षिप्ता जूर्णिर्न वक्षति' (ऋ० १.१२९.८) इति यास्केनोद्धृतो निगमः। (सु०)।

२. निरु० १०.३०। (सु०)।

च्यवते (२६)। कवते (२७)। गवते (२८)। नवते (२९)। क्षोदति (३०)। नक्षति (३१)। सक्षति (३२)। म्यक्षति (३३)। सचति (३४)। ऋच्छति (३५)। तुरीयति (३६)। चतति (३७)। अतति (३८)। गाति (३९)। इयक्षति (४०)। सश्चति (४१)। त्सरति (४२)। रंहति (४३)। यतते (४४)। भ्रमति (४५)। ध्रजति (४६)। रजति (४७)। लजति (४८)। क्षियति (४९)। धमति (५०)। मिनाति (५१)। ऋण्वति (५२)। ऋणोति (५३)। स्वरति (५४)। सिसर्ति (५५)। विषिष्टि (५६)। योषिष्टि (५७)। रिणाति (५८)। रीयते (५९)। रेजति (६०)। दघ्यति (६१)। दभ्नोति (६२)। युध्यति (६३)। धन्वति (६४)। अरुषति (६५)। आर्य्यति (६६)। सीयते (६७)। तकति (६८)। दीयति (६९)। ईषति (७०)। फणति (७१)। हनति (७२)। अर्दति (७३)। मर्दति (७४)। सर्सृते (७५)। नसते (७६)। हर्य्यति (७७)। इयर्त्ति (७८)। इर्त्ते (७९)। ईङ्खते (८०)। ज्रयति (८१)। श्वात्रति (८२)। गन्ति (८३)। आगनीगन्ति (८४)। जङ्गन्ति (८५)। जिन्वति (८६)। जसति (८७)। गमति (८८)। ध्रति (८९)। ध्राति (९०)। ध्रयति (९१)। वहते (९२)। रथर्यति (९३)। जेहते (९४)। ष्वःकति (९५)। क्षुम्पति (९६)। प्साति (९७)। वाति (९८)। याति (९९)। द्रूषति (१००)। द्राति (१०१)। द्रूळति (१०२)। एजति (१०३)। जमति (१०४)। जवति (१०५)। वञ्चति (१०६)। अनिति (१०७)। पवते (१०८)। हन्ति (१०९)। सेधति (११०)। अगन् (१११)। अजगन् (११२)। जिगाति (११३)। पतति (११४)।

इन्वति (११५)। द्रमति (११६)। द्रवति (११७)। वेति (११८)। हन्तात् (११९)। एति (१२०)। जगायात् (१२१)। अयथुः (१२२)। इति द्वाविंशशतं गतिकर्माणः॥ १४॥

अत्र वर्त्तते इत्यादीनां गत्यर्थानां गतिकर्मकत्वं स्कन्दस्वामिना प्रतिपादितम्[१]। अनेकार्थत्वाद्वा गतिकर्मत्वम्। एष्वप्रदर्शितनिगमानां निगमा अन्वेषणीयाः। अनुक्तविकरणानां भूवादित्वं ज्ञेयम्, अनुक्तौ परस्मैपदित्वञ्च॥

(१) वर्त्तते–'वृतु वर्त्तने' आत्मनेपदी (भ्वा० ५०८)॥

(२) अयते। (३) लोटते। (४) लोठते॥ (५) स्यन्दते–'स्यन्दू प्रस्रवणे' आत्मनेपदी (भ्वा० ५११)। 'स्यन्दन्तां कुल्या विषिताः पुरस्तात्' (ऋ० ५.८३.८) इति निगमः॥

(६) कसति[२]–'कस गतौ' (भ्वा० प० ५९९)।

(७) सर्पति–'सृप्लृ गतौ' (भ्वा० प० ७०९)। 'नमो अस्तु सर्पेभ्यः' (मा० सं० १३.६), 'अहिर्न जूर्णामति सर्पति त्वचम्' (ऋ० ९.८६.४४) इति निगमौ॥

(८) स्यमति[३]॥ **(९) स्रवति**–'स्रु गतौ' (भ्वा० प० ६७३)। 'अवस्रवेदघशंसोऽवतरम्' (ऋ० १.१२९.६) इति निगमः॥

(१०) स्रंसते–'स्रंसु अवस्रंसने' आत्मनेपदी (भ्वा० ५०४)। 'जातेन जातमति स प्र सर्सृते' (ऋ० २.२५.१) इति निगमः[४]। 'स्रंसतिरन्तर्णीतण्यर्थः'[५] इति हरदत्तः॥

(११) अवति–'अव रक्षणगत्यादौ' (भ्वा० प० ३९६) 'प्रावन् वाणीः पुरुहूतं धमन्तीः' (ऋ० ३.३०.१०), 'तं घेदग्निर्वृधावति' (ऋ० ८.७५.१४) इति निगमौ॥

---

१. द्र०–स्कन्दटीका (निरु० ३.९)।

२. कसेः सिकता (वर्णविपर्ययेण) इति महाभाष्यम्। लौकिकसंस्कृते 'विकासः' 'निकासः' प्राकृते भोजपुरीभाषायां च 'निकसना' इत्यादीनि कसेरनेकानि रूपाणि। (सु०)।

३. 'सीमिका (=पिपीलिका) स्यमनात्' –निरु० ३.२०। धातुपाठे शब्दार्थे समाम्नायते। परं सीमिकाशब्दार्थसाधनाय तु गत्यर्थत्वमेवोचितम्। (सु०)।

४. नैतत् स्रंसते रूपम्, अपितु सरतेः। अग्रे ७५ संख्यायाम् अयमेव निगम उदाहृतः, अतः 'अति स्रसेम वृजनं नांहः' (ऋ० ६.११.६) इत्युदाहरणमुचितम्। (सु०)।

५. मृग्यम्।

(१२) श्चोतति–'श्च्युतिर् क्षरणे' (भ्वा० प० ३४)। 'श्चोतन्ति ते वसो स्तोकाः' (ऋ० ३.२१.५) इति निगमः॥

(१३) ध्वंसति[1] ॥ **(१४) वेनति**–नैरुक्तधातुः। 'आ प्र द्रव हरिवो मा वि वेनः' (ऋ० ५.३१.२), 'नासत्या मा वि वेनतम्' (ऋ० ५.७५.७) इति निगमौ॥

(१५) मार्ष्टि–'मृजूष् शुद्धौ' अदादिः (प० ५९)। 'मृगो न भीमः' (ऋ० १.१५४.२)[2], 'उरावन्तरिक्षे मर्जयन्त' (ऋ० ७.३९.३) इति निगमौ॥

(१६) भुरण्यति[3]–'भुरण धारणपोषणयोः' कण्ड्वादिः (२४)। 'भुरण्यन्तं जनाँ अनु' (ऋ० १.५०.६), 'शुचिर्वां स्तोमो भुरणावजीगः' (ऋ० १०.२९.१) इति च निगमौ॥

(१७) शवति–'शव गतौ' (प० ४८०)। 'शु गतौ'[4] इति स्कन्दस्वामी, 'मा भेम शवसस्पते' (ऋ० १.११.२) इति निगमः॥

(१८) कालयति–'कल गतौ'[5] चुरादिरदन्तः (७२)। व्यत्ययेन स्थानिवद्भावाभावाद्[6] वृद्धिः। 'तं काले काल आगते यते'[4] इति निगमः। 'कालः कालयतेर्गतिकर्मणः' (निरु० २.२५) इति यास्कः॥

(१९) पेलयति[7]–'पेलृ फेलृ शेलृ गतौ' (भ्वा० प० ३६४)। 'वयांसि पक्वगन्धेन पिपीलिकाः प्रशादेन' (तै० सं० ५.७.२३.१) इति निगमः। 'पिपीलिका पेलतेर्गतिकर्मणः' (निरु० ७.१३) इति यास्कः॥

(२०) कण्टति–'कटि गतौ' (भ्वा० प० २१२)। 'यातुधानेभ्यः कण्टकीकारीम्' (मा० सं० ३०.८) इति निगमः। 'कण्टकः कन्तपो वा कृन्ततेर्वा कण्टतेर्वा स्याद् गतिकर्मणः' (निरु० ९.३२) इति निरुक्तम्। 'कण्टति पश्यति परान्'[4] इति स्कन्दस्वामी॥

(२१) पिस्यति[8]–'पिसृ पेसृ गतौ' (भ्वा० प० ४७६)। व्यत्ययेन श्यन्॥

---

१. 'प्राचाजिह्वं ध्वंसयन्तं तृषुच्युतम्' (ऋ० १.१४०.३) इति निगमः। (सु०)।
२. 'मृगो मार्ष्टेः' निरु० १.२०। परं न शुद्ध्यर्थकान्मार्ष्टेः। अपितु नैरुक्तगत्यर्थादेव। (सु०)।
३. वेदे भुरणशब्दो भर्त्रर्थे पालनार्थे वा प्रसिद्धः। यथा–ऋ० १.११७.११। तस्मादेव नामधातुरूपं कण्ड्वादिमिषेण व्याख्यायते। (सु०)।
४. मृग्यम्।
५. 'क्षेपे' इत्यपपाठो मुद्रितेषु।
६. 'स्थानिवद्भावाद्' इत्यपपाठो मुद्रितेषु।
७. तु०–'पिपीलः सर्पः' (ऋ० १०.१६.६)। (सु०)।
८. 'पिस्यति ह प्रजया पशुभिः' (चतुर्विंश-ब्रा० १.७.८.१८) इति निगमः। (सु०)।

(२२) बिस्यति[१], **(२३) मिस्यति**–'बिस प्रेरणे' (दिवा० प० १०७) 'मसी परिमाणे' (प० १११) दिवादिः। मिस्यतीतीकारश्छान्दसः। 'इ॒यं शुष्मे॑भिर्बिस॒खा इ॑वारुज॒त्' (ऋ० ६.६१.२) इति निगमः। अत्र 'बिस्यतिर्गतिकर्मसु पठ्यते'[२] इति स्कन्दस्वामी। ऋग्भाष्ये–बिस्यति मिस्यति इमौ नैरुक्तधातू[३]॥

(२४) प्रवते, (२५) प्लवते, (२६) च्यवते[४]–'च्युङ् छ्युङ् प्रुङ् प्लुङ् म्लुङ् क्लुङ् गतौ' (भ्वा० आ० ६८४)। 'अ॒भि प्र॑वन्त॒ सम॑नेव॒ योषाः' (ऋ० ४.५८.८), 'ति॒स्रः पृ॑थि॒वीरु॒परि॑ प्र॒वा दि॒वः' (ऋ० १.३४.८) इति निगमौ॥

(२७) कवते[५]–'कुङ् गतिशोषणयोः'। 'नी॒चीन॑बारं॒ वरु॑ण॒ः कव॑न्धम्' (ऋ० ५.८५.३) इति निगमः। 'कवतेर्गतिकर्मणः कवनमुदकम्'[६] इति स्कन्दस्वामी॥

(२८) गवते[५]॥ **(२९) नवते**–'णु स्तुतौ' अदादिः (प० २७)। 'बहुलं छन्दसि' (अ० २.४.७३) इति शपो लुगभावः, आत्मनेपदन्तु व्यत्ययेन। 'प्र॒धे॒नव॑ उद॒प्रुतो॑ नवन्त' (ऋ० ७.४२.१) इति निगमः॥

(३०) क्षोदति–'क्षुदिर् सम्प्रेषणे' रुधादिः, स्वरितेत् (६)। व्यत्ययेन शप्। 'क्षोद॑न्त॒ आपो॑ रिण॒ते व॒ना॒नि' (ऋ० ५.५८.६) इति निगमः॥

(३०) नक्षति–'नक्ष गतौ' (भ्वा० प० ४४२)। 'श॒फच्यु॑तो रे॒णुर्न॑क्षत॒ द्याम्' (ऋ० १.३३.१४) इति निगमः॥

(३२) सक्षति–'षच समवाये' स्वरितेत् (भ्वा० ७२३)। 'सिब्बहुलं लेटि' (अ० ३.१.३४) 'लेटोऽडाटौ' (अ० ३.४.९४)। नैरुक्तधातुर्वा। 'सक्ष्वा॑ दे॒व प्र ण॑स्पु॒रः' (ऋ० १.४२.१) इति स्कन्दस्वामी[७]॥

(३३) म्यक्षति[८]–म्यक्षेर्गतिकर्मणो रूपम्[९] इति स्कन्दस्वामी॥

---

१. 'बिसं बिस्यतेर्भेदनकर्मणः, वृद्धिकर्मणो वा' (निरु० २.२४)। (सु०)।
२. स्कन्दटीका (निरु० २.२४)। ३. मृग्यम्।
४. निघ० २.४ मध्ये च्यवानशब्दः, निघ० २.९ मध्ये च्यौत्लशब्दोऽपि च्युधातोर्व्याख्यायते। (सु०)।
५. धातुपाठे कुङ्, गुङ् आदयः शब्दार्थे समाम्नायन्ते। जोगुवे (ऋ० ५.६४.२), जोगुवानः (ऋ० १.६१.१४) आदयो गुङ्धातोर्निदर्शनम्। (सु०)।
६. स्कन्दटीका (निरु० १०.४)।
७. 'सक्षतेः सचतेर्वा गतिकर्मणो रूपम्' (ऋ० १.४२.१ स्कन्दभाष्यम्)।
८. 'मि॒म्यक्ष॒ वज्रो॑ नृपते॒ गभ॑स्तौ' (ऋ० १०.४४.२) इति निगमः। संहतं कृतवान् इत्यर्थः। (सु०)। ९. स्कन्दटीका (निरु० ६.६)।

(३४) सचति–'षच समवाये' (भ्वा०उभ० ७२३)। 'अच्छिन्नपत्राः सचन्ताम्' (ऋ० १.२२.११), 'अ॒ग्निं विश्वा॑ अ॒भि पृक्षः॑ सचन्ते' (ऋ० १.७१.७) इति निगमौ। 'सचत्यृच्छतीति गतिकर्मसु पाठात्'[1] इति स्कन्दस्वामी॥

(३५) ऋच्छति–'ऋ गतिप्रापणयोः' (भ्वा० प० ६७०)। 'पाघ्राध्मा०' (अ० ७.३.७८) इत्यादिसूत्रेण ऋच्छादेशः। 'वा॒चा स्ते॒नं शर॑व ऋच्छन्तु' (ऋ० १०.८७.१५) इति निगमः॥

(३६) तुरीयति[2]–नैरुक्तधातुः॥

(३७) चतति–'चते याचने' स्वरितेत् (भ्वा० ६०७)। 'दू॒राद् दूरम॑चीचतम्' (तै० आ० २.४.१) इति निगमः। 'चततिर्गत्यर्थे च'[3] इति भट्टभास्करमिश्रः॥

(३८) अतति–'अत सातत्यगमने' (भ्वा० प० ३१)। 'अ॒यमु॑ ते॒ सम॑तसि' (ऋ० १.३०.४) इति निगमः॥

(३९) गाति–'गाङ् गतौ' (भ्वा० आ० ६८१)। व्यत्ययेन परस्मैपदी। 'निर्यत् पूतेव॒ स्वधि॑ति॒ः शुचि॒र्गात्' (ऋ० ७.३.९) इति निगमः॥

(४०) इयक्षति–'यक्ष[4] पूजायाम्' चुरादिरात्मनेपदी (१६९१)[5]। व्यत्ययेन परस्मैपदम्। 'छन्दस्युभयथा' (अ० ३.४.११७) इति हि आर्द्धधातुकत्वात् णिलोपः। यजेः सनि वा रूपम्, अभ्यासस्य सम्प्रसारणं व्यत्ययेन। 'क॒विमि॑यक्षसि प्रयज्यो' (ऋ० ६.४९.४) इति निगमः। 'गतिकर्मा'[6] इति हरदत्तः॥

(४१) सश्चति–सचतेरेव छान्दसः शकार उपजनः। 'अस॑श्चन्ती॒ भूरि॑धारे॒ पय॑स्वती' (ऋ० ६.७०.२), 'ऋजी॒षिण॒ं वृषणं सश्चत श्रि॒ये' (ऋ० १.६४.१२) इति निगमौ॥

(४२) त्सरति–'त्सर छद्मगतौ' (भ्वा० प० ३७३)। 'अ॒भि त्सर॑न्ति धे॒नुभि॑ः' (ऋ० ८.२.६), 'अव॑त्सरत पृश॒न्यश्चि॑कि॒त्वान्' (ऋ० १.७१.५) इति निगमौ॥

---

१. स्कन्दभाष्ये (ऋ० १.२२.११)।

२. त्वरार्थे तुरशब्दः, तुरण्शब्दश्च वेदे संवर्तेते। तुरशब्दादस्मात् नामधातोः तुरीयति, तुरण्शब्दाच्च सिद्धं तुरण्यति। तुरशब्दो लोके तुरग, तुरंगम इत्यादिषु प्राकृतभाषायां च 'तुरन्त' आदिशब्देषु जीवति। (सु०)।

३. 'गत्यर्थो वा' इति भट्टभास्करः (तै० आ० २.४.१ भाष्ये)।

४. 'यज' इत्यपपाठो मुद्रितेषु।

५. 'तुदादिरा०' इत्यपपाठो मुद्रितेषु।

६. मृग्यम्।

(४३) रंहति[१]–'रहि गतौ' (भ्वा० प० ४८७)। 'सहस्रसाः शतसा अस्य रंहिः' (ऋ० १०.१७८.३), 'पुरो हरिभ्यां वृषभो रथो हि षः' (ऋ० १.५४.३) इति निगमौ। 'रथो रंहतेर्गतिकर्मणः' (निरु० ९.११) इति भाष्यम्॥

(४४) यतते–'यती प्रयत्ने' आत्मनेपदम् (भ्वा० २५)। 'हंसा इव श्रेणिशो यतन्ते' (ऋ० १.१६३.१०), 'मित्रं न यातयज्जनम्' (ऋ० ८.१०२.१२) इति निगमौ॥

(४५) भ्रमति–'भ्रमु चलने' (भ्वा० प० ५८९)। 'भृमिरस्यृषिकृन्मर्त्यानाम्' (ऋ० १.३१.१६) इति निगमः॥

(४६) ध्रजति–'ध्रज ध्रजि गतौ' (भ्वा० प० १३२) 'ध्राजिरेकस्य ददृशे न रूपम्' (ऋ० १.१६४.४४), 'अहिर्धुनिर्वात इव ध्रजीमान्' (ऋ० १.७९.१) इति निगमौ॥

(४७) रजति। (४८) लजति। (४९) क्षियति॥ (५०) धमति–'धमिः सौत्रः'[२] इति स्कन्दस्वामी। यद्वा 'ध्मा शब्दाग्निसंयोगयोः' (भ्वा० प० ६६१)। 'पाघ्राध्मास्था०' (अ० ७.३.७८) इत्यादिना धमादेशः। 'प्रावन्वाणीः पुरुहूतं धमन्तीः' (ऋ० ३.३०.१०), 'निःषीमद्भ्यो धमथो निःषधस्थात्' (ऋ० ५.३१.९) इति निगमौ॥

(५१) मिनाति–'मीञ् हिंसायाम्' (क्र्या० उभ० ४)। 'मीनातेर्निगमे' (अ० ७.३.८१) इति ह्रस्वः। 'मिनोति' इति पाठान्तरम्। तत्र 'डुमिञ् प्रक्षेपणे' स्वादिः (उभ० ४)। 'सप्तचक्रं रथमविश्वमिन्वम्' (ऋ० २.४०.३) इति निगमः। 'मीनातेरेतद्रूपम्, सर्वेणापि लोकेनावगन्तुमशक्यम्'[३] इति हरदत्तः॥

(५२) ऋण्वति–'रिवि रवि गतौ' (भ्वा० प० ३९३)। 'इदितो नुम् धातोः' (अ० ७.१.५८) 'रयेर्मतौ बहुलम्' (अ० ६.१.३७ वा०) इति बहुलवचनात् सम्प्रसारणम्[४]। 'व्यानुषग् वार्या देव ऋण्वति' (ऋ० १.५८.३) इति निगमः। 'ऋण्वतिर्गतिकर्मा, अन्तर्णीतण्यर्थः। विविधं गमयति'[५] इति स्कन्दस्वामिभाष्यम्॥

(५३) ऋणोति–'ऋण गतौ' तनादिः स्वरितेत् (५)। 'सञ्ज्ञापूर्वको विधिरनित्यः'[६] इति लघूपधगुणाभावः। 'अभिकृष्णेन रजसा द्यामृणोति' (ऋ० १.३५.९) 'ऋणोरपो अनवद्यार्णाः' (ऋ० १.१७४.२) इति निगमौ।

---

१. निघ० २.१५ मध्ये 'वातरंह'शब्देन तुलनामर्हति। (सु०)।
२. मृग्यम्। तु०–धमतिर्गतिकर्मा (निरु० ६.२) इति स्कन्दटीका। ३. मृग्यम्।
४. नास्त्यत्र रयिः, नापि च मतुप्। तथापि बाहुलकमहिम्ना सम्प्रसारणं प्रोच्यते। वस्तुतस्त्वत्र ऋण्वतिः धात्वन्तरम्। (सु०)।
५. तु०–स्कन्दभाष्यम् (ऋ० १.३५.९)। ६. सीर० प० ७१।

उभयोरपि 'ऋणोतिर्गतिकर्मा'[१] इति स्कन्दस्वामिभाष्यम्॥

(५४) स्वरति–'स्वृ शब्दोपतापयोः' (स्वा० प० ६६६) 'हरी इन्द्र प्रतद्वसू अभि स्वर' (ऋ० ८.१३.२७) इति निगमः। अत्र 'गतिकर्मा'[२] इत्युक्तं स्कन्दस्वामिना। 'अनिमेषं विदथाभिस्वरन्ति' (ऋ० १.१६४.२१) इत्यादौ 'गतिकर्मस्वपठितोऽपि गत्यर्थः'[३] इत्युक्तम्॥

(५५) सिसर्त्ति–'ऋ सृ गतौ' जुहोत्यादिः (प० १६)। 'अर्त्तिपिपर्त्योश्च' (अ० ७.४.७७) 'बहुलं छन्दसि' (अ० ७.४.७८) इति अभ्यासस्येत्वम्। 'प्र बाहवा सिसृतं जीवसे न' (ऋ० ७.६२.५) इति निगमः॥

(५६) विषिष्टि–'विष्लृ व्याप्तौ' जुहोत्यादिः (उभ० १३)। लेटि 'सिब्बहुलं लेटि' (अ० ३.१.३४)। 'अग्ने संवेषिषो रयिम्' (ऋ० ८.७५.११) इति निगमः। 'समन्तात् प्रापय' (तै० सं० २.६.११.३) इति भट्टभास्करमिश्रः॥

(५७) योषिष्टि–'यूष हिंसायाम्' (भ्वा० प० ४५७)। लेटि सिपि व्यत्ययेन गुणः॥

(५८) रिणाति–'री गतिरेषणयोः' क्र्यादिः (प० ३२) स्वादिश्च (प० ३०)। 'ऋघायमाणो निरिणाति शत्रून्' (ऋ० १.६१.१३), 'लोपामुद्रा वृषणं नी रिणाति' (ऋ० १.१७९.४) इति निगमौ॥

(५९) रीयते–'रीङ् श्रवणे'[४] दिवादिः (आ० २८)। 'एदु निम्नं न रीयते' (ऋ० १.३०.२) इति निगमः। 'रीयते रेजतीति गतिकर्मसु पाठाद् गत्यर्थः'[५] इति स्कन्दस्वामिभाष्यम्॥

(६०) रेजति[६]–नैरुक्तधातुः। 'हव्यो न य इषवान् मन्म रेजति' (ऋ० १.१२९.६) 'चलति गच्छतीत्यर्थः'[७] इति स्कन्दस्वामी॥

(६१) दघ्यति[८]–'दघ पालने' स्वादिः (प० २८)। व्यत्ययेन श्यन्।

---

१. स्कन्दटीका (निरु० ६.३१)। अपि द्र०–टि० ५, पृ० १७०।

२. मृग्यम्।

३. स्कन्दटीका (निरु० ३.१२)।

४. 'रीङ् स्रवणे' इति क्षीरतरङ्गिणी। एतदेव वैदिकपरम्परानुवर्ति। वेदे स्रवत्यर्थे प्रयोगस्य दृष्टत्वात्। (सु०)।

५. स्कन्दभाष्यम् (ऋ० १.३०.२)।

६. अत्रैव गतिनामसु १०३ संख्यायाम् 'एजति' इत्यपि पठ्यते। एवञ्च रेफादिक एजतिरत्र रेजतिः। निरु० १०.४२ मध्ये अयमेव निगम उदाहृतः। तत्र चासौ धातुरन्तर्णीतण्यर्थः। एवं च कम्पयतीत्यर्थः। (सु०)।

७. स्कन्दटीका (निरु० १०.४२)।

८. निरु० १.९ दघ्यतिः स्रवतिकर्मा इति प्रोच्यते। (सु०)।

'पश्चा स दध्या यो अघस्य धाता' (ऋ० १.१२३.५) इति च निगमः॥

(६२) दभ्नोति–'दम्भु दम्भे' स्वादिः (प० २३)[१]॥

(६३) युध्यति[२]–'युध सम्प्रहारे' दिवादिरात्मनेपदी (६२), व्यत्ययेन परस्मैपदी॥

(६४) धन्वति–'रिवि रवि धवि गत्यर्थाः' (भ्वा० प० ३९३)। 'परि सोम प्रधन्वा स्वस्तये' (ऋ० ९.७५.५), 'न यस्य द्यावापृथिवी न धन्व' (ऋ० १०.८९.६) इति निगमौ॥

(६५) अरुषति–नैरुक्तधातुः[३]। 'वि धूममग्ने अरुषं मियेध्य' (ऋ० १.३६.९), 'स्वसारः श्यावीमरुषीमजुष्रन्' (ऋ० १.७१.१), 'प्र नीचीरग्ने अरुषीरजानन्' (ऋ० १.७२.१०) इत्यादिषु स्कन्दस्वामिभाष्यम्–'अरुषतिर्गतिकर्मा' इति दृष्टम्। 'युञ्जन्ति ब्रध्नमरुषं चरन्तम्' (ऋ० १.६.१) इत्यादौ द्वित्र्योः प्रदेशयोः 'अरुष्यतिर्गतिकर्मा'[४] इत्यपि। उभयथा दृष्टमपि, बहुषु प्रदेशेषु दर्शनाद् अरुषतीति पाठो युक्तः।

(६६) आर्यति[५]–'मामार्यन्ति कृतेन कर्त्वेन च' (ऋ० १०.४८.३), 'तमिच्च्यौत्नैरार्यन्ति' (ऋ० ८.१६.६) इति निगमौ॥

(६७) सीयते–'षिञ् बन्धने' स्वादिः (उभ० २) क्र्यादिश्च (उभ० ५)। व्यत्ययेन श्यन्। 'डीयते' इति पाठान्तरम्। तदा 'डीङ् विहायसा गतौ' दिवादिः (आ० २५)। निगमदर्शनान्निर्णयः॥

(६८) तकति–'तक हसने'[६] (भ्वा० प० ८२) 'यः शूरसाता परितक्म्ये धने' (ऋ० १.३१.६), 'अन्योन्यान्मत्सर्गप्रतक्के'[७] इति निगमौ॥

(६९) दीयति[८]–'दीङ् क्षये' दिवादिः (आ० २४)। व्यत्ययेन परस्मैपदम्। 'श्येनो न दीयन्नन्वेति पाथः' (ऋ० ७.६३.५) इति निगमः॥

(७०) ईषति–'ईष गतिहिंसादानेषु' आत्मनेपदी (भ्वा० ४०६), व्यत्ययेन परस्मैपदम्। 'उतानागा ईषते वृष्ण्यावतः' (ऋ० ५.८३.२) इति

---

१. 'न त्वा केता आदभ्नुवन्ति भूर्णयः' (ऋ० १.५५.७) इति निगमः। (सु०)।
२. दश राजानः० सुदासं० न युयुधुः' (ऋ० ७.८३.७) इति निगमः। (सु०)।
३. वस्तुतस्तु नामधातुरयम्। अरुषशब्दो व्याख्यातः निघ० १.१४.१७, अस्माच्छब्दाद् अरुष्यतीति पाठे यगन्तः, 'अरुषति' इति पाठे तु क्विबन्तो नामधातुः। (सु०)।
४. मुद्रिते तु 'अरुषति' इत्येव पाठः।
५. आर्यशब्दात् क्विबन्तो नामधातुरिति प्रतीमः। (सु०)।
६. निरु० ११.२५ मध्ये तक्म्यशब्दं निर्ब्रुवन् तकतेर्गत्यर्थत्वं व्याप्त्यर्थत्वं वाचष्टे। अतो नात्र ह्रासार्थस्य कोऽपि सम्बन्धः। (सु०)। ७. मृग्यम्।
८. एष उत्क्षतनार्थे। 'डीयते' इत्यनेन साम्यमुपैति। नात्र क्षयार्थः। (सु०)।

निगमः। बहुषु 'ईषतीति गतिकर्मसु पाठात्'[१] इति स्कन्दस्वामी॥

(७१) फणति[२]–'फण गतौ' (भ्वा० प० ५६७)। 'पृथामङ्क्षांस्यन्वा-पनीफणत्' (ऋ० ४.४०.४) इति निगमः॥

(७२) हनति–'हन हिंसागत्योः' अदादिः (प० २)। 'बहुलं छन्दसि' (अ० २.४.७३) इति शपो लुग् न भवति। 'सं यद्धनन्त मन्युभिर्जनासः' (ऋ० ७.५६.२२) इति निगमः॥

(७३) अर्दति[३]–'अर्द गतौ याचने च' (भ्वा० प० ४५)॥

(७४) मर्दति–'मृदू मर्दने'[४]। व्यत्ययेन परस्मैपदम्॥

(७५) सर्सृते–'ऋ सृ गतौ' जुहोत्यादिः परस्मैपदी (१६)। व्यत्ययेना-त्मनेपदम्। पृषोदरादित्वात् (अ० ६.३.१०९) अभ्यासस्य रुगागमः। 'प्र सस्राति दीर्घमायुः प्रयक्षे' (ऋ० ३.७.१), 'जातेन जातमति स प्रसर्सृते' (ऋ० २.२५.१) इति निगमौ॥

(७६) नसते[५]–'णस कौटिल्ये' आत्मनेपदी (भ्वा० ४१७)। 'अक्षी-भ्यां ते नासिकाभ्याम्' (ऋ० १०.१६३.१) इति निगमः॥

(७७) हर्यति–'हर्य गतिकान्त्योः' (भ्वा० प० ३४४)॥

(७८) इयर्त्ति–'ऋ सृ गतौ' जुहोत्यादिः (प० १६)। 'अर्त्तिपिपर्त्योश्च' (अ० ७.४.७७)। 'कृष्टीरियर्त्योजसा' (ऋ० १.७.८) इति निगमः॥

(७९) ईर्त्ते–'ईर गतौ कम्पने च' अदादिरात्मनेपदी (८)। 'मत्सरासः प्रसुपः साकमीरते' (ऋ० ९.६९.६) इति निगमः॥

(८०) ईङ्खते–'ईखि गतौ' परस्मैपदी[६] (भ्वा० ८८)। 'य ईङ्खयन्ति पर्वतान्' (ऋ० १.१९.७) इति निगमः। अत्र 'ईङ्खतिर्गतिकर्मा'[७] इति स्कन्द-स्वामिभाष्यम्॥

(८१) व्रयति[८], **(८२) श्वात्रति**[९]–एतौ नैरुक्तधातू॥

---

१. 'ईषति फणतीति गतिकर्मसु पाठात्' इति स्कन्दभाष्यम् (ऋ० १.३९.८)। अपि द्र०–स्कन्दटीका (निरु० ४.२)।

२. लौकिकसंस्कृतेऽस्माद् धातोः 'फण'शब्दः। (सु०)।

३. 'आर्दन् धन्वानि सरयन्त आपः' (ऋ० ४.१७.२) इति निगमः। 'अर्दयति' इति वधकर्मसु–निघ० २.१९। (सु०)। ४. पाणिनीये धातुपाठे न संगृह्यते।

५. 'नसतिराप्नोतिकर्मा वा नमतिकर्मा वा' निरु० ७.१७। (सु०)।

६. 'आत्मनेपदी' इत्यपपाठो मुद्रितेषु। ७. स्कन्दभाष्यम् (ऋ० १.१९.७)।

८. धातुपाठेऽभिभवार्थे पठ्यते व्रयतिः। 'जिगादुप व्रयति गोरपीच्यम्' (ऋ० ९.७१.५) इति निगमः। (सु०)।

९. निघ० २.९ मध्ये श्वात्रशब्दो धननामसु पठ्यते तस्मात् क्विबन्तो नामधातुरेषः। (सु०)।

(८३) गन्ति–'गम्लृ गतौ' (भ्वा० प० ७०९)। व्यत्ययेन शपो लुक्। 'अङ्गिरोभिरागहि यज्ञियेभिः' (ऋ० १०.१४.५) इति निगमः॥

(८४) आगनीगन्ति–'गम्लृ गतौ' (भ्वा० प० ७०९)। 'दाधर्त्तिदर्धर्त्ति०' (अ० ७.४.६५) इत्यादिना आङ्पूर्वस्य गमेर्लटि [श्लौ] अभ्यासस्य चुत्वाभावो नीगागमश्च निपात्यते। यङ्लुगन्ताद्वा लटि निपातनाद्रूपसिद्धिः। 'वक्ष्यन्ती वेदा गनीगन्ति कर्णम्' (ऋ० ६.७५.३) इति निगमः॥

(८५) जङ्गन्ति–गमेर्यङ्लुकि 'नुगतोऽनुनासिकान्तस्य' (अ० ७.४.८५) इति नुकि च रूपम्। 'प्रातर्मक्षू धियावसुर्जगम्यात्' (ऋ० १.५८.९) इत्यत्र 'जङ्गन्तेर्गतिकर्मण एतद्रूपम्'[1] इति स्कन्दस्वामिभाष्यम्।

(८६) जिन्वति[2]–'इवि धिवि जिवि प्रीणनार्थाः' (भ्वा० प० ३९२)॥

(८७) जसति[3]–'जसु मोक्षणे' दिवादिः (प० १०१)। व्यत्ययेन शप्॥

(८८) गमति–'गम्लृ गतौ' (भ्वा० प० ७०९)। लेट्। 'लेटोऽडाटौ' (अ० ३.४.९४)। बाहुलकात् 'सिब्बहुलं लेटि' (अ० ३.१.३४) इति सिप् न भवति। यद्वा 'सर्वे विधयश्छन्दसि विकल्प्यन्ते' (परि० ३५) इति छत्वाभावः। 'त आगमन्तु त इह श्रुवन्तु' (ऋ० ६.४९.१) इति निगमः॥

(८९) ध्रति[4], **(९०) ध्राति**[4], **(९१) ध्रयति**[5]–त्रयोऽपि नैरुक्ताः॥

(९२) वहते–'वह प्रापणे' (भ्वा० उभ० ७३०) स्वरितेत्। 'वैश्वानरं मातरिश्वा परावतः' (ऋ० ६.८.४) इत्यत्र 'परापूर्वस्य वहतेर्गतिकर्मणः परावच्छब्दः'[6] इति स्कन्दस्वामी॥

(९३) रथर्यति–नैरुक्तधातुः। 'रंहतेर्वा रथो रंहणं गमनम् इच्छतीति क्यचि रथीयतीति प्राप्ते रेफ उपजन ईत्वाभावश्च पृषोदरादित्वात् (अ० ६.३.१०९)'[7] इति स्कन्दस्वामी[8]। 'एष देवो रथर्यति' (ऋ० ९.३.५) इति निगमः। माधवभाष्यं द्रष्टव्यम्॥

---

१. मृग्यम्।

२. 'त्वष्टेदेनं सौश्रवसाय जिन्वति' (ऋ० १.१६२.३) इति निगमः। (सु०)।

३. 'इरेव धन्वन्नि जजास ते विषम्' (अथर्व० ५.१३.१) इति निगमः, अ० २.३.५६ मध्ये तु ताडनार्थे जासयतिः। (सु०)।

४. 'धरति' इत्यस्य विविधं रूपं प्रतिभाति। (सु०)।

५. धातुपाठे तृप्त्यर्थे ध्रायतिः। (सु०)।

६. स्कन्दटीका (निरु० ७.२६)। तत्र 'वेतेर्गतिकर्मणः' इति मुद्रितपाठः।

७. स्कन्दटीका (निरु० ६.२९)। अयं स्कन्दस्वामिन आशयः, पाठस्तु भिन्नो मुद्रिते।

८. 'रथं कामयते' इति निरु० ६.२९। (सु०)।

(९४) जेहते–'वेहृ जेहृ बाहृ प्रयत्ने' आत्मनेपदी (भ्वा० ४२८)। 'ये तातृषुर्देवत्रा जेहमाना' (ऋ० १०.१५.९) इति निगमः। 'ओहाङ् गतावित्यस्य रूपम्'[1] इति स्कन्दस्वामी॥

(९५) ष्वःकति[2]। **(९६) क्षुम्पति**[3]। **(९७) प्साति**[4]। **(९८) वाति**[5]। **(९९) याति**[6]। **(१००) इषति**–'इष गतौ' दिवादिः (प० १९)। व्यत्ययेन शः। 'तत्रास्मभ्यमिषवः शर्म यंसन्' (ऋ० ६.७५.११) इति निगमः। 'इषुरिषतेर्गतिकर्मणः (९.१८) इति निरुक्तम्॥

(१०१) द्राति–'द्रा कुत्सायां गतौ' अदादिः (प० ४७)। 'वसूयवो मतयो दस्म दद्रुः' (ऋ० १.६२.११) इति निगमः॥

(१०२) द्रुळति–नैरुक्तधातुः॥

(१०३) एजति–'एजृ कम्पने' (भ्वा० प० १४३)। 'यूथेन वृष्णिरेजति' (ऋ० १.१०.२), 'यथा समुद्र एजति' (ऋ० ५.७८.८) इति निगमौ॥

(१०४) जमति–'जमु अदने' (भ्वा० प० ३१७)। 'न जामये तान्वो रिक्थमारैक्' (ऋ० ३.३१.२) इति निगमः। 'जामिर्जमतेर्गतिकर्मणः'[7] इति स्कन्दस्वामी॥

(१०५) जवति[8]–'जु गतौ'[9] इति क्षीरस्वामी। 'न पातव इन्द्र **बुजूर्तु** नः'[10], 'विपाट्छुतुद्री पयसा जवेते' (ऋ० ३.३३.१) इति निगमौ॥

(१०६) वञ्चति–'वञ्चु गतौ' (भ्वा० प० ११६)। 'नमो वञ्चते परिवञ्चते' (मा० सं० १६.२१) इति निगमः॥

---

१. स्कन्दटीका (निरु० ६.१४) पाठभेदेन।

२. धातुपाठे गत्यर्थे ष्वष्कतिः। अ० ६.१.६४ सूत्रे महाभाष्यवार्तिके तु ष्वस्कतिः। (सु०)।

३. ऋ० १.८४.८ मध्ये 'क्षुम्प'शब्दः। (सु०)।

४. 'सुपत्नान् मे प्साहि पूर्वान्' अथर्व० १०.३.१४, एवं विनाशनार्थः प्सातिः। निरुक्तोक्त-(५.१३)-अप्सशब्दन्तु प्साधातुना साधयते दुर्गाचार्यः। तत्तु नोचितम्। प्सातेः विनाशनार्थकत्वात्। अतो भस्धातोः साधनीयम्। (सु०)।

५. 'तन्नो वातो मयोभु वातु भेषजम्' (ऋ० १.८९.४) इति निगमः। लौकिकसंस्कृते तु वायोः प्रवहणार्थे नियतो वातिः। (सु०)।

६. ऋ० १.५०.९ प्राकृतेऽपि जीवति 'जाता है'। (सु०)।

७. स्कन्दटीका (निरु० ३.६)।

८. अ० ३.२.११७ सूत्रे व्याख्याकारैः जु इति सौत्रो धातुरिति प्रोच्यते। परमत्रोपलभ्यमानत्वादयमस्ति वस्तुतो नैरुक्तो धातुः। (सु०)।

९. अमरकोशोद्घाटनम् (१.१.६४) तत्र 'जुङ् गतौ' इति पाठः।

१०. मृग्यम्।

(१०७) अनिति–'श्वस प्राणने, अन च' (अदा० प० ६३)। 'अत्र मातर्यात्वनिति'[१] इति निगमः। 'अनितिर्गतिकर्मा'[१] इति माधवः॥

(१०८) पवते–'पूङ् पवने' (भ्वा० आ० ६९३)। 'नेन्द्राद‍ृते पवते धाम किञ्चन' (ऋ० ९.६९.६), 'सृकं संशार्य पविमिन्द्र तिग्मम्' (ऋ० १०.१८०.२) इति निगमौ॥

(१०९) हन्ति–'हन हिंसागत्योः' अदादिः (प० २)। 'नि येन मुष्टिहत्यया' (ऋ० १.८.२), 'आस्य वज्रमधि सानौ जघान' (ऋ० १.३२.७) इति निगमौ॥

(११०) सेधति–'षिधु गत्याम्' (भ्वा० प० ३७)। 'सेधतं द्वेषो भवतं सचाभुवा' (ऋ० १.३४.११) इति निगमः॥

(१११) अगन्–'गम्लृ गतौ' (भ्वा० प० ७०९)। लुङि तिपि च्लेः 'मन्त्रे घस०' (अ० २.४.८०) इति लुकि, 'इतश्च' (अ० ३.४.१००) 'संयोगान्तस्य लोपः' (अ० ८.२.२३) 'मो नो धातोः' (अ० ८.२.६४) इति मकारस्य नकारः। 'यदा मार्गन् प्रथमजा ऋतस्य' (ऋ० १.१६४.३७) इति निगमः॥

(११२) अजगन्–गमेर्लङि[२] 'बहुलं छन्दसि' (अ० २.४.७६) इति शपः श्लुः[३]। पूर्ववन्नत्वम् (अ० ८.२.६४)। 'यन्मातृरजगन्नपः' (ऋ० ३.९.२) इति निगमः॥

(११३) जिगाति–'गा स्तुतौ' छन्दसि जुहोत्यादिः (प० २३)। 'अर्त्तिपिपर्त्त्योश्च' (अ० ७.४.७७) 'बहुलं छन्दसि' (अ० ७.४.७८) इति अभ्यासस्येत्वम्। 'धेना जिगाति दाशुषे' (ऋ० १.२.३) इति निगमः। 'जगतीति पाठान्तरम्'[१] इति स्कन्दस्वामिभाष्यम्॥

(११४) पतति–'पत्लृ गतौ' (भ्वा० प० ५८४)। 'गोभिः सन्नद्धा पतति प्रसूता' (ऋ० ६.७५.११) इति निगमः॥

(११५) इन्वति–'इवि गतौ[४]' (भ्वा० प० ३९०)। 'देवीर्द्वारो बृहतीर्विश्वमिन्वा' (मा० सं० २९.३०) इति निगमः॥

(११६) द्रमति–'द्रम हम्म मीमृ गतौ' (भ्वा० प० ३१५)। 'प्र चन्द्रमास्तिरते दीर्घमायुः' (ऋ० १०.८५.१९) इति निगमः। 'चन्द्रमाश्चायन् द्रमति' इति भाष्यम् (निरु० ११.५)। 'द्रमतिर्गतिकर्मा'[१] इति स्कन्दस्वामी॥

---

१. मृग्यम्। २. 'गमेर्लुङि' इत्यपपाठो मुद्रितेषु।
३. 'श्नुः' इत्यपपाठो मुद्रितेषु। ४. 'इवि व्याप्तौ' इति पाणिनीये धातुपाठे।

(११७) द्रवति–'दु द्रु गतौ' (भ्वा० प० ६७७)। 'यत्रा नरः सं च वि च द्रवन्ति' (ऋ० ६.७५.११) इति निगमः॥

(११८) वेति–'वी गतिव्याप्तिप्रजनकान्त्यसनखादनेषु' अदादिः (प० ४१)। 'अपामीवां बाधते वेति सूर्य्यम्' (ऋ० १.३५.९), 'पदं न वेत्योदती' (ऋ० १.४८.६) इति निगमौ॥

(११९) हन्तात्–हन्तेर्लोटि तातङि रूपम्। 'हयन्तात्' इति केचित् पठन्ति। तत्र 'हय गतौ' (भ्वा० प० ३४२) इत्यस्य तातङि नकार[1] उपजनः॥

(१२०) एति–'इण् गतौ' अदादिः (प० ३८)। 'विचाकशच्चन्द्रमा नक्तमेति' (ऋ० १.२४.१०) इति निगमः॥

(१२१) जगायात्–'गा स्तुतौ' जुहोत्यादिः (प० २३)। लिङि 'छन्दस्युभयथा' (अ० ३.४.११७) इत्यार्द्धधातुकत्वेन 'ई हल्यघोः' (अ० ६.४.११३) इतीत्वं न भवति। 'स्वाशितः पुनरस्तं जगायात्' (ऋ० १०.२८.१) इति निगमः॥

(१२२) अयथुः–'ट्वितोऽथुच्' (अ० ३.३.८९) इति बाहुलकाद-यतेरथुज् भवति॥

इति द्वाविंशशतं गतिकर्माणः ॥ १४ ॥

नु (१)। मक्षु (२)। द्रवत् (३)। ओषम् (४)। जीराः (५)। जूर्णिः (६)। शूर्त्ताः (७)। शूघनासः (८)। शीभम् (९)। तृषु (१०)। तूर्यम् (११)। तूर्णिः (१२)। अजिरम् (१३)। भुरण्युः (१४)। शु (१५)। आशु (१६)। प्राशुः (१७)। तूतुजिः (१८)। तूतुजानः (१९)। तुज्यमानासः (२०)। अज्राः (२१)। साचीवित् (२२)। द्युगत् (२३)। ताजत् (२४)। तरणिः (२५)। वातरंहाः (२६)। इति षड्विंशतिः क्षिप्रनामानि ॥ १५ ॥

'क्षिप्रनामान्युत्तराणि षड्विंशतिः' (निरु० ३.९) इत्यत्र भाष्ये 'गुणस्य चैतानि क्षिप्रस्य तद्वतो वा [सत्त्वस्य] नामधेयानि। तथा च वक्ष्यति 'भुरण्युः शकुनिः (निरु० १२.२२) इति'[2] इति स्कन्दस्वामी। गुणश्च चिरकालविशिष्टा

---

१. 'तकारः' इत्यपपाठो मुद्रितेषु। २. स्कन्दटीका (निरु० ३.९) स्वल्पपाठान्तरेण।

स्वल्पकालविशिष्टा वा क्रिया। तत्कर्त्तरि कर्त्तुरल्पकालविशिष्टत्वञ्च तथाविध-क्रियाकर्त्तृत्वाल्पक्रियाद्वारकम्। तत्र 'मक्षूमक्षू कृणुहि' (ऋ० ३.३१.२०) इत्यादिषु क्रियाविशेषेण वा[१] क्रियारूपस्तद्वान्। विकृष्टगुणनामधेयोदाहरणानि[२] पुनरन्वेषणीयानि। केचित्तु 'यद्यपि गुणशब्दो व्यवच्छेदकमात्रवचनतया ह्यत्र कर्त्तृविशेषणभूतक्रियालक्षणे[३] व्यवच्छेदकविशेषे वर्त्तते विकृष्टा[४] गुणमात्रवाचिनि गम्यादौ लभ्या, तथापि सत्त्वशब्दस्य द्रव्यवचनत्वे स्वारस्यात् क्रियायाश्चा-द्रव्यत्वात् क्रियाया इव द्रव्यस्यापि नामधेयानि' इत्याहुः। इदानीं क्रियाविशेषणानि गुणनामधेयोदाहरणानि 'जीराः' 'अजिरम्' इत्यादीनि॥

(१) नु–निपातोऽयम्। 'इन्द्रस्य नु वीर्याणि प्रवोचम्' (ऋ० १.३२.१) इति निगमः॥

(२) मक्षु–'टुमस्जो शुद्धौ' (तु० प० १२५)। 'मस्जीषोः षुक्' (स० क० २.१.१०८) इति भोजसूत्रेण षुक्प्रत्ययः। संयोगादिलोपः[५]। अन्तर्णीतण्यर्थश्च मस्जी। क्रियायाः पापतो वा मज्जयति चिरकालमिति। 'मक्षूमक्षू कृणुहि गोजितो नः' (ऋ० ३.३१.२०) इति निगमः॥

(३) द्रवत्–'द्रु गतौ' (भू० प० ६७७)। 'संश्चत्तृम्पद्वेहत्' (उ० २.८६) इति बाहुलकाद् अतिप्रत्ययान्तो निपात्यते। द्रवत्यनेन। 'द्रवत्पाणी शुभस्पती' (ऋ० १.३.१) इति निगमः॥

(४) ओषम्–निपातोऽयम्। 'ओषमित् पृथिवीमहम्' (ऋ० १०.११९.१०), 'ओषः पात्रं न शोचिषा' (ऋ० १.१७५.३) इति निगमौ। 'अन्तोदात्तो निपातः स्यादाख्याने चाद्युदात्तता'[६] इति हि माधवः॥

(५) जीराः–जवतिर्गतिकर्मा। 'जोरी च' (उ० २.२४) इति रक्प्रत्यय ईकारश्चान्तादेशः[७]। जस्। 'जीरा अजिरशोचिषः' (ऋ० ९.६६.२५), 'जीरं दूतममर्त्यम्' (ऋ० १.४४.११) इति निगमौ॥

(६) जूर्णिः–व्याख्यातं क्रोधनामसु (२.१३.९)। निगमोऽन्वेषणीयः॥

(७) शूर्त्ताः–'तातव्रातालातसुत०' (स० क० २.२.१३४) इत्यादि-भोजसूत्र आदिशब्देन श्रृणात्यस्मात् क्तप्रत्ययान्तो निपात्यते। श्रृणाति फललाभम्।

---

१. 'स्वल्पकालविशिष्टा क्रिया तादृक्क्रियाविशेषेण वा' इत्यभिप्रेतं स्यात् ?

२. 'निकृष्ट०' इत्यपपाठो मुद्रितेषु। तु०–विकर्षः (निरु० ३.९)।

३. '०लक्षणा' इति मुद्रितेषु।

४. 'निकृष्टा' इति मुद्रितेषु।

५. नुमभावश्छान्दसः। दण्डनाथवृत्तौ 'मङ्क्षुः' इत्युदाह्रियते।

६. मृग्यम्।

७. अ० १.१.४ सूत्रे महाभाष्यवार्त्तिके तु रकिज्यः सम्प्रसारणेन जीरशब्दो व्याख्यायते। (सु०)।

'त्वया शूर्त्ता वहमाना अपत्यम्' (ऋ० १.१७४.६) इति निगमः। 'शूर्त्ताः क्षिप्रास्त्वरमाणाः'[१] इति भट्टभास्करमिश्राः॥

(८) शूघनासः–शु[२]शब्द उपपदे हन्तेः [ण्यन्तात्] 'युज् बहुलम्' (उ० २.७९) इति युचि बाहुलकात् कुत्वं णिलोपश्च निपात्यते दीर्घश्च। शीघ्रमागच्छत्यनेन क्रियाफलम्। तस्मात् जसोऽसुक्। 'सिन्धोरिव प्राध्वने शूघनासः' (मा० सं० १७.९५) इति निगमः। 'शूघनासः क्षिप्रगमनाः'[३] इत्युवटः॥

(९) शीभम्–'शीभृ कत्थने' (भ्वा० आ० २६७)। घञ्। शीभ्यतेऽनेन तद्वान्। 'प्रयात शीभमाशुभिः' (ऋ० १.३७.१४), 'आवक्षणाः पृणध्वं यात शीभम्' (ऋ० ३.३३.१२) इति निगमौ॥

(१०) तृषु[४]–['तृ प्लवनसंतरणयोः' भ्वा० प० ६९६] 'ञित्वरा सम्भ्रमे' (भ्वा० आ० ५२५)। 'मस्जीषोः षुक्' (स० क० २.१.१०८) इति बाहुलकात् षुक्प्रत्ययो धातोस्तृभावश्च। तरत्यनेन फललाभमद्य, त्वरतेऽनेन फलमागन्तुम्। 'तृष्वविष्यन्नतसेषु तिष्ठति' (ऋ० १.५८.२), 'तृष्वीमनु प्रसितिं द्रुणानः' (ऋ० ४.४.१) इति निगमौ॥

(११) तूयम्–व्याख्यातमुदकनामसु[५] (१.१२.९२)। वर्द्धतेऽनेन तद्वन्तः श्लाघ्याः। 'आपित्वे नः प्रपित्वे तूयमा गहि' (ऋ० ८.४.३) इति निगमः॥

(१२) तूर्णिः[६]–'ञित्वरा सम्भ्रमे'। 'वहिश्रिश्रुयुद्रुग्लाहात्वरिभ्यो नित्' (उ० ४.५२) इति नित्प्रत्ययः। त्वरतेऽनेन फलमागन्तुम्। 'अपो यत्तूर्णिश्चरति प्रजानन्' (ऋ १०.८८.६), 'सुतमा गन्त तूर्णयः' (ऋ० १.३.८) इति निगमौ॥

(१३) अजिरम्–'अज गतिक्षेपणयोः' (भ्वा० प० १३९)। 'अजिर-शिशिरशिथिलस्थिरस्फिरस्थविरखदिराः' (उ० १.५३) इति किरच्प्रत्ययो वीभावाभावश्च[७] निपात्यते। क्षिपति फलोत्पत्तिमाद्यम्। 'त्वामीळते अजिरं दूत्याय' (ऋ० ७.११.२) इति निगमः॥

(१४) भुरण्युः–[८]भुरण्यतिर्गतिकर्मा। 'मृगय्वादयश्च' (उ० १.३७)

---

१. मृग्यम्। २. 'सु' इत्यपपाठो मुद्रितेषु।
३. तथात्वे तु शु=क्षिप्रम्, घ्नन्ति=गच्छन्ति इति शूघनासाः इति निर्वचनं साधुतरं भाति। शु इति निपातः क्षिप्रार्थे अत्रैव १५ संख्यायां परिपठितः। (सु०)।
४. निरु० ६.१२ तरतेर्वा त्वरतेर्वा। (सु०)।
५. तद्वतोऽपि नामधेयत्वादेव तूयम्, तोयमित्युदकनाम। (सु०)।
६. निरु० ७.२७। (सु०)। ७. 'जिभावश्च' इत्यपपाठो मुद्रितेषु।
८. नामधातुरेष इति प्रोक्तं टिप्पण्यां निघ० २.१४.१६। 'भुरण्युः शकुनिः' निरु० १२.२२। (सु०)।

इति क्युप्रत्ययः। 'येना पावक चक्षसा भुरण्यन्तम्' (ऋ० १.५०.६) इत्यत्र स्कन्दस्वामिना 'भुरण्यतिः शीघ्रकरणार्थे'[१] इति प्रतिपादितम्। तत्र भुरण्यशब्दस्य शीघ्रविशिष्टगमनादिक्रियाकर्त्तरि सत्त्ववत्येव[२] वृत्तिः। 'श्रीणान्नुपस्थाद्दिवं भुरण्युः' (ऋ० १.६८.१) इति निगमः॥ 'भुरण्यतेर्गतिकर्मण इदम्, क्षिप्रनाम वा'[३] इति स्कन्दस्वामिभाष्यम्॥

(१५) शु–निपातः। 'श्वानं वस्तो बोधयितारमब्रवीत्' (ऋ० १.१६१.१३) इति निगमः। 'शु आशुगामी'[४] इति निरुक्तम्॥

(१६) आशु–'अशू व्याप्तौ' (स्वा० आ० १८)। 'कृवापाजिमिस्वदिसाध्यशूभ्य उण्' (उ० १.१)। व्याप्नोत्यनेन नरवैलक्षण्येन व्याप्तव्यम्। 'आशु इदं क्षिप्रनाम क्षिप्रगामी'[४] इति स्कन्दस्वामिभाष्यम्। आशु इति च शब्दस्वरूपापेक्षया नपुंसकनिर्देशः। तेन आशु इति निपातः[५], आशुरिति सत्त्ववाची च उभयमपि पठितं भवति। तथा च स्कन्दस्वामी 'एमाशुमाशवे भर' (ऋ० १.४.७) इत्यत्र ऋग्भाष्ये 'आशुमिति क्षिप्रनामैतत्' इति। 'आशु इति शु इति च क्षिप्रनामनी भवतः' (निरु० ६.१) इति निर्विवक्षयोपन्यास इति चेत्? न, निपातत्वादिति चोक्तत्वात्। 'त्वमग्ने द्युभिस्त्वमाशुशुक्षणिः' (ऋ० २.१.१) इति निगमः॥

(१७) प्राशुः–सत्त्ववाच्याशुशब्दवद् इति भाष्ये प्रकर्षार्थोऽतिरिक्तः। 'हस्तो हन्तेः प्राशुर्हनने' (निरु० १.७) इति भाष्ये 'प्राशुः क्षिप्रः' इति स्कन्दस्वामी। 'सुप्राव्यः प्राशुषाळेष वीरः' (ऋ० ४.२५.६) इति निगमः॥

(१८) तूतुजिः–'तुज हिंसायाम्' (भ्वा० प० १५०)। 'किकिनोः प्रकरणे' इत्यर्थे '०छन्दसि सदादिभ्यो दर्शनात्' (अ० ३.२.१७१ वा०) इति किन्प्रत्ययः। लिड्वद्भावाद् द्विर्वचनम्। 'तुजादीनां दीर्घोऽभ्यासस्य' (अ० ६.१.७) इति दीर्घः। तूर्णवदर्थः। 'आयुंक्षातामश्विना तूतुजिं रथम्' (ऋ० १०.३५.६) इति निगमः॥

(१९) तूतुजानः[६]–तोजतेर्लिटि कानजादेशः। 'इन्द्रा याहि तूतुजानः' (ऋ० १.३.६) इति निगमः। 'क्षिप्रार्थे स्वर आदित अन्तोदात्तः तुगर्थस्तूतुजानो महे मतः'[७] इति माधवः॥

(२०) तुज्यमानासः–तोजतेरेव कर्मणि लटि शानच्। 'तुज्यमानास

---

१. स्कन्दटीका (निरु० १२.२२)। स्कन्दभाष्ये (ऋ० १.५०.६) पाठान्तरम्।
२. 'सत्वन्येव' इत्यपपाठो मुद्रितेषु। ३. स्कन्दभाष्ये (ऋ० १.६८.१) 'वा' इति नास्ति।
४. तु०–श्वा शुयायी (निरु० ३.१८)। ५. लौकिकसंस्कृते तु केवलं निपात एव। (सु०)।
६. निरु० ६.२० त्वरमाण इत्यर्थः। (सु०)। ७. मृग्यम्।

आविषुः' (ऋ० १.११.५) इति निगमः॥

(२१) अभ्राः–अजतेः 'स्फायितञ्चिवञ्चि०' (उ० २.१३) इत्यादिना रग् बाहुलकात्। 'आर्द्धधातुके विकल्प इष्यते' (अ० २.४.५६ वा०) इति वैकल्पिकत्वाद् वीभावाभावः। अजिरवदर्थः। 'द्यौर्न भूमिं गिरयो नाभ्रान्' (ऋ० १०.५९.३) इति निगमः। 'अभ्रान् सत्वरान् शीघ्रान्'[१] इति भट्टभास्करमिश्रः॥

(२२) साचीवित्, (२३) द्युगत्[२], **(२४) ताजत्**–त्रयो निपाताः। साचीविदित्यस्य निगमोऽन्वेषणीयः। 'अतस्त्वा गीर्भिर्द्युगदिन्द्र केशिभिः' (ऋ० ८.९७.४) इति निगमः। अत्र माधवस्तु–'द्युगद् दीप्तिं द्युलोकं गच्छ हरिभिः'[१] इति चैतद्भाष्य उक्तवान्। 'तूतुजानः तरणिः द्युगत्'[३] इति क्षिप्रनामसु द्युगच्छब्दस्तेनाप्यपाठि। 'ताजत्······मार्च्छति'[४], 'ताजत्······प्रमीयते'[१] इति निगमौ॥

(२५) तरणिः–तरतेः 'अर्त्तिसृधृधम्यम्यश्यवितृभ्योऽनिः' (उ० २.१०४) इत्यनिप्रत्ययः। तृषुवदर्थः। 'विष्ट्वी शमी तरणित्वेन वाघतः' (ऋ० १.११०.४), 'तरणिर्विश्वदर्शतः' (ऋ० १.५०.४) इति निगमौ॥

(२६) वातरंहाः–'वा गतिगन्धनयोः' (अदा० प० ४३)। 'हसिमृग्रिण्वामिदमिलूपूधूर्विभ्यस्तन्' (उ० ३.८६) इति तन्। 'रमु क्रीडायाम्' (भ्वा० आ० ५९२) 'रमेश्च [वेगे]' (उ० ४.२१५) इत्यसुन् हुगागमश्च। वातवद् रंहो यस्य सः। 'वातरंहसो दिव्यासो अत्याः' (ऋ० १.१८१.२) इति निगमः॥

इति षड्विंशतिः क्षिप्रनामानि॥ १५॥

तळित् (१)। आसात् (२)। अम्बरम् (३)। तुर्वशे (४)। अस्तमीके (५)। आके (६)। उपाके (७)। अर्वाके (८)। अन्तमानाम् (९)। अवमे (१०)। उपमे (११)। इत्येकादशान्तिकनामानि॥ १६॥

---

१. मृग्यम्।

२. शब्दोऽयं 'द्यु'उपपदात् क्विबन्ताद् गमेः 'गमः क्वौ' (अ० ६ ४.४०) इत्यनुनासिकलोपेन शक्यते साधयितुम्। (सु०)।

३. नामानुक्रमणीपङ्क्तिः ६०२।

४. वस्तुतस्तु 'ताजगार्त्तिमार्च्छति' (तै० सं० २.१.५.७) इति शुद्धः पाठः। अन्यत्रापि ताजक्शब्दो दृश्यते। अ० १.४.५७ सूत्रे चादिगणे च ताजक्शब्दस्य पाठः। ताजत्शब्दस्य तु विरलः प्रयोगः। यथा–'ताजद् भङ्ग इव भज्यन्ताम्' (अथर्व० ८.८.३)। (सु०)।

(१) तळित्[१]–'तड आघाते' चुरादिः (४८)। 'ताडेर्णिलुक् च' (उ० १.९८) इतीतिप्रत्ययः। 'दूरे चित् सन्तळिदिवाति रोचसे' (ऋ० १.९४.७), 'या नो दूरे तळितो या अरातयः' (ऋ० २.२३.९) इति निगमौ॥

(२) आसात्–'आस उपवेशने' (अदा० आ० ११)। 'पुंसि सञ्ज्ञायां घः प्रायेण' (अ० ३.३.११८)। अन्तिक आसते। 'आ न इन्द्रो दूरादा न आसात्' (ऋ० ४.२०.१), 'स नो दूराच्चासाच्च' (ऋ० १.२७.३) इति निगमौ। 'आसादित्यन्तिकनाम'[२] इति स्कन्दस्वामिभाष्यम्। 'आसादासेः'[३] इति माधवः॥

(३) अम्बरम्–[अमतेः] 'कृदरादयश्च' (उ० ५.४१) इत्यरन्प्रत्ययो बुगागमश्च निपात्यते[४]। प्राप्यते ह्यासन्नम्। 'यन्नासत्या परावति यद्वा स्थो अध्यम्बरे' (ऋ० ८.८.१४) इति निगमः। स्कन्दस्वामिव्यतिरिक्तभाष्यकारमते। स्कन्दस्वामी तु 'अन्तरिक्षनाम'[५] इति॥

(४) तुर्वशे–व्याख्यातं मनुष्यनामसु (२.३.१५)। तूर्णं व्याप्यते अन्तिकम्। 'यन्नासत्या परावति यद्वा स्थो अधि तुर्वशे' (ऋ० १.४७.७) इति निगमः॥

(५) अस्तमीके–अस्तंशब्द उपपदे मातेः 'अलीकादयश्च' (उ० ४.२६) इति मीकच्प्रत्ययो[६] धातोर्लोपश्च निपात्यते[७]। अस्तं प्राप्यत अस्मिन्, अन्तिकस्थं हि नाश्यते। 'सचस्व नः पराक आ सचस्वास्तमीक आ' (ऋ० १.१२९.९) इति निगमः॥

(६) आके[८], **(७) उपाके**, **(८) अर्वाके**[९]–आङुपार्वच्छब्देषूपपदेषु क्रामतेः 'वलाकादयश्च' (उ० ४.१४) इति आकप्रत्ययो धातोर्लोपश्च निपात्यते[१०]। अर्वाग् गन्ता। आक्रम्यते उपक्रम्यते गन्तृभिः। क्रम्यते च

---

१. निघ० २.१९ वधनामसु, निरु० ३.१० शीघ्रगतित्वादन्तिकनामार्थे, ताडकत्वाच्च वधार्थ इति विवेकः। (सु०)।
२. स्कन्दभाष्यम् (ऋ० १.२७.३)।
३. मृग्यम्।
४. द्र०–निघ० १.३.१।
५. द्र०–स्कन्दटीका (निरु० ३.१०)।
६. 'वीकन्प्रत्ययः' इति मुद्रितेषु।
७. अस्तंशब्दो गृहनामसु–निघ० ३.४। 'ईके' शब्दश्चाञ्च्धातोः समीके, अभीके इतिवन्निष्पाद्यते। अत अस्तं=गृहं लक्षणया सर्वभोगावस्थानान्तिकत्वम् अञ्चति प्राप्नोति यत्र तद् अस्तमीके। (सु०)।
८. आके, पराके इति निघ० ३.२६ दूरनामसु। (सु०)।
९. निरु० ५.१२, १२.४४। (सु०)।
१०. आङ्पूर्वादञ्चतेः, उपपूर्वादञ्चतेः, अरुपूर्वादञ्चतेश्च 'घञर्थे कविधानम्०' (अ० ३.३.५८ वा०) इति कप्रत्ययेन, न्यङ्क्वादि-(अ० ७.३.५३)-कुत्वेन च शब्दा इमे शक्यन्ते साधयितुम्। (सु०)।

ह्यासन्नम्। 'आकेनिपासो अहभिर्दविध्वतः' (ऋ० ४.४५.६), 'सिन्धोरूर्मा उपाक आ' (ऋ० १.२७.६), 'यन्नासत्या पराके अर्वाकि अस्ति भेषजम्' (ऋ० ८.९.१५) इति निगमाः॥

(९) अन्तमानाम्–अन्तिकशब्दात्तमपि 'तमे तादेश्च' (अ० ६.४.१४९ वा०) इति तादिलोपः[१]। अन्तिकतममन्तमम्। 'अथा ते अन्तमानाम्' (ऋ० १.४.३), 'शिक्षा वस्वो अन्तमस्य' (ऋ० १.२७.५) इति निगमौ। आद्युदात्तमन्तमम्, अन्तोदात्तन्तु तृतीयाबहुवचनम्, 'अतो वयमन्तमेभिर्युजानाः' (ऋ० १.१६५.५) इति माधवः[२]॥

(१०) अवमे[३]–'अव रक्षणादिषु' (भ्वा० प० ३९६)। 'अवेर्धश्च वा' (स० क० २.२.२४९) इति अमच्प्रत्ययः। गम्यते ह्यासन्नम्। 'अस्मै बहूनामवमाय सख्ये' (ऋ० २.३५.१२), 'मध्यमस्यामवमस्यामुत स्थः' (ऋ० १.१०८.१०) इति निगमौ॥

(११) उपमे–उपपूर्वात् मिनातेः 'अन्येष्वपि दृश्यते' (अ० ३.२.१०१) इति डः। उपच्छिद्यते ह्यन्तिकम्। 'उपमे रोचने दिवः' (ऋ० ८.८२.४), 'अस्मा इदु त्यमुपमं स्वर्षाम्' (ऋ० १.६१.३) इति निगमौ॥

इत्येकादशान्तिकनामानि॥ १६ ॥

रणः (१)। विवाक् (२)। विखादः (३)। नदनुः (४)। भरे (५)। आक्रन्दे (६)। आहवे (७)। आजौ (८)। पृतनाज्यम् (९)। अभीके (१०)। समीके (११)। ममसत्यम् (१२)। नेमधिता (१३)। सङ्काः (१४)। समितिः (१५)। समनम्। (१६)। मीळ्हे (१७)। पृतनाः (१८)। स्पृधः (१९)। मृधः (२०)। पृत्सु (२१)। समत्सु (२२)। समर्ये (२३)। समरणे (२४)। समोहे (२५)। समिथे (२६)। सङ्खे (२७)। सङ्गे (२८)। संयुगे (२९)। सङ्गथे

---

१. अन्तशब्दाद् मध्यमादिलन्मप्रत्ययेन शब्दोऽयं साधुतरं शक्यते व्युत्पादयितुम्। य एवान्तस्स एवान्तमः स अन्तिकस्तु भवत्येव। यथा–अन्तिमः। (सु०)।

२. मृग्यम्।

३. परमप्रतिलोमार्थे प्रयुज्यते अवमशब्दः–'अग्निर्वै देवानामवमो विष्णुः परमः' (ऐ० ब्रा० १.१), अवम आसन्न इत्यर्थः। (सु०)।

(३०)। स॒ङ्ग्मे (३१)। वृ॒त्रतूर्य्ये॑ (३२)। पृ॒क्षे (३३)। आ॒णौ (३४)। शूर॑सातौ (३५)। वाज॑सातौ (३६)। स॒म॒नी॒के (३७)। खले॑ (३८)। खजे॑ (३९)। पौंस्ये॑ (४०)। म॒हा॒ध॒ने (४१)। वाजे॑ (४२)। अज्म॑ (४३)। सद्म॑ (४४)। सं॒यत् (४५)। संवतः (४६)। इति षट्चत्वारिंशत् संग्राम-नामानि॥ १७॥

(१) रणः–'अण रण क्वण शब्दार्थाः' (भ्वा० प० ३०३)। 'वशिरण्योरुपसंख्यानम्' (अ० ३.३.५८ वा०) इत्यप्। 'रणन्ति दुन्दुभयोऽत्र योधा वा परस्परं शब्दायन्ते। यद्वा रमतेः 'रास्नासास्नास्थूणावीणाः' (उ० ३.१५) इत्यादिना नप्रत्ययो मकारलोपश्च निपात्यते[1]। रमणीयो हि संग्रामो विचित्रकर्माधिष्ठानत्वात्। 'म॒रुत्वाँ॑ इन्द्र वृष॒भो रणा॑य' (ऋ० ३.४७.१) इति निगमः॥

(२) विवाक्–विविधा विरुद्धा वाचो यत्र योधानाम्। 'हव॑न्त उ त्वा॒ हव्यं॒ विवा॑चि' (ऋ० ७.३०.२) इति निगमः॥

(३) विखादः–'खद स्थैर्य्ये हिंसायाञ्च' (भ्वा० प० ४०)। विशिष्टं स्थैर्य्यमत्र शूराणां हिंसनं वा। 'तं वि॑खा॒दे सस्नि॑म॒द्य श्रु॒तं नर॑म्।' (ऋ० १०.३८.४) इति निगमः॥

(४) नदनुः–'णद अव्यक्ते शब्दे' (भ्वा० प० ४४)। 'अनुङ् नदेश्च' (उ० ३.५२) इति चानुङ् प्रत्ययः। 'य॒दा कृ॒णोषि॑ न॒द॒नुं समू॑ह॒सि' (ऋ० ८.२१.१४) इति निगमः॥

(५) भरे[2]–'डुभृञ् धारणपोषणयोः' (जु० उभ० ५)। 'नन्दिग्रहिपचा-दिभ्यः०' (अ० ३.१.१३४)। तत्र गणपाठः–'पचवचवपवदलपतजभराः' इति। बिभर्त्ति पोषयति सुभटानां धैर्य्यं यशो वा। यद्वा 'पुंसि सञ्ज्ञायां घः०' (अ० ३.३.११८)। बिभ्रत्यनेन जयलक्ष्मीं योधाः। उभयत्रापि पृषोदरादेरा-कृतिगणत्वादाद्युदात्तत्वम्। यद्वा 'भृ भर्त्सने' क्र्यादिः (प० २०) स्वादिः[3] च। भर्त्स्यन्ते हि तत्र शत्रवः। हरतेर्वा भः। ह्रियन्ते हि यत्र योद्धृणामायूंषि धनानि च। 'हृग्रहोर्भश्छन्दसि०' (अ० ८.२.३५ वा०)। 'अ॒स्मिन् भ॒रे॒ नृत॑म॒ं वाज॑सातौ' (ऋ० ३.३०.२२), 'अनु॑ क्रोशन्ति क्षि॒तयो॒ भरे॑षु' (ऋ० ४.३८.५)

---

१. तु०–निरु० ४.८, ९.२७, १०.४७। (सु०)।

२. निरु० ४.२४। (सु०)।

३. स्वादौ पाणिनीये नास्ति।

इति निगमौ॥

(६) आक्रन्दे–'कदि क्रदि क्लदि आह्वाने रोदने च' (भ्वा० प० ५८)। क्रन्दन्त्याह्वयन्तेऽन्योऽन्यमत्र, रुदन्ति वानेन बन्धुविनाशहेतुत्वात्। निगमोऽन्वेषणीयः॥

(७) आहवे–'ह्वेञ् स्पर्द्धायाम्०' (भ्वा० उभ० ७३४)। **'आङि युद्धे'** (अ० ३.३.७३) इत्यप्। 'बहुलं छन्दसि' (अ० ६.१.३३) इति सम्प्रसारणञ्च। आहूयन्तेऽत्र परस्परं स्पर्द्धया योधाः। 'न कश्चन संहत आहवेषु' (ऋ० ६.४७.१) इति निगमः॥

(८) आजौ[१]–'अज गतिक्षेपणयोः' (भ्वा० प० १३९)। 'अज्यतिभ्याञ्च' (उ० ४.१३२) इति इण्प्रत्ययः। बाहुलकाद् वीभावाभावः। अजन्ति गच्छन्त्यत्र विजयश्रियं योद्धारः, कातराः पराभवं वा। एवमर्थो गत्यर्थेषु द्रष्टव्यः। क्षिप्यन्ते शस्त्राणि क्षिपन्त्याक्षिपन्ति वान्योऽन्यं वीर्य्यतारतम्यात्। 'तेन वाजं सनिषदस्मिन्नाजौ' (ऋ० १०.७५.९) इति निगमः॥

(९) पृतनाज्यम्–पृतनाशब्दोपपदादजतेश्च अघ्न्यादित्वाद् (उ० ४.११३) यक्प्रत्ययः। पृतनानां सेनानामजनं यत्र[२]। 'गवां मुद्गलः पृतनाज्येषु' (ऋ० १०.१०२.९) इति निगमः॥

(१०) अभीके[३]–अभिपूर्वादितेः 'अलीकादयश्च' (द० उ० ३.४३) इतीकन्[४] प्रत्ययो धातोर्लोपश्च निपात्यते। यद्वा न विद्यते भीर्येषां ते अभीकाः। अभीकैः क्रियमाणत्वाद् अभीकमित्युच्यते। 'पाहि वज्रिवो दुरितादभीके' (ऋ० १.१२१.१४) इति निगमः॥

(११) समीके–संपूर्वोऽत्र एतिः। अभीकवत्। निगमोऽन्वेषणीयः[५]॥

(१२) ममसत्यम्–मम सत्यं जय इति योद्धृणां वाक्यविषयत्वान्ममसत्यमित्याचक्षते। पृषोदरादिः। 'त्वां जना ममसत्येष्विन्द्र' (ऋ० १०.४२.४) इति निगमः॥

(१३) नेमधिता–'सुधितवसुधितनेमधितधिष्वधिषीय च' (अ० ७.४.४५) इति नेमपूर्वाद्दधातेः तप्रत्यये इत्वमिडागमो वा निपात्यते। नेमशब्दो

---

१. निरु० ९.२३। (सु०)।

२. निरु० ९.२४ पृतनानां ज्या यत्र इत्यपि सम्भाव्यते। ऋ० ६.७५.३ इत्यादिषु ज्याशब्दः प्रयुज्यते वेदे। उद्ध्रियते चात्रैव 'समन' शब्दनिर्वचनप्रसङ्गे। (सु०)।

३. निघ० ३.२९.२ आसन्नार्थे, निरु० ३.२०। (सु०)।

४. द्र०-द० उ० ३.४३ माणिक्यदेववृत्तिः।

५. 'तमिन्नरो विह्वयन्ते समीके' (ऋ० ४.२४.३) भाष्ये दयानन्दः। (सु०)।

दानपर्य्यायः। सप्तम्येकवचनस्याकारादेशः (अ० ७.१.३९)। 'इन्द्रन्नरौ नेमधिता हवन्ते' (ऋ० ७.२७.१), 'विदन्मर्त्तौ नेमधिता चिकित्वान्' (ऋ० १.७२.४), 'नेमधिता न पौंस्या' (ऋ० १०.९३.१३) इति निगमाः॥

(१४) सङ्काः–सचतेर्गतिकर्मणो बाहुलकादङ्कप्रत्ययष्टिलोपश्च। यद्वा संपूर्वात् किरतेः कृन्ततेर्वा 'अन्येष्वपि दृश्यते' (अ० ३.२.१०१) इति डः। सङ्कीर्त्यन्तेऽत्र योद्धारः, सम्यक् कृत्यन्ते छिद्यन्त आयुधैर्वा। 'इषुधिः सङ्काः पृतनाश्च सर्वाः' (ऋ० ६.७५.५) इति निगमः[1]॥

(१५) समितिः–सम्पूर्वादितेः क्तिन्। 'राजानः समिताविव' (ऋ० १०.९७.६) इति निगमः॥

(१६) समनम्[2]–'षम ष्टम अवैक्लव्ये' (भ्वा० प० ५७२)। समन्ति अविक्लवा भवन्त्यस्मिन् शूराः। 'ज्या इयं समने पारयन्ती' (ऋ० ६.७५.३), इति 'वि या सृजति समनम्' (ऋ० १.४८.६) इति च निगमौ॥

(१७) मीळ्हे–'मीळ्हम्' इति धननामसु व्याख्यातञ्च (निघ० २.१०.११)। मीळ्हार्थत्वात् संग्रामोऽपि मीळ्हम्। यद्वा मीळ्हमस्मिन्नस्तीति 'लुगकारेकाररेफाश्च' (अ० ४.४.१२८ वा०) इति मत्वर्थीयस्य लुक्। 'प्रधने इत्यपठितमपि संग्रामनाम। प्रकीर्णान्यस्मिन्निति आभरणरूपेण चूडामणिकटक-विक्षेपात्'[3]। 'स्वर्मीळ्हे नरं आजा हवन्ते' (ऋ० १.६३.६) इति निगमः। 'स्वर्मीळ्हे। स्वरित्युदकनाम। उदकार्थे संग्रामे आजौ अन्यस्मिन्नपि संग्रामे'[4] इति स्कन्दस्वामिभाष्यम्। 'स जामिभिर्यत्समजाति मीळ्हे' (ऋ० १.१००.११) इति च॥

(१८) पृतनाः–'पृङ् व्यायामे' (तु० आ० ११२) 'पृपूभ्यां कित्' (स० क० २.२.२०६) इति तनन्प्रत्ययः। व्याप्रियन्तेऽत्र योद्धारः। 'रणाय निघ्नन् पृतनासु शत्रून्'[5] इति निगमः॥

(१९) स्पृधः–'स्पर्द्ध सङ्घर्षे' (भ्वा० आ० ३)। 'क्विब्वचिप्रच्छि०' (द० उ० १०.२) इत्यत्र 'प्राक् प्रत्ययनिर्देशादिष्टसिद्धिः'[6] इत्युक्तेः क्विप्। पृषोदरादित्वाद् (अ० ६.३.१०९) रेफस्य ऋकारोऽलोपश्च। शसि स्पृधः। स्पर्द्धन्तेऽत्र परस्परं योद्धारः। 'जयेम संयुधि स्पृधः' (ऋ० १.८.३) इति निगमः। 'स्पृध इति संग्रामनाम, 'तत्करोति०' (अ० ३.१.२६ वा०) इति

---

१. व्याख्यातोऽसौ निगमः शब्दव्युत्पत्तिश्च–निरु० ९.१४। (सु०)।
२. निरु ९.१८। (सु०)। ३. तु०–निरु० ९.२३ स्कन्दटीका।
४. तु०–ऋ० १.६३.६ स्कन्दस्वामिभाष्यम्।५. मृग्यम्।
६. तु०–माणिक्यदेववृत्तिः (द० उ० १०.२)।

णिजन्तात् क्विप्, संग्रामकारिण इत्यर्थः'[१] इति स्कन्दस्वामिभाष्यम्॥

(२०) मृधः[२]–'अमर्द्धन्ता सोमपेयाय देवा' (ऋ० ३.२५.४), 'मिहो नपातममृध्रम्' (ऋ० १.३७.११) इत्यादौ 'मृधिर्हिंसार्थः'[३] इति स्कन्दस्वामिभाष्यम्। तत्र पूर्ववत् क्विप् शस्। 'अयं सुतः सुमख मा मृधस्कः' (ऋ० २.१८.४), 'वि न इन्द्र मृधो जहि' (ऋ० १०.१५२.४) इति निगमौ॥

(२१) पृत्सु–पृतनाशब्दश्च संग्रामनामसु पठितोऽपि 'नासिकापृतनासानूनां नस्पृत्स्नवो वाच्याः' (अ० ६.१.६३ वा०) इति पृदादेशे विकृतत्वात् पुनः पाठः[४]। 'यमग्ने पृत्सु मर्त्यम्' (ऋ० १.२७.७) इति निगमः॥

(२२) समत्सु[४]–सम्पूर्वादत्तेः क्विप्। सम्भक्षयन्ति योद्धृणामायूंषि। सम्पूर्वाद् 'मदी हर्षे' (दि० प० ९८) इत्यस्माद्वा क्विपि समो मलोपः। संहृष्यन्ति तत्र सुभटाः[५]। 'समत्सु त्वा हवामहे' (ऋ० ८.११.८), 'धन्वना तीव्राः समदो जयेम' (ऋ० ६.७५.२) इति निगमौ॥

(२३) समर्ये–मर्यशब्दो मनुष्यनामसु व्याख्यातः (निघ० २.३.११) मर्यैः मरणधर्मिभिः सह वर्त्तते, सहशब्दस्य सभावः। 'मा स्मैतादृगप गूहः समर्ये' (ऋ० १०.२७.२४), 'तव स्वधाव इयमा समर्ये' (ऋ० १.६३.६) इति निगमौ॥

(२४) समरणे[६]–सम्पूर्वात् 'ऋ सृ गतौ' (जु० प० १६) इत्यस्माद् ल्युट्। 'मां वृताः समरणे हवन्ते' (ऋ० ४.४२.५) इति निगमः॥

(२५) समोहे–'उहिर् दुहिर् अर्दने' (भू० प० ४९१)। सम्पूर्वादुहेर्घञ्[७]। सम्यगुह्यन्ते अर्द्यन्तेऽत्र मिथो योद्धारः। 'अध्रिगव ओहम्' (ऋ० १.६१.१) इत्यादौ 'वहेरिदं रूपम्'[८] इति स्कन्दस्वामी। स च सम्पूर्वाद्वहेर्घञि पृषोदरादित्वात् (अ० ६.३.१०९) सम्प्रसारणे लघूपधगुणः। समुह्यन्तेऽत्र रथादिना सुभटाः, सुभटैर्वा कवचानि। 'समोहे वा य आशत' (ऋ० १.८.६) इति निगमः। 'अन्तोदात्तं संग्रामनाम, मध्योदात्तं णमुलन्तम्'[९] इति माधवः। 'इयर्त्ति रेणुं मघवा समोहम्' (ऋ० ४.१७.१३) इति णमुलन्तम्॥

---

१. द्र०–स्कन्दस्वामिभाष्यम् (ऋ० १.८.३)।

२. निरु० ७.२। (सु०)।

३. द्र०–निरु० ७.८ स्कन्दटीका।

४. निरु० ९.२०। वस्तुतस्तु 'समत्सु' इत्यादिवत् पृधातोः क्विपा निर्मितः 'पृत्' शब्दः, नास्ति विकृतः, अपितु शब्दान्तरम्। (सु०)।

५. तु०–स्कन्दटीका (निरु० ९.१७)।

६. निरु० ११.८। (सु०)।

७. 'नञ्पूर्वा०' इत्यपपाठो मुद्रितेषु।

८. द्र०–निरु० ५.११ स्कन्दटीका।

९. मृग्यम्।

(२६) समिथे[1]–सम्पूर्वादितेः 'समीणः' (उ० २.११) इति थक्। 'यदन्यरूपः समिथे बभूथ' (ऋ० ७.१००.६), 'स इन्महानि समिथानि मज्मना' (ऋ० १.५५.५) इति निगमौ॥

(२७) सङ्खे[2]–सम्पूर्वात् चक्षिङः 'अन्येष्वपि दृश्यते' (अ० ३.२.१०१) इति डः, 'बहुलं सञ्ज्ञाच्छन्दसोः' (अ० २.४.५४ वा०) इति ख्याञादेशः, पृषोदरादित्वाद्यकारलोपः। सम्पूर्वश्चक्षिर्वर्जनार्थः। सञ्चक्ष्यते कातरैः। यद्वा सम्पूर्वाद् 'अश्नोतेर्डित्' (स० क० २.२.५१) इति खप्रत्ययः, टिलोपेन धातुलोपः। समश्नुवतेऽस्मिन्नन्योऽन्यं योद्धारः। निगमोऽन्वेषणीयः॥

(२८) सङ्गे–सम्पूर्वाद् गमेः 'डोऽन्येष्वपि दृश्यते' (अ० ३.२.४८ वा०) इति डः, पूर्ववद् (अ० ३.२.१०१) वा। 'सङ्गे समत्सु वृत्रहा' (ऋ० १०.१३३.१) इति निगमः॥

(२९) संयुगे–'युजिर् योगे' (रु० उभ० ७)। घञ् उञ्छादिषु[3] (अ० ६.१.१६०) युगशब्दस्य पाठाद् निपातनादगुणत्वम्, 'विशेषेऽसौ निपातनमिष्यते, कालविशेषे रथाद्युपकरणे च'[4] इति वृत्तिः। सङ्गता रथयुगा यस्मिन्। निगमोऽन्वेषणीयः॥

(३०) सङ्गथे–सम्पूर्वात् 'गूथयूथप्रोथपृष्ठादयः' (स० क० २.२.१५७) इति थक्प्रत्ययान्तो निपात्यते। 'आये वामस्य सङ्गथे' (ऋ० २.३८.१०) इति निगमः॥

(३१) सङ्गमे–सम्पूर्वाद् गमेः 'ग्रहवृदृनिश्चिगमश्च' (अ० ३.३.५८) इत्यप्। 'जैत्रं यं ते अनुमदाम सङ्गमे' (ऋ० १.१०२.३) इति निगमः॥

(३२) वृत्रतूर्ये–वृत्रशब्दो मेघनाम, अत्रासुरः शत्रुवचनः। मेघनामसु व्याख्यातः (निघ० १.१०.२८) 'तूरी गतित्वरणहिंसनयोः' (दि० आ० ४३) अघ्न्यादित्वाद् (उ० ४.११३) यक्। वृत्रस्तूर्यतेऽनेनास्मिन् वा। 'इन्द्रोऽवृणीत वृत्रतूर्ये यूयमिन्द्रमवृणीध्वं वृत्रतूर्ये' (मा० सं० १.१३) इति निगमः[5]॥

(३३) पृक्षे–'पृची सम्पर्के' (रु० प० २४)। 'स्नुवृश्चिकृत्यृषिभ्यः

---

१. निरु० ५.८। (सु०)।

२. सङ्खेशब्दो नैव वेदे नापि च लोके क्वापि दृश्यते। ऋज्वर्थाभिधटीकापुस्तकातिरिक्तेषु सर्वत्र सङ्ख्ये इत्येव पाठः। अतः सङ्खे इत्यपपाठः, सङ्ख्ये इति भाव्यम्। शब्दोऽयं ब्राह्मणग्रन्थे गीतायां (१.१६) च दृश्यते। तदा च सम्पूर्वात् ख्याधातोः भावे कप्रत्ययेन सिद्ध्यति सङ्ख्य इति। (सु०)।

३. 'उक्थादिषु' इत्यपपाठो मुद्रितेषु।

४. द्र०–काशिकावृत्तिः (अ० ६.१.१६०)।

५. सामश्रमी तु 'बह्वनुसन्धानेनाप्यस्माभिर्न लभ्यते' अयं निगम इति भाषते। (सु०)।

कित्' (उ० ३.६६) इति बाहुलकात् सप्रत्ययो भवति। सम्पृञ्चन्त्यस्मिन् परस्परं योद्धारः। निगमोऽन्वेषणीयः॥

(३४) आणौ–'अण रण क्वण शब्दार्थाः' (भ्वा० प० ३०३)। 'अलिशलिपलितलिघसिजम्यणिपनिभ्य इण्' (स० क० २.१.१६८)। रणवदर्थः। 'त्वं शुष्णं वृजने पृक्ष आ॒णौ' (ऋ० १.६३.३) इति निगमः। 'आणौ इति संग्रामनाम'[1] इति स्कन्दस्वामिभाष्यम्।

(३५) शूरसातौ–'शु गतौ' (सौत्रः)[2] इत्यस्मात् 'शुसिचिमीनां दीर्घश्च' (उ० २.२६) इति क्रन्प्रत्ययः। 'षणु दाने' (त० उभ० २)। 'ऊतियूतिजूतिसातिहेतिकीर्त्तयश्च' (अ० ३.३.९७) इति सनोतेः 'जनसनखनाम्०' (अ० ६.४.४२) इत्यात्वे कृते स्वरो निपात्यते। स्यतेर्वा 'द्यतिस्यति०' (अ० ७.४.४०) इतीत्वाभावश्च। शूराणां सातिः वेदनादानं[3] मरणं वा येन। 'यः शूर॑साता॒ परि॑तक्म्ये॒' (ऋ० १.३१.६) इति निगमः॥

(३६) वाजसातौ[4]–वाजोऽन्नं दीयते येन। 'वृ॒धे च॑ नो भवतं॒ वाज॑सातौ' (ऋ० १.३४.१२) इति निगमः॥

(३७) समनीके–'अन प्राणने' (अदा० प० ६३)। 'अनिहृषिभ्यां किच्च' (उ० ४.१८) इति ईकन्प्रत्ययः। अनित्यनीकम्। यद्वा नञ्पूर्वान्नियतेः 'अलीकादयश्च'[5] (उ० ४.२६) इति निपात्यते। न नीयते न चाल्यत अनीकं सेनाविशेषः। सङ्गतान्यनीकानि यस्मिन्। 'भो॒जः शत्रून्त्समनी॒के॑षु॒ जेता॑' (ऋ० १०.१०७.११) इति निगमः॥

(३८) खले–'खज मन्थे' (भ्वा० प० १४१)। 'पुंसि सञ्ज्ञायां घः०' (अ० ३.३.११८)। व्यत्ययेन जकारस्य लकारः। मथ्यन्ते हि योद्धारस्तत्र। 'स्खल सञ्चलने' (भ्वा० प० ३६५) इत्यस्माद्वा घः। व्यत्ययेन सकारलोपः। स्खलन्ति तत्र कातराः[6]। 'खले॒ न प॒र्षान् प्रति॑ हन्मि॒ भूरि॑' (ऋ० १०.४८.७) इति निगमः॥

(३९) खजे–'खज मन्थे' (भ्वा० प० १४१)। पूर्ववत् साध्योऽर्थश्च। 'कर्म॑न् कर्मञ्छ॒तमू॑तिः खजङ्क॒रः' (ऋ० १.१०२.६) इति निगमः॥

---

१. द्र०–स्कन्दस्वामिभाष्यम् (ऋ० १.६३.३)।

२. नैरुक्तोऽप्ययं धातुः। द्र०–'शूरः शवतेर्गतिकर्मणः' निरु० ४.१३। (सु०)।

३. 'वेतनादानम्' इति मुद्रितेषु।

४. निरु० १२.४६। वाजस्य=अन्नस्य संसननं=सम्भजनं भवति यत्र स संग्राम इत्यर्थस्तत्र ध्वन्यते। (सु०)।

५. 'पिपीलिकादयश्च' इत्यपपाठो मुद्रितेषु।

६. तु०–स्कन्दटीका (निरु० ३.१०)।

(४०) पौंस्ये–बलनामसु व्याख्यातम् (निघ० २.९.२४)। अभिवर्धतेऽनेन······। निगमोऽन्वेषणीयः॥

(४१) महाधने–'मह पूजायाम्' (भ्वा० प० ४८५)। 'वर्तमाने पृषद्बृहन्महज्जगच्छतृवच्च' (उ० २.८५) इति निपातनम्। धिविः प्रीणनार्थः (भ्वा० प० ३९२)। इदित्त्वान्नुम्। पचाद्यच्। वकारलोपः, इकारस्याकारश्च पृषोदरादित्वात् (अ० ६.३.१०९)। धिनोतीति धनं प्रीणयतीति संग्रामो यद्द्वारा। महच्चादो धनञ्च महाधनम्। महद्धनमर्थोऽनेनेति वा। 'इन्द्रं वयं महाधने' (ऋ० १.७.५), 'नास्य वर्त्ता न तरुता महाधने' (ऋ० १.४०.८) इति निगमौ॥

(४२) वाजे–वाजशब्दो व्याख्यातो बलनामसु (निघ० २.९.२)। 'इन्द्र वाजेषु नोऽव' (ऋ० १.७.४), 'तं त्वा वाजेषु वाजिनम्' (ऋ० १.४.९) इति निगमौ॥

(४३) अज्म–'अज गतिक्षेपणयोः' (भ्वा० प० १३९)। मनिन्। 'अग्निर्नादीदेच्चित इद्धो अज्मन्ना' (ऋ० १.११२.१७) इति निगमः। 'यज्ञगृहे[१] युद्धे वा'[२] इति माधवः॥

(४४) सद्म[३]–सदेर्मनिन्। अवसाद्यन्तेऽत्र प्राणिनः। निगमोऽन्वेषणीयः॥

(४५) संयत्–सम्पूर्वाद् यमेर्यतेर्वा औणादिकः क्विप्। यमेरनुनासिकलोपः तुगागमः। संयतन्ते संयच्छन्ति हयादीन्। 'इळां नः संयतं करत्' (ऋ० ७.१०२.३)। 'संयत् संग्रामः'[२] इति हरदत्तः। 'आसंयतमिन्द्र णः स्वस्तिम्' (ऋ० ६.२२.१०) इत्यत्र 'संयतं युद्धम्'[२] इति माधवः॥

(४६) संवतः–सम्पूर्वाद् वनेः सम्पदादित्वात् क्विप्, अनुनासिकलोपे तुगागमः। संवननीयो हि शूरैः संग्रामः। 'परस्या अधि संवतः' (ऋ० ८.७५.१५), 'स संवतो नवजातस्तुतुर्यात्' (ऋ० ५.१५.३) इति निगमौ॥

इति षट्चत्वारिंशत् संग्रामनामानि॥ १७॥

इन्वति (१)। नक्षति (२)। आक्षाणः (३)। आनट् (४)। आष्टं (५)। आपानः (६)। अशत् (७)। नशत् (८)। आनशे (९)। अश्नुते (१०)। इति दश

---

१. निघ० ३.४ गृहनामसु। (सु०)। २. मृग्यम्।

३ निघ० ३.४ गृहनामसु, ३.३० द्यावापृथिवीनामसु। (सु०)।

व्याप्तिकर्माणः ॥ १८ ॥

(१) इन्वति–अत्र वधकर्मसु ऐश्वर्य्यकर्मसु च अनेकार्थत्वादि गति-कर्मादावुक्तमनुसन्धेयम्। 'इवि व्याप्तौ' (भ्वा० प० ३९०)। 'स धीनां योग-मिन्वति' (ऋ० १.१८.७) इति निगमः॥

(२) नक्षति[१]–'नक्ष रक्ष[२] गतौ' (भ्वा० प० ४४२)। नक्षद्दाभं ततुरिं पर्वतेष्ठाम्' (ऋ० ६.२२.२), 'वृद्धस्य चिद्वर्धतो द्यामिनक्षतः' (ऋ० १.५१.९) इति निगमौ। 'इन्वति नक्षतीति व्याप्तिकर्मसु पठितस्य इकार आगमश्छान्दसः'[३] इति स्कन्दस्वामिभाष्यम्॥

(३) आक्षाणः–अश्नोतेर्लटि शानच्। 'सिब्बहुलं लेटि' (अ० ३.१.३४) इति बाहुलकात् सिपि, उपधादीर्घश्च, व्रश्चादिषत्वे (अ० ८.२.३६), 'षढोः कः सि' (अ० ८.२.४१), 'आदेशप्रत्यययोः' (अ० ८.३.५९), णत्वम् (अ० ८.४.२)। 'आक्षाणे शूर वज्रिवः' (ऋ० १०.२२.११) इति निगमः। भाष्यं[४] द्रष्टव्यम्॥

(४) आनट्–'णश अदर्शने' (दि० प० ८३)। लुङि च्लेः 'मन्त्रे घसह्वरणश०' (अ० २.४.८०) इति लुक्। संयोगान्तलोपे[५], व्रश्चादिषत्वे (अ० ८.२.३६), जश्त्वम् (अ० ८.२.३९)। 'छन्दस्यपि दृश्यते' (अ० ६.४.७३) इति आडागमः। 'किमिच्छन्ती सरमा प्रेदमानट्' (ऋ० १०.१०८.१), 'घर्मस्वेदेभिर्द्रविणं व्यानट्' (ऋ० १०.६७.७) इति निगमौ। यद्वा अश्नोतेर्लिटि एश्त्वे (अ० ३.४.८१) व्यत्ययेन एशो लुक्, व्रश्चादिना षत्वम्, 'झलां जशोऽन्ते' (अ० ८.२.३९), 'वावसाने' (अ० ८.४.५५)। 'उपांशुना सम्ममृतत्वमानट्' (ऋ० ४.५८.१) इति निगमः॥

(५) आष्ट–अश्नोतेर्लुङि आत्मनेपदप्रथमपुरुषैकवचनम्। 'आष्ट प्रतिष्ठामविदद्धि गाधम्' (तै० सं० ४.३.११.४) इति निगमः॥

(६) आपानः–'आप्लृ व्याप्तौ' (स्वा० प० १५) शानच्। अन्ततेर्बन्धकर्मणः तद्रूपम्[६] इति स्कन्दस्वामी। 'आपानासो विवस्वतः' (ऋ० ९.१०.५) इति निगमः। भाष्यं[७] द्रष्टव्यम्॥

---

१. इयमेव नक्षत्रशब्दस्य प्रकृतिः। द्र०–'नक्षत्राणि नक्षतेर्गतिकर्मणः' निरु० ३.२०। निघ० २.१४ गतिकर्मसु। (सु०)।

२. पाणिनीये धातुपाठे नास्ति।

३. द्र०–स्कन्दस्वामिभाष्यम् (ऋ० १.५१.९)।

४. निरु० ३.१०।

५. हल्ङ्यादिलोपे (अ० ६.१.६८) इति युक्तम्।

६. मृग्यम्। निरु० ३.१० व्याख्यायां त्वाप्नोतेरेतद्रूपमुच्यते स्कन्देन।

७. निरु० ३.१०।

(७) अशत्–अश्नोतेर्व्यत्ययेन लुङि च्लेः पूर्ववत् लुक्। 'बहुलं छन्दस्यमाङ्योगेऽपि' (अ० ६.४.७५) इत्याडभावः। निगमोऽन्वेषणीयः॥

(८) नशत्–नश्यतेर्लेटि 'लेटोऽडाटौ' (अ० ३.४.९४) 'इतश्च लोपः परस्मैपदेषु' (अ० ३.४.९७)। 'स धीयते ते नशत्'[1], 'नकिः शवांसि ते नशत्' (ऋ० ८.६८.८) इति निगमौ॥

(९) आनशे–अश्नोतेर्लिटि रूपम्। 'नकिः स्वश्व आनशे' (ऋ० १.८४.६) इति निगमः॥

(१०) अश्नुते–'अतप्ततनूर्न तदामो अश्नुते' (ऋ० ९.८३.१), 'व्यश्नुहि तर्पया काममेषाम्' (ऋ० १.५४.९) इति निगमौ॥

व्याप्तिकर्मसु 'शाकपूणेरतिरिक्ता एते–विव्याः, विव्याचः, उरुव्यचाः, विव्रे'[2] इति स्कन्दस्वामी॥

इति दश व्याप्तिकर्माणः॥ १८॥

दभ्नोति (१)। श्नथति (२)। ध्वरति (३)। धूर्वति (४)। वृणक्ति (५)। वृश्चति (६)। कृण्वति (७)। कृन्तति (८)। श्वसिति (९)। नभते (१०)। अर्दयति (११)। स्तृणाति (१२)। स्नेहयति (१३)। यातयति (१४)। स्फुरति (१५)। स्फुलति (१६)। निवपन्तु (१७)। अवतिरति (१८)। वियातः (१९)। आतिरत् (२०)। तळित् (२१)। आखण्डल (२२)। द्रूणाति (२३)। रम्णाति (२४)। शृणाति (२५)। शम्नाति (२६)। तृणेळहि (२७)। ताळहि (२८)। नितोशते (२९)। निबर्हयति (३०)। मिनाति (३१)। मिनोति (३२)। धमति (३३)। इति त्रयस्त्रिंशद् वधकर्माणः॥ १९॥

(१) दभ्नोति–'दम्भु दम्भने' स्वादिः (प० २३)। 'न त्वा केता आ दभ्नुवन्ति भूर्णयः' (ऋ० १.५५.७) इति निगमः॥

(२) श्नथति–'श्नथ क्नथ क्रथ हिंसायाम्' (भ्वा० प० ५४२)।

---

1. मृग्यम्। 2. द्र०–स्कन्दटीका (निरु० ३.१०)।

'श्नथद् वृत्रमुत सनोति वाजम्' (ऋ० ६.६०.१), 'नव पुरो नवतिं च श्नथिष्टम्' (ऋ० ७.९९.५) इति निगमौ॥

(३) ध्वरति[१] ॥ **(४) धूर्वति**–'तुर्व धुर्व दुर्व थुर्व हिंसार्थाः' (भ्वा० प० ३८२)। 'उपधायाञ्च' (अ० ८.२.७८) इति दीर्घः। 'धूरसि धूर्व धूर्वन्तं धूर्व' (मा० सं० १.८) इति निगमः॥

(५) वृणक्ति–'वृजी वर्जने' रुधादिः (प० २३)। 'नि चक्रेण रथ्या दुष्पदा वृणक्' (ऋ० १.५३.९) इति निगमः॥

(६) वृश्चति–'ओव्रश्चू छेदने' तुदादिः (प० ११)। 'ग्रहिज्या०' (अ० ६.१.१६) इत्यादिना सम्प्रसारणम्। 'वृश्चा मध्यं प्रत्यग्रं शृणीहि' (ऋ० ३.३०.१७), 'विवृश्चद् वज्रेण वृत्रमिन्द्रः' (ऋ० १.६१.१०) इति निगमौ॥

(७) कृण्वति–'कृवि हिंसाकरणयोश्च' (भ्वा० प० ३९४) व्यत्ययेन 'धिन्विकृण्व्योर च' (अ० ३.१.८०) इत्येतन्न भवति[२]॥

(८) कृन्तति–'कृती छेदने' तुदादिः (प० १४४)। 'शे मुचादीनाम्' (अ० ७.१.५९)। 'वि दस्यूँर्योनावकृतो वृथाषाट्' (ऋ० १.६३.४) इति निगमः॥

(९) श्वसिति ॥ **(१०) नभते**–'णभ तुभ हिंसायाम्' आत्मनेपदी (भ्वा० ५०३)। 'नभन्तामन्यके समे' (ऋ० ८.३९.१) इति निगमः॥

(११) अर्दयति–'अर्द हिंसायाम्' आधृषीयः (चुरा० उभ० २५५)। 'वृत्रं विपर्वमर्दयत्' (ऋ० १.१८७.१) इति निगमः॥

(१२) स्तृणाति–'स्तृञ् आच्छादने' क्र्यादिः (उभ० १३) स्वादिः[३] (उभ० ६)। 'कदु वृत्रघ्नोअस्तृतम्' (ऋ० ८.६६.१०) इति निगमः॥

(१३) स्नेहयति–'ष्णिह स्नेहने' चुरादिः (प० ३९)। 'यः स्नीहितीषु पूर्व्यः' (ऋ० १.७४.२) इति निगमः। 'स्नेहयतिर्वधकर्मा'[४] इति स्कन्दस्वामी॥

(१४) यातयति[५]–'यत निकारोपस्कारयोः' चुरादिः (प० २०३)। 'अयातयन्त क्षितयो नवग्वाः' (ऋ० १.३३.६) इति निगमः॥

---

१. अध्वरशब्दव्याख्यानप्रसङ्गे–'ध्वरतिर्हिंसाकर्मा तत्प्रतिषेधः' निरु० १.८। (सु०)।

२. वस्तुतस्तु हिंसार्थकस्य सौवादिकस्य कृञ्धातोः 'कृणोति' इति रूपम्। लौकिकसंस्कृते 'कृण्वति' इति रूपस्याप्राप्तौ तन्निवारणाय धिन्विकृण्व्योरिति सूत्रम्। वेदे तु रूपमेतदुपलभ्यत एव। एवं च तत्सूत्रं वेदे न प्रवर्तते। एवं यदत्र वाचनिकमभिप्रेयते तद् वस्तुतः स्वाभाविकमेव। (सु०)। ३. 'रुधादिः' इत्यपपाठो मुद्रितेषु।

४. स्कन्दस्वामिभाष्यम् (ऋ० १.७४.२)।

५. धातोरस्य कष्टार्थः, अद्यापि लोके 'यातना' इत्यादिशब्देषु जीवति। (सु०)।

(१५) स्फुरति, (१६) स्फुलति–'स्फुर स्फुरणे', 'स्फुल सञ्चलने' तुदादिः (प० ९९,१०१), कुटादिः। 'पुदा क्षुम्पमिव स्फुरत्' (ऋ० १.८४.८), 'आर्त्नी इमे विष्फुरन्तौ अमित्रान्' (ऋ० ६.७५.४) इति निगमौ। 'स्फुरति स्फुलतीति वधकर्मसु पाठात्'[1] इति स्कन्दस्वामी॥

(१७) निवपन्तु–'डुवप बीजसन्ताने०' (भ्वा०उभ० ७२९) इत्यस्मात् लोट्। 'अन्यं ते अस्मन्निवपन्तु सेनाः' (ऋ० २.३३.११) इति निगमः॥

(१८) अवतिरति–तरतेर्लट् 'बहुलं छन्दसि' (अ० ७.४.७८) इतीत्वम्। 'अवातिर्ज्योतिषाग्निस्तमांसि' (ऋ० ६.९.१), 'यदिन्द्र शारदीरवातिरः' (ऋ० १.१३१.४) इति निगमौ॥

(१९) वियातः–'तत्र वियात इत्येतद् वियातयत इति वा वियातयेति वा' (निरु० ३.१०) इति भाष्ये स्कन्दस्वामी–['तेषु वियात इत्येतद् नाम इति शेषः]। तस्य समाधिमर्थं व्याचष्टे [वियातयत इति वा वियातयेति वा, विविधं याति शत्रून् इति वियाता, तस्य सम्बोधनम्]। विपूर्वस्य यातयतेर्वा शे प्रत्यये वियातय इति भवति धारयः पारय इतिवत्। तस्य सम्बोधनं वियातयेति। वियातयितरिति वा पाठान्तरम्'[2] इति। धारयपारयेति दृष्टान्तप्रदर्शनेन 'व्यत्ययो बहुलम्' (अ० ३.१.८५) इति अस्मादपि 'अनुपसर्गाल्लिम्पविन्द०' (अ० ३.१.१३८) इति सूत्रेण शप्रत्यय इति दर्शयति॥

(२०) आतिरत्–आङ्पूर्वात्तरतेर्लङ् पूर्ववद् इत्वम्। 'इन्द्रः पूर्भिरातिरद् दासमर्कैः'[3] इति निगमः॥

(२१) तळित्–अन्तिकनामसु व्याख्यातम् (निघ० २.१६.१)॥

(२२) आखण्डल–'खड खडि कडि भेदे' चुरादिः (प० ४९)। अस्मादाङ्पूर्वाद् 'मङ्गेरलच्' (उ० ५.७०) इति बाहुलकादलच्। 'आखण्डल प्रहूयसे' (ऋ० ८.१७.१२) इति निगमः॥

(२३) द्रूणाति–'द्रूञ् हिंसायाम्' क्र्यादिः (उभ० ९)। 'तृष्वीमनु प्रसितिं द्रूणानः' (ऋ० ४.४.१) इति निगमः॥

(२४) रम्णाति–'रमु क्रीडायाम्' भूवादिरात्मनेपदी (५९२), व्यत्ययेन श्ना, परस्मैपदम्॥

(२५) शृणाति–'शॄ हिंसायाम्' क्र्यादिः (प० १७) प्वादिश्च। 'शृणाति वीळु रुजति स्थिराणि' (ऋ० १०.८९.६) इति निगमः॥

---

१. स्कन्दटीका (निरु० ५.१७)। २. स्कन्दटीका (निरु० ३.१०)।
३. मृग्यम्।

(२६) शम्नाति–'शमु उपशमे' दिवादिः (प० ९१)। व्यत्ययेन श्ना 'शिशिरं जीवनाय कम्' (निरु० १.१०) इति निगमः। 'शिशिरं शृणातेः शम्नातेर्वा' इति निरुक्तम् (१.१०)। 'शम्नातेः हिंसार्थस्य'[१] इति स्कन्दस्वामी॥

(२७) तृणेळ्हि–'तृहि हिंसायाम्' रुधादिः (प० १८)। लटि तिपि एकारभावः[२]। निगमोऽन्वेषणीयः॥

(२८) ताळ्हि–'तड आघाते' चुरादिः (प० ४८)। लण्मध्यमः। पृषोदरादित्वाद् (अ० ६.३.१०९) रूपसिद्धिः। 'वि शत्रून्ताळ्हि वि मृधो नुदस्व' (ऋ० १०.१८०.२) इति निगमः॥

(२९) नितोशते–तोशते नैरुक्तो धातुः। 'मन्दी मदाय तोशते' (ऋ० ९.१०७.९), 'इन्दुरिन्द्राय तोशते नितोशते' (ऋ० ९.१०९.११), 'शुनासीरा हविषा तोशमाना' (शौ० सं० ३.१७.५) इति निगमाः॥

(३०) निबर्हयति–'बर्हि हिंसायाम्' चुरादिः (प० १३२), निपूर्वः। 'बर्हिष्मते नि सहस्राणि बर्हयः' (ऋ० १.५३.६) इति निगमः॥

(३१) मिनाति, (३२) मिनोति, (३३) धमति–गतिकर्मसु व्याख्याताः (२.१४.५०, ५१)। 'न ता मिनन्ति मायिनो न धीराः' (ऋ० ३.५६.१), 'न मिनन्ति वेधसः'[३], 'उशिग्भ्यो नामिमीत वर्णम्' (ऋ० २.४.५) इति मिनातेर्निगमाः। अत्र 'मिनातिर्वधकर्मा'[४] इति स्कन्दस्वामी। 'द्यावा वर्णं चरत आमिनाने' (ऋ० १.११३.२), 'उत द्विबर्हा अमिनः सहोभिः' (ऋ० ६.१९.१) इति मिनोतेर्निगमौ। अनयोः 'मिनोतिर्वधकर्मा'[५] इति स एव। 'वि सूर्यरश्मिरधमत्तमांसि' (ऋ० ४.५०.४) इति निगमः॥

इति त्रयस्त्रिंशत् वधकर्माणः ॥ १९ ॥

दिद्युत् (१)। नेमिः (२)। हेतिः (३)। नमः (४)। पविः (५)। सृकः (६)। वृकः (७)। वधः (८)। वज्रः (९)। अर्कः (१०)। कुत्सः (११)। कुलिशः (१२)। तुञ्जः[६] (१३)। तिग्मम् (१४)। मेनिः (१५)। स्वधितिः (१६)। सायकः (१७)। परशुः (१८)। इत्यष्टादश

---

१. स्कन्दटीका (निरु० १.१०)
२. 'तृणह इम्' (अ० ७.३.९२) इतीमि विकरणाकारेणैकादेशे सतीत्यभिप्रायः।
३. मृग्यम्।
४. स्कन्दटीका (निरु० ६.१७)।
५. 'मिनोतिर्हिंसाकर्मा' इति स्कन्दटीका (निरु० २.२०)।
६. 'तुजः' इति मुद्रितेषु।

वज्रनामानि ॥ २० ॥

(१) दिद्युत्[१]–'द्युत दीप्तौ' (भ्वा० आ० ४९३)। 'द्युतिगमिजुहोतीनां द्वे च' (अ० ३.२.१७८ वा०) इति क्विपि द्वित्वे, 'द्युतिस्वाप्योः सम्प्रसारणम्' (अ० ७.४.६७) इत्यभ्यासस्य सम्प्रसारणम्। द्योतत उज्ज्वलत्वात्। द्यतेर्वा क्विपि पृषोदरादित्वाद् रूपसिद्धिः। द्यति शत्रून्। 'अस्तुर्न दि॒द्युत्त्वे॒षप्र॑तीका' (ऋ० १.६६.४), 'यत्रा॑ वो दि॒द्युद्रद॑ति॒' (ऋ० १.१६६.६), 'या ते॑ दि॒द्युदव॑सृष्टा' (ऋ० ७.४६.३) इति निगमाः।

(२) नेमिः–नयतेः 'नियो मिः' (उ० ४.४४) इति मिप्रत्ययः। नयति शत्रून् विनाशम्, नीयन्तेऽनेन वा ऐश्वर्य्यात्। यद्वा 'णम प्रह्वत्वे०' (भ्वा० प० ७०८)। '०उत्सर्गश्छन्दसि सदादिभ्यो दर्शनात्' (अ० ३.२.१७१ वा०) इति किप्रत्ययः। लिड्वद्भावाद् द्विर्वचने 'अत एकहल्मध्येऽनादेशादेर्लिटि' (अ० ६.४.१२०)। अन्तर्णीतण्यर्थो नमिः। नमयति शत्रून्। 'अरिष्टनेमिं पृत॒नाज॑म॒शुम्' (ऋ० १०.१७८.१) इति निगमः॥

(३) हेतिः[२]–हन्तेर्हिनोतेर्वा 'ऊतियूतिजूतिसातिहेतिकीर्त्तयश्च' (अ० ३.३.९७) इति क्तिनि हन्तेर्नकारस्येत्वम्, हिनोतेर्गुणश्च निपात्यते। हन्यन्तेऽनेन शत्रवः, गम्यतेऽनेन जयः, वर्द्धयते वैश्वर्य्यम्। 'ब्र॒ह्म॒द्विषे॒ तपु॑षिं हे॒तिम॑स्य' (ऋ० ३.३०.१७) इति निगमः॥

(४) नमः–नमतेरसुन्। नेमिवदर्थः। निगमोऽन्वेषणीयः॥

(५) पविः–पवतिर्गतिकर्मा। 'अच इः' (उ० ४.१४०)। गन्ता शत्रून् गम्यतेऽनेन यश इति च। 'सृकं सं॒शाय॑ प॒विमि॑न्द्र ति॒ग्मम्' (ऋ० १०.१८०.२) इति निगमः। सृकतिग्मशब्दावत्र क्रियाशब्दौ॥

(६) सृकः–'सृ गतौ'[३] (भ्वा० प० ६६९)। 'सृवृभूशुषिमुषिभ्यः कक्' (उ० ३.४१) इति कक्प्रत्ययः। दर्शितनिगमः (ऋ० १०.१८०.२)॥

(७) वृकः[४]–'वृक आदाने' (भ्वा० आ० ७२) इगुपधलक्षणः कः (अ० ३.१.१३५)। आदत्ते शत्रुप्राणान्। वृणक्तेर्वा के पृषोदरादित्वाद् (अ० ६.३.१०९) रूपसिद्धिः। हेतिवदर्थः। निगमोऽन्वेषणीयः॥

(८) वधः[५]–'जनिवध्योश्च' (अ० ७.३.३५) इति वृद्धिप्रतिषेधः।

---

१. निरु० १०.७। (सु०)। २. निरु० ६.३। (सु०)।

३. समानधातुकः सृणिशब्दो व्याख्यायते निरु० ५.२८। (सु०)।

४. निघ० ३.२४ स्तेननामसु, निरु० ५.२१ विकर्तनात् श्वापि वृकः। निरु० १२.४४। (सु०)। ५. वधेर्हलन्तस्येदं रूपम्। द्र०–काशिकावृत्तिः (अ० ७.३.३५)।

हेतिवदर्थः। 'वृत्रस्य यद् भृष्टिमता वधेन' (ऋ० १.५२.१५), 'इन्द्रो अस्या अव वधर्जभार' (ऋ० १.३२.९) इति निगमौ॥

(९) वज्रः–'व्रज गतौ' (भ्वा० प० १५४)। 'ऋज्रेन्द्राग्रवज्र०' (द० उ० ८.४६) इत्यादिना रन्प्रत्ययान्तो निपात्यते। यद्वा वृणक्तेर्हेतुमण्ण्यन्ताद् रन्, गुणे प्राप्तस्य रेफस्य लोपः। वर्जयति प्राणैः शत्रून्। अन्ये वर्जयतिमेव विनाशार्थमाहुः[१]। विनाशयति शत्रून्। 'त्वष्टास्मै वज्रं स्वर्यं ततक्ष' (ऋ० १.३२.२) इति निगमः॥

(१०) अर्कः[२]–'अर्च पूजायाम्' (भ्वा० प० १२०)। 'कृदाधारार्चिकलिभ्यः कः' (उ० ३.४०) इति कप्रत्ययः। 'चोः कुः' (अ० ८.२.३०)। 'इन्द्रः पूर्भिदातिरद्दासमर्कैः' (ऋ० ३.३४.१) इति निगमः॥

(११) कुत्सः–कृन्ततेः। 'स्नुवृश्चिकृत्यृषिभ्यः कित्' (उ० ३.६६) इति सप्रत्ययः। कृन्ततेरकारस्य बाहुलकादुत्वम्। कृन्तति शत्रून्। यद्वा 'कुत्स क्षेपणे' चुरादिरात्मनेपदी (१६५)। घञ्। कुत्सयत्यनेन शत्रून्। 'सद्यो दस्यून् प्रमृण कुत्स्येन' (ऋ० ४.१६.१२) इति निगमः[३]। यकार उपजनः॥

(१२) कुलिशः[४]–'कुलिनः पर्वतान् श्यति पक्षच्छेदेन तनूकरोति'[५] इति[६] क्षीरस्वामी। कुलशब्द उपपदे श्यतेः 'आतोऽनुपसर्गे कः' (अ० ३.२.३) पृषोदरादित्वाद् (अ० ६.३.१०९) अकारस्येकारः। यद्वा कुलशब्दोपपदादन्तर्णीतण्यर्थात् 'शद्लृ शातने' (भ्वा० प० ५९४) इत्यस्माद् 'अन्येष्वपि दृश्यते' (अ० ३.२.१०१) इति डः, पूर्ववदिकारः। मेघस्यान्तं पर्वतस्य वा समुच्छ्रिताः प्रदेशाः कुलानीव, तेषां शातनात्[७]। 'स्कन्धांसीव कुलिशेना विवृक्णाहिः' (ऋ० १.३२.५) इति निगमः॥

(१३) तुञ्जः–तुञ्जेः[८] पचाद्यच्। हेतिवदर्थः। निगमोऽन्वेषणीयः[९]॥

(१४) तिग्मम्–'तिज निशाने' चुरादिः (प० १२०)। 'युजिरुचितिजां

---

१. तु०–स्कन्दटीका (निरु० ३.११)।

२. निघ० २.७ अन्ननामसु। निरु० ५.४, ६.२३। (सु०)।

३. निरुक्ते निन्दार्थकस्य कुत्सशब्दस्यापि प्रयोगो दृश्यते–निरु० २.३। (सु०)।

४. अनुमन्त्रं व्याख्यातो वज्रार्थः–निरु० ६.१७। (सु०)।

५. अमरकोशोद्घाटनम् १.१.४७।

६. 'स्कन्दस्वामी' इत्यधिकः मुद्रितेषु। स त्वपपाठः।

७. तु०–स्कन्दटीका (निरु० ६.१७)।

८. 'तुजेः' इति कोशेषु। चतुर्थे (४.३.८२) उल्लिख्यते।

९. 'इन्द्रस्तुजो बर्हणा आविवेश' (ऋ० ३.३४.५) इति निगमः। (सु०)।

कुश्च' (उ० १.१४६) इति मक्प्रत्ययः कुत्वञ्च। तिज्यते तीक्ष्णीक्रियते। 'तिग्मं तेजतेरुत्साहकर्मणः[1] तीक्ष्ण इहायुधं योद्धारमुत्साहयति तिग्मशातनः'[2] इति माधवः। 'वि तिग्मेन वृषभेणा पुरोऽभेत्' (ऋ० १.३३.१३) इति निगमः॥

(१५) मेनिः—मन्यतेः कान्तिकर्मणः '०उत्सर्गश्छन्दसि सदादिभ्यो दर्शनात्' (अ० ३.२.१७१ वा०) इति किप्रत्ययः। नेमिवत् प्रक्रिया। काम्यते हि आयुधम्। यद्वा 'मीञ् हिंसायाम्' (क्र्या० उभ० ४) 'वीज्याज्वरिभ्यः०' (उ० ४.४९) बाहुलकाद् निप्रत्ययः। हेतिवदर्थः। निगमोऽन्वेषणीयः[3]॥

(१६) स्वधितिः[4]—स्वशब्दोपपदाद् 'धि धारणे' (तु० प० ११५) इत्यस्मात् क्तिन्। स्वं धनं धीयतेऽनेन। 'न स्वधितिर्वनन्वति' (ऋ० ८.१०२.१९) इति निगमः॥

(१७) सायकः[5]—'षोऽन्तकर्मणि' (दि० प० ३८)। ण्वुलि[6] 'आतो युक् चिण्कृतोः' (अ० ७.३.३३)। शत्रूणामन्तकरः। 'षिञ् बन्धने' (क्र्या० उभ० ५) इत्यस्माद्वा ण्वुल् [,वृद्धिः]। बध्नाति स्थिरीकरोति तद्वद् ऐश्वर्य्यादि। 'पुरीषिणं सायकेना हिरण्ययम्' (ऋ० १०.४८.४), 'न सायकस्य चिकिते जनासः' (ऋ० ३.५३.२३) इति निगमौ॥

(१८) परशुः[7]—'शॄ हिंसायाम्' (क्र्या० प० १७)। 'आङ्परयोः खनिशॄभ्यां डिच्च' (उ० १.३३) इति कुप्रत्ययः। डित्त्वाट्टिलोपः। 'परान् शृणातीति परशुः'[8] इति दण्डनाथवृत्तिः। 'परान् श्यतीति परशुः'[9] इति क्षीरस्वामी। तत्र मृगय्वादित्वात् (उ० १.३७) कुः। 'शिशीते नूनं परशुं स्वायसम्' (ऋ० १०.५३.९), 'अभीदु शक्रः परशुर्यथा वनम्' (ऋ० ७.१०४.२१) इति निगमौ॥

इत्यष्टादश वज्रनामानि॥ २०॥

इरज्यति (१)। पत्यते (२)। क्षयति (३)। राजति (४)। इति चत्वार ऐश्वर्य्यकर्माणः॥ २१॥

---

१. निरु० १०.७। (सु०)। २. मृगयम्।
३. 'हेत्या हेतिरसि मेन्या मेनिरसि' (शौ०सं० २.११.१)। अत्र वज्रार्थकस्य हेतिशब्दस्य मेनिशब्दस्यापि च प्रयोगः। (सु०)। ४. निरु० १.१५। (सु०)।
५. लौकिकसंस्कृते शब्दोऽसौ बाणार्थकः। (सु०)।
६. 'वृद्धौ' इत्यधिकं कोशेषु। तत्तु न युक्तमत्र, उत्तरत्रोपयुज्यते।
७. 'फरसा' इति प्राकृतम्। (सु०)। ८. स० क० २.१.३३ हृदयहारिणीवृत्तिः
९. 'पराञ्शृणाति परशुः' इति मुद्रितेऽमरकोशोद्घाटने (२.८.९३)।

(१) इरज्यति[१]–कण्ड्वादिः (८)। 'य एकश्चर्षणीनां वसूनामिरज्यति' (ऋ० १.७.९), 'महो नृम्णस्य धर्मणामिरज्यसि' (ऋ० १.५५.३) इति निगमौ॥

(२) पत्यते–नैरुक्तधातुः। दिवादौ 'तप ऐश्वर्य्ये वा' (दि० आ० ४८) इत्यस्य स्थाने 'पत ऐश्वर्य्ये' इति केचित् पठन्ति[२]। 'उग्रं शवः पत्यते धृष्ण्वोजः' (ऋ० ३.३६.४), 'द्युतद्यामा नियुतः पत्यमानः' (ऋ० ६.४९.४) इति निगमौ॥

(३) क्षयति[३]–'सेदु राजा क्षयति चर्षणीनाम्' (ऋ० १.३२.१५) इति निगमः॥

(४) राजति–'राजृ दीप्तौ' (भ्वा०उभ० ५६९) स्वरितेत्। 'धियो विश्वा विराजति' (ऋ० १.३.१२), 'राजन्तमध्वराणाम्' (ऋ० १.१.८) इति निगमौ॥

इति चत्वार ऐश्वर्यकर्माणः॥ २१॥

राष्ट्री (१)। अर्य्यः (२)। नियुत्वान् (३)। इनइन (४)। इति चत्वारीश्वरनामानि॥ २२॥

अपस्तुङ्मनुष्याआयत्यग्रुवोवश्म्यन्धआवयत्योजोमघमघ्न्यारेळते-हेळोवर्त्ततेनुतळिद्रणइन्वतिदभ्नोतिदिद्युदिरज्यतिराष्ट्रीति द्वाविंशतिः॥

इति निघण्टौ द्वितीयोऽध्यायः समाप्तः॥ २॥

(१) राष्ट्री[४]–राजतैरैश्वर्य्यकर्मणः (निघ० २.२१.४)। 'ष्ट्रन् सर्वधातुभ्यः' (उ० ४.१६०) इति ष्ट्रन् प्रत्ययः। व्रश्चादिना (अ० ८.२.३६) षत्वम्। षित्त्वाद् ङीष् (अ० ४.१.४१)[५] 'राष्ट्री देवानां निषसाद मन्द्रा' (ऋ० ८.१००.१०) इति निगमः॥

(२) अर्य्यः[६]–'ऋ गतौ' (भ्वा० प० ६७०) इत्यस्माद् ण्यति प्राप्ते 'अर्य्यः स्वामिवैश्ययोः' (अ० ३.१.१०३) इति यन्निपात्यते। गम्यते हि

---

१. निघ० ३.५ परिचरणकर्मसु 'इरज्यन्नग्ने प्रथयस्व जन्तुभिः' (ऋ० १०.१४०.४) इत्यादिषु इरज्यतिः दीप्त्यर्थक इति भट्टभास्करः। तदर्थोऽपि वस्तुत ऐश्वर्यपूर्वक एव। (सु०)।

२. द्र०–क्षीरतरङ्गिणी (दिवा० ४८)।

३. निरु० ५.९ क्षयन्तमिति निवसन्तमित्यर्थः। एवं च भौवादिकः क्षिधातुरस्ति निवासार्थे। निवासपूर्वकमत्रैश्वर्यमिति निगूढमाकूतम्। धातुपाठस्तु भौवादिकस्य क्षिधातोः क्षयैश्वर्यमर्थं परिगणयन् नैरुक्तमर्थं विपर्येति स्वारस्यं च विजहाति। (सु०)।

४. निरु० ११.३० अनुमन्त्रं व्याख्यायते। (सु०)।

५. स्वरश्छान्दसः ?

६. निरु० ५.८ ईश्वरार्थे। (सु०)।

सर्वैरीश्वरः। 'समर्य्यो गा अजति यस्य वष्टि' (ऋ० १.३३.३), 'मंहिष्ठो अर्य्यः सत्पतिः' (ऋ० ८.१९.३६) इति निगमौ॥

(३) नियुत्वान्[1]–नियुच्छब्दो व्याख्यातः 'नियुतो वायोः' इत्यत्र (निघ० १.१५.१०)। नियुतोऽश्वाः ताभिस्तद्वान्[2]। 'तसौ मत्वर्थे' (अ० १.४.१९) इति भसंज्ञाया विधानाज्जश्त्वं न भवति। 'अतो नो यज्ञमवसे नियुत्वान्' (ऋ० ६.४०.५) इति निगमः॥

अस्य स्थाने 'पतिः' इति केचित् पठन्ति। तत्र 'पा रक्षणे' (अदा० प० ४९) 'पातेर्डतिः' (उ० ४.५८)। रक्षिता हीश्वरः। 'पिता पाता वा पालयिता वा' इति भाष्ये (निरु० ४.२१)। अत्र पातेर्ण्यन्ताद् बाहुलकाद् डतिः रूपसिद्धिश्च स्कन्दस्वामिना[3] उक्ता। 'शिप्रिन् वाजानां पते' (ऋ० १.२९.२) इति निगमः॥

(४) इनः–एतेः सम्भाजनार्थे वर्त्तमानात् समुपसर्गार्थविशिष्टाद्वा 'इण्सिञ्जिदीङुष्यविभ्यो नक्' (उ० ३.२) इति नक् प्रत्ययः। अर्थस्तु 'तत्रेन इत्येतत्सनितः' (निरु० ३.११) इत्यत्र स्कन्दस्वामिना[4] विस्तरेणोक्तः। 'इनो विश्वस्य भुवनस्य गोपाः' (ऋ० १.१६४.२१) इति निगमः॥

[अध्यायपरिसमाप्तिकं द्विर्वचनम्॥]

इति चत्वारीश्वरनामानि॥ २२॥

इति श्रीदेवराजयज्वविरचिते नैघण्टुककाण्डनिर्वचने

द्वितीयोऽध्यायः॥ २॥

—o—

१. निरु० ५.२७। (सु०)।

२. एवञ्च मूलतोऽश्वानामैश्वर्येण ईश्वरो नियुत्वान्। (सु०)।

३. द्र०–स्कन्दटीका (निरु० ४.२०)। ४. द्र०–स्कन्दटीका (निरु० ३.११)।

तृतीयोऽध्यायः

उरु (१)। तुवि (२)। पुरु (३)। भूरि (४)। शश्वत् (५)। विश्वम् (६)। परीणसा (७)। व्यानशिः (८)। शतम् (९)। सहस्रम् (१०)। सलिलम् (११)। कुवित् (१२)। इति द्वादश बहुनामानि॥ १॥

(१) उरु[१]–उर्वीति पृथिवीनाम (निघ० १.१.१०) इति उरुशब्दो व्याख्यातः। आच्छाद्यते ह्यनेनाल्पम्। 'उरुकृदुरुर्णस्कृधि' (ऋ० ८.७५.११) इति निगमः॥

(२) तुवि–तवतिर्वृद्ध्यर्थः। सौत्रो धातुः[२]। 'अच इः' (उ० ४.१४०)। वृद्धिर्हि बहुः। 'तुविजाता उरुक्षया' (ऋ० १.२.९) इति निगमः॥

(३) पुरु[३]–पृणातेः 'पृभिदिव्यधिगृधिधृषिहृषिभ्यः०' (उ० १.२३) इति कुप्रत्ययः। 'उदोष्ठ्यपूर्वस्य' (अ० ७.१.१०२) इति उत्त्वम्। पुरुरेव बहुः। 'पुरुभुजा चनस्यतम्' (ऋ० १.३.१) इति निगमः॥

(४) भूरि–भवतेः 'अदिशदिभूशुभिभ्यः क्रिन्' (उ० ४.६६) इति क्रिन्प्रत्ययः। भवति तत् सर्वस्यानुग्रहाय[४]। 'यत्र गावो भूरिशृङ्गा अयासः' (ऋ० १.१५४.६) इति निगमः॥

(५) शश्वत्–'टुओश्वि गतिवृद्ध्योः' (भ्वा० प० ७३६)। 'संश्चत्तृपद्वेहत्०' (स० क० २.१.२५९) इत्यादिना द्विर्वचनम्, अभ्यासवकारेकारस्याकारो डित्त्वमाद्युदात्तञ्च निपात्यते। परिवर्द्धते गम्यते वा। 'अहं धनानि सञ्जयामि शश्वतः' (ऋ० १०.४८.१), 'यच्चिद्धि शश्वता तना' (ऋ० १.२६.६) इति निगमौ॥

(६) विश्वम्। (७) परीणसा[५]॥ **(८) व्यानशिः**–विपूर्वादश्नोतेः

---

१. उरुशब्दस्य बह्वर्थत्वादेव 'उरुगाय'शब्दो महदर्थे निरुक्ते। (सु०)।

२. 'तुरुस्तुशम्यमः०' (अ० ७.३.९५) सूत्रे प्रोक्तत्वात् सौत्रः। निरु ९.२५ मध्ये 'तविषी' इति व्याख्यानप्रसङ्गे वृद्धिकर्मा धातुरेष स्वीकृतः। (सु०)।

३. निरुक्ते पुरुत्रा ९.१३, पुरुधा १०.३४, पुरुरथः ११.२३, पुरुवर्पः ११.२१ इत्यादिषु दृश्यते पुरुशब्दः। (सु०)।

४. तु०–स्कन्दटीका (निरु० २.७)।

५. पर्युपसर्गपूर्वात् नसतेः क्विप्। 'नहिवृति०' (अ० ६.३.११६) इत्यादिवदत्रापि पूर्वपदस्य दीर्घः। नसतिराप्नोतिकर्मा इति निरु० ७.१७। 'त्वं नं इन्द्र राया परीणसा' (ऋ० १.१२९.९) इति निगमः। (सु०)।

'०उत्सर्गश्छन्दसि सदादिभ्यो दर्शनात्' (अ० ३.२.१७१ वा०) इति किः। द्वित्वम्। 'अत आदेः' (अ० ७.४.७०), 'अश्नोतेश्च' (अ० ७.४.७२)। विविधं व्याप्नोति। 'व्यानशिः पवसे सोम धर्मभिः' (ऋ० ९.८६.५) इति निगमः॥

(९) शतम्–'पङ्क्तिविंशतित्रिंशच्चत्वारिंशत्पञ्चाशत्षष्टिसप्तत्यशीतिनवतिशतम्' (अ० ५.१.५८) इति दशानां दशतां शभावस्तत्प्रत्ययश्च[1] निपात्यते। 'दश दशतः' इति निरुक्तम् (३.१०)। निपातनसामर्थ्यात् बहुमात्रेऽपि वर्त्तते। 'वाजयामः शतक्रतो' (ऋ० १.४.९) इति निगमः॥

(१०) सहस्रम्–सहो बलनामसु व्याख्यातम् (निघ० २.९.१७)। रो मत्वर्थीयः। अल्पाभिभाविनी शक्तिरस्मिन्नस्ति। 'सहस्राक्षरा परमे व्योमन्' (ऋ० १.१६४.४१) इति निगमः॥

(११) सलिलम्–व्याख्यातमुदकनामसु (निघ० १.१२.७)। गम्यते हि जलवत्। 'अप्रकेतं सलिलं सर्वमा इदम्' (ऋ० १०.१२९.३) इति निगमः। 'सलिलमिति बहुनाम। सलिलं कुविदिति पाठात्'[2] इति हरदत्तः॥

(१२) कुवित्[3]–निपातोऽयम्। 'कुवित् सोमस्यापामिति' (ऋ० १०.११९.२) इति निगमः॥

इति द्वादश बहुनामानि॥ १॥

ऋहन् (१)। ह्रस्वः (२)। निघृष्वः (३)। मायुकः (४)। प्रतिष्ठा (५)। कृधु (६)। वम्रकः (७)। दभ्रम् (८)। अर्भकः (९)। क्षुल्लकः (१०)। अल्पः (११)। इत्येकादश ह्रस्वनामानि॥ २॥

(१) ऋहन्–'रुह बीजजन्मनि०' (भ्वा० प० ५९८), 'रह त्यागे' (भ्वा० प० ४८६) अनयोः 'संश्चत्तृपद्वेहदित्यादयः'[4] (स० क० २.१.२५९) इति रेफस्य सम्प्रसारणम्, अतिप्रत्ययः, शतृवद्भावश्च निपात्यते। तत्र दण्डनाथवृत्तिः–'आदिग्रहणाद्रिहद्वियदित्यादयो[5] भवन्ति'[6] इति। आरुह्यते हि ह्रस्वो वृक्षादिः, त्यज्यते वा दीर्घार्थिभिः। 'बृहन्तं चिदृहते रन्धयानि' (ऋ०

---

१. 'दशदशांशभावस्त च' इति मुद्रितेषु। २. मृग्यम्।

३. निरु० ४.१५। ४. 'संश्चतत्तृपद्वेहदादयः' इति साम्बशिवसंस्करणे।

५. 'आदिग्रहणाद्रेहद्वियत्पुरीतदादयः' इति साम्बशिवसंस्करणे।

६. स० क० २.१.२५९ हृदयहारिणी वृत्तिः।

१०.२८.९) इति निगमः॥

(२) ह्रस्वः[१]–'सर्वनिघृष्वरिष्वलिष्वशिवह्रस्वपद्वप्रह्वेष्वा अतन्त्रे' (द० उ० ८.१२७) इति वन्प्रत्ययान्तो निपात्यते। ह्रसतिः शब्दार्थे पठितः, तथाप्यत्र न्यूनार्थे वर्त्तति। 'नमो ह्रस्वाय च वामनाय च' (मा०सं० १६.३०) इति निगमः॥

(३) निघृष्वः–'घृषु सङ्घर्षे' (भ्वा० प० ४७०)। अत्र न्यूनार्थः। ह्रस्ववत् सिद्धिः[२] निगमोऽन्वेषणीयः[३]॥

(४) मायुकः–'डुमिञ् प्रक्षेपणे' (स्वा० उभ० ४)। 'कृवापा०' (उ० १.१) इत्युण्। स्वार्थे कः। प्रक्षिप्यतेऽनायासेन। निगमोऽन्वेषणीयः॥

(५) प्रतिष्ठा–प्रतिपूर्वात् तिष्ठतेर्न्यूनार्थात् 'घञर्थे कविधानम्०' (अ० ३.३.५८ वा०) इति बाहुलकात् कर्त्तरि कः। प्रतितिष्ठति। निगमोऽन्वेषणीयः[४]॥

(६) कृधु[५]–'कृती छेदने' (रु० प० १०)। 'पृभिदिव्यधिगृधिधृषिहृषिभ्यः०' (उ० १.२३) इत्यादिना बाहुलकात् कुप्रत्ययस्तकारस्य धकारश्च। 'निकृत्तमिव हि तद् भवति ह्रस्वत्वादेव'[६] इति स्कन्दस्वामी। 'यो अस्कृधोयुरजरः स्वर्वान्' (ऋ० ६.२२.३) इति निगमः॥

(७) वम्रकः[७]–'टुवम उद्गिरणे' (भ्वा० प० ५८८) न्यूनार्थः। 'स्फायितञ्चिवञ्चि०' (उ० २.१३) इत्यादिना बाहुलकाद्रक्। ततः स्वार्थे कः (अ० ५.३.९७)। 'वम्रकः पड्भिरुपसर्पदिन्द्रम्' (ऋ० १०.९९.१२) इति निगमः। 'स्तवानो वम्रो विजघान सन्दिहः' (ऋ० १.५१.९) इत्यत्र 'वम्रो ह्रस्वनामैतद् द्रष्टव्यम्। स्वार्थिककप्रत्ययान्तो ह्रस्वनामसु पठितम्'[८] इति स्कन्दस्वामी॥

(८) दभ्रम्[९]–दभतिर्न्यूनार्थः[१०]। 'स्फायितञ्चिवञ्चि०' (उ० २.१३) इति रक्। 'नेड् वशि कृति' (अ० ७.२.८) इतीट्त्वप्रतिषेधः। 'दभ्रं पश्यद्भ्य

---

१. निरु० ३.१३। (सु०)।

२. 'इगुपधलक्षणः कः। ह्रस्ववदर्थः।' इति मुद्रितेषु।

३. 'अणुभिश्च महद्भिश्च निघृष्वैरसमायुतैः'–तै० आ० १.१२.२, ३। (सु०)।

४. 'अशीमहि गाधमुत प्रतिष्ठाम्' (ऋ० ५.४७.७) इति प्रतिष्ठाशब्दस्य कृते गाधप्रतिलोमः निगमः। (सु०)।

५. निरु० ६.३। (सु०)।

६. द्र०–स्कन्दस्वामिभाष्यम् (ऋ० ६.२२.३)।

७. निरु० ५.३। या उपजिह्विका मृदं वमन्ति वल्मीकनिर्माणाय ता ह्रस्वा एव। अतो वम्रशब्दोऽपि ह्रस्वार्थः। (सु०)।

८. तु०–स्कन्दटीका (निरु० ५.३)।

९. निघ० ३.२.९। (सु०)।

१०. धातुपाठे दभतिर्न्यूनार्थे नैव परिगण्यते। सौत्र इति सायणः। (सु०)।

उर्विया विचक्षं' (ऋ० १.११३.५) इति निगमः॥

(९) अर्भकः[१]॥ (१०) क्षुल्लकः–क्षुधं लाति। 'आतोऽनुपसर्गे कः' (अ० ३.२.३)। स्वार्थे कः।[२] 'क्षुधं लाति क्षुल्लकः'[३] इति क्षीरस्वामी। 'नमो महद्भ्यः क्षुल्लकेभ्यश्च वो नमः' (तै० सं० ४.५.४.१) इति निगमः॥

(११) अल्पः–'अल भूषणपर्य्याप्तिवारणेषु' (भ्वा० प० ३४५)। 'अलितलिशीङ्पृपाभ्यः[४] पः' (स० क० २.२.२०७) इति पः। 'अल्पा एनं पशवो मूञ्जन्त उपतिष्ठेरन्'[५] इति निगमः॥

इत्येकादश ह्रस्वनामानि॥ २॥

महत् (१)। ब्रध्नः (२)। ऋष्वः (३)। बृहत् (४)। उक्षितः (५)। तवसः (६)। तविषः (७)। महिषः (८)। अभ्वः (९)। ऋभुक्षाः (१०)। उक्षा (११)। विहायाः (१२)। यह्वः (१३)। ववक्षिथ (१४)। विवक्षसे (१५)। अम्भृणः (१६)। माहिनः (१७)। गभीरः (१८)। ककुहः (१९)। रभसः (२०)। व्राधन् (२१)। विरप्शी (२२)। अद्भुतम् (२३)। बंहिष्ठः (२४)। बर्हिषत् (२५)। इति पञ्चविंशतिर्महन्नामानि॥ ३॥

(१) महत्–'मानेनान्यान् जहातीति शाकपूणिर्मंहनीयो भवतीति वा' (निरु० ३.१३) इति भाष्यम्। 'मानेन स्वगुणेन परिमाणेनान्यान्, यदपेक्ष्य तस्य महत्त्वम्, तान् जहाति अतिक्रामति मानशब्दाद् जहातेश्चेति शाकपूणिः। निर्वचनलाघवाद् मंहतेः पूजाकर्मणो वदत्याचार्य्यः'[६] इति स्कन्दस्वामी। उभयत्रापि 'वर्त्तमाने पृषद्बृहन्महत्०' (उ० २.८५) इत्यतिप्रत्यये निपातनाद्रूपसिद्धिः। 'महत्तदुल्बं स्थविरं तदासीत्' (ऋ० १०.५१.१) इति निगमः॥

---

१. निघ० ३.२९, निरु० ४.१५ अवृद्ध इत्यर्थः 'नमो महद्भ्यो नमो अर्भकेभ्यः' (ऋ० १.२७.१३) इति निगमः। (सु०)।

२. क्षुल्लशब्दाच्च पुनः स्वार्थे तद्धितः कः (अ० ५.३.९७)। क्षुल्लकवदत्रापि स्वार्थे कः। (सु०)।

३. अमरकोशोद्घाटनम् ३.३.१०।

४. '०शीङ्सृपाभ्यः' इति पाठान्तरम्।

५. मृग्यम्।

६. स्कन्दटीका (निरु० ३.१३)।

(२) ब्रध्नः–व्याख्यातमश्वनामसु (निघ० १.१४.१६)। बध्नाति स्वगुणैः सर्वान् वेतनदानेन भृत्यादीन्। 'युञ्जन्ति ब्रध्नमरुषञ्चरन्तम्' (ऋ० १.६.१) इति निगमः॥

(३) ऋष्वः–'ऋष गतौ' (तु० प० ७)। 'सर्वनिघृष्व०'[१] (द० उ० ८.१२७) इति वन्प्रत्ययो गुणाभावश्च निपात्यते। गम्यते हि महान् सर्वैः गतो वा भूमिम्। इमावर्थौ गत्यर्थेषु बोद्धव्यौ। 'ऋषिर्दर्शनात्' (निरु० २.११) इति भाष्यादपि दर्शनार्थम्। दर्शनीयो हि महान्। 'ऋष्वा त इन्द्र स्थविरस्य बाहू' (ऋ० ६.४७.८) इति निगमः[२]॥

(४) बृहत्–'बृहि वृद्धौ'[३] (भ्वा० प० ४८८) 'वर्तमाने पृषद्बृहत्०' (उ० २.८५) इति निपातनम्। परिवृद्धं भवति हि महत्त्वम्, वर्धतेऽस्मिन्नैश्वर्यादिः, वर्धतेऽनेन समाश्रितः। वृद्ध्यर्थेष्वेवमर्थो बोद्धव्यः। 'बृहद्वदेम विदथे सुवीराः' (ऋ० २.१.१६), 'उरोर्ऋष्वस्य बृहतः' (ऋ० १.२५.९) इति निगमौ। उरोर्ऋष्वस्येत्यत्र 'ऋष्वस्य महन्नाम बलवतः, बृहत एतदपि महन्नामैव। वेगसम्बन्धेन न च पुनरुक्तिः। महतो वेगेन शीघ्रस्येत्यर्थः'[४] इति स्कन्दस्वामिभाष्यम्॥

(५) उक्षितः–'उक्षतिर्वृद्ध्यर्थः'[५] इति स्कन्दस्वामी। निष्ठायामिडागमः। निगमोऽन्वेषणीयः[६]॥

(६) तवसः–तवतिर्वृद्ध्यर्थः[७]। 'अत्यविचमितमिनमिरभिलभिनभितपिपतिपनिपणिमहिभ्योऽसच्' (उ० ३.११७)। 'रजस्तुरं तवसं मारुतं गणम्' (ऋ० १.६४.१२), 'तन्त्वां गृणामि तवसमतव्यान्'[८] (ऋ० ७.१००.५) इति निगमौ॥

(७) तविषः–तवतेरेव। 'तवेर्णिद्वा' (उ० १.४८) इति टिषच्प्रत्ययः। 'सानु गिरीणां तविषेभिरूर्मिभिः' (ऋ० ६.६१.२) इति निगमः॥

---

१. उणादिसूत्रे 'रिष्व' इति प्रायिकः पाठः, 'ऋष्व' इत्यपि क्वाचित्कः (द्र०–उ० १३९ श्वेतवनवासिवृत्तिः)।

२. व्याख्यात एष निगमः–निरु० ७.६। (सु०)।

३. 'बृहिः प्रकृत्यन्तरम्' इति अ० १.१.४ सूत्रे महाभाष्यम्, एवं च सति बृहतेर्धातोः 'बृहत्' इति पदं सुसाधम्। (सु०)।

४. द्र०–ऋ० १.२५.९ स्कन्दस्वामिभाष्यम्।

५. स्कन्दटीका (निरु० १२.९)

६. 'त उक्षितासो महिमानमाशत' (ऋ० १.८५.२) इति निगमः। (सु०)।

७. स्कन्दटीका (निरु० ५.९)।

८. निगम एष व्याख्यायते (निरु० ५.८)। (मु०)।

(८) महिषः—महतेः 'अविमह्योष्टिषच्' (उ० १.४५)। महद्वदर्थः। यद्वा महतेः क्विप्, सप्तम्येकवचनम्, सदेः 'अन्येष्वपि दृष्यते' (अ० ३.२.१०१) इति डप्रत्ययः, 'तत्पुरुषे कृति बहुलम्' (अ० ६.३.१३) इति अलुक्, 'सुषामादिषु च' (अ० ८.३.९८) इति षत्वम्। महि महति स्थाने सीदन्नास्ते महिषः। 'म॒हि॒षासो॑ मा॒यिन॑श्चि॒त्रभा॑नवः' (ऋ० १.६४.७) इति निगमः॥

(९) अभ्वः—व्याख्यातमुदकनामसु (निघ० १.१२.८९)। आ समन्ताद् भवतीति कीर्त्तिमत्त्वात्। यद्वा भवतेः सत्तार्थात् प्राप्त्यर्थाद् वा नञ्पूर्वाद् 'नञि भुवो डित्' (स० क० २.३.१३२) इति क्वन्प्रत्ययः। न भवत्यनेनोपद्रवोऽस्मिन्निति वा, न प्राप्यते लेशैः। 'न ये वात॑स्य प्रमि॒नन्त्यभ्व॑म्' (ऋ० १.२४.६), 'आ यो नो॒ अभ्व॒ ईष॑ते' (ऋ० १.३९.८) इति निगमौ॥

(१०) ऋभुक्षाः[१]—'ऋ गतौ' (भ्वा० प० ६७०)। 'अर्त्तेर्भुक्षिनक्' (स० क० २.१.२९४) इति भुक्षिनक्प्रत्ययः। 'पथिमथ्यृभुक्षामात्' (अ० ७.१.८५) 'इतोऽत् सर्वनामस्थाने' (अ० ७.१.८६)। उरु विस्तीर्णं भाति, ऋतेन सत्येन यज्ञेन वा भाति भवति वा ऋभुः, मेधावी महत्स्थानं वा। उरुशब्दादुपपदाद् भातेर्भवतेर्वा 'मृगय्वादयश्च' (उ० १.३७) इति कुप्रत्ययः पूर्वपदस्य उवर्णतलोपः[२] सम्प्रसारणञ्च निपात्यते। क्षयतेरैश्वर्यकर्मणः क्षियतेर्वा 'वृतेश्छन्दसि' (उ० ४.१४२) इति बाहुलकादिनिः टिलोपश्च। ऋभूणां क्षयति इष्टे, ऋभौ महति स्थाने निवसति वा[३]। 'त्वमृ॑भु॒क्षा नर्य॒स्त्वं षाट्' (ऋ० १.६३.३) इति निगमः॥

(११) उक्षा—उक्षतेर्वृद्ध्यर्थात्[४] 'श्वन्नुक्षन्पूषन्०' (उ० १.१५९) इति कनिन्प्रत्ययान्तो निपात्यते। निगमोऽन्वेषणीयः॥

(१२) विहायाः[५]—'वहिहाधाञ्भ्यश्छन्दसि' (उ० ४.२२२) इति जहातेर्जिहीतेर्वा बाहुलकात् सुडभावेऽसुनि[६] युगागमो निपात्यते। 'कृ॒ष्णा-दुद॑स्थाद॒र्या॒३॑ विहा॑या॒ः' (ऋ० १.१२३.१) इति निगमः॥

(१३) यह्वः—यजतेः 'शेवयह्वजिह्वाग्रीवाप्वामीवाः' (उ० १.१५४) इति वन्प्रत्ययो जकारस्य हकारश्च निपात्यते। यजते देवपूजादिकं करोति। यद्वा 'यसु प्रयत्ने' (दि० प० १००) 'यसेर्ह च' (स० क० २.३.१३१) इति

---

१. निरु० ९.३। (सु०)।

२. 'उवर्णटिलोपः' इति मुद्रितेषु।

३. तु०—स्कन्दटीका (निरु० ९.३)।

४. द्र०—पूर्व पृ० २०५, टि० ५।

५. निरु० ४.१५, १०.२६ व्याप्ता इत्यर्थः। सर्वव्याप्तित्वादेवात्र महदर्थत्वम्। पश्चाच्चानेनैव हेतुनाकाशार्थत्वम्। (सु०)।

६. 'षुगभावेऽपि' इति मुद्रितेषु।

क्वन्प्रत्ययः, इति भोजदेवः। यस्यति प्रयत्यते शत्रुत्वाज्जयादौ। 'यह्व इति महतो नामधेयं यातश्च, हूतश्च भवति' इति भाष्ये (निरु० ८.८)। 'यातश्चासावाहूतश्च वार्थिभिः, हूतश्चासौ शरणार्थिभिः, द्विधातुजत्वं दर्शितम्'[१] इति स्कन्दस्वामी। ततोऽत्र यातेर्ह्वयतेश्च 'गेहे कः' (अ० ३.१.१४४) इति बाहुलकाद् भूते कप्रत्ययो ह्वयतेः सम्प्रसारणाभावश्च। 'प्र वो यह्वं पुरूणाम्' (ऋ० १.३६.१) इति निगमः॥

(१४) ववक्षिथ, (१५) विवक्षसे–'तत्र ववक्षिथ विवक्षस इत्येते' (निरु० ३.१३) इत्यादिभाष्येऽनयोराख्यातयो[२]र्महन्नामसु पठनीयत्वं महद्वाचकत्वं चोपपादितं स्कन्दस्वामिना[३]। ववक्षिथेत्यत्र 'सन्यतः' (अ० ७.४.७९) इतीत्वाभावः, एकवचनस्य स्थाने बहुवचनम्, क्षकारात् परस्याकारस्येत्वञ्च व्यत्ययेन। 'अतिविश्वं ववक्षिथ' (ऋ० १.८१.५), 'शीरं पावकशोचिषं विवक्षसे' (ऋ० १०.२१.१) इति निगमौ॥

(१६) अम्भृणः[४]–अमतेः क्विप्। बिभर्त्तेः 'इण्सिञ्जिदी०' (उ० ३.२) इत्यादिना बाहुलकाद् नप्रत्ययः। 'पिशङ्गभृष्टिमम्भृणम्' (ऋ० १.१३३.५) इत्यत्र 'अम्भृणस्य महतः फलस्य हेतुभूता'[५] इति स्कन्दस्वामी॥

(१७) माहिनः–महतेः 'महेरिनण् च' (उ० २.५७) इति इनण्प्रत्ययः। 'प्रयो न हर्मिस्तोमं माहिनाय' (ऋ० १.६१.१) इति निगमः॥

(१८) गभीरः–वाङ्नामसु व्याख्यातम् (निघ० १.११.७)। प्रतिष्ठितो महति स्थाने लिप्स्यते[६]। 'उरुव्यचा वरिमता गभीरम्' (ऋ० १.१०८.२) इति निगमः॥

(१९) ककुहः[७]–'ककु सहने'[८]। 'ककेरुहः'[८] इति उहप्रत्ययः। सहते अभिभवति शत्रून् सहते क्षमतेऽपराधान् वा। 'वच्यन्ते वां ककुहासः' (ऋ० १.४६.३) इति निगमः। 'ककुह इति महन्नाम'[९] इति स्कन्दस्वामी॥

(२०) रभसः–'रभ राभस्ये' (भ्वा० आ० ७०१)। 'अत्यविचमित-

---

१. स्कन्दटीका (निरु० ८.८)। २. वक्तेर्वा वहतेर्वा। निरु० ३.१३। (सु०)।

३. स्कन्दटीका (निरु० ३.१३)।

४. जलार्थकेन 'अम्भस्'शब्देन साम्यमुपैति। मा० सं० १९.२७ मन्त्रे 'अम्भृणौ पूतभृदाधवनीयौ' इत्यर्थः प्रत्यपादिषत व्याख्याकारैः। एवञ्च जलस्य महत्त्वादेवासावत्र महदर्थकः। (सु०)।

५. स्कन्दटीका (निरु० ७.२)। ६. 'लिप्यन्ते' इत्यपपाठो मुद्रितेषु।

७. उच्चशिखरार्थकः ककुभ्शब्दः। यथा–ऋ० ४ १९.४ इत्यादौ। तस्य महत्त्वादेवास्य महदर्थः। (सु०)। ८. मृग्यम्। ९. ऋ० १.४६.३ स्कन्दस्वामिभाष्यम्।

मिनमिरभिलभिनभितपिपतिपनिपणिमहिभ्योऽसच्' (उ० ३.११७)। रभते महान्ति कर्माणि, संरभ्यते वा शत्रुषु। 'अधैनं वृका रभसासो अद्युः' (ऋ० १०.९५.१४) इति निगमः॥

(२१) व्राधत्–वर्धतेः[१] 'संश्चत्तृपद्वेहदित्यादयः'[२] (स० क० २.१.२५९) इत्यतिप्रत्यय आमागमश्च निपात्यते। 'स व्राधतो नहुषो दंसुजूतः' (ऋ० १.१२२.१०) इति निगमः॥

(२२) विरप्शी[३]–'रप लप व्यक्तायां वाचि' (भ्वा० प० २८५) विपूर्वः। रपेः 'वृभृवम्यमिकुभ्यः शक्' (स० क० २.३.१४०) इति बाहुलकात् शक्। विविधं रपन्तीति विरप्शा वक्तारः, तेऽस्य सन्ति इति विरप्शी। यद्वा विविधं रपणं तदस्यास्ति वा। महिः मह इत्यसुन्नन्तपाठश्च। 'विरप्शी गोमती मही' (ऋ० १.८.८) इत्यादीकारान्तोपादानं सन्देहनिवृत्त्यर्थम्। 'क्रत्वे अपिबो विरप्शिन्' (ऋ० ६.४०.२), 'विरप्शिने वज्रिणे शन्तमानि' (ऋ० ६.३२.१) इति निगमौ॥

(२३) अद्भुतम्[४]–'भू सत्तायाम्' (भ्वा० प० १)। 'अदि भुवो डुतच्' (उ० ५.१)। 'अदित्याश्चर्य्यार्थेऽव्ययम्'[५] इति क्षीरस्वामी। तत्र सम्पूर्वाद् बिभर्तेर्वा बाहुलकाद् डुतन्प्रत्यये समोऽद्भावश्च। सम्यक् पोषितो धनादिभिः, सम्यग् बिभर्त्याश्रितेनेति वा। 'सदसस्पतिमद्भुतम्' (ऋ० १.१८.६) 'वषट्कृतस्याद्भुतस्य दस्रा' (ऋ० १.१२०.४) इत्यत्र 'महन्नामाद्युदात्तः स्यादत्राश्चर्यभूतेऽन्तोदात्तः स्वरः'[६] इति माधवः। 'तन्नस्तुरीपमद्भुतम्' (ऋ० १.१४२.१०) इति निगमः॥

(२४) बंहिष्ठः–'बहि महि वृद्धौ' (भ्वा० आ० ४२२) 'लङ्घिबंह्योर्नलोपश्च' (उ० १.२९) इति बहुपदम्, तत इष्ठन्प्रत्ययः[७]। 'बंहतेर्बहु बहुलम्, मत्वर्थीयो लः'[८] इति क्षीरस्वामी। अतिशयेन बहुलो बंहिष्ठः। 'प्रियस्थिरस्फिरोरु-

---

१. 'व्रन्धातेः' इत्यपपाठो मुद्रितेषु। २. द्र०–पूर्व पृ० २०२, टि० ४।
३. निरु० ६.२३। (सु०)।
४. निरु० १.६ अद्भुतम्-अभूतम्। नव्यास्तु-नञ्पूर्वाद् दभ्धातोरुतन्प्रत्ययेन शब्दममुं साधयन्ति। तथा हि–ऋ० ८.९०.३ मध्ये अनतिद्भुतशब्दस्य विद्यमानत्वादेव चात्र अकारस्य परिवर्तनीयांशस्योपलभ्यमानत्वाद् 'अ' इति विग्रहः प्रामाणिकः। अथ च शौ० सं० १२.३.३१ मध्ये 'अमन्युत' शब्देन 'उत' प्रत्ययस्यास्तित्वं जायते। (सु०)।
५. अमरकोशोद्घाटनम् १.६.१९। ६. मृग्यम्।
७. बृंहशब्दादिष्ठन् प्रत्ययः साधुतरः स्यात् स्थानिवर्णसामीप्यानुरोधात्। ऋकारस्याकारादेशः 'पिता' इत्यादिषु दृश्यत एव। एवञ्च बंहादेशो न भवति वाचनिकः। (सु०)।
८. अमरकोशोद्घाटनम् ३.१.६३।

बहुल०' (अ० ६.४.१५७) इत्यादिना बंहादेशः। यद्वा 'निचुलवञ्जुलवकुल-तुमुलपृथुलस्थुलविशंस्थुलादयः' (स० क० २.३.१०९) इति बंहेरुलच्प्रत्ययो नलोपश्च निपात्यते। अन्यत् पूर्ववत्। 'यद्बंहिष्ठम् नातिविधे सुदानू' (ऋ० ५.६२.९) इति निगमः॥

(२५) बर्हिषत्–'बृह बृहि वृद्धौ' (भ्वा० प० ४८८)। 'बृंहेर्नलोपश्च' (उ० २.१११) इति इसिप्रत्ययः, बर्हिःशब्द उपपदे सदः 'सत्सूद्विष०' (अ० ३.२.६१) इत्यादिना क्विप्। पृषोदरादित्वाद् (अ० ६.३.१०९) बर्हिषः सकारलोपः। सुषामादित्वात् (अ० ८.३.९८) षत्वम्। यद्वा बर्हतेः 'इन्[1] सर्वधातुभ्यः' (श्वेत० ५५२, उ० ४.११९) इति इन्। अन्यत् पूर्ववत्। परिवृद्धे स्थाने सीदति हि महान्। निगमोऽन्वेषणीयः[2]॥

इति पञ्चविंशतिर्महन्नामानि॥ ३॥

गयः (१)। कृदरः (२)। गर्त्तः (३)। हर्म्यम् (४)। अस्तम् (५)। पस्त्यम् (६)। दुरोणे (७)। नीळम् (८)। दुर्य्याः (९)। स्वसराणि (१०)। अमा (११)। दमे (१२)। कृत्तिः (१३)। योनिः (१४)। सद्म (१५)। शरणम् (१६)। वरूथम् (१७)। छर्दिः (१८)। छदिः (१९)। छाया (२०)। शर्म (२१)। अज्म (२२)। इति द्वाविंशतिर्गृहनामानि॥ ४॥

(१) गयः–व्याख्यातमपत्यनामसु (निघ० २.२.८)[3]। गम्यते वासाय, गच्छत्यनेन सुखम्। गत्यर्थेष्वेवमर्थो बोद्धव्यः। गीयते स्तूयते स्वास्थ्यातिशयेन, स्तुवन्त्यस्मिन् स्थिता देवान्[4] इति च। 'अरक्षद्दाशुषे गयम्' (ऋ० १.७४.२) इति निगमः॥

(२) कृदरः[5]–'कृती छेदने' (तु०, रु० प० १४४, १०)। 'कृदरादयश्च' (उ० ५.४१) इति अरन्प्रत्ययो गुणाभावश्च तकारस्य दकारश्च निपात्यते।

---

१. 'अनिते इति' इति मुद्रितेषु।

२. 'इन्द्रं नरो बर्हिषदं यजध्वम्' (ऋ० २.३.३) इत्यादिषु मन्त्रेषु प्रोक्ता बर्हिषि सीदन्त इन्द्रादयो देवा महान्तो भवन्ति, इत्यतो 'बर्हिषत्' शब्दो लक्षणया महान्तमर्थं ब्रवीति। (सु०)।

३. निघ० २.९ धननामस्वपि। (सु०)।

४. 'श्रवन्ति अस्मिन् स्थिता देवा' इति मुद्रितेषु।

५. निरु० ३.२०। (सु०)।

कृत्यते छिद्यतेऽनेन क्लेशः, परिच्छिन्नं वा सुशास्त्रमर्यादया। यद्वा 'दृङ् आदरे' (तु० आ० १२०)। 'ग्रहिवृदृनिश्चिगमश्च' (अ० ३.३.५८) इत्यप्। कृतो दर आदरोऽत्र कृतदरः। पृषोदरादित्वात् (अ० ६.३.१०९) तशब्दलोपः। निगमोऽन्वेषणीयः॥

(३) गर्त्तः–'गृ शब्दे' (क्र्या० प० २९) स्तुतिकर्मा (निघ० ३.१४.६) वा। 'हसिमृग्रिण्वामिदमिलूपूधूर्विभ्यस्तन्' (उ० ३.८६) इति तन्प्रत्ययः। शब्द्यते तस्मिन् स्तूयते वा। निगमोऽन्वेषणीयः[1]॥

(४) हर्म्यम्–'हृञ् हरणे' (भ्वा० उभ० ६४०)। 'मध्यविन्ध्यशिक्य०' (स० क० २.३.४) इति क्यप्प्रत्ययो मुडागमो गुणश्च निपात्यते। हरति अनुह्रियते आह्रियतेऽत्र धान्यादि। यद्वा 'अम द्रम हम्म मीमृ गतौ' (भ्वा० प० ३१५)। अघ्न्यादित्वाद् (उ० ४.११३) यक्प्रत्ययः। 'मन्योरियाय हर्म्येषु तस्थौ' (ऋ० १०.७३.१०) इति निगमः॥

(५) अस्तम्[2]–'अस भुवि' (अदा० प० ५८) 'अस गतिदीप्त्यादानेषु' (भ्वा० उभ० ६२५) 'असु क्षेपणे' (दि० प० ९९)। 'हसिमृग्रिण्वामि०' (उ० ३.८६) इति बाहुलकात् तन्। द्वितीयैकवचनं भवति, अङ्गनसुखं दीप्यते हि तत्। आदीयते स्वीक्रियते वा तदर्थिभिः, क्षिप्यन्तेऽस्मिन् पदार्था इति वा। 'अस्तं न गावो नक्षन्त इद्धम्' (ऋ० १.६६.५), इति निगमः। 'तमग्निमस्ते वसवो न्यृण्वन्' (ऋ० ७.१.२) इति च॥

(६) पस्त्यम्। 'मध्यविन्ध्य०' (स० क० २.३.४) इत्यादिनौणादिकः क्यप्, तुगागमश्च निपात्यते। वसन्त्यस्मिन्। यद्वा 'पत्लृ गतौ' (भ्वा० प० ५८४)। निपातनात् सकार उपजनः। पस्त्या 'पसेः सङ्गत्यर्थे वा'[3] इति माधवः। 'वरुणः पस्त्याऽस्वा' (ऋ० १.२५.१०), 'प्रप्र दाश्वान् पस्त्याभिरस्थित' (ऋ० १.४०.७) इति निगमौ। 'पस्त्यमिति गृहनाम। अजादित्वात् (अ० ४.१.४) टाप्'[4] इति स्कन्दस्वामी॥

(७) दुरोणे–'रास्नासास्ना०' (स० क० २.२.१८४) इत्यादिभोजसूत्रे 'आदिग्रहणादत् दुरोणादयः'[5] इति वृत्तिः। दुःपूर्वाद् अवतेर्नकि रुटि गुणः। 'दुरोण इति गृहनाम। दुरवा भवन्ति दुस्तर्पाः' (निरु० ४.५) इति भाष्ये

---

१. महर्षियास्केन निरु० ३.५ मध्ये स्वयं निरुक्तोऽसौ शब्दोऽनुमन्त्रम्। एवं च मुख्यतोऽक्षनिवपनपीठरूपगृहार्थे प्रयुज्यतेऽसौ शब्दः। (सु०)।

२. मुख्यतस्सूर्याय परिकल्पिते गृहार्थे। यथा–निरु० १२.२९। (सु०)।

३. मृग्यम्। ४. द्र०–स्कन्दस्वामिभाष्यम् (ऋ० १.२५.१०)।

५. त्रिवेन्द्रमुद्रितवृत्तौ त्वन्यथा पाठः पाठभेदश्च।

'दुःशब्दपूर्वस्यावते रक्षणार्थस्य तर्पणार्थस्य वा ल्युटि छान्दसत्वात् सम्प्रसारणम्, आद्गुणश्च। गृहादयो दुरवा भवन्ति दुस्तर्पा इति पर्य्यायेणास्यार्थकथनम्'[१] इति स्कन्दस्वामी। 'जुष्टो दमूना अतिथिर्दुरोणे' (ऋ० ५.४.५), 'मध्ये निषत्तो रण्वो दुरोणे' (ऋ० १.६९.२) इति निगमौ॥

(८) नीळम्–'व्याडनीडक्रोडकुहोडादयः' (स० क० २.२.११९) इति उडच्प्रत्ययः, प्रत्ययादेर्लोपो गुणाभावश्च निपात्यते। नीयन्तेऽत्र पदार्थाः, नयति मुखनिःश्वसनमिति वा। 'आ यो महः शूरः सनादनीळः' (ऋ० १०.५५.६) इति निगमः॥

(९) दुर्य्याः–'दुर्वी हिंसार्थः' (भ्वा० प० ३८२)। अघ्न्यादित्वाद् यत्प्रत्यये वकारलोपो दीर्घाभावश्च निपात्यते। हिंसन्ति मीनन्ति हि ते दुःखम्। यद्वा दुःशब्दपूर्वाद् यातेः 'घञर्थे कविधानम्०' (अ० ३.३.५८ वा०) इति कः[२]। दुःखेन प्राप्यन्ते। 'दुरो गृहद्वाराण्यर्हन्तीति वा दुर्य्या गृहा उच्यन्ते'[३] इत्युवटः। 'अवीरहा प्रचरा सोम दुर्य्यान्' (ऋ० १.९१.१९) इति निगमः॥

(१०) स्वसराणि–व्याख्यातमहर्नामसु (निघ० १.९.५)। स्वेन स्वननेन[४] स्रियते प्राप्यते, स्वैर्गृहवतो ज्ञातिभिः श्रियते, सुष्ठु अस्यन्ते वास्मिन् पदार्थाः। निगमोऽन्वेषणीयः॥

(११) अमा–'अम गतिभक्षशब्देषु' (भ्वा० प० ३१४)। 'पुंसि सञ्ज्ञायां घः प्रायेण' (अ० ३.३.११८)। गम्यन्तेऽस्मिन् भक्ष्यन्ते शब्दायन्ते वा। यद्वा निपातोऽयम्। 'अमात्यम्' इत्यत्र उवटः–'अमा गृहवचनः सहवचनो वा। अव्ययात् त्यप् तत्र भव इत्यर्थे। गृहे सत्याह्वा भवति अमात्यः'[५] इति। 'सा नो अमा सो अरणे नि पातु' (ऋ० १०.६३.१६), 'अमा सते वहसि भूरि वामम्' (ऋ० १.१२४.१२), 'अमाजूरिव पित्रोः सचा सती' (ऋ० २.१७.७) इति निगमाः॥

(१२) दमे–'दमु उपशमने' (दि० प० ९३)। घञ्। 'नोदात्तोपदेशस्य०' (अ० ७.३.३४) इति वृद्धिप्रतिषेधः। शाम्यतेऽनेन शीतादिः, दान्तः क्लेशः। 'वर्धमानं स्वे दमे' (ऋ० १.१.८), 'हस्कर्त्तारं दमेदमे' (ऋ० ४.७.३) इति

---

१. निरुक्तस्यायं सन्दर्भोऽस्य व्याख्यानं च नोपलभ्यते मुद्रितायां स्कन्दटीकायाम्।

२. महासुखभूतानां गृहाणां कृते नैषा व्युत्पत्तिर्मनोज्ञकं बिभर्ति। वस्तुतस्तु 'द्वार्+य' इति स्थितौ सम्प्रसारणेन सिद्ध्यति दुर्याः। द्वार् शब्दो निरुच्यते निरु० ८.११। तद्वन्ति गृहाण्यपि द्वार्शब्दाभिधेयानि। अद्यापि 'घर-बार' इति युग्मं बहुलं प्रचरति लोके। (सु०)।

३. मा० सं० १.११ उवटभाष्यम्।

४. धनेनात्मना वा पाठः स्यात्?

५. मृग्यम्।

निगमौ॥

(१३) कृत्तिः[१]–'कृती छेदने' (तु०, रु० प० १४४, १०) क्तिन् कृदरवदर्थः। निगमोऽन्वेषणीयः[२]॥

(१४) योनिः–व्याख्यातमुदकनामसु (निघ० १.१२.६९)। मिश्र्यतेऽनेन सुखम्, पृथग्भूयन्तेऽनेनानिष्टा इति, परीवीतो वा प्राकारादिना जायेव। 'जायेव योनावरं विश्वस्मै' (ऋ० १.६६.३) इति निगमः॥

(१५) सद्म–सदेर्मनिन्। सीदत्यस्मिन्। 'सद्मेव धीराः संमाय चक्रुः' (ऋ० १.६७.५) इति निगमः। 'सद्म गृहनाम'[३] इति स्कन्दस्वामी॥

'वर्म' इति केचित् पठन्ति। वृणोतेर्मन्। व्रियते तेन सम्भज्यते वा गृहिभिः। निगमोऽन्वेषणीयः॥

(१६) शरणम्–शृणातेः 'युज् बहुलम्' (उ० २.७९) इति युच्। शृणाति शीतादिक्लेशम्, रक्षितवान् वा क्लेशेभ्यः 'शरिः प्राप्त्यर्थः'[४] इति माधवः। प्राप्यते हि तत्। 'तोदस्येव शरण आ महस्य' (ऋ० १.१५०.१) इति निगमः॥

(१७) वरूथम्–'वृञ् वरणे' (स्वा० उभ० ८)। 'जृवृञ्भ्यामूथन्' (उ० २.६)। वर्मवदर्थः। 'भवा वरूथं गृणते विभावो' (ऋ० १.५८.९) इति निगमः॥

(१८) छर्दिः–'छृदी सन्दीपने' (चु० प० २४४) 'अर्चिशुचिहुसृपिछादिच्छर्दिभ्य इसिः' (उ० २.११०)। सन्दीप्यते शालया। 'प्र नो यच्छतादवृकं पृथुच्छर्दिः' (ऋ० १.४८.१५), 'वरूथमस्ति यच्छर्दिः' (ऋ० ८.६७.६) इति निगमौ॥

(१९) छदिः–'छद आवरणे' (चु० उभ० २४८)। णिच्। पूर्ववदिस्। 'छादेर्घेऽद्व्युपसर्गस्य' (अ० ६.४.९६), 'इस्मन्त्रन्क्विषु च' (अ० ६.४.९७) इति ह्रस्वः। णिलोपः। छाद्यते हि तत्। निगमोऽन्वेषणीयः[५]॥

(२०) छाया–'छो छेदने' (दि० प० ३७)। 'माच्छाससिसूभ्यो यः' (श्वेत० ५४४, उ० ४.११०)। कृत्तिवदर्थः। छायाकरत्वाद्वा छाया। 'यस्य

---

१. निरु० ५.२२ यश उतान्नार्थे, उपमया सूत्रनिर्मितवस्त्रार्थे। गृहार्थे कृत्तिशब्दे तु सति कृत्तिकुटीशब्दयोरेकैव प्रकृतिः स्यात्। (सु०)।

२. 'महीव कृत्तिः शरणा त इन्द्र' (ऋ० ८.९०.६) इति गृहार्थे निगमः। (सु०)।

३. स्कन्दस्वामिभाष्यम् (ऋ० १.६७.५)।

४. मृग्यम्।

५. 'इन्द्रस्य छुदिरसि' (मा० सं० ५.२८) इति निगमः। (सु०)।

छायामृतम्' (ऋ० १०.१२१.२) इति निगमः॥

(२१) शर्म[१]–शृणातेः शरेः श्रयतेर्वा मन्। श्रयतेर्बाहुलकाद्रूपसिद्धिः। श्रीयते हि तत्। अन्यत्र शरणवदर्थः। 'स्यामेदिन्द्रस्य शर्मणि' (ऋ० १.४.६), 'त्रिधातु शर्म वहतं शुभस्पती' (ऋ० १.३४.६) इति निगमौ॥

(२२) अज्म–अजेः 'अर्तिस्तुसुहुसृधृक्षिक्षु०' (उ० १.१४०) इत्यादिना बाहुलकाद् मन्। अस्तवदर्थः। 'येषामज्मेषु पृथिवी' (ऋ० १.३७.८) इति निगमः॥

इति द्वाविंशतिर्गृहनामानि॥४॥

इरज्यति (१)। विधेम (२)। सपर्यति (३)। नमस्यति (४)। दुवस्यति (५)। ऋध्नोति (६)। ऋणद्धि (७)। ऋच्छति (८)। सपति (९)। विवासति (१०)। इति दश परिचरणकर्माणः॥५॥

(१) इरज्यति–'इरज् ईर्ष्यायाम्' कण्ड्वादिः (८), गतिकर्मसु। अनेकार्थत्वाद् इत्यादि यदुक्तं तस्मिन्नध्याये (निघ० २.१४.१) सर्वत्र धातुषु तद् बोद्धव्यम्॥

(२) विधेम–'विध विधाने' तुदादिः (प० ३६)। लिङुत्तमपुरुषबहु-वचनम्। 'यज्ञैर्विधेम नमसा हविर्भिः' (ऋ० २.३५.१२), 'हविष्मन्तो विधेम ते' (ऋ० १.३६.२), 'होतेव सद्म विधतो वि तारीत्' (ऋ० १.७३.१) इति निगमाः॥

(३) सपर्यति[२]–'सपर पूजायाम्' कण्ड्वादिः (१६)। 'दूतं देव सपर्यति' (ऋ० १.१२.८) इति निगमः॥

(४) नमस्यति–'नमोवरिवश्चित्रङः क्यच्' (अ० ३.१.१९)। 'नमसः पूजायाम्' (अ० ३.१.१९ महा०)। नमः करोति। 'इन्द्रं नमस्यन्नुपमेभिरर्कैः' (ऋ० १.३३.२), 'यं नमस्यन्ति कृष्टयः' (ऋ० १.३६.१९) इति निगमौ॥

(५) दुवस्यति[३]–'दुवस् परिचरणे, परितापे च' कण्ड्वादिः (३४)। 'दुवस्यन्ति स्वसारो अह्रयाणम्' (ऋ० १.६२.१०) इति निगमः॥

---

१. शरणमित्यर्थः निरु० ९.३२। (सु०)।

२. निरु० ११.१० परिचरणार्थे मन्त्रः। (सु०)।

३. निरु० १०.२० राध्नोतिकर्मा–परिचरणार्थकः। (सु०)।

(६) **ऋध्नोति**–'ऋधु वृद्धौ' स्वादिः (प० २४)। अत एव 'आद् ऋध्नोति हविष्कृतिम्' (ऋ० १.१८.८) इति निगमः॥

(७) **ऋणद्धि**–व्यत्ययेन श्नम्॥

(८) **ऋच्छति**–'ऋच्छ गतीन्द्रियप्रलयमूर्त्तिभावेषु' (तु० प० १५)॥

(९) **सपति**[1]–'षप समवाये' (भ्वा० प० २८४)। 'अविद्वांसो विदुष्टरं सपेम' (ऋ० ६.१५.१०) इति निगमः॥

(१०) **विवासति**[2]–नैरुक्तधातुः। 'विपूर्वात् वसेर्णिच्'। 'छन्दस्युभयथा' (अ० ३.४.११७) इति शप्यार्धधातुकत्वाद् णिलोपः'[3] इति भट्टभास्करमिश्रः। 'हविष्मा॑ आविवासति' (ऋ० १.१२.९)।

इति दश परिचरणकर्माणः॥५॥

शिम्बाता (१)। शतरा (२)। शातपन्ता (३)। शर्म (४)। स्यूमकम् (५)। शेवृधम् (६)। मयः (७)। सुगम्यम् (८)। सुदिनम् (९)। शूषम् (१०)। शुनम् (११)। शग्मम् (१२)। भेषजम् (१३)। जलाषम् (१४)। स्योनम् (१५)। सुम्नम् (१६)। शेवम् (१७)। शिवम् (१८)। शम् (१९)। कम् (२०)। इति विंशतिः सुखनामानि॥६॥

(१) **शिम्बाता**–'शिञ् निशाने' (स्वा० उभ० ३)। 'निम्बबिम्बशिम्ब[4]-डिम्बहिडिम्बस्तम्बसम्बादयः' (स० क० २.२.२२२) इति शिनोतेर्बप्रत्ययो मुम् [च] निपात्यते। अततेर्घञ्। दुःखानि तनूकुर्वत् प्रार्थ्यते[5]॥

(२) **शतरा**–शतं बहु, अनेकमिन्द्रियप्रसादादि राति ददाति। 'आतोऽनुपसर्गे कः' (अ० ३.२.३)[6]॥

(३) **शातपन्ता**–'शो तनूकरणे' (दि० प० ३६) निष्ठा। पततेः 'हसिमृग्रिण्वामि०' (उ० ३.८६) बाहुलकात् तन्। शातेन दुःखानां तनूकरणेन पत्यते स्तूयते। त्रिष्वपि द्विवचनस्याकारः। 'मित्रेव ऋता शतरा शातपन्ता'

---

१. निघ० ३.१४ अर्चतिकर्मसु। (सु०)।

२. निरु० २.२४, ११.२३–विवासतिः परिचर्यायाम्। (सु०)।

३. मृग्यम्।

४. 'शिम्ब' नास्ति मुद्रितसंस्करणयोः स०क०स्य।

५. 'वंसगेव पूषर्या शिम्बाता' (ऋ० १०.१०६.५) इति भवति शिम्बाताशब्दस्य निगमः। (सु०)।

६. उत्तरस्मिन् 'शातपन्ता'शब्दे प्रोक्तो निगमः। (सु०)।

(ऋ० १०.१०६.५) इति निगमः॥

(४) शर्म–व्याख्यातं गृहनामसु (निघ० ३.४.२१)। 'ता नो देवीः सुहवाः शर्म यच्छत' (ऋ० ५.४६.७) इति निगमः। अस्य स्थाने 'शिल्गुः' इति केचित् पठन्ति। 'शल गतौ' (भ्वा०प० ५८४)। 'वलिफल्योर्गुक् च' (स०क० २.१.१५) इति उप्रत्ययो गुगागमश्च बाहुलकादकारस्येकारः। गम्यते पुण्यवद्भिः, गच्छत्यनेन तृप्तिम्, गच्छति वान्त्यमनित्यत्वात्। एवमर्था गत्यर्थेषु बोद्धव्याः। निगमोऽन्वेषणीयः॥

(५) स्यूमकम्–'षिवु तन्तुसन्ताने' (दि० प० २)। 'अविसिविसिशुषिभ्यः कित्' (उ० १.१४४) इति मन्प्रत्ययः। 'च्छ्वोः शूडनुनासिके च' (अ० ६.४.१९), यणादेशः, स्वार्थे कः। स्यूतं पुण्यवति। निगमोऽन्वेषणीयः[१]॥

(६) शेवृधम्–शेवशब्द उपपदे वृधेर् इगुपधलक्षणः कः। ....शेवस्य वर्द्धयितृ शेवृधम्। पृषोदरादित्वाद् (अ० ६.३.१०९) उभयत्र रूपसिद्धिः। 'स शेवृधमधि धा द्युम्नमस्मे' (ऋ० १.५४.११) इति निगमः॥

(७) मयः–'मीञ् हिंसायाम्' (क्र्या० उभ० ४)। असुन्। हिनस्ति दुःखम्। 'मयः कृणोषि प्रय आ च सूरयें' (ऋ० १.३१.७) इति निगमः॥

(८) सुग्म्यम्–सुपूर्वाद् गमेर् अघ्न्यादित्वाद् (उ० ४.११३) यक्प्रत्यय उपधालोपश्च। 'उषा ददातु सुग्म्यम्' (ऋ० १.४८.१३), 'आ सुग्म्याय सुग्म्यं प्राता' (ऋ० ८.२२.१५) इति निगमौ॥

(९) सुदिनम्–व्याख्यातमहर्नामसु (निघ० १.९.९), अत्र सुपूर्वम्। सुष्ठु द्यति दुःखम्, खण्ड्यते वा भाग्यविपर्य्ययेण[२]। निगमोऽन्वेषणीयः॥

(१०) शूषम्–व्याख्यातं बलनामसु (निघ० २.९.१३)। शुष्यत्यनेन दुःखम्, प्रियावहञ्च सुखम्। 'सास्माकेभिरेतरी न शूषैः' (ऋ० ६.१२.४) इति निगमः॥

(११) शुनम्–'शुन गतौ' (तु० प० ४८)। 'गेहे कः' (अ० ३.१.१४४) इति बाहुलकात् कः[३]। 'शुनं नः फाला विकृषन्तु भूमिम्' (ऋ० ४.५७.८), 'शुनं हुवेम मघवानमिन्द्रम्' (ऋ० ३.३०.२२) इति निगमौ॥

(१२) शग्मम्–शंशब्द उपपदे गमेः 'गेहे कः' (अ० ३.१.१४४)

---

१. तु०–सुखपूर्णरश्मिमित्यर्थे–'स्यूमगभस्तिम्' (ऋ० ७.७१.३)। (सु०)।

२. अत्रान्तर्वर्त्यर्थस्तु नापेक्ष्यते। शोभनं दिनमेव सुखम्। सुकालं सुखान्नातिभिद्यते। यथा मेघाच्छन्नेऽह्नि अशोभनं कालमेव–दुःखं दिनं दुर्दिनं वा प्रोच्यते। तु०–मेघाच्छन्नेऽह्नि दुर्दिनम्–अमरः। (सु०)।

३. 'इगुपधज्ञाप्रीकिरः कः' (अ० ३.१.१३५) इति तु युक्ततरम्। (सु०)।

इति कः। 'गमहन०' (अ० ६.४.९८) इत्युपधालोपः। पृषोदरादित्वात् (अ० ६.३.१०९) शमो मलोपः। सुखं गम्यतेऽनेन दुष्कृतादिशमनेन वा। यद्वा शकेः 'युजितिजिरुजां कुश्च' (उ० १.१४६) इति बाहुलकाद् मक्प्रत्ययः, ककारस्य गकारश्च। शक्नोति तृप्तिं जनयितुम्। 'वास्तोष्पते शग्मया संसदा ते' (ऋ० ७.५४.३) इति निगमः॥

(१३) भेषजम्, (१४) जलाषम्–व्याख्याते उदकनामसु (निघ० १.१२.३९,१००) भिषज्यतिरत्र सुखनाम। 'रुद्रं जलाषभेषजम्' (ऋ० १.४३.४) इति निगमः। 'जलाषजं सुख-[नाम। तस्य भेषजमौ]-षधम्'[१] इति स्कन्दस्वामिभाष्यम्॥

(१५) स्योनम्–'षिवु तन्तुसन्ताने' (दि० प० २)। 'सिवेष्टेर्यु च' (द० उ० ५.४१) इति नप्रत्यये गुणः। स्यूमवदर्थः। 'स्योनमिति सुखनाम, 'स्यतेरवस्यन्त्येतत्' इति (निरु० ८.९) भाष्ये 'स्यतेः सेवतेश्च स्योनम्'[२] व्याख्यातं स्कन्दस्वामिना। तत्र बाहुलकान्नप्रत्यये टेर्यु। 'देवेभ्यो अदितये स्योनम्' (ऋ० १०.११०.४), 'स्योना पृथिवि भवान्' (ऋ० १.२२.१५) इति निगमौ॥

(१६) सुम्नम्–'रास्नासास्नासुम्नद्युम्ननिम्न०' (स० कं० २.२.१८४) इति भोजसूत्रम्। शोभनेन कर्मणा मीयते निर्मीयते, सुष्ठु मीयते परिच्छिद्यते भागेनेति वा[३]। 'क्व वः सुम्ना नव्यांसि' (ऋ० १.३८.३), 'सुम्नाय वर्त्तयामसि' (ऋ० ८.६८.१) इति निगमौ॥

(१७) शेवम्, (१८) शिवम्–'शीङ् स्वप्ने' (अदा० आ० २५) 'इण्शीभ्यां वन्' (उ० १.१५२)। 'सर्वनिघृष्व०' (उ० १.१५३) इति शीङो ह्रस्वत्वं वन्प्रत्ययो गुणाभावश्च निपात्यते। 'शेवमिति सुखनाम' (निरु० १०.१७) इत्यादिभाष्ये। शिष्यतेर्व्वुत्पादितावेतौ। तत्रार्थस्तु–शेषति हिनस्ति क्लेशम्, शेषयति वा स्वाश्रयम्। 'जने न शेव आहूर्य्यः सन्' (ऋ० १.६९.२), 'शिवाभिर्न स्मयमानाभिरागात्' (ऋ० १.७९.२) इति निगमौ॥

(१९) शम्–निपातोऽयम्। यद्वा शाम्यतेर्विन्। शमयितृ क्लेशानाम्। 'शं ते सन्तु प्रचेतसे' (ऋ० १.५.७) इति निगमः॥

(२०) कम्–अयमपि निपातः[४]। 'श्रियसे कं भानुभिः सम्मिमिक्षिरे' (ऋ० १.८७.६), 'आ वो मक्षू तनाय कम्' (ऋ० १.३९.७) इति निगमौ।

---

१. स्कन्दस्वामिभाष्यम् (ऋ० १.४३.४)। २. तु०–स्कन्दटीका (निरु० ८.९)।
३. सुपूर्वाद् म्नाधातोः कप्रत्ययेन सुम्नशब्दसिद्धिः साधुतरा। (सु०)।
४. 'निपातनम्' इति मुद्रितेषु।

'श्रद्धे कमिन्द्र चरतो वितर्तुरम्' (ऋ० १.१०२.२) इत्यत्र 'कमिति सुखनामेदमव्ययम्'[१] इति हरदत्तः॥

इति विंशतिः सुखनामानि॥ ६॥

निर्णिक् (१)। वव्रिः (२)। वर्पः (३)। वपुः (४)। अमतिः (५)। अप्सः (६)। प्सुः (७)। अप्नः (८)। पिष्टम् (९)। पेशः (१०)। कृशनम् (११)। प्सरः (१२)। अर्जुनम् (१३)। ताम्रम् (१४)। अरुषम् (१५)। शिल्पम् (१६)। इति षोडश रूपनामानि॥ ७॥

(१) निर्णिक्[२]–'णिजिर् शौचपोषणयोः' (जु०उभ० ११) निशब्दपूर्वः, क्विप्। निर्णिक्तं हि तत्, पोषयति वा प्रीतिम्। 'वरुणो वस्त निर्णिजम्' (ऋ० १.२५.१३) इति निगमः॥

(२) वव्रिः[३]–'वृञ् वरणे' (स्वा०उभ० ८)। 'आदृगमहनजनः किकिनौ लिट् च' (अ० ३.२.१७१) द्विर्वचनम्, कित्त्वाद् गुणाभावः, यणादेशः। तद्धि स्वाश्रयमावृणोति[४], व्रियते वा। 'विद्युद् भवन्ती प्रति वव्रिमौहत' (ऋ० १.१६४.२९) इति निगमः॥

(३) वर्पः–'वृङ् सम्भक्तौ' (क्र्या० आ० ४२)। 'वृङ्शीङ्भ्यां रूपस्वाङ्गयोः पुट् च' (उ० ४.२०२) इत्यसुन्। भज्यते हि तत्। वृणोतेर्वा बाहुलकादसुन् पुट् च। वव्रिवदर्थः। 'मा वर्पो अस्मदप गूह एतत्' (ऋ० ७.१००.६) इति निगमः॥

(४) वपुः–व्याख्यातमुदकनामसु (निघ० १.१२.९०)। उप्यते स्वाश्रयः। 'वपुर्भिरा चरतो अन्यान्या' (ऋ० १.६२.८) इति निगमः॥

(५) अमतिः[५]–['सामर्थ्यादत्र तद्वति वर्तते' इति स्कन्दस्वामिभाष्यम्][६]॥

(६) अप्सः–'अप्स इति रूपनामाप्सातेः' (निरु० ५.१३) इत्यादिभाष्ये

---

१. मृग्यम्।
२. निरु० ५.२१। (सु०)।
३. निरु० २.८। (सु०)।
४. द्र०–स्कन्दटीका (निरु० २.९)।
५. गत्याद्यर्थेषु वर्तमानाद् अम्धातोः 'पतिवसतिस्वपति' शब्दादिवद् अतिप्रत्ययः। 'पुरुप्रशस्तो अमतिर्न सत्यः' (ऋ० १.७३.२) इति निगमः। सुन्दरस्वरूप इत्यर्थ इति तत्रैव भाष्ये दयानन्दः। (सु०)।
६. अयं पाठो लक्ष्मणस्वरूपेण स्कन्दटीकाद्वितीयपरिशिष्टे ३३५तमे पृष्ठ उद्धृतः। तु०–स्कन्दस्वामिभाष्यम् (ऋ० १.६४.९)।

स्कन्दस्वामिना अप्सशब्दो व्युत्पादितः। तत्प्रकारेण निर्वचनं प्रदर्श्यते[१]। नञ्पूर्वात् प्सातेरसुनि बाहुलकादकारलोपः। आप्नोतेर्वा 'वृतॄवदिहनिकमिकषिभ्यः सः' (श्वेत० ३३२, उ० ३.६२) इति सप्रत्ययः। 'उषा हस्नेव नि रिणीते अप्सः' (ऋ० १.१२४.७), 'अप्सरसः परि जज्ञे वसिष्ठः' (ऋ० ७.३३.१२), 'अप्सरसां गन्धर्वाणाम्' (ऋ० १०.१३६.६) इति निगमाः॥

(७) प्सुः—'स्फुर स्फुरणे' (तु० प० ९९)। 'मृगय्वादयश्च' (उ० १.३७) इति डुन्प्रत्ययः, सकारपकारयोः फकारस्य च व्यत्ययश्च निपात्यते। स्फुरति हि तत्। 'वहन्ते अह्रुतप्सवः' (ऋ० ८.२०.७), 'शुष्मा इन्द्रमवाता अह्रुतप्सवः' (ऋ० १.५२.४) इति निगमौ॥

(८) अप्नः—अपत्यनामसु व्याख्यातम् (निघ० २.२.७)। तेन हि कृत्स्नमाश्रयं व्याप्नोति। 'अभिसन्ति जम्भया ता अनप्नसः' (ऋ० २.२३.९) इति निगमः॥

(९) पिष्टम्[२]—'पिश अवयवे' (तु० प० १४६) 'पिस गतौ' (चुरा० प० ३६) इति क्षीरस्वामी। 'पिशेः किच्च' (उ० ३.९५) इति तः, गुणाभावश्च, 'तितुत्रत०' (अ० ७.२.९) इतीट्प्रतिषेधः। 'पिशितम्, अवयवशो विभक्तमित्यर्थः'[३] इति स्कन्दस्वामी। 'पिश आश्लेषणार्थः'[४] इति माधवः। आश्लिष्यत्याश्रयम्। 'पिष्टं रुक्मेभिरञ्जिभिः' (ऋ० ५.५६.१) इति निगमः॥

(१०) कृशनम्, (११) पेशः—व्याख्याते हिरण्यनामसु (निघ० १.२.६, ७) दीप्यते हि तत्, दीप्यतेऽनेन वा तद्वान्। पेशसः पिष्टवदर्थः। कृशनस्य निगमोऽन्वेषणीयः[५]। 'पेशो मर्या अपेशसे' (ऋ० १.६.३) इति निगमः॥

(१२) प्सरः—'स्फुर स्फुरणे' (तु० प० ९९)। असुन्। पृषोदरादित्वात् (अ० ६.३.१०९) सकारपकारयोर्व्यत्ययः। स्फुरति हि तत्। 'महि प्सरो वरुणस्य' (ऋ० १.४१.७), 'वचो देवप्सरस्तमम्' (ऋ० १.७५.१) इति निगमौ॥

केचिदत्र मरुच्छब्दं पठन्ति। तद्धिरण्यनामसु व्याख्यातम् (निघ०

---

१. तु०—स्कन्दटीका (निरु० ५.१३)।

२. पिष्टतमया=सुरूपतमया—निरु० ८.२०। (सु०)।

३. द्र०—स्कन्दस्वामिभाष्यम् (ऋ० ५.५६.१)।

४. मृग्यम्।

५. 'स नो हिरण्यजाः शङ्खः कृशनः पात्वंहसः' (शौ०सं० ४.१०.१) इति निगमः। रोचिष्णुस्वरूप इत्यर्थः। (सु०)।

१.२.१३)। निगमोऽन्वेषणीयः॥

(१३) अर्जुनम्–व्याख्यातमुषोनामसु (निघ० १.८.६) अर्जुनीत्यत्र। 'अहश्च कृष्णमहरर्जुनञ्च' (ऋ० ६.९.१) इति निगमः॥

(१४) ताम्रम्–'तमु काङ्क्षायाम्' (दि० प० ९२)। 'अमितम्योर्दीर्घश्च' (उ० २.१६) इति रक्प्रत्ययः। काङ्क्ष्यं हि तत्, तस्मात् ताम्रम्। 'आपो दिवादा ताम्रः'[1] इति निगमः। 'असौ यस्ताम्रोऽअरुणः' (मा०सं० १६.६) इति च॥

(१५) अरुषम्–व्याख्यातमुषोनामसु (निघ० १.८.१३) अरुषीत्यत्र आ रोचते। निगमोऽन्वेषणीयः॥

(१६) शिल्पम्[2]–'शिष्लृ विशेषणे' (रु० प० १४)। 'खष्पशिल्पशष्पबाष्परूपपर्पतल्पाः' (उ० ३.२८) इति पप्रत्ययः। षकारस्य लकारो बाहुलकाद् गुणाभावश्च निपात्यते। विशेषयति तद्वन्तम्। 'ऋक्सामयोः शिल्पे स्थः' (मा०सं० ४.९) इति निगमः॥

इति षोडश रूपनामानि॥ ७॥

अस्त्रेमा (१)। अनेमा (२)। अनेद्यः (३)। अनवद्यः (४)। अनभिशस्ताः (५)। उक्थ्यः (६)। सुनीथः (७)। पाकः (८)। वामः (९)। वयुनम् (१०)। इति प्रशस्यस्य॥८॥

(१) अस्त्रेमा–'स्त्रिवु गतिशोषणयोः' (प० ३) दिवादिर्नञ्पूर्वः, 'मनिन् सर्वधातुभ्यः' (उ० ४.१४६) इति मनिनि बाहुलकाद् ऊडभावः[3], 'लोपो व्योर्वलि' (अ० ६.१.६४) इति वकारलोपः, गुणः। न गच्छत्यकीर्त्तिम्, अगम्योऽसत्पुरुषाणाम्, न गच्छन्त्यस्माद् गुणाः। 'अस्त्रेमाणं तरणिं वीळुजम्भम्' (ऋ० ३.२९.१३) इति निगमः॥

(२) अनेमा–नञ्पूर्वान्नयतेर्मनिन्। नेतुमशक्यो दुर्मार्गम्। निगमोऽन्वेषणीयः॥

(३) अनेद्यः[4]–'णिदि कुत्सायाम्' (भ्वा०प० ५४) नञ्पूर्वः, आगमा-

---

१. मृग्यम्।

२. निघ० २.१ कर्मनामसु। आश्चर्यकरं कर्म। तथाभूतं रूपमत्र शिल्पम्। (सु०)।

३. 'आडभावः' इत्यपपाठो मुद्रितेषु।

४. निन्दार्थे निद्धातुरप्यासीदिति वेदेष्वसकृत् प्रयुक्तैर्विविधरूपैः परिज्ञायते। यथा–उत ब्रुवन्तु नो निदः (ऋ० १.४.५), तस्यैवात्र रूपम् अनेद्य इति। लोके त्वैकान्तिकतया निन्द्धातोः प्रयुज्यमानत्वाद् धातुपाठे केवलं निन्द्धातुः परिगण्यते। (सु०)।

नित्यत्वान्नुम् न क्रियते, 'ऋहलोर्ण्यत्' (अ० ३.१.१२४) 'माध्यंन्दिनस्य सवनस्य वृत्रहन्ननेद्य' (ऋ० ८.३७.२) इति निगमः॥

(४) अनवद्यः[१] ॥ **(५) अनभिशस्ताः**–'शसु हिंसायाम्' (भ्वा० प० ४८२)। निगमोऽन्वेषणीयः[२]॥

(६) उक्थ्यः[३]–'वच परिभाषणे' (अदा० प० ५६)। 'पातृतुदिवचिरिचिसिचिभ्यस्थक्' (उ० २.७) सम्प्रसारणञ्च। उक्थशब्दः स्तुतिपर्यायः। उक्थमर्हति। 'छन्दसि च' (अ० ५.१.६६) इति यः। स्तुत्यर्ह इत्यर्थः। 'क्रतुर्भवत्युक्थ्यः' (ऋ० १.१७.५), 'गायं गायत्रमुक्थ्यम्' (ऋ० १.३८.१४) इति निगमौ॥

(७) सुनीथः[४]–नयतेः 'हनिकुषिनीरमिकाशिभ्यः क्थन्' (उ० २.२)। नीथा स्तुतिः। शोभना नीथा यस्य सः। 'हिरण्यहस्तो असुरः सुनीथः' (ऋ० १.३५.१०), 'गभीरवेपा असुरः सुनीथः' (ऋ० १.३५.७) इति निगमौ॥

(८) पाकः[५]–पातेः 'इण्भीकापाशल्यतिमर्चिभ्यः कन्' (उ० ३.४३) इति कन्। रक्ष्यते राजादिना गुणवत्त्वात्। 'तं पाकेन मनसापश्यमन्तितः' (ऋ० १०.११४.४) इति निगमः। 'अपाकोऽचिष्टुर्यशसे पुरूणि' (मा०सं० २०.४४) इति च॥

(९) वामः[६]–'वन षण सम्भक्तौ' (भ्वा० प० ३१३)। 'इषियुधीन्धिदसिश्याधूसूभ्यो मक्' (उ० १.१४५) इति बाहुलकान्मक्प्रत्ययः, नकारस्याकारश्च। सम्भजनीयो हि प्रशस्यः। 'न दूढ्ये३ अनुददासि वामम्' (ऋ० १.१९०.५) इति निगमः॥

(१०) वयुनम्[७]–अजतेः 'अजियमिशीङ्भ्यश्च' (उ० ३.६१) इत्युनन्प्रत्ययः, वीभावः। अस्त्रेमवदर्थः। 'वयुनं वेतेः, कान्तिर्वा प्रज्ञा वा' (निरु० ५.१४) इति भाष्यम्। तत्र बाहुलकादुनन्, मत्वर्थीयस्य लुक्,

---

१. अ० ३.१.१०१ सूत्रेण नञ्पूर्वाद् वद्धातोः गर्ह्यार्थे क्यप् प्रत्ययः। तस्यात्र निषेधः, प्रशस्य इत्यर्थः। (ऋ० १.७३.३) निगमः। (सु०)।

२. अहिंसितः, प्रशस्त इत्यर्थः। 'अनभिशस्ता दिव्या यथा विट्' (ऋ० ९.८८.७) इति निगमः। (सु०)।

३. 'उक्थ्यं वक्तव्यप्रशंसम्' निरु० ११.३१ वक्तव्या प्रशंसा यस्य तमित्यर्थः। (सु०)।

४. निरु० ४.१९। (सु०)।

५. निरु० ३.१२ विपक्वप्रज्ञ इत्यर्थः। प्रदीप्ततया इति शेषः। (सु०)।

६. निरु० ४.२६, ६.३०, १०.४६। सुन्दरस्वरूपत्वादेव स्त्रीणां कृते लोके वामाशब्दः। उद्गिरणार्थकाद् वम्धातोः वामाशब्दं निर्ब्रुवन्तः कोशकृतस्तु धन्याः। (सु०)।

७. निरु० ५.८, ८.२०, ९.१५। (सु०)।

कान्तिमान् प्रज्ञावान् वा। 'विमानमग्निर्वयुनञ्च वाघताम्' (ऋ० ३.३.४) इति निगमः॥

इति दश प्रशस्यनामानि॥ ८॥

केतः (१)। केतुः (२)। चेतः (३)। चित्तम् (४)। क्रतुः (५)। असुः (६)। धीः (७)। शची (८)। माया (९)। वयुनम् (१०)। अभिख्या (११)। इत्येकादश प्रज्ञानामानि॥ ९॥

(१) केतः[१]–'चायृ पूजानिशामनयोः' (भ्वा०उभ० ६२०)। 'चायः की' (उ० १.७४) इति तप्रत्ययो[२] धातोः कीरादेशो गुणश्च। पूज्यते। 'पुरूरवोऽनु ते केतमायम्' (ऋ० १०.९५.५) इति निगमः॥

(२) केतुः[३]॥ **(३) चेतः, (४) चित्तम्**[४]–'चिती सञ्ज्ञाने' (भ्वा० प० ३२)। 'अञ्जिघृसिभ्यः०' (उ० ३.८९) इति बाहुलकात् क्तः। केतवदर्थः 'ऋतावानं विचेतसम्' (ऋ० ४.७.३), 'सन्त्याचित्तं चित्तेन ममृतम्'[५] इति निगमौ॥

(५) क्रतुः–व्याख्यातं कर्मनामसु (निघ० २.१.१०)। क्रियतेऽनया धर्मादिविचारः। 'अग्निर्होता कविक्रतुः' (ऋ० १.१.५) इति निगमः॥

(६) असुः–अस्यतेः 'शृस्वृस्निहित्रप्यसिवसि०' (उ० १.१०) इति उप्रत्ययः। 'असुरिति प्राणनाम' (निरु० ३.८) इति भाष्ये, अस्यति क्षिपत्यनर्थान्, अस्ताः क्षिप्ता अस्यामर्था इत्यर्थप्राप्त्यनर्थपरिहारात्मकमुभयमपि प्राप्नोति[६]॥

(७) धीः, (८) शची–व्याख्याते कर्मनामसु (निघ० २.१.२१, २२)। निधीयते द्रव्येषु, धारयत्यर्थान् ध्यायन्तेऽनया देवताः, गम्यन्ते अवगम्यन्तेऽनयार्थाः, गच्छत्यनया इष्टप्राप्तिमनिष्टपरिहारञ्च। 'चिदसि मनासि धीरसि' (मा०सं० ४.१९), 'दोषावस्तर्धिया वयम्' (ऋ० १.१.७), 'ऋणोरक्षं

---

१. 'कित ज्ञाने' इत्येतस्माद् धातोः घञन्त आद्युदात्तोऽयं शब्द इति ऋ० १.३३.१ मन्त्रे सायणः। (सु०)।
२. बाहुलकादिति शेषः।
३. निरु० ११.६, ११.२७–अत्र ऋ० १.३.१२ इति प्रोक्ते निगमे केतुना कर्मणा प्रज्ञया वेत्यर्थः। निरु० १२.७, १२.१७। (सु०)।
४. निरु० १.६, ९.३३। (सु०)।
५. मृग्यम्।
६. द्र०–स्कन्दटीका (निरु० १०.३४)।

न शचीभिः' (ऋ० १.३०.१५) इति निगमाः॥

(९) माया[१]–'माङ् माने' (जु०आ० ६)। 'माछासससिभ्यो यः' (उ० ४.११०) इति यप्रत्ययः। मीयन्ते परिच्छिद्यन्तेऽनया पदार्थाः। 'मायाभिरिन्द्र मायिनम्' (ऋ० १.११.७), 'इमामू नु कवितमस्य मायाम्' (ऋ० ५.८५.६) इति निगमौ॥

(१०) वयुनम्–व्याख्यातं प्रशस्यनामसु (निघ० ३.८.१०)। गतौ शचीवदर्थः, क्षेपणेऽसुवत्। 'विद्वाँ अग्ने वयुनानि क्षितीनाम्' (ऋ० १.७२.७) इति निगमः॥

(११) अभिख्या–'ख्या प्रकथने' (अदा० प० ५३)। 'आतश्चोपसर्गे' (अ० ३.३.१०६) इत्यङ्। प्रकर्षेण कथ्यन्तेऽनयार्थाः। 'अभिख्या भासा बृहता शुशुक्वनिः' (ऋ० ८.२३.५) इति निगमः। भाष्यं[२] द्रष्टव्यम्॥

इत्येकादश प्रज्ञानामानि॥ ९॥

बट् (१)। श्रत् (२)। सत्रा (३)। अद्धा (४)। इत्था (५)। ऋतम् (६)। इति षट् सत्यनामानि॥ १०॥

(१) बट्, (२) श्रत्, (३) सत्रा, (४) अद्धा, (५) इत्था[३]–बडादयो निपाताः। बण्महाँ असि सूर्य' (ऋ० ८.१०१.११), 'श्रद्धयाग्निः समिध्यते' (ऋ० १०.१५१.१), 'सत्रादावन्नपा वृधि' (ऋ० १.७.६), 'सत्यमद्धा नकिरन्यस्त्वावान्' (ऋ० १.५२.१३), 'मक्षिवीत्था धिया नरा' (ऋ० १.२.६) इति निगमाः॥

(६) ऋतम्[४]–व्याख्यातमुदकनामसु (नि० १.१२.७०)। गच्छत्यनेन सुगतिम्। 'ऋतम् अर्तेः, प्राप्यते तदिन्द्रियैः'[५] इति माधवः। 'ऋतेन मित्रावरुणौ' (ऋ० १.२.८) इति निगमः॥

इति षट् सत्यनामानि॥ १०॥

चिक्यत् (१)। चाकनत् (२)। आचक्ष्म (३)। चष्टे (४)। विचष्टे (५)। विचर्षणिः (६)। विश्वचर्षणिः (७)। अवचाकशत् (८)। इत्यष्टौ पश्यतिकर्माणः॥ ११॥

---

१. निरु० ७.२७, १२.१७। (सु०)। २. अत्र निरुक्ते न किञ्चिदुच्यते।

३. निरु० ४.२५, ५.५ अमुथेत्यर्थः, ६.३, ११.३८। (सु०)।

४. निरु० ४.१९, ८.६, ८.१९। (सु०)। ५. मृग्यम्।

(१) चिक्यत्, (२) चाकनत्[1], **(३) आचक्ष्म, (४) चष्टे, (५) विचष्टे**–इति चक्षिङो दर्शनार्थानि व्याख्यातानि[2]। 'चिक्यदित्यादीनि चायत्यर्थनिगमानि'[3] इति स्कन्दस्वामिना भाष्यमुक्तम्। 'कि ज्ञाने' (जु० प० २०) यङ्लुकि शतरि। व्यत्ययेन 'नुगतोऽनुनासिकान्तस्य' (अ० ७.४.८५) इति न भवति। निगमोऽन्वेषणीयः॥

(३) आचक्ष्म–आङ्पूर्वस्य चक्षिङो लङि महिङो मसादेशो व्यत्ययेन। 'अतश्चक्षाथे अदितिं दितिञ्च' (ऋ० ५.६२.८) इति निगमः॥

(४) चष्टे, (५) विचष्टे–केवलाद् विपूर्वाच्च [चक्षिङः] आत्मनेपदप्रथमपुरुषैकवचने संयोगादिलोपे ष्टुत्वे च रूपम्। 'तेभिश्चष्टे वरुणो मित्रो अर्यमा' (ऋ० १०.९२.६), 'इतो जातो विश्वमिदं विचष्टे' (ऋ० १.९८.१) इति निगमौ॥

(६) विचर्षणिः, (७) विश्वचर्षणिः–विपूर्वाद् विश्वपूर्वाच्च 'कृष विलेखने' (भ्वा० प० ७१६) इत्यस्मात् 'कृषेरादेश्च चः' (द० उ० १.४) इति अनिप्रत्ययः, आदेः ककारस्य चकारश्च[4]। यद्वा चायतेरेव बाहुलकाद् अनिप्रत्ययो धातोर्ह्रस्वः षभावश्च[5]। विविधं द्रष्टा विचर्षणिः। विश्वस्य द्रष्टा विश्वचर्षणिः। 'सक्मन् पिपर्षि विदथे विचर्षणे' (ऋ०१.३१.६), स्तोमैभिर्विश्वचर्षणे' (ऋ०१.९.३) इति निगमौ॥

(८) अवचाकशत्–'काशृ दीप्तौ' (भ्वा० आ० ४३०) अवपूर्वः। यङ्लुकि शतरि व्यत्ययेन ह्रस्वत्वम्। 'जनानां धेना अवचाकशद् वृषा' (ऋ० १०.४३.६), 'उभे सोमावचाकशत्' (ऋ० ९.३२.४) इति निगमौ॥

इत्यष्टौ पश्यतिकर्माणः॥ ११॥

हिर्कम् (१)। नुकम् (२)। सुकम् (३)। आहिकम् (४)। आकीम् (५)। नकिः (६)। माकिः (७)। नकीम् (८)। आकृतम् (९)। इति नवोत्तराणि पदानि

---

१. निघ० २.६ कान्तिकर्मसु। (सु०)।

२. यद्यपि धातुपाठे चक्षिङ्धातुर्व्यक्तायां वाचीत्यर्थे समाम्नायते। परं वैदिके युगे धातुरयं दर्शनार्थक आसीदित्यर्थे नैरुक्तः समाम्नायः प्रमाणम्। अत एव चक्ष्धातोः नेत्रार्थकस्य चक्षुःशब्दस्य सिद्धिः सङ्गच्छते। (सु०)।

३. मृग्यम्।

४. अत्र कत्वचत्वादेर्व्यत्ययमुपलक्ष्य पूर्वस्मिन् 'केत'शब्दे (निघ० ३.९.१) चितधातुं कल्पयन्ति नव्याः। (सु०)।

५. रमागमोऽपि।

सर्वपदसमाम्नानाय ॥ १२ ॥

(१) हिकम्, (२) नुकम्, (३) सुकम्, (४) आहिकम्, (५) आकीम्, (६) नकिः, (७) माकिः, (८) नकीम्—एते निपाताः। 'वसुर्वसुपतिर्हि कम्'[१] (ऋ० ८.४४.२४), 'इमा नु कम्भुवना' (ऋ० १०.१५७.१), 'सीषधामातिष्वतेलवतासुकम्', 'पृङ्क्तं हवींषि मधुना हि कं गतम्' (ऋ० २.३७.५), 'आकीं सूर्यस्य रोचनात्' (ऋ० १.१४.९), 'नकिरिन्द्र त्वदुत्तरो' (ऋ० ४.३०.१), 'माकिर्नेशन्माकीं रिषत्' (ऋ० ६.५४.७), 'नकीं वृधीक इन्द्र ते' (ऋ० ८.७८.४) इति निगमाः॥

(९) आकृतम्—निष्ठान्तस्य कृतशब्दस्यात्र पाठात् सङ्गतेरयमपि निपातसमाहाररूपो निपातितः। कृतशब्दस्य विभक्तिप्रतिरूपकत्वाद् निपातत्वमित्याहुः। निगमोऽन्वेषणीयः[२]॥

इति नव सर्वपदसमाम्नानाय ॥ १२ ॥

इदमिव (१)। इदं यथा (२)। अग्निर्नये (३)। चतुरंश्चिद्ददमानात् (४)। ब्राह्मणा व्रतचारिणः (५)। वृक्षस्य नु ते पुरुहूतवया (६)। जार आ भगम् (७)। मेषो भूतोऽभि यन्नयः (८)। तद्रूपः (९)। तद्वर्णः (१०)। तद्वत् (११)। तथा (१२)। इत्युपमाः ॥ १३ ॥

इदमिवादीनि भाष्यकारेणैव व्याख्यातानि (निरु० ३.१३-१८)[३]॥ १३॥

अर्चति (१)। गायति (२)। रेभति (३)। स्तोभति (४)। गूर्धयति (५)। गृणाति (६)। जरते (७)। ह्वयते (८)। नदति (९)। पृच्छति (१०)। रिहति (११)। धमति (१२)। कृपायति (१३)। कृपण्यति (१४)। पनस्यति (१५)। पनायते (१६)। वल्गूयति (१७)। मन्दते (१८)। भन्दते (१९)। छन्दति (२०)। छदयते (२१)। शशमानः (२२)। रञ्जयति (२३)। जरयति (२४)। शंसति (२५)।

---

१. पदकारस्त्वत्र 'हि कम्' इति चिच्छेद। (सु०)।
२. 'यद्वा समुद्रे अध्याकृते' (ऋ० ८.१०.१) इति निगमः। (सु०)।
३. तृतीयाध्यायादुत्तरत्र परिशिष्टे व्याख्यास्यन्ते।

स्तौति (२६)। यौति (२७)। रौति (२८)। नौति (२९)। भनति (३०)। पणायति (३१)। पणते (३२)। सपति (३३)। पपृक्षाः (३४)। महयति (३५)। वाजयति (३६)। पूजयति (३७)। मन्यते (३८)। मदति (३९)। रसति (४०)। स्वरति (४१)। वेनति (४२)। मन्द्रयते (४३)। जल्पति (४४)। इति चतुश्चत्वारिंशदर्चतिकर्माणः ॥ १४ ॥

(१) **अर्चति**–'अर्च पूजायाम्' (भ्वा०प० १२०)।'अर्चन्त्यर्कमर्किणः' (ऋ० १.१०.१) इति निगमः॥

(२) **गायति**[१]–'कै गै शब्दे' (भ्वा० प० ६५३)। 'गायन्ति त्वा गायत्रिणः।' (ऋ० १.१०.१) इति निगमः॥

(३) **रेभति**, (४) **स्तोभति**[२]–'रेभृ शब्दे' (भ्वा० आ० २६९), 'ष्टुभ स्तम्भे' (भ्वा० आ० २७८)। आत्मनेपदिनौ व्यत्ययेन परस्मैपदम्। 'रेभन्तो वै देवाश्च ऋषयश्च स्वर्गं लोकमायन्' (ऐ० ब्रा० ६.३२), 'सोमः पवित्रमत्येति रेभन्' (ऋ० ९.९६.६), 'परिष्टोभत विंशतिः' (ऋ० १.८०.९) इति निगमाः॥

(५) **गूर्द्धयति**–नैरुक्तधातुः। 'तं गूर्द्धया स्वर्णरम्' (ऋ० ८.१९.१) इति निगमः॥

(६) **गृणाति**[३]–'गॄ शब्दे' क्र्यादिः (प० २९) स्वादिश्च[४]। 'कण्वतमो नाम गृणाति नृणाम्' (ऋ० १.४८.४) इति निगमः॥

(७) **जरते**[५]–नैरुक्तधातुः।'पुरुणीथे जरते सूनृतावान्' (ऋ० १.५९.७) इति निगमः॥

(८) **ह्वयते**–'ह्वेञ् स्पर्द्धायाम्०' (भ्वा०उभ० ७३४)। 'वाहिष्ठो वां हवानाम्' (ऋ० ८.२६.१६) इति निगमः।'हवाः स्तोमा ह्वयतेरर्चतिकर्मत्वात्'[६] इति स्कन्दस्वामी॥

(९) **नदति**[७]–'णद अव्यक्ते शब्दे' (भ्वा० प० ४४)। 'नदस्य मा

---

१. निरु० १.८। (सु०)।

२. निरु० ७.१२ 'अनुष्टुभ्'आदिशब्दा अस्मात् स्तुभ्धातोरेव। (सु०)।

३. निरु० ३.५। (सु०)। ४. स्वादौ नास्ति।

५. निरु० १०.८ स्तुत्यर्थको जराशब्दोऽस्मादेव। (सु०)।

६. मृग्यम्। ७. निरु० ५.३। (सु०)।

रुधतः काम आगन्' (ऋ० १.१७९.४) इति निगमः॥

(१०) पृच्छति–'प्रच्छ ज्ञीप्सायाम्' तुदादिः (प० १२२)। 'ग्रहिज्या०' (अ० ६.१.१६) इत्यादिना सम्प्रसारणम्॥

(११) रिहति[1]–'रिह कत्थनादौ' इति क्षीरस्वामी[2]। तुदादिः (प० २४)। 'शिशुं न विप्रा मतिभी रिहन्ति' (ऋ० १०.१२३.१) इति निगमः। 'अत्र भाष्ये तु समानवृत्तित्वप्रदर्शनपरं लिहन्ति पर्यायवचनम्'[3] इति। 'विप्रा रिहन्ति धीतिभिः' (ऋ० १.२२.१४) इत्यत्र 'रिहतिधमतीत्यर्चतिकर्मसु पाठात्'[3] इति स्कन्दस्वामी॥

(१२) धमति–गतिकर्मसु व्याख्यातः (निघ० २.१४.५०)॥

(१३) कृपायति[4], **(१४) कृपण्यति**, **(१५) पनस्यति**–नैरुक्तधातवः। 'सर्वताता ये कृपणन्त रत्नम्' (ऋ० १०.७४.३) इत्यत्र 'कृपणन्त स्तुवन्ति'[5] इति भट्टभास्करमिश्रः। 'त्वेषं पनस्युमर्किणम्' (ऋ० १.३८.१५) इति निगमः। 'पनस्यतिरर्चतिकर्मा, स्तुत्यमित्यर्थः'[6] इति स्कन्दस्वामी॥

(१६) पनायते–'पण व्यवहारे स्तुतौ च', 'पन च' (भ्वा० आ० २९८, २९९)। 'गुपूधूपविच्छिपणिपनिभ्य आयः' (अ० ३.१.२८)। 'अभीशूनां महिमानं पनायत' (ऋ० ६.७५.६) इति निगमः[7]॥

(१७) वल्गूयति[8]–'वल्गु पूजामाधुर्ययोः' कण्ड्वादिः (३)। 'वल्गूयति वन्दते पूर्वभाजम्' (ऋ० ४.५०.७) इति निगमः॥

(१८) मन्दते[9]–'मदि स्तुतिमोदमदस्वप्रकान्तिगतिषु' आत्मनेपदी (भ्वा० १२)। 'प्र वो महे मन्दमानायान्धसः' (ऋ० १०.५०.१) इति निगमः॥

(१९) भन्दते[10]–'भदि कल्याणे सुखे च' आत्मनेपदी (भ्वा० ११)।

---

१. 'लिहति' इत्यनेन साम्यं भजते। रलयोरभेदात्। 'शिशुं न गावस्तरुणं रिहन्ति' (ऋ० १.१८६.७) अत्र लिहन्तीत्येवार्थः। पश्चात्तु लक्षणया स्निह्यत्यर्चतीत्यर्थोऽपि। (सु०)।

२. क्षीरतरङ्गिणी ६.२७।

३. स्कन्दटीका (निरु० १०.३९)।

४. निरु० २.१२ कृपयन् इत्यस्य कृपायमाण इत्यर्थः। अनेन क्यङ्प्रत्ययान्तोऽप्यस्तीति व्यज्यते। (सु०)।

५. मृग्यम्।

६. तु०–स्कन्दस्वामिभाष्यम् (ऋ० १.३८.१५)।

७. निरु० ९.१६ व्याख्यायतेऽसौ निगमः। (सु०)।

८. वल्गुशब्दश्शोभन इत्यर्थे प्रसिद्धो वेदे। यथा–ऋ० ६.६३.१ भाष्ये दयानन्दः। तस्मादेव नामधातुरूपम्–वल्गूयति इति। (सु०)।

९. निरु० ४.२५ मन्दी मन्दतेः स्तुतिकर्मणः। (सु०)।

१०. निरु० ५.२ भन्दना भन्दतेः स्तुतिकर्मणः। (सु०)।

'पुरुप्रियो भन्दते धामभिः कविः' (ऋ० ३.३.४) इति निगमः॥

(२०) छन्दति–'छदि संवरणे' चुरादिः (प० ४६)। 'बहुलमन्यत्रापि सञ्ज्ञाच्छन्दसोः' (उ० २.२३) इति लुक्। 'वृषाच्छन्दुर्भवति हर्यतो वृषा' (ऋ० १.५५.४) इति निगमः॥

(२१) छदयते–'छद अपवारणे' चुरादिः (उभ० ३६२)। 'सञ्ज्ञापूर्वको विधिरनित्यः' (परि० ९३) इति वृद्ध्यभावः। 'अदन्तो द्रष्टव्यः'[१] इति भट्टभास्करमिश्रः॥

(२२) शशमानः–'शशमानः शंसमानः' (निरु० ६.८) इति भाष्ये 'शंसु स्तुतावित्यस्य शंशन्नित्यवगम्यते'[२] इति स्कन्दस्वामी। शंसेर्लटि पृषोदरादित्वाद्रूपसिद्धिः। यद्वा 'शश प्लुतगतौ' (भ्वा० प० ४८१)। 'ताच्छील्यवयोवचनशक्तिषु चानश्' (अ० ३.२.१२९)। 'यो वां यज्ञैः शशमानो ह दाशति' (ऋ० १.१५१.७) इति निगमः॥

(२३) रञ्जयति, (२४) जरयति–'रञ्ज रागे' (भ्वा०उभ० ७२५), 'जृष् वयोहानौ' (दि० प० २१) हेतुमति (अ० ३.१.२६) णिच्॥

(२५) शंसति–'शंसु स्तुतौ' (भ्वा० प० ४८३)। 'मा चिदन्यद्वि शंसत' (ऋ० ८.१.१) इति निगमः॥

(२६) स्तौति–'ष्टुञ् स्तुतौ' अदादिः (उभ० ३६)। 'उतो वृद्धिर्लुकि हलि' (अ० ७.३.८९)। 'इदमित् स्तोतारं वृषणं सचासुतः'[१] इति निगमः॥

(२७) यौति, (२८) रौति, (२९) नौति–'यु मिश्रणे', 'रु शब्दे', 'णु स्तुतौ' अदादयः (प० २६, २८, २७)। 'रुवद्धोक्षा पप्रथानेभिरेवैः' (ऋ० ४.५६.१) इति निगमः। 'द्युम्नैरभि प्र णोनुमः' (ऋ० १.७८.१) इति निगमः॥

(३०) भनति[३]–नैरुक्तधातुः॥

(३१) पणायति, (३२) पणते–'पण व्यवहारे स्तुतौ च' (भ्वा० आ० २९८)। 'गुपूधूप०' (अ० ३.१.२८) इत्यादिना आयः, छान्दसत्वाद् आयप्रत्यये विकल्पिते पणत इति रूपम्। 'देवौऽनयत् सविता सुपाणिः' (ऋ० ३.३३.६) इति निगमः। 'पाणिः पणायतेः पूजाकर्मणः' (२.२६) इति निरुक्तम्॥

(३३) सपति[४]–'षप समवाये' (भ्वा० प० २८४)। 'मत्सरासः

---

१. मृग्यम्। २. स्कन्दटीका (निरु० ६.८)।

३. 'एता वि पृच्छ किमिदं भनन्ति' (ऋ० ४.१८.६) इति निगमः। सम्मानपूर्वकाख्यानार्थत्वादत्रार्चतिकर्मा। अस्यैव लौकिकसंस्कृते रूपं 'भणति' इति। (सु०)।

४. निघ० ३.५ परिचरणकर्मसु। (सु०)।

प्रसुपः साकमीरते' (ऋ० ९.६९.६)। प्रसुपः सपतेरर्चतिकर्मणः। 'वि ये चृतन्त्यृता सपन्तः' (ऋ० १.६७.४) इति निगमौ॥

(३४) पपृक्षाः–पृञ्चतिर्नैरुक्तधातुः। पृचेः सनि 'हलन्ताच्च' (अ० १.२.१०) इत्यत्र हल्ग्रहणस्य जातिवाचकत्वाद् 'अनिदिताम्०' (अ० ६.४.२४) इति नलोपः, गुणाशावश्च। सनन्ताद् (अ० ३.४.७) लेटि, सिपि (अ० ३.१.३४), आडागमे (अ० ३.४.९४), 'इतश्च लोपः०' (अ० ३.४.९७)। 'वायो तव प्रपृञ्चती' (ऋ० १.२.३) इत्यत्र 'पपृक्षाः, महयति इत्यर्चतिकर्मसु पाठात् पृञ्चतिः स्तुत्यर्थोऽपि'[१] इति स्कन्दस्वामी॥

(३५) महयति–'मह पूजायाम्' चुरादिरदन्तः (२९२)। 'त्वं सु मेषं महया स्वर्विदम्' (ऋ० १.५२.१) इति निगमः॥

(३६) वाजयति–वजेर्णिच्[२]। 'वाजयामः शतक्रतो' (ऋ० १.४.९) इति निगमः॥

(३७) पूजयति–'पूज पूजायाम्' चुरादिः (प० १११)॥

(३८) मन्यते–'मन ज्ञाने' दिवादिः (आ० ६५)। 'इमा उ वां भृमयो मन्यमानाः' (ऋ० ३.६२.१) इति निगमः॥

(३९) मदति–'मदी हर्षग्लेपनयोः' (भ्वा० प० ५५५)। 'क्षुमन्तो याभिर्मदेम' (ऋ० १.३०.१३), 'इन्द्रं गीर्भिर्मदता वस्वो अर्णवम्' (ऋ० १.५१.१) इति निगमौ। 'मदति रसतीत्यर्चतिकर्मसु पाठात्'[३] इति स्कन्दस्वामिभाष्यम्॥

(४०) रसति–'रस शब्दे' (भ्वा० प० ४७२)॥

(४१) स्वरति–'स्वृ शब्दोपतापयोः' (भ्वा० प० ६६६)। 'स्वरेणाद्रिं स्वर्यो३ नवग्वैः' (ऋ० १.६२.४), 'ऋषिस्वरं चरति यासु नाम ते' (ऋ० ५.४४.८) इति निगमौ। 'स्वरेणाद्रिम्' इत्यत्र 'स्वरति वेनतीत्यर्चतिकर्मसु पाठात्'[४] इति, 'ऋषिस्वरम्' इत्यत्र 'स्वरतिरर्चतिकर्मा'[५] इति च स्कन्दस्वामी॥

---

१. स्कन्दस्वामिभाष्यम् (ऋ० १.२.३)।

२. वाजं शक्तिं करोत्यादधाति–'तत्करोति०' (अ० ३.१.२६ वा०) इति णिच्। एवं च सति सम्मानास्पदत्वादर्चतिकर्मा। (सु०)।

३. तु०–स्कन्दस्वामिभाष्यम् (ऋ० १.३०.१३, १.५१.१)।

४. तु०–स्कन्दस्वामिभाष्यम् (ऋ० १.६२.४)।

५. स्कन्दटीका (निरु० ६.१५)।

(४२) वेनति[१], **(४३) मन्द्रयते**–नैरुक्तधातू[२]। 'अनर्वाणं वृषभं मन्द्रजिह्वम्' (ऋ० १.१९०.१) इति निगमः। 'मन्द्रयतिरर्चतिकर्मा ....स्तुत्यवाचम्'[३] इति स्कन्दस्वामी॥

(४४) जल्पति–'जल्प व्यक्तायां वाचि' (भ्वा० प० २८१)॥

इति चतुश्चत्वारिंशदर्चतिकर्माणः॥१४॥

विप्रः (१)। विग्रः (२)। गृत्सः (३)। धीरः (४)। वेनः (५)। वेधाः (६)। कण्वः (७)। ऋभुः (८)। नवेदाः (९)। कविः (१०)। मनीषिणः (११)। मन्धाता (१२)। विधाता (१३)। विपः (१४)। मनश्चित् (१५)। विपश्चित् (१६)। विपन्यवः (१७)। आकेनिपः (१८)। उशिजः (१९)। कीस्तासः (२०)। अद्धातयः (२१)। मतयः (२२)। मतुथाः (२३)। वाघतः (२४)। इति चतुर्विंशतिर्मेधाविनामानि॥१५॥

(१) विप्रः–'डुवप बीजसन्ताने०' (भ्वा० उभ० ७२९)। 'विप क्षेपे'[४] इति क्षीरस्वामी। 'ऋज्रेन्द्राग्रवज्रविप्र०' (उ० २.२९) इत्यादिना रन्प्रत्यय इत्वं गुणाभावश्च निपात्यते। उप्यतेऽस्मिन्नतिशयेन मेधा। क्षिपत्यनया पापं वा। यद्वा 'विप्' इति वाङ्नामसु[५] व्याख्यातम् (निघ० १.११.४१), सास्यास्तीति रो मत्वर्थीयः, पृषोदरादित्वाद् जश्त्वाभावः। वाङ्मयी हि मेधा। यद्वा 'प्रा पूरणे' (अदा० प० ५४) विपूर्वः। 'आतोऽनुपसर्गे०' (अ० ३.२.३) इति कः[६]। 'आतो लोप इटि च' (अ० ६.४.६४)। विशेषेण पूरयति विद्यार्थिनामपेक्षाः। 'गृणन्ति विप्र ते धियः' (ऋ० १.१४.२) इति निगमः॥

---

१. निघ० २.६ कान्तिकर्मसु, २.१४ गतिकर्मसु, निरु० १०.४० वेनो वेनतेः कान्तिकर्मणः, १२.२९ वेनति कामयते वेनः–निघ० ३.१५ मेधाविनामसु, ३.१७ यज्ञनामसु। 'अत्रा नो विश्पतिः पिता पुराणाँ अनु वेनति' (ऋ० १०.१३५.१) इति निगमः। (सु०)।

२. वेनधातुर्लौकिकसंस्कृते 'वेण्' इति रूपेण गत्याद्यर्थेषु जीवति। (सु०)।

३. स्कन्दटीका (निरु० ६.२३)।

४. अमरकोषोद्घाटनम् २.७.४।

५. 'सङ्ग्रामनामसु' इत्यपपाठो मुद्रितेषु।

६. उपसर्गत्वादसौ न प्रवर्तते। मूलविभुजादित्वात् (अ० ३.२.५ वा०) क इति युक्ततरं स्यात्। (सु०)।

(२) विप्रः–विपूर्वाद् गृणातेः 'अन्येष्वपि दृश्यते' (अ० ३.२.१०१) इति डः[1]। विविधं गृणात्यर्थान्। 'परैहि विप्रमस्तृतम्' (ऋ० १.४.४) इति निगमः॥

(३) गृत्सः–'गृधु अभिकाङ्क्षायाम्' (दि० प० १३२) 'ऋचिरिषिवृतिव्रश्चिशृगृधिभ्यः कित्' (स० क० २.३.१६९)[2] इति सप्रत्ययः। अभिकाङ्क्ष्यते सर्वैः। यद्वा गृणातेः स्तुतिकर्मणो बाहुलकात् सक्प्रत्ययो ह्रस्वत्वं तुगागमश्च। स्तुत्यो लोकस्य, स्तोता वा देवानाम्। 'गृत्सस्य धीरास्तवसो वि वो मदे' (ऋ० १०.२५.५), 'नमो गृत्सेभ्यो गृत्सपतिभ्यश्च' (मा० सं० १६.२५) इति निगमौ॥

(४) धीरः–दधातेः 'सुसूधाञ्गृधिभ्यः क्रन्' (उ० २.२५) इति क्रन्प्रत्ययः, 'घुमास्थागापा०' (अ० ६.४.६६) इतीत्वम्। धत्ते श्रुतमर्थम्, ददाति वा विद्याः शिष्येभ्यः। यद्वा धीः प्रज्ञा कर्म वा, रो मत्वर्थीयः। 'धियमीरयति' (अ०उ० २.७.५) इति क्षीरस्वामी। तत्र धीशब्द उपपदे 'कर्मण्यण्' (अ० ३.२.१)। 'स मा धीरः पाकमत्राविवेश' (ऋ० १.१६४.२१) इति निगमः॥

(५) वेनः–अजतेः 'धापृवस्यज्यतिभ्यो नः' (उ० ३.६) इति नप्रत्ययः, वीभावः। गच्छति सत्कारं लोके, अवगच्छत्यर्थान्, अवगच्छन्त्यस्मादर्थसंशयान्, गच्छन्त्येनं विद्यार्थिनः, क्षिपत्यनर्थान् पापं वा। यद्वा वेनतेः कान्तिकर्मणो गतिकर्मणो वात्तिकर्मणो वा 'पुंसि सञ्ज्ञायां घः०' (अ० ३.३.११८)। 'गिरिं न वेना अधिरोह तेजसा' (ऋ० १.५६.२) इति निगमः॥

(६) वेधाः–दधातेर्विपूर्वाद् 'विधाञो वेध च' (उ० ४.२२६) इत्यसुन् वेधादेशश्च। विदधाति काव्यादि। 'मोषथा वृक्षं कपनेव वेधसः' (ऋ० ५.५४.६), 'सोमो न वेधा ऋतप्रजातः' (ऋ० १.६५.५), 'आ पृच्छ्यो विश्पतिर्विक्षु वेधाः' (ऋ० १.६०.२) इति निगमाः॥

(७) कण्वः–'कण शब्दे' (भ्वा०प० ३०३) 'कण निमीलने' (चु० प० १८४) वा। 'अशूप्रुषिलटिकणिखटिविशिभ्यः क्वन्' (उ० १.१५१)। कणति स्तोत्रलक्षणं शब्दं करोति, कण्यते स्तूयते वा, निमीलयति परान् वा स्वतेजसा। 'कण्वा अभि प्रगायत' (ऋ० १.३७.१), 'कण्वतमो नाम गृणाति नृणाम्' (ऋ० १.४८.४) इति निगमौ॥

(८) ऋभुः–ऋभुक्षा इत्यत्र व्याख्यातम् (निघ० ३.३.१०)।

---

१. टिलोपाभावो यणादेशश्च पृषोदरादित्वात्।

२. सूत्रपाठभेदो मुद्रितस०क०संस्करणयोः।

'ऋभुर्ऋभुभिरभि वः स्याम' (ऋ० ७.४८.२) इति निगमः॥

(९) नवेदाः—'एषां भूत नवेदा म ऋतानाम्' (ऋ० १.१६५.१३) इत्यत्र 'न न वेत्ति वेत्त्येवेत्येतस्मिन्नर्थे वर्त्तते। कुत एतत् ? निपातनात्। वैयाकरणा हि 'नभ्राण्नपान्नवेदा०' (अ० ६.३.७४) इति निपातयन्ति'[1] इति स्कन्दस्वामी। तत्र द्विनञ्पूर्वाद् विदेः कर्त्तर्यसुनि एकस्य नञो लोपोऽन्यस्य प्रकृतिभावश्च निपात्यत इति भावः। 'त्रिश्चिन्नो अद्या भवतं नवेदसा' (ऋ०१.३४.१) इति निगमः॥

(१०) कविः—'कविः क्रान्तदर्शनो भवति कवतेर्वा' (निरु० १२.१३) इति भाष्ये 'क्रामतेः कवतेर्वा गतिकर्मण इति रूपम्'[2] इति स्कन्दस्वामी। क्रामतेः कवतेश्च 'इन् सर्वधातुभ्यः' (उ० ४.११९) इतीन्प्रत्ययः। क्रामतेर्मकारस्य वत्वं रेफलोपश्च बाहुलकात्। क्रान्तमस्यास्तीति मत्वर्थीयस्य लुक्। कविः क्रान्तदर्शनः। 'अतीतानागतविप्रकृष्टविषयं युगपद् दर्शनं[3] यस्य स क्रान्तदर्शनः'[4] इत्युवटः। 'कवी नो मित्रावरुणा' (ऋ० १.२.९) इति निगमः॥

(११) मनीषिणः[5]—'मनु अवबोधने' (तना० आ० ९)। 'कृतॄभ्यामीषन्' (उ० ४.२७) इति बाहुलकादीषन्। मनीषा प्रज्ञास्यास्ति व्रीह्यादित्वाद् (अ० ५.२.११६) इनिः। यद्वा मनस ईषा स्तुतिः प्रज्ञा वा मनीषा[6]। पृषोदरादित्वाद्रूपसिद्धिः। पूर्ववदीषन्। 'घृतपृष्ठं मनीषिणः' (ऋ० १.१३.५) इति निगमः॥

(१२) मन्धाता—मन्यतेर्ल्युट्, दधातेस्तृच्। मानस्य ज्ञानस्य विधाता, पृषोदरादिः (अ० ६.३.१०९)। 'मन्धातासि द्रविणोदा ऋतावा' (ऋ० १०.२.२) इति निगमः॥

(१३) विधाता—विपूर्वाद् दधातेस्तृच्। वेधःशब्दवदर्थः। निगमोऽन्वेषणीयः[7]॥

---

१. स्कन्दटीका (निरु० ४.७)।

२. स्कन्दटीका (निरु० १२.१३)। मुद्रितस्कन्दटीकाया द्वितीयपरिशिष्टम् (पृ० ३३६-३३७) अत्रानुसन्धेयम्।

३. 'ज्ञानम्' इति मुद्रितेषु।

४. मा० सं० २.४ उवटभाष्यम्।

५. 'मनस ईषिण इति मनीषिणः' इति पस्पशाह्निके महाभाष्यम्। (सु०)।

६. लाङ्गलदण्डार्थेऽपि प्रोच्यत ईषाशब्दः। यथा—अ० ६.१.१२७ सूत्रे वार्त्तिके 'ईषा अक्षः'। एवं च मनस ईषा बुद्धिः। नियामकत्वादारोपितमत्रेषात्वम्। सा विवेकवती बुद्धिरस्यास्तीति मनीषी। (सु०)।

७. 'विधातारो वि ते दधुरजस्राः' (ऋ० ४.५५.२) इति निगमः। (सु०)।

(१४) विपः–'विप क्षेपे'[१]। इगुपधलक्षणः कः (अ० ३.१.१३५)। विप्रवदर्थः। 'अस्तृणाद् बर्हणा विपः' (ऋ० ८.६३.७) इति निगमः॥

(१५) मनश्चित्–मनःशब्दोपपदात् 'चिती सञ्ज्ञाने' (भ्वा० प० ३२) इत्यस्मादौणादिकः क्विप्। मनसा चेतयते। निगमोऽन्वेषणीयः[२]॥

(१६) विपश्चित्–विपो[३] वाचश्चेतयते 'तत्पुरुषे कृति बहुलम्' (अ० ६.३.१३) इत्यलुक्। 'विपश्यंश्चेतयते'[४] इति क्षीरस्वामी। पृषोदरादित्वात् पश्यते रूपम्। 'धर्मकृते विपश्चिते पनस्यवे' (ऋ० ८.९८.१), 'इन्द्रं पृच्छा विपश्चितम्' (ऋ० १.४.४) इति निगमौ॥

(१७) विपन्यवः[५]–विपनेः 'कन्युच् क्षिपेश्च' (उ० ३.५१) इत्यत्र प्राक्प्रत्ययनिर्देशस्याधिकविध्यर्थत्वात् कन्युचप्रत्ययः। यद्वा विविधं पननं स्तुतिः [यस्य] 'मृगय्वादयश्च' (उ० १.३७) इति कुप्रत्ययः। 'विपन्यवो विप्रासो वाजसातये' (ऋ० ८.८७.६) इति निगमः॥

(१८) आकेनिपः–आङ्शब्दे, केशब्दे, निशब्दे चोपपदे त्रिपूर्वात् पततेः 'अन्येष्वपि दृश्यते' (अ० ३.२.१०१) इति डः। 'तत्पुरुषे कृति बहुलम्' (अ० ६.३.१३)। के आत्मनि पतन्ति अध्यात्मज्ञाने पतन्त इत्यर्थः। 'अप्यसो यथा केनिपानामिनो वृधे' (ऋ० १०.४४.४) इति निगमः॥

(१९) उशिजः–'वश कान्तौ' (अदा० प० ७२) 'वशेः कित्' (उ० २.७२) इति इजिप्रत्ययः। 'ग्रहिज्या०' (अ० ६.१.१६) इत्यादिना सम्प्रसारणम्। कामयते शास्त्राण्यभ्यसितुं व्याख्यातुं वा। 'कक्षीवन्तं य औशिजः' (ऋ० १.१८.१) इति निगमः॥

(२०) कीस्तासः[६]–कीर्त्तयतेः पचाद्यचि (अ० ३.१.१३४) घञि वा। कीर्तयन्ति प्रशस्तानर्थान्। 'कीस्तासो अभिद्यवः' (ऋ० १.१२७.७) इति

---

१. द्र०–पूर्व पृ० २२९ टि० ४।

२. 'मनश्चिन्मनसस्पतिः' (ऋ० ९.११.८) इति निगमः। (सु०)।

३. वस्तुतोऽत्र सकारान्तस्य विपस्शब्दस्य प्रयोगः। शब्दोऽसौ विपोधाः (ऋ० १०.४६.५) आदिपदेषु जीवग्राहं गृह्णाति। पुनश्च निरु० १.४ प्रक्रियया आचार्यश्चिदितिवत् पूजायां चित्शब्दस्य प्रयोगः। (सु०)।

४. अ० उ० २.७.५। 'विपश्यश्चिन्तयते' इति मुद्रिते।

५. पनिष्ठः, पनीयान् इत्याद्युपलभ्यमानैः शब्दैः विपन्शब्दस्यास्तित्वं ज्ञायते। तस्मात् क्यजन्तात् 'क्याच्छन्दसि' (अ० ३.२.१७०) इत्युप्रत्ययेन सुसाधमिदं पदम्। मार्गेणानेन विपन्याशब्दोऽपि अप्रत्ययेन (३.३.१०३) सर्वथा साधुः। (सु०)।

६. कीस्तशब्दाज्जसि परे 'आज्जसेरसुक्' (अ० ७.१.५०) इत्यसुगागमेन सिद्धं कीस्तास इति। (सु०)।

निगमः॥

(२१) अद्धातयः–अद्धेति सत्यनाम। अततेरतयः। सत्यं प्राप्नोति, गत्यर्था बुद्ध्यर्थाः, सत्यं जानाति वा। 'तदद्धातय इद्विदुः' (ऋ० १०.८५.१६) इति निगमः॥

(२२) मतयः–मन्यतेः क्तिन्। ज्ञायन्तेऽस्मादर्थाः। यद्वा मतिरस्यास्ति मत्वर्थीयस्य लुक्। 'अद्रोघवाचं मतिभिः शविष्ठम्' (ऋ० ६.२२.२), 'त्वामिन्द्र मतिभिः सुतम्'[1] इति निगमौ॥

(२३) मतुथाः[2]–'गूथयूथप्रोथपृष्ठादयः' (स० क० २.२.१५७) इति मनेस्थकि नकारस्य तुभावो निपात्यते। 'तुथोऽसि विश्ववेदाः' (मा० सं० ५.३१)। 'विभजत्विति। ब्रह्म वै तुथः' (श० ब्रा० ४.३.४.१५) इति श्रुतिः' इत्युवटः। मतं ज्ञातं तुथो यैर्मनुष्यैः, ते मततुथाः[3] सन्तः पृषोदरादित्वेन मतुथाः। निगमोऽन्वेषणीयः॥

(२४) वाघतः[4]–वहेः 'संश्चत्तृपद्वेहत्' (उ० २.८६) इति अतिप्रत्ययः, उपधावृद्धिः, हकारस्य घकारश्च निपात्यते। निवहति ग्रन्थार्थान्। 'विष्ट्वी शमी तरणित्वेन वाघतः' (ऋ० १.११०.४) इति निगमः[5]॥

इति चतुर्विंशतिर्मेधाविन इति मेधाविनामानि॥ १५॥

रेभः (१)। जरिता (२)। कारुः (३)। नदः (४)। स्तामुः (५)। कीरिः (६)। गौः (७)। सूरिः (८)। नादः (९)। छन्दः (१०)। स्तुप् (११)। रुद्रः (१२)। कृपण्युः (१३)। इति त्रयोदशस्तोतृनामानि॥ १६॥

(१) रेभः–रेभतिरर्चतिकर्मा (निघ० ३.१४.४)। अच्। स्तौति। निगमोऽन्वेषणीयः[6]॥

(२) जरिता[7]–जरतेरर्चतिकर्मणः (निघ० ३.१४.७)। 'त्वामच्छा

---

१. मृग्यम्।

२. मेधाविन्–'पदं यदस्य मतुथा अजीजनन्' (ऋ० ९.७१.५) इति निगमः। (सु०)।

३. 'मतं ज्ञानं तुथो मनुष्यैः, तेन मनतुथाः' इति मुद्रितेषु।

४. निघ० ३.१८ ऋत्विङ्नामसु। (सु०)।

५. व्याख्यायतेऽसौ मन्त्रो निरु० ११.१६। (सु०)।

६. 'मधुच्छन्दो भनति रेभ इष्टौ' (ऋ० ६.११.३) अत्र भाष्ये स्तोता इत्यर्थ इति दयानन्दः। (सु०)।

७. जरिता गरिता–निरु० १.७ स्तोता इत्यर्थः। (सु०)।

जरितारः' (ऋ० १.२.२) इति निगमः॥

(३) कारुः—करोतेः 'कृवापाजि०' (उ० १.१) इत्युण्। कर्त्ता 'विदुष्टे तस्य कारवः' (ऋ० १.११.६) इति निगमः॥

(४) नदः—नदति स्तुतिकर्मा (निघ० ३.१४.९)। अच्। 'नदस्य मा रुधतः काम आगन्' (ऋ० १.१७९.४) इति निगमः॥

(५) स्तामुः—'षम ष्टम अवैक्लव्ये' (भ्वा० प० ५७२)। 'छन्दसीणः' (उ० १.२) इति बाहुलकादुण् स्तोत्रकर्मणि। 'तामु' इति केचित् पठन्ति। 'तमु काङ्क्षायाम्' (दि० प० ९२) पूर्ववद् बाहुलकादुण्। काङ्क्षति स्तोतुम्। उभयोरेव निगमोऽन्वेषणीयः॥

(६) कीरिः—'कै गै शब्दे' (भ्वा० प० ६५३)। 'कायः कीः' इति ईप्रत्ययः[1]। आकारलोपः। स्तोत्रलक्षणं शब्दमारचयति। 'इन् सर्वधातुभ्यः' (उ० ४.११९)। 'कीरिश्चिन्मन्त्रं मनसा वनोषि तम्' (ऋ० १.३१.१३) इति निगमः॥

(७) गौः—व्याख्यातं पृथिवीनामसु (निघ० १.१.१)। गीयन्ते स्तूयन्तेऽनेन देवताः। 'यो अश्वानां यो गवां गोपतिर्वशी' (ऋ० १.१०१.४) इति निगमः। 'गोपतिः स्तोत्रपतिः'[2] इति स्कन्दस्वामी॥

(८) सूरिः—'षू प्रेरणे' (तु० प० ११७)। 'षूङः क्रिः' (श्वेत० ४९२, उ० ४.६५) इति सुवतेः[3] क्रिर्भवति। प्रकर्षेण ईरयति स्तोत्रम्। 'सदा पश्यन्ति सूरयः' (ऋ० १.२२.२०) इति निगमः॥

(९) नादः—नदतेर्घञ्। भवत्यस्मात् स्तुतिः। निगमोऽन्वेषणीयः[4]॥

(१०) छन्दः—छन्दतिरर्चतिकर्मा (निघ० ३.१४.२०)। असुन्। 'छद आच्छादने' (चु० प० २४८)। 'छदिरहोर्नुं ह्रस्वश्च'[5] (स० क० २.१.३३०), इत्यसुन्। आच्छादयति स्तोत्रैः। निगमोऽन्वेषणीयः॥

(११) स्तुप्[6]—स्तोभतिरर्चतिकर्मा (निघ० ३.१४.४)। क्विप्। निगमोऽन्वेषणीयः॥

---

१. 'कायः किः' इति स० क० (२.१.१७३) सूत्रेण 'काकिः' साध्यते दण्डनाथवृत्त्या। इह तु 'की'=इ-प्रत्ययः, कित्त्वाद् आलोपः। ततः 'की' इत्युपपदे रचयतेर इन्प्रत्यये टिलोपे सति 'कीरिः' इति प्रक्रिया प्रतीयते ?

२. द्र०—स्कन्दटीका (निरु० ५.१५)। स्कन्दभाष्यं च (ऋ० १.१०१.४)।

३. बाहुलकाद् इत्यभिप्रायः।

४. 'नदस्य नादे परिपातु मे मनः' (ऋ० १०.११.२) इति निगमः। (सु०)।

५. 'छदेश्च' इत्यपपाठः कोशेषु। ६. निरु० ७.१२ अनुष्टुब् आदिशब्दाः। (सु०)।

(१२) रुद्रः—रौतेः क्विप्, रुत् शब्दः, मत्वर्थीयो रः। स्तोत्रलक्षणशब्दवानित्यर्थः। 'क्राणा रुद्रेभिर्वसुभिः पुरोहितः' (ऋ० १.५८.३) इति निगमः॥

(१३) कृपण्युः[१]॥

इति त्रयोदश स्तोतृनामानि॥ १६॥

यज्ञः (१)। वेनः (२)। अध्वरः (३)। मेधः (४)। विदथः (५)। नार्यः (६)। सवनम् (७)। होत्रा (८)। इष्टिः (९)। देवताता (१०)। मखः (११)। विष्णुः (१२)। इन्दुः (१३)। प्रजापतिः (१४)। घर्मः (१५)। इति पञ्चदश यज्ञनामानि॥ १७॥

(१) **यज्ञः**—प्रख्यातं यजतिकर्मेति नैरुक्ताः (३.१९) इत्यादि भाष्यकारेण, स्कन्दस्वामिना[२] च यज्ञशब्दो बहुधा व्युत्पादितः। यजेः 'यजयाचयतविच्छप्रच्छरक्षो नङ्' (अ० ३.३.९०) यजनम्। इज्यन्तेऽत्र देवताः। अन्येषु पृषोदरादित्वेन रूपसिद्धिः। 'यज्ञेयज्ञे न उदव' (ऋ० ५.५.९) इति निगमः॥

(२) **वेनः**—व्याख्यातं मेधाविनामसु (निघ० ३.१५.५)। गच्छत्यनेन स्वर्गम्, प्रक्षिप्यते देवतोद्देशेन वास्मिन् हव्यम्, तेनात्र देवता काम्यन्ते वा। निगमोऽन्वेषणीयः॥

(३) **अध्वरः**[३]—ध्वरतेर्वधकर्मणः 'पुंसि सञ्ज्ञायां घः०' (अ० ३.४.११८)। नञ्पूर्वः, ध्वरो हिंसा, तदभावो यत्र। अत एव शिष्टाः स्मरन्ति—

'ओषध्यः पशवो वृक्षास्तिर्यञ्चः पक्षिणस्तथा।
यज्ञार्थं निधनं प्राप्ताः प्राप्नुवन्त्युच्छ्रितां गतिम्'[४]॥ इति।

तस्मादुपपन्नं यज्ञे हिंसा स्वर्जित्यामेतद्यज्ञीयवचनादहिंसा[५] प्रतीयते। अन्यत्र विस्तरेणोपपादितः।

अथवा षष्ठ्यर्थे बहुव्रीहिः। अविद्यमानो ध्वरो यस्य सोऽध्वरः, रक्षोभिर-

---

१. स्तवनसामर्थ्यार्थकात् कृपणशब्दात् क्यङ्प्रत्यये नामधातौ 'क्याच्छन्दसि' (अ० ३.२.१७०) इत्युप्रत्ययः। (सु०)। २. स्कन्दटीका (निरु० ३.१९)।
३. ध्वरतिर्हिंसाकर्मा तत्प्रतिषेधः—निरु० १.८। (सु०)। ४. मृग्यम्।
५. हिंसापि सती अहिंसा प्रतीयत इति तु नास्ति साम्प्रतम्। यद्यत्र हिंसा स्यात्तर्हि किं कृतमनेनाध्वरशब्दार्थेन। तस्मात् सर्वथा हिंसानिषेधे तात्पर्यमध्वरशब्दस्य इत्यातिष्ठामहे। (सु०)।

हिंसितः। 'राजन्तमध्वराणाम्' (ऋ० १.१.८) इति निगमः॥

(४) मेधः–व्याख्यातं धननामसु (नि० २.१०.२२)। गच्छन्त्यत्र देवता हविर्ग्रहीतुम्, दक्षिणार्थं वा सदस्याः[1], हिनस्त्यनेन पापं वा। 'कर्त्ता यज्ञो द्रव्याणामृतसामर्थ्याद्धविषश्च सारभूतात्'[2] इति माधवः। 'मेधं जुषन्त वह्नयः' (ऋ० १.३.९), 'तं मेधेषु प्रथमं देवयन्तीः' (ऋ० १.७७.३) इति निगमौ॥

(५) विदथः[3]–'विद ज्ञाने' (अदा० प० ५७), 'विद विचारणे' (रु० आ० १३) 'विद्लृ लाभे' (तु० उभ० १४१) 'विद सत्तायाम्' (दि० आ० ६०)। 'रुविदिभ्यां ङित्' (उ० ३.११५) इति अथप्रत्ययः। ज्ञायते हि यज्ञः, लभते हि दक्षिणादिरत्र, विचार्यते हि विद्वद्भिः, भावयत्यनेन फलम्। 'अधा जिव्री विदथमावदाथः' (ऋ० १०.८५.२७) इति निगमः॥

(६) नार्यः–'नॄ नये' क्र्यादिः (प० २६)। 'ऋहलोर्ण्यत्' (अ० ३.१.१२४)। नयति स्वर्गं कर्त्तारम्, नीयतेऽयमनुष्ठानेन वा। निगमोऽन्वेषणीयः[4]॥

(७) सवनम्–'षुञ् अभिषवे' (स्वा० उभ० १)। 'सुयुरुवृञो युच्' (उ० २.७५)। अभिषूयतेऽस्मिन् सोमः। 'उप नः सवना गहि' (ऋ० १.४.२) इति निगमः॥

(८) होत्रा–व्याख्यातं वाङ्नामसु (निघ० १.११.३५)। दीयतेऽस्मिन् हविः। 'होत्राविदः स्तोमतष्टासो अर्कैः' (ऋ० १०.१५.९) इति निगमः॥

(९) इष्टिः–यजेरिषेर्वा क्तिन्। यजतेर्यज्ञवदर्थः, इष्यते हि सः। 'इष्टिशब्दो हविर्यज्ञे आद्युदात्तो यज्ञमात्रेऽन्तोदात्तः'[5] इति माधवः। 'यथा त उश्मसीष्टये' (ऋ० १.३०.१२) इति निगमः॥

(१०) देवताता[5]–दिवु क्रीडादौ (दि०प० १)। दीव्यन्ति स्तुवन्त्यत्र देवताः। देव एव देवता (अ० ४.४.२७)। 'सर्वदेवात्तातिल्' (अ० ४.४.१४२), सप्तम्या आकारः[6] (अ० ७.१.३९)। 'त्रिर्देवताता त्रिरुतावतं धियः' (ऋ० १.३४.५), 'आ देवताता हविषा विवासति' (ऋ० १.५८.१) इति निगमौ॥

(११) मखः[7]–'मह पूजायाम्' (भ्वा० प० ४८५)। 'महेरुच्चास्य वा'[8]

---

१. 'सदस्यात्' इति मुद्रितेषु। २. मृग्यम्।

३. विदथानि वेदनानि निरु० ६.८, विदथे यज्ञे निरु० ९.३। (सु०)।

४. 'आ नार्यस्य दक्षिणा व्यश्वाँ एतु सोमिनः' (ऋ० ८.२४.२९) इति निगमः। (सु०)।

५. निरु० १२.४४। (सु०)। ६. डादेशः स्यात्।

७. 'मखम् इत्येतद्यज्ञनामधेयम्। छिद्रप्रतिषेधसामर्थ्यात्। छिद्रं खमित्युक्तम्, तस्य मेति प्रतिषेधः। मा यज्ञं छिद्रं करिष्यति'। गो० ब्रा० ३.२.५। (सु०)।

८. 'महेः ख च' इत्यपपाठो मुद्रितेषु।

(स० क० २.२.४७) खप्रत्ययो हलोपश्च। महन्त्यत्र देवताः। यद्वा 'मख गतौ' (भ्वा० प० ८८) घः। वेनवदर्थः। 'मुखः सहस्वदर्चति' (ऋ० १.६.८), 'विवक्ति वह्निः स्वपस्यते मुखः' (ऋ० १०.११.६) इति निगमौ॥

(१२) विष्णुः–'विष्लृ व्याप्तौ' (जु० उभ० १३)। 'विषेः किच्च' (उ० ३.३९) इति नुप्रत्ययः। विशेषेणाप्नोति स्वर्गम्। 'जूरसि धृता मनसा जुष्टा विष्णवे। तस्यास्ते' (मा० सं० ४.१७) इति निगमः॥

(१३) इन्दुः[1]–'उन्दी क्लेदने' (रु० प० १९)। 'उन्देरिच्चादेः' (उ० १.१२) इत्युप्रत्ययः। क्लिद्यते सूयतेऽस्मिन् सोमः। निगमोऽन्वेषणीयः॥

(१४) प्रजापतिः–प्रजाशब्दः पतिशब्दश्चापत्यनामसु (निघ० २.२.१४), ऐश्वर्यकर्मनामसु (निघ० २.२१.२) च व्याख्यातौ। प्रजापतिर्वृष्ट्यादिहेतुत्वात्। निगमोऽन्वेषणीयः॥

(१५) घर्मः[2]–'घृ क्षरणदीप्त्योः' (जु० प० १४)। मप्रत्ययः। क्षरत्यस्मिन् सोमः, दीप्यन्तेऽत्राग्नय इति वा। 'घर्मस्वेदेभिर्द्रविणं व्यानट्' (ऋ० १०.६७.७), 'सुत्यैः कव्यैः पितृभिर्घर्मसद्भिः' (ऋ० १०.१५.९) इति निगमौ॥

इति पञ्चदश यज्ञनामानि॥ १७॥

भारताः (१)। कुरवः (२)। वाघतः (३)। वृक्तबर्हिषः (४)। यतस्रुचः (५)। मरुतः (६)। सबाधः (७)। देवयवः (८)। इत्यष्टावृत्विङ्नामानि॥ १८॥

(१) भारताः–'भृञ् भरणे' (भ्वा० उभ० ६३९)। 'भृमृदृशियजिपर्विपच्यमितमिनमिहर्यिभ्योऽतच्' (उ० ३.११०)। 'यज्ञद्वारेण कृत्स्नं[3] भरन्तीति'[4] स्कन्दस्वामी। बिभर्तेर्वातच्। पुष्यन्ते दक्षिणाभिः। 'अमन्थिष्टां भारता' (ऋ० ३.२३.२) इति निगमः॥

(२) कुरवः–'कृ विक्षेपे' (तु० प० ११८)। 'कृग्रोरुच्च' (द०उ० १.१०९) इति कुप्रत्ययः। विक्षिपन्त्यहानि कर्माणि। यद्वा करोतेर्बाहुलकादुत्वम्। कुर्वन्ति कर्माणि। निगमोऽन्वेषणीयः॥

(३) वाघतः–व्याख्यातं मेधाविनामसु (निघ० ३.१५.२४)। वहन्ति

---

१. निघ० १.१२.८४ उदकनामसु, निरु० १०.४२। (सु०)।

२. यज्ञहविष्यार्थं महावीरपात्रे प्रणिहितं तप्तं क्षीरं 'घर्मम्' इति प्रोच्यते। अस्मिन्नर्थे निरुक्तम्–६.३२, ११.४३। पश्चात्तु लक्षणया घर्मसाधनको यज्ञोऽपि घर्मः। (सु०)।

३. 'नृन् सम्०' इति मुद्रितेषु। ४. स्कन्दटीका (निरु० ३.१९)।

हवींषि। 'उप ब्रह्माणि वाघतः' (ऋ० १.३.५) इति निगमः॥

(४) वृक्तबर्हिषः–'वृजी वर्जने' (रु० प० २३)। अत्र छेदनार्थः। निष्ठा 'श्वीदितो निष्ठायाम्' (अ० ७.२.१४) इतीट्प्रतिषेधः। बर्हिःशब्दो व्याख्यात उदकनामसु (निघ० १.१२.७८)। वृक्तं बर्हिर्यैः। 'नासत्या वृक्तबर्हिषः' (ऋ० १.३.३) इति निगमः॥

(५) यतस्रुचः–'यमु उपरमे' (भ्वा० प० ७१०) निष्ठा, 'स्रु गतौ' (भ्वा० प० ६७३)। 'स्रुवः कः', 'चिक् च' (उ० २.६२, ६३) इति चिक्प्रत्ययः, इकारककारावित्सञ्ज्ञकौ। उद्यताः स्रुचो जुह्वाद्या यैः। निगमोऽन्वेषणीयः॥

(६) मरुतः–व्याख्यातं हिरण्यनामसु (निघ० १.२.१३)। 'बृहदिन्द्राय गायत मरुतः' (ऋ० ८.८९.१), 'आर्चन्नत्र मरुतः सस्मिन्नाजौ' (ऋ० १.५२.१५) इति निगमौ॥

(७) सबाधः–'बाधृ विलोडने' (भ्वा० आ० ५) क्विप्। बाधया सह वर्त्तत इति सबाधः। राक्षोघ्नमन्त्रोच्चारणं रक्षोबाधनात्। 'तं सबाधो यतस्रुचः' (ऋ० ३.२७.६) इति निगमः॥

(८) देवयवः[१]–देवशब्दोपपदाद् यातेः 'मृगय्वादयश्च' (उ० १.३७) इति कुप्रत्ययान्तो निपात्यते। देवान् यान्ति मनसा हविःप्रदानसमये। निगमोऽन्वेषणीयः[२]॥

इत्यष्टावृत्विङ्नामानि॥ १८॥

ईमहे (१)। यामि (२)। मन्महे (३)। दुद्धि (४)। शग्धि (५)। पूर्द्धि (६)। मिमिड्ढि (७)। मिमीहि (८)। रिरिड्ढि (९)। रिरीहि (१०)। पीपरत् (११)। यन्तारः (१२)। यन्धि (१३)। इषुध्यति (१४)। मदेमहि (१५)। मनामहे (१६)। मायते (१७)। इति सप्तदश याच्ञाकर्माणः॥ १९॥

(१) ईमहे–'ईङ् गतौ' दिवादिः (आ० ३४)। 'बहुलं छन्दसि' (अ०

---

१. देवशब्दादिच्छार्थे क्यचि 'न च्छन्दस्यपुत्रस्य' (अ० ७.४.३५) इति ईत्वनिषेधे देवयशब्दान्नामधातोः 'क्याच्छन्दसि' (अ० ३.२.१७०) इत्युप्रत्यये सिद्धं देवयुरिति। (सु०)।

२. 'नरो यत्र देवयवो मदन्ति' (ऋ० १.१५४.५) इति निगमः। (सु०)।

२.४.७३) इति शपो लुक्। 'इतो वा सातिमीमहे' (ऋ० १.६.१०) इति निगमः॥

(२) यामि–'या प्रापणे' अदादिः (प० ४२)। 'तत्त्वा यामि ब्रह्मणा वन्दमानः' (ऋ० १.२४.११) इति निगमः॥

(३) मन्महे–'मनु अवबोधने' तनादिरात्मनेपदी (९)। 'लोपश्चास्यान्यतरस्यां म्वोः' (अ० ६.४.१०७) इति उप्रत्ययस्य लोपः। 'वयं हि ते अमन्महि' (ऋ० १.३०.२१) इति निगमः। 'ईमहे, यामि, मन्मह इति याच्ञाकर्मसु पाठात्'[1] इति स्कन्दस्वामी॥

(४) दद्धि–'दद दाने' भूवादिः (आ० १६)। व्यत्ययेन शपो लुक्[2]। 'हुझल्भ्यो हेर्धिः' (अ० ६.४.१०१)। भाष्यं द्रष्टव्यम्॥

(५) शग्धि[3]–'शक्लृ शक्तौ' स्वादिः (प० १६)। पूर्ववल् लुक्[2]। 'झलां जश् झषि' (अ० ८.४.५२)॥

(६) पूर्द्धि[4]–'पृ पालनपूरणयोः' क्र्यादिः (प० १८) प्वादिश्च। व्यत्ययेन शप्, 'बहुलं छन्दसि' (अ० २.४.७३) इति लुक्। 'श्रुशृणुपॄकृवृभ्यश्छन्दसि' (अ० ६.४.१०२) इति धिभावः। 'शग्धि पूर्द्धि प्र यंसि च' (ऋ० १.४२.९), 'रायस्पूर्द्धि स्वधावोऽस्ति' (ऋ० १.३६.१२) इति निगमौ। 'शाकी भव यजमानस्य चोदिता' (ऋ० १.५१.८) इत्यत्र, 'शग्धि पूर्द्धि' (ऋ० १.४२.९) इत्यत्र च 'शग्धिपूर्द्धीति याच्ञाकर्मसु पाठात् शकिपृणाती याच्ञाकर्माणौ'[5] इति स्कन्दस्वामिभाष्य उक्तम्॥

(७) मिमिड्ढि–'मिह सेचने' (भ्वा० प० ७१८)। 'बहुलं छन्दसि' (अ० २.४.७६) शपः श्लुः, छान्दसत्वाद् ढलोपाभावश्च॥

(८) मिमीहि–'माङ् माने' जुहोत्यादिः (आ० ६)। व्यत्ययेन हिः। 'भृञामित्' (अ० ७.४.७६)। 'ई हल्यघोः' (अ० ६.४.११३)। 'यत् सीं वरिष्ठे बृहती विमिन्वन्' (ऋ० ४.५६.१) इत्यत्र 'मिमीहि इति याच्ञाकर्मसु पठ्यते, तस्येदं रूपम्, विविधं याचन्'[6] इति हरदत्तभाष्ये दृष्टम्॥

(९) रिरिड्ढि–'रिह कत्थने' तौदादिकः (प० २४)। पूर्ववत् श्लुः, ढलोपाभावश्च॥

---

१. स्कन्दस्वामिभाष्यम् (ऋ० १.३०.२१)। २. 'श्लुः' इति मुद्रितेषु।

३. 'शग्धि तव तन्न ऊतिभिः' (ऋ० ८.२४.११) इति निगमः। (सु०)।

४. निरु ४.२। (सु०)। ५. द्र०–स्कन्दस्वामिभाष्यम् (ऋ० १.५१.८, १.४२.९)।

६. मृग्यम्।

(१०) रिरीहि–'रीङ् गतौ' (दि० आ० २८)। व्यत्ययेन परस्मैपदम्, हौ शपः श्लुः। 'प्रजावतीरिन्द्र गोष्ठे रिरीहि' (ऋ० १०.१६९.३) इति निगमः। 'सङ्गायेत्यर्थमवोचत्'[१] भट्टभास्करमिश्रः॥

(११) पीपरत्[२]–पृणोतेर्णिचि, लुङि, उपधाह्रस्वत्वे, द्वित्वे, सन्वद्भावादित्वे, 'दीर्घो लघोः' (अ० ७.४.९४)[३] 'बहुलं छन्दस्यमाङ्योगेऽपि' (अ० ६.४.७५) इत्यडभावः॥

(१२) यन्तारः–'यमु उपरमे' (भ्वा० प० ७१०)। तृच्। जश्। 'इन्द्र इद्रायः क्षयति प्रयन्ता' (ऋ० १.५१.१४) इति निगमः॥

(१३) यन्धि–'यमु उपरमे' (भ्वा० प० ७१०)। पूर्ववच्छपो लुक्, हेः 'वा छन्दसि' (अ० ३.४.८८) इति हेरपित्त्वे, 'अङितश्च' (अ० ६.४.१०३) इति धिभावो मकारलोपाभावश्च। 'उरु णो यन्धि जीवसे' (ऋ० ८.६८.१२) इति निगमः॥

(१४) इषुध्यति[४]–'इषुध शरधारणे' कण्ड्वादिः (२०)। 'विश्वो राय इषुध्यति' (ऋ० ५.५०.१) इत्यत्र 'इषुध्यतिर्याच्ञाकर्मसु पठितः'[५] इत्युवटः॥

(१५) मदेमहि–'मदी हर्षग्लेपनयोः' (भ्वा० प० ५५५) स्वरितेत्[६], लिङ्॥

(१६) मनामहे–'म्ना अभ्यासे' (भ्वा० प० ६६३), व्यत्ययेनात्मनेपदम्, 'पाघ्राध्मास्थाम्ना०' (अ० ७.३.७८) इत्यादिसूत्रेण मनादेशः। 'स्वग्नयो मनामहे' (ऋ० १.२६.८) इति निगमः॥

(१७) मायते–नैरुक्तधातुः[७]॥

इति सप्तदश याच्ञाकर्माणः॥ १९॥

दाति (१)। दाशति (२)। दासति (३)। राति (४)। रासति (५)। पृणक्षि (६)। पृणाति (७)। शिक्षति (८)।

---

१. मृग्यम्।

२. 'अंहसो यत्र पीपरद् यथा नः' (ऋ० ३.३२.१४) इति निगमः। (सु०)।

३. 'ऋतश्च' इत्यधिकं कोशेषु।

४. इषुशब्दो बाणार्थे, इषुधिशब्दश्च तूणार्थे प्रसिद्धो लोके वेदे च। अस्मादिषुशब्दाद् 'इषूयति' इषुधिशब्दाच्च, 'इषुधिमिच्छति' इत्यर्थे 'इषुध्यति' इत्यादयः प्रयोगा उपलभ्यन्ते वेदे। अतोऽत्र 'शस्त्रविषयिणी याच्ञा' इति इषुध्यतिशब्दस्य मौलिकोऽर्थः। (सु०)।

५. उवटभाष्यम् (मा० सं० ४.८)।

६. पाणिनीये धातुपाठे तु परस्मैपदी।

७. दैवादिकस्य 'माङ् माने' (आ० ३३) धातोः कर्तरि लटि प्रयोगः।

तुञ्जति (९)। मंहते (१०)। इति दश दानकर्माणः ॥ २० ॥

(१) दाति–'दाप् लवने' अदादिः (प० ५२), ददातेर्वा 'बहुलं छन्दसि' (अ० २.४.७३) इति शपो लुक्। 'दाति प्रियाणि चिद्वसु' (ऋ० ४.८.३) इति निगमः॥

(२) दाशति[1]–'दाशृ दाने' स्वरितेत् (भ्वा० ६२२)। 'धनं यस्तै ददाश मर्त्यः' (ऋ० १.३६.४) इति निगमः॥

(३) दासति[2]–'दासृ दाने' स्वरितेत् (भ्वा० ६३५)॥

(४) राति[3]–'रा दाने' अदादिः (प० ५०)। 'तस्य मे रास्व तस्य ते भक्षीय' (तै० सं० ३.२.३.१) इति निगमः[4]॥

(५) रासति–'रासृ शब्दे' (भ्वा० आ० ४१६)। व्यत्ययेन परस्मैपदम्। 'स नो रासच्छुरुधश्चन्द्राग्राः' (ऋ० ६.४९.८) इति निगमः॥

(६) पृणक्षि–'पृची सम्पर्के' रुधादिः (प० २४)। 'पृणक्षि सानसिं क्रतुम्' (ऋ० १०.१४०.४) इति निगमः॥

(७) पृणाति–'पृ पालनपूरणयोः' क्र्यादिः (प० १८) जुहोत्यादिश्च (प० ५)। 'यः पृणाति स ह देवेषु गच्छति' (ऋ० १.१२५.५) इति निगमः॥

(८) शिक्षति[5]–शकेः 'सनि मीमा०' (अ० ७.४.५४) इति इस्। 'अत्र लोपोऽभ्यासस्य' (अ० ७.४.५८), संयोगादिलोपः (अ० ८.२.२९)। 'यस्तुभ्यं दाशाद् यो वा ते शिक्षात्' (ऋ० १.६८.३) इति निगमः। 'शिक्षतिर्दानकर्मा पठितः'[6] इति स्कन्दस्वामिभाष्यम्॥

(९) तुञ्जति[7]–'तुजि हिंसायां पालने च' (भ्वा० प० १५१)। 'तुञ्जेतुञ्जे य उत्तरे' (ऋ० १.७.७) इति निगमः॥

(१०) मंहते[8]–'बृहि महि वृद्धौ' आत्मनेपदी (भ्वा० ४२२)।

---

१. निरु० १.७, ६.८। (सु०)।

२. 'यो नो अग्नेऽभिदासति' (ऋ० १.७९.११) इति निगमः। (सु०)।

३. रातेर्धातोः प्रयोगा नैवोपलभ्यन्ते लोके। अत एव पाणिनिनास्य कृदन्तप्रयोगाणां मधुरादीनाम् अन्वाख्यानाय अ० ५.२.१०७ इति सूत्रेण 'र'प्रत्ययो व्यधायि। सति तु राधातौ 'मधु राति' इति व्याख्यानं सुकरं शक्यते विधातुम्। तथात्वे चानेकानि वार्तिकान्यपि न भवन्ति वाचनिकानि। (सु०)।

४. निरु० १२.१७। (सु०)।

५. 'शिक्ष=देहि' निरु० १.७। (सु०)।

६. स्कन्दभाष्ये (ऋ० १.१०.६) स्वल्पपाठभेदः।

७. 'तुञ्जः तुञ्जतेर्दानकर्मणः' निरु० ६.१७। (सु०)।

८. 'मघं मंहतेर्दानकर्मणः' निरु० १.७। (सु०)।

'स्तोतृभ्यो मंहते मघम्' (ऋ० १.११.३) इति निगमः॥

इति दश दानकर्माणः॥२०॥

परिस्रव (१)। पवस्व (२)। अभ्यर्ष (३)। आशिषः (४)। इति चत्वारोऽध्येषणाकर्माणः॥२१॥

(१) **परिस्रव**–'स्रु गतौ' (भ्वा० प० ६७३) परिपूर्वः, लोण्मध्यमैकवचनम्। 'इन्द्रायेन्दो परिस्रव' (ऋ० ८.९१.३) इति निगमः॥

(२) **पवस्व**–'पूङ् पवने' (भ्वा० आ० ६९३)। 'पवस्व सोम मन्दयन्' (ऋ० ९.६७.१६) इति निगमः॥

(३) **अभ्यर्ष**–'ऋषी गतौ' तुदादिः (प० ७)। 'छन्दस्युभयथा' (अ० ३.४.११७) इति शस्यार्द्धधातुकत्वे कित्त्वाभावाद् गुणः। 'अभ्यर्ष स्वायुध' (ऋ० ९.४.७) इति निगमः॥

(४) **आशिषः**–अश्नोतेर्लेट्। 'सिब्बहुलं लेटि' (अ० ३.१.३४), इट्, 'लेटोऽडाटौ' (अ० ३.४.९४)॥

इति चत्वारोऽध्येषणाकर्माणः॥२१॥

स्वपिति (१)। सस्ति (२)। इति द्वौ स्वपितिकर्माणौ॥२२॥

(१) **स्वपिति**–'ञिष्वप शये' अदादिः (प० ६१)। तिपि 'रुदादिभ्यः सार्वधातुके' (अ० ७.२.७६) इतीट्। 'यो दीक्षितः स्वपिति'[1] इति निगमः॥

(२) **सस्ति**–'षस स्वप्ने' अदादिः (प० ७१)। 'सस्तु माता सस्तु पिता' (ऋ० ७.५५.५) इति निगमः॥

इति द्वौ स्वपितिकर्माणौ॥२२॥

कूपः (१)। कातुः (२)। कर्त्तः (३)। वव्रः (४)। काटः (५)। खातः (६)। अवतः (७)। क्रिविः (८)। सूर्दः (९)। उत्सः (१०)। ऋश्यदात् (११)। कारोतरात् (१२)। कुशयः (१३)। केवटः (१४)। इति चतुर्दश कूपनामानि॥२३॥

---

१. मृग्यम्।

(१) कूपः–कुशब्दोपपदात् पिबतेः 'अन्येष्वपि दृश्यते' (अ० ३.२.१०१) इति डः, 'अन्येषामपि दृश्यते' (अ० ६.३.१३६) इति दीर्घः। कुत्सितं पानमत्र, कृच्छ्रसाध्यत्वाच्छौचासम्भवाद्वा। यद्वा 'कुप क्रोधे' दिवादिः (प० १२२)। इगुपधलक्षणः (अ० ३.१.१३५) कः, पृषोदरादित्वाद् (अ० ६.३.१०९) दीर्घः। कुप्यन्त्यस्मै मनुष्या दुरादानजलत्वात्[१]। यद्वा कवतेर्गतिकर्मणः 'कुयुभ्याञ्च' (उ० ३.२७) इति पप्रत्ययः, कित्त्वाद्दीर्घश्च[२]। गम्यते जलार्थिभिः। 'त्रि॒तः कूपेऽव॑हितः' (ऋ० १.१०५.१७) इति निगमः॥

(२) कातुः–'कै गै शब्दे' (भ्वा० प० ६५३)। 'सितनिगमिमसिसच्यविधाञ्क्रुशिभ्यस्तुन्' (उ० १.६९) इति बाहुलकात्तुन्। शब्द्यते बहुलत्वादिना[३]। यद्वा कशब्द उपपद अततेः 'छन्दसीणः' (उ० १.२) इति बाहुलकादुण्। कमुदकमस्मिन्नत्यते अधिगम्यते। निगमोऽन्वेषणीयः॥

(३) कर्त्तः–करोतेः [कृणोते-] र्वा हिंसार्थात्[४]। 'हसिमृग्रिण्वामिदमिलूपूधूर्विभ्यस्तन्' (उ० ३.८६) इति बाहुलकात्तन्। क्रियत उत्पाद्यते पुरुषैः, हिंसन्त्यत्र चौराः पथिकादीनर्थवतः। कस्य ऋतः प्राप्तिरत्रेति वा। 'कर्त्तमन्वस्य वित्तमादाय इन्वन्ति'[५] इति निगमः॥

(४) वव्रः–'वृञ् सम्भक्तौ' (स्वा० उभ० ८)। 'घञर्थे कविधानम्०' (अ० ३.३.५८ वा०) इति कः। 'कृञादीनां के द्वे भवतः०' (अ० ६.१.१२ वा०)। सम्भज्यते जलार्थिभिः। 'व॒व्राँ अ॑न॒न्ताँ अव॒ सा प॑दीष्ट॒' (ऋ० ७.१०४.१७) इति निगमः॥

(५) काटः–'कटे वर्षावरणयोः' (भ्वा० प० १९०) घञ्। आव्रियते जलार्थिभिः। यद्वा 'अट पट गतौ' (भ्वा० प० १९२) घञ्। 'का॒टे निबा॑ळ्ह॒ ऋषि॑रह्वदू॒तये॑' (ऋ० १.१०६.६) इति निगमः॥

(६) खातः–'खनु अवदारणे' (भ्वा० उभ० ६१८)। निष्ठा। निगमोऽन्वेषणीयः॥

---

१. तु०–कु पानं भवति, कुप्यतेर्वा–निरु० ३.१९। कूपादुदकं प्राप्नुवते पिपासिताय तु दूरमास्तामिदं प्रवृत्तिनिमित्तम्। पाणिनिस्त्वेवम्भूते प्रयोगे गुपधातुं विदधाति। स हि अ० ३.१.११४ सूत्रे गोप्यमिति स्थाने 'कुप्यम्' इति निराह–गर्तत्वात् सुषिरत्वाद्वा। कूपप्रसङ्गेऽपि शक्यमेवं भवितुम्-यथोत्तरं मुनीनां प्रामाण्यम्। (सु०)।

२. कित्त्वाद् गुणाभावः, ततो दीर्घ इति भावः। निदप्यनुवर्त्य आद्युदात्तार्थः।

३. सन्दिग्धम्।

४. अत्रापि गोप्यम्–कुप्यमितिवद् गर्तः–कर्त इति रुचिरतरं स्यात्। (सु०)।

५. मृग्यम्।

(७) अवतः–अवपूर्वादततेः पचाद्यचि (अ० ३.१.१३४) शकन्ध्वादित्वात् (अ० ६.१.९४ वा०) पररूपम्। अवातति खन्यमानोऽधो गच्छति[१]। 'द्रोणाहावमवतमश्मचक्रम्' (ऋ० १०.१०१.७), 'आवृतासोऽवतासो न कर्तृभिः' (ऋ० १.५५.८) इति निगमौ॥

(८) क्रिविः–करोतेः कृणोतेर्वा[२] 'कृविघृष्विछविस्थविकिकीदिवि' (उ० ४.५७) इति क्विन् प्रत्ययो रिडादेशश्च निपात्यते। कर्त्तवदर्थः। 'आ व इन्द्रं क्रिविं यथा' (ऋ० १.३०.१) इति निगमः॥

(९) सूदः–'सूद क्षरणे हिंसायाञ्च' (भ्वा० आ० २०)। क्षरत्यस्माद् जलम्, हिंसायां कर्त्तवदर्थः। 'शोभनोदकः सुस्थिरोदको वा सूदः'[३] इति हरदत्तमिश्रः। 'उदकस्योदः सञ्ज्ञायाम्' (अ० ६.३.५६)। निगमोऽन्वेषणीयः[४]॥

(१०) उत्सः[५]–उत्पूर्वात् सर्त्तेः सदेः स्यन्देर्वा डप्रत्ययः। स्यन्देर्यलोपो बाहुलकात्। उन्देर्वा 'उन्देर्नलोपश्च' (स० क० २.३.१७१) इति सप्रत्ययः। उद्गच्छत्यस्माद् जलम्, स्यन्दत आर्द्रीक्रियते वा जलेन। 'उत्सं न कञ्चिज्जनपानमक्षितम्' (ऋ० ९.११०.५) इति निगमः॥

(११) ऋश्यदात्–'ऋषी गतौ' (तु० प० ७)। 'अघ्न्यादयश्च' (उ० ४.११३) इति यक्प्रत्ययो मूर्द्धन्यस्य शादेशो गुणाभावश्च निपात्यते। ऋष्या मृगाः। ऋष्यान् द्यति। 'आतोऽनुपसर्गे कः' (अ० ३.२.३)। पञ्चम्येकवचनम्। कूपो हि दुर्ग्रहजलत्वाद् ऋश्यान् खण्डयति, खण्डितत्वञ्च जलादानेच्छान् निराकरोति[६]। 'युवं वन्दनमृश्यदादुदूपथुर्युवं' (ऋ० १०.३९.८) इति निगमः॥

(१२) कारोतरात्–करणं कारः। करोतेर्घञ्। कारेण खननक्रियया उत्तरोऽधिकः प्रदेशान्तरादुत्कृष्टो वा। यद्वा उत्खातमुदकं यस्य स कारोतरः कृतोदको वा। पृषोदरादित्वात् कारोतरः। पञ्चम्येकवचनम्। निगमोऽन्वेषणीयः[७]॥

(१३) कुशयः–कौ शेते। 'अधिकरणे शेतेः' (अ० ३.२.१५) इत्यच्प्रत्ययः। निगमोऽन्वेषणीयः॥

---

१. 'अवतः–अवातितो महान् भवति' निरु० ५.२५, १०.१४। (सु०)।

२. यास्कस्तु क्रिविर्दती इति निर्वचनप्रसङ्गे (निरु० ६.३१) कृत्धातोः क्रिविशब्दं निराह। (सु०)।

३. मृग्यम्।

४. 'मध्वः सूदं पवस्व वस्व उत्सम्' (ऋ० ९.९७.४४) इति निगमः। (सु०)।

५. 'उत्सो मेघः' निरु० १०.९, १४। लोके निर्झरादिप्रभवार्थ उत्सः। (सु०)।

६. 'जलादानेच्छा न करोति' इति मुद्रितेषु।

७. 'कारोतरेण दधतो गवां त्वचि' (मा०सं० १९.८२) कूपेनेव इत्यर्थ इति दयानन्दः। (सु०)।

(१४) केवटः[१]–'केवृ सेवने' (स्वा० आ० ३३८)। 'शकादिभ्योऽटन्' (उ० ४.८२) इत्यटन्प्रत्ययः। सेव्यते जलार्थिभिः। 'माकीं सं शारि केवटे' (ऋ० ६.५४.७) इति निगमः॥

इति चतुर्दश कूपनामानि॥ २३॥

तृपुः (१)। तक्वा (२)। रिभ्वा (३)। रिपुः (४)। रिक्वा (५)। रिहायाः (६)। तायुः (७)। तस्करः (८)। वनर्गुः (९)। हुरश्चित् (१०)। मुषीवान् (११)। मलिम्लुचः (१२)। अघशंसः (१३)। वृकः (१४)। इति चतुर्दशैव स्तेननामानि॥ २४॥

(१) तृपुः[२]–'तृप प्रीणने' (दि०प० ८४)। 'ईषेः किच्च' (उ० १.१३) इति बाहुलकादुप्रत्ययः किच्च। परद्रव्यापहारात् तृप्यति। निगमोऽन्वेषणीयः॥

(२) तक्वा–तकतिर्गतिकर्मा, 'तक सहने'[३] (भ्वा० प० ८२)। 'अन्येभ्योऽपि दृश्यन्ते' (अ० ३.२.७५) इति वनिप्। गच्छति मोषणार्थम्, मोषणेन वा सहत अभिभवति। 'तक्वा न भूर्णिर्वना सिषक्ति' (ऋ० १.६६.२) इति निगमः॥

(३) रिभ्वाः–'रभ राभस्ये' (भ्वा० आ० ७०१)। पूर्ववद्वनिप्। पृषोदरादित्वाद् इकारो गुणाभावश्च। रभते मोषणक्रियां[४] वेगेन करोति। निगमोऽन्वेषणीयः॥

(४) रिपुः–'रिफ कत्थनयुद्धनिन्दाहिंसादानेषु' (तु० प० २३) 'ईषेः किच्च' (उ० १.१३) इति बाहुलकादुप्रत्ययः। 'रिपति' केचित् पठन्ति। तत्र बाहुलकादेव फकारस्य पकारः। रिफति मोषणार्थं युध्यते हिनस्ति वा निन्द्यते च सत्पुरुषैः। 'मा नः स रिपुरीशत' (ऋ० १.३६.१६) इति निगमः॥

(५) रिक्वा–'रिचिर् वियोजने'[५] (रु० उभ० ४)। 'अन्येभ्योऽपि दृश्यन्ते' (अ० ३.२.७५) इति क्वनिप्। चकारस्य ककारो व्यत्ययेन।

---

१. प्राकृतभाषासु धीवरार्थको नाविकार्थको वा केवटशब्दस्तु वेदोक्तात् केवर्तशब्दान्निःसृतः। (सु०)। २. तु०–तृप्रप्रहारी–निरु० ५.१२। (सु०)।

३. 'हसन इति पाणिनीयाः। सहन इति दुर्गः' इति क्षीरतरङ्गिणी। पुरुषकारे तु 'क्षीरस्वामी सहन इत्युक्त्वा हसन इति दुर्गः' इति विपरीतमुद्धरति।

४. 'मोषणविद्याम्' इति मुद्रितेषु।

५. 'विरेचने' इति पाणिनीयाः। 'रिच वियोजनसम्पर्चनयोः' इति चुरादौ (२४०)।

वियोजयत्यर्थैरर्थवतः, वियुज्यते वा प्राणैः। निगमोऽन्वेषणीयः॥

(६) रिहायाः–'रिह कत्थनादौ' इति क्षीरस्वामी[१]। 'रेपस्त्रेक्णसूधस्-विहायस्०' (स० क० २.१.३४४) इत्यादिनासिः, आयुडागमो गुणाभावश्च निपात्यते। रिपुवदर्थः। निगमोऽन्वेषणीयः॥

(७) तायुः–'तायृ सन्तानपालनयोः' (भ्वा० आ० ३२९)। 'छन्दसीणः' (उ० १.२) इति बाहुलकाद् उण्। पाल्यते यस्मात् सर्वम्। यद्वा तसेरुपक्षयार्थात् पूर्ववदुणि बाहुलकात् सकारस्य यकारः। 'उपक्षीणोऽसाविह लोक आयुषा यदा तदा राज्ञा मारयिष्यमाणत्वात्, परलोकेऽपि धर्मेणा-धर्मकारित्वात्'[२] इति स्कन्दस्वामी। 'अप त्ये तायवो यथा' (ऋ० १.५०.२), 'उत स्मैनं वस्त्रमथिं न तायुम्' (ऋ० ४.३८.५) इति निगमौ॥

(८) तस्करः–तत् करोतीति विगृह्य 'दिवाविभानिशाप्रभा०' (अ० ३.२.२१) इत्यादिना टप्रत्ययः। 'तत् करोति यत् पापकम्' इति नैरुक्ताः (निरु० ३.१४)। 'तच्छब्देन प्रकरणसामर्थ्यादर्थप्राधान्याच्च पापकर्मनिर्देशम-भिप्रेतमित्याह–यत् पापकमिति नैरुक्ता इति। वैयाकरणास्तु शब्दपरत्वात् सामान्येनाहुः 'तद्बृहतोः करपत्योश्चोरदेवतयोः सुट् तलोपश्च' (अ० ६.१.१५७ ग० सू०) इति। तनोतेर्वा स्यात् सन्ततकर्मेति। सन्ततं कर्म स्तेयमस्येति, तनोतेः कर्मशब्दाच्च तस्करः। तच्च सन्ततकर्मत्वं दर्शयति–अहोरात्रकर्मेति। 'दिवा पथि मोषणेन, रात्रौ सन्धिच्छेदनेन'[३] इति स्कन्दस्वामी। तनोतेः क्विपि नलोपे तुकि रूपम्[४]। यद्वा 'त्यजियजितनिभ्यो[५] डित्' (उ० १.१३२) इति अदिप्रत्यये तत्। कर्मशब्दस्य मकारलोपः। पृषोदरादित्वाद् रूपम्। 'तनूत्यजेव तस्करा वनर्गू' (ऋ० १०.४.६), 'तस्कराणां पतये नमः' (मा० सं० १६.२१) इति निगमौ॥

(९) वनर्गुः–वनशब्दोपपदाद् गमेः 'मृगय्वादयश्च' (उ० १.३७) इति डुप्रत्ययो रुडागमश्च निपात्यते। तस्करो हि मोषणार्थं सदा वनं गच्छति। निगमोऽन्वेषणीयः[६]॥

(१०) हुरश्चित्–'हुर्च्छा कौटिल्ये' (भ्वा० प० १२६)। क्विप्। 'राल्लोपः' (अ० ६.४.२१)। इति छकारलोपः। 'चिती सञ्ज्ञाने' (भ्वा०

१. क्षीरतरङ्गिणी (तु० प० ३७)।
२. स्कन्दटीका (निरु० ४.२४)।
३. स्कन्दटीका (निरु० ३.१४)।
४. 'चर्त्वम्' इति मुद्रितेषु।
५. श्वेतवनवासिपाठः।
६. उपरिष्टात् तस्करशब्दप्रसङ्गे प्रोक्तो निगमः। निरुक्तकारेण व्याख्यातश्च। –निरु ३.१४। (सु०)।

प० ३२)। क्विप्। हुरः कौटिल्यानि चेतयते। यद्वा हरतेः 'अन्येभ्योऽपि दृश्यन्ते' (अ० ३.२.७५) इति विचि गुणः, पृषोदरादित्वाद् अकारस्योकारः। हुरोऽर्थानामाहर्तॄन् चेतयते। चिनोतेर्वा क्विप्, हुरो हृतानर्थान् सञ्चिनोति। अपिशब्दादत्र कर्मणि विच्। 'तत्पुरुषे कृति बहुलम्' (अ० ६.३.१३) इत्यलुक्। 'अपप्रोथन्तः सनुतर्हुरश्चितः' (ऋ० ९.९८.११) इति निगमः॥

(११) मुषीवान्—'मुष स्तेये' (क्र्या० प० ६०)। इक्[१]। 'कृदिकारादक्तिनः' (अ० ४.१.४५ वा०) इति ङीष्। मुषी मोषणमस्यास्ति। 'छन्दसीवनिपौ' (अ० ५.२.१०९ वा०) इति वनिप्। 'मुषीवाणं हुरश्चितम्' (ऋ० १.४२.३) इति निगमः। अत्र 'परोक्षहर्ता चौरो मुषीवान्, प्रत्यक्षहर्त्ता हुरश्चित्'[२] इति माधवः॥

(१२) मलिम्लुचः—मलमस्यास्ति। 'ज्योत्स्नातमिस्राशृङ्गिणोर्जस्विन्नूर्जस्वलगोमिन्मलिनमलीमसाः' (अ० ५.२.११४) इति मलिनो निपात्यते। 'म्लुचु स्तेयकरणे' (भ्वा० प० ११६)। 'इगुपधज्ञाप्रीकिरः कः' (अ० ३.१.१३५)। मलिमश्चासौ म्लुचश्च मलिम्लुचः। पृषोदरादित्वेन नलोपः। निगमोऽन्वेषणीयः[३]॥

(१३) अघशंसः—आङ्पूर्वाद् हन्तेः 'अन्येष्वपि दृश्यते' (अ० ३.२.१०१) इति डः। पृषोदरादित्वाद् आङो ह्रस्वत्वं हकारस्य घत्वञ्च। शंसेः पचाद्यच्। आहन्ता, वधस्वभावः, आशंसमानश्च[४]। 'अघशंसस्य कस्यचित्' (ऋ० १.४२.४) इति निगमः॥

(१४) वृकः—व्याख्यातमृत्विङ्नामसु (निघ० ३.१८.४)। वारको मार्गस्य। 'यो नः पूषन्नघो वृकः' (ऋ० १.४२.२) इति निगमः॥

इति चतुर्दश स्तेननामानि॥ २४॥

निण्यम् (१)। सस्वः (२)। सनुतः (३)। हिरुक् (४)। प्रतीच्यम् (५)। अपीच्यम् (६)। इति षट् निर्णीतान्तर्हितनामधेयानि॥ २५॥

(१) निण्यम्—निर्शब्दपूर्वान् नयतेः 'अघ्न्यादयश्च' (उ० ४.११३)

---

१. 'अच्' इत्यपपाठो मुद्रितेषु। २. मृगयम्।

३. तु०—'देवमलिम्लुचः' पञ्चविंशब्रा० १४.४। (सु०)।

४. अघं पापं शंसतीति व्याख्यानं समीचीनतरम्। व्याख्यानमेतत् निरुक्तेन समर्थितं च (निरु० ६.११)। (सु०)।

इति यक्प्रत्ययष्टिलोपो रेफलोपश्च निपात्यते। निर्णीतं बहिर्नीतम्, निर्गतमन्तर्हितं वा। 'वृत्रस्य निण्यं विचरन्त्यापः' (ऋ० १.३२.१०), 'निण्यः सन्नद्धो मनसा चरामि' (ऋ० १.१६४.३७) इति निगमौ॥

(२) सस्वः–सम्पूर्वात् स्वरतेर्गतिकर्मणो विचि रपरगुणः। समोऽन्तलोपः। सम्यगन्तर्गतं विनिर्गतं वा। 'सस्वर्ह यन्मरुतो गोतमो वः' (ऋ० १.८८.५), 'यत् सस्वर्ता जिहीळिरे यदाविः' (ऋ० ७.५८.५) इति निगमौ॥

(३) सनुतः, (४) हिरुक्–स्वरादिः[१]। 'सनुतर्द्धैहि तं ततः' (ऋ० ८.९७.३), 'य ईं ददर्श हिरुगिन्नु तस्मात्' (ऋ० १.१६४.३२) इति निगमौ॥

(५) प्रतीच्यम्, (६) अपीच्यम्–अपीच्यमपगतमपचितम् (निरु० ४.२५) इत्यादिभाष्ये 'अपेत्य चितं स्थितम्'[२] इति स्कन्दस्वामी। प्रतिपूर्वाद् अपमात्रपूर्वाच्च चिनोतेरघ्न्यादित्वाद् यक्प्रत्ययष्टिलोपादि च निपात्यते। प्रतीच्यस्य निगमोऽन्वेषणीयः॥ 'नाम त्वष्टुरपीच्यम्' (ऋ० १.८४.१५), 'य उस्राणामपीच्या३' (ऋ० ८.४१.५) इति निगमौ। 'य उस्राणामपीच्या' इत्यत्र अपिपूर्वादञ्चतेः 'ऋत्विग्०' (अ० ३.२.५९) इत्यादिना क्विन्प्रत्ययः, ततो 'भवे छन्दसि' (अ० ४.४.११०) इति यत्, 'अचः' (अ० ६.४.१३७) इत्यकारलोपः', 'चौ' (अ० ६.३.१३७) इति पूर्वपदस्य दीर्घः। 'अपीच्योऽप्रकाशः'[३] इति भट्टभास्करमिश्रः॥

इति षट् निर्णीतान्तर्हितनामानि॥ २५॥

आके (१)। पराके (२)। पराचैः (३)। आरे (४)। परावतः (५)। इति पञ्च दूरनामानि॥ २६॥

(१) आके, (२) पराके–आङ्पूर्वात् परापूर्वाच्च एतेः 'पिनाकादयश्च' (उ० ४.१६) इति आकप्रत्ययो धातुलोपश्च निपात्यते। यद्वा आङ्पूर्वात् परापूर्वाच्च किरतेः 'अन्येष्वपि०' (अ० ३.२.१०१) इति डः[४]। आकीर्णं पराकीर्णं च तद् विक्षिप्तमिव भवति। आकेनिगमोऽन्वेषणीयः। 'क्षयन्तमस्य रजसः पराके' (ऋ० ७.१००.५) इति निगमः॥

(३) पराचैः–'नीचैरिति वदन्नयं पराकैः'[३] इति भट्टभास्करमिश्रः। निगमोऽन्वेषणीयः[५]॥

---

१. अ० १.१.३७। २. स्कन्दटीका (निरु० ४.२५)। ३. मृग्यम्।

४. परापूर्वादञ्चतेः कप्रत्ययेन समीचीनतरः स्यात्। वेदे परापूर्वस्याञ्चतेः संवर्तते बहुलं समाचारः। (सु०)।

५. 'बाधस्व दूरे निर्ऋतिं पराचैः' (ऋ० १.२४.९) इति निगमः। (सु०)।

(४) आरे–अव्ययम्। 'न हि त्वदारे निमिषश्चनेशे' (ऋ० २.२८.६) इति निगमः॥

(५) परावतः–ईरयतेर्वेतेर्गतिकर्मणो[१] वा संसाधनेऽर्थे वर्तमानात् प्रोपसर्गात् परोपसर्गाद्वा 'उपसर्गाच्छन्दसि धात्वर्थे' (अ० ५.१.११७) इति वतिः। पृषोदरादित्वात् प्रशब्दस्य पराभावः। प्रकर्षेण ईरयति विक्षिप्तं परागतमिव वा तद् भवति[२]। 'परावतं परमां गन्तवा उ' (ऋ० १०.९५.१४), 'ससार सीं परावतः' (ऋ० ४.३०.११) इति निगमौ॥

इति पञ्च दूरनामानि॥ २६॥

प्रत्नम् (१)। प्रदिवः (२)। प्रवयाः (३)। सनेमि (४)। पूर्व्यम् (५)। अह्नाय (६)। इति षट् पुराणनामानि॥ २७॥

(१) प्रत्नम्–'नश्च पुराणे प्रात्' (अ० ५.४.२५ वा०) इति नप्रत्ययः[३]। 'तं प्रत्नथा पूर्वथा विश्वथेमथा' (ऋ० ५.४४.१) इति निगमः॥

(२) प्रदिवः–'यदीमनु प्रदिवः' (ऋ० १.१४१.३) इत्यत्र पुंल्लिङ्ग-द्विवचनान्तेन, 'क्षत्रं राजाना प्रदिवः' (ऋ० ३.३८.५) इत्यत्र षष्ठ्येकवचनान्तेन, 'इन्द्राय सोमाः प्रदिवः' (ऋ० ३.३६.२) इत्यत्र प्रथमाबहुवचनान्तेन च प्रदिव इत्येव सामानाधिकरण्यदर्शनात् सकारान्तमेतदव्ययमित्याहुः। इन्द्रार्थत्वेनानादि-कालप्रवृत्ता इत्यभाषयत्[४]। तेन प्रगतानि दिनान्यस्य पृषोदरादित्वान्नकारस्य वकार इत्यादिव्युत्पत्तिः। निगमेषु वचनव्यत्ययश्चाश्रयणीयः॥

(३) प्रवयाः–प्रगतं वयो यस्य। वयः कालमात्रमत्र। निगमोऽन्वे-षणीयः॥

(४) सनेमि–अव्ययम्। 'सनेम्यस्मद्युयवन्नमीवाः' (ऋ० ७.३८.७), 'सनेमि सख्यं स्वपस्यमानः' (ऋ० १.६२.९), 'सनेम्यभ्वं मरुतो जुनन्ति' (ऋ० १.१६९.३) इति निगमाः॥

(५) पूर्व्यम्–'पुर्व पूरणे' (भ्वा० प० ३८५)। पचाद्यच् (अ० ३.१.१३४)। वयःप्रवृत्तिं पूरयतीति। पूर्वस्मिन् काले भवं पूर्व्यम् 'भवे छन्दसि' (अ० ४.४.११०) इति यत्। यद्वा 'पूर्वैः कृतमिनयौ च' (अ०

---

१. द्र०–स्कन्दटीका (निरु० ७.२६)।

२. परा-उपसर्गाद्वा गम्धात्वर्थे वतिः। परागता एव परावतः। (सु०)।

३. अ० ४.३.२३ सूत्रे 'प्रगस्य छन्दसि गलोपश्च' इति वार्त्तिकेन प्रगशब्दात् त्नप्रत्ययेन गलोपेनापि साध्यतेऽयं शब्दः। (सु०)।

४. प्रदिवः.........पुराणमनादिकालप्रसिद्धम्। स्कन्दटीका (निरु० ८.१९)।

४.४.१३३) इति यः। 'पूर्व्यं होतरस्य नः' (ऋ० १.२६.५), 'यः स्तोमेभिर्वावृधे पूर्व्येभिः' (ऋ० ३.३२.१३) इति निगमौ॥

(६) अह्नाय–अव्ययम्। निगमोऽन्वेषणीयः॥

इति षट् पुराणनामानि॥ २७॥

नवम् (१)। नूत्नम् (२)। नूतनम् (३)। नव्यम् (४)। इदा (५)। इदानीम् (६)। इति षडेव नवनामानि॥ २८॥

(१) **नवम्**–.........यद्वा 'णु स्तुतौ' (अदा० प० २७)। 'ऋदोरप्' (अ० ३.३.५७)। नूयते स्तूयते, अचिरकृतत्वेन रमणीयत्वादिति। 'नवेन पूर्वं दयमाने' (मा० सं० २८.१६) इति निगमः॥

(२) **नूत्नम्**–नौतेरेव। 'राम्नासास्ना०' (उ० ३.१५) इत्यादिना त्नप्रत्ययो[१] दीर्घश्च निपात्यते[२]। 'नूत्ना इदिन्द्र ते वयमूती' (ऋ० ८.२१.७) इति निगमः॥

(३) **नूतनम्**–'नवस्य नू आदेशः त्नप्तनप्तनथनाश्च प्रत्यया वक्तव्याः' (अ० ५.४.२५ वा०) इति तनप्प्रत्ययः[३]। 'ईड्यो नूतनैरुत' (ऋ० १.१.२) इति निगमः॥

(४) **नव्यम्**–नवमेव नव्यम्। 'शाखादिभ्यो यत्' (अ० ५.३.१०३) इति स्वार्थे यत्। यद्वा नौतेः 'अचो यत्' (अ० ३.१.९७) 'वान्तो यि प्रत्यये' (अ० ६.१.७६)। 'इन्द्राग्नी स्तोमं जनयामि नव्यम्' (ऋ० १.१०९.२) इति निगमः॥

(५) **इदा**–'तयोर्दार्हिलौ च च्छन्दसि' (अ० ५.३.२०) इति इदंशब्दात् सप्तम्यन्ताद् दाप्रत्ययः। 'इदा हि व उपस्तुतिम्' (ऋ० ८.२७.११) इति निगमः॥

(६) **इदानीम्**–'दानीञ्च' (अ० ५.३.१८) इति तस्मादेव[४] दानीम्प्रत्ययः। 'इदानीमह्न उपवाच्यो नृभिः' (ऋ० ४.५४.१) इति निगमः॥

इति षडेव नवनामानि॥ २८॥

---

१. 'नप्रत्ययः' इति मुद्रितेषु।
२. अग्रिमे नूतनशब्द उद्धृतं वार्त्तिकमपि द्रष्टव्यम्।
३. सिद्धिरेषा नैरुक्तमर्थं विपर्येति। तदनुसारेण 'नू च' इति निपातो नूतनार्थकः। तथा हि–इदं पारमर्षं नैरुक्तं वचः–पुराणनवयोर्नूचेति। नू च पुरा च=अद्य च पुरा च (निरु० ४.१७) अस्मात् स्वतन्त्र-'नू'-अव्ययात् अ० ४.३.२३ सूत्रेण ट्युप्रत्ययेन स्वभावतः सिद्धं नूतनम् इति। अतः कृतमनेन द्रविड़प्राणायामेन। (सु०)।
४. इदंशब्दात् सप्तम्यन्तादेव।

प्रपित्वे (१)। अभीके (२)। दभ्रम् (३)। अर्भकम् (४)। तिरः (५)। सतः (६)। त्वः (७)। नेमः (८)। ऋक्षाः (९)। स्तृभिः (१०)। वम्रीभिः (११)। उपजिह्विका (१२)। ऊर्दरम् (१३)। कृदरम् (१४)। रम्भः (१५)। पिनाकम् (१६)। मेना (१७)। ग्नाः (१८)। शेपः (१९)। वैतसः (२०)। अया (२१)। एना (२२)। सिषक्तु (२३)। सचते (२४)। भ्यसते (२५)। रेजते (२६)। इति षड्विंशतिर्द्विश उत्तराणि नामानि॥ २९ ॥

प्रपित्वे इत्यादीनि भाष्यकारेणैव निरुक्तानि (निरु० ३.२०,२१)[१]॥ २९॥

स्वधे (१)। पुरन्धी (२)। धिषणे (३)। रोदसी (४)। क्षोणी (५)। अम्भसी (६)। नभसी (७)। रजसी (८)। सदसी (९)। सद्मनी (१०)। घृतवती (११)। बहुले (१२)। गभीरे (१३)। गम्भीरे (१४)। ओण्यौ (१५)। चम्वौ (१६)। पार्श्वौ (१७)। मही (१८)। उर्वी (१९)। पृथ्वी (२०)। अदिती (२१)। अह्री (२२)। दूरेअन्ते (२३)। अपारे (२४)। अपारे इति चतुर्विंशतिर्द्यावापृथिवी-नामधेयानि नामधेयानि॥ ३० ॥

उर्व्यृहन्महद्गयइरज्यतिशिम्बातानिर्णिगस्त्रेमाकेतोबट्चिक्यद्धि-कमिदमिवार्चतिविप्रोरेभोयज्ञोभारताईमहेदातिपरिस्त्रवस्वपितिकूपस्तृ-पुर्निण्यमाकेप्रत्नन्नवम्प्रपित्वेस्वधे त्रिंशत्॥

इति निघण्टौ तृतीयोऽध्यायः समाप्तः॥ ३॥

(१) स्वधे-व्याख्यातमन्त्रनामसु (निघ० १.१२.९७, २.७.१७)। स्वेनात्मना भूतग्रामं धारयतः, स्वं धनं धीयते अनयोरिति वा। द्यावापृथिवीनामसु सर्वत्र द्विवचनान्तत्वम्। तथा च 'आदु ब्रुवाते मिथुनानि नाम' (ऋ० ३.५४.७) इत्यत्र स्कन्दस्वामी-'मिथुनानि द्विवचनसंयुक्तानि [नाम बहुवचनस्यात्र लुक्] नामानि 'स्वधे पुरन्धी इत्यादीनि'[२] इति॥

---

१. तृतीयाध्यायादुत्तरत्र परिशिष्टे निर्वक्ष्यन्ते। २. स्कन्दटीका (निरु० ४.२५)।

(२) **पुरन्धी**—पुराणि धीयन्तेऽनयोः। 'कर्मण्यधिकरणे च' (अ० ३.३.९३) इति किप्रत्ययः। पृषोदरादित्वान्मकार उपजनः। निगमोऽन्वेषणीयः॥

(३) **धिषणे**—व्याख्यातं वाङ्नामसु (निघ० १.११.४४)। स्वं रक्षितुं प्रगल्भे समर्थे, धारयित्र्यौ वा देवमनुष्यादीन्, शब्द्येते स्तूयेते वा। निगमोऽन्वेषणीयः॥

(४) **रोदसी**—'[रोदसी] इतीदमस्ति स्त्रीलिङ्गद्विवचनान्तम्, द्यावा-पृथिव्योर्वर्त्तमानं चास्ति नपुंसकद्विवचनान्तम्, अस्ति चाव्ययम्। तत्र निगमानां साधारण्यात् तेषां त्रयाणामपि साधारणोऽयं पाठः' इत्याहुः। 'प्रसूरश्वापि भूद्यावौ रोदस्यौ रोदसी च ते' (अमर० ३.३.२३०) इत्यत्र 'आद्य ईदन्तो दिवि भुवि च वर्त्तते, अन्त्योऽसन्तः'[१] इति क्षीरस्वामी। तत्र रुधेरसुन्, पृषोदरादित्वाद् धकारस्य दकारः, स्त्रीलिङ्गे तु 'उगितश्च' (अ० ४.१.६) इति ङीप्, 'वा छन्दसि' (अ० ६.१.१०२) इति पूर्वसवर्णदीर्घः। आभ्यां हि विविधं रुद्धानि सर्वभूतानि। 'नमो॑ दि॒वे बृ॑ह॒ते रोद॑सीभ्याम्' (ऋ० १.१३६.६), 'होता॑रं स॒त्य॒यजं॒ रोद॑स्योः' (ऋ० ४.३.१), 'इ॒मे चि॑दिन्द्र॒ रोद॑सी अपा॒रे' (ऋ० ३.३०.५) इति निगमाः। 'विषि॑तस्तुका रोद॒सी नृ॒मणाः॑' (ऋ० १.१६७.५) इत्यादावन्तोदात्तो रोदसीशब्दो रुद्रपत्नीवचनः'[२] इति माधवः॥

(५) **क्षोणी**—व्याख्यातं पृथिवीनामसु (निघ० १.१.७) 'अ॒पः क्षो॒णी स॑चते॒ माहि॑ना वाम्' (ऋ० १.१८०.५) इति निगमः॥

(६) **अम्भसी**—व्याख्यातमुदकनामसु (निघ० १.१२.५)। बाहुलकादत्रापि नुम्। यद्वा अम्भ उदकमनयोरस्ति, मत्वर्थीयस्य लुक्। एकत्रावशिष्टमपरत्रावशिष्यमाणमादित्यमण्डलस्थम्। निगमोऽन्वेषणीयः॥

(७) **नभसी**—'णह बन्धने' (दि० उभ० ५५)। 'नहेर्दिवि भश्च' (उ० ४.२१२) इत्यसुन्। साहचर्यात् उभे अपि नभःशब्देनोच्येते। सम्बध्यते पुण्यवद्भिः। निगमोऽन्वेषणीयः॥

(८) **रजसी**—'रञ्ज रागे' (भ्वा० उभ० ७२५)। 'भूरञ्जिभ्यां कित्' (उ० ४.२१८) इत्यसुन्। 'रजकरजनरजस्सू०' (अ० ६.४.२४ वा०) इति नलोपः। रजके स्वगुणे भूतानाम्। 'रजोरजतेर्गतिकर्मणः'[२] इति माधवः। गम्यते पुण्यवद्भिः। निगमोऽन्वेषणीयः॥

(९) **सदसी**—सदेरसुन्। सीदन्त्यनयोर्देवमनुष्यादयः। निगमोऽन्वेषणीयः॥

---

१. अमरकोषोद्घाटनम् (३.३.२३०)। २. मृग्यम्।

(१०) सद्मनी–सदेरेव मनिन्। 'पुराण्योः सद्मनोः केतुरन्तः' (ऋ० ३.५५.२) इति निगमः। भाष्यं[१] द्रष्टव्यम्॥

(११) घृतवती–उदकवत्यौ। निगमोऽन्वेषणीयः॥

(१२) बहुले–'बंहिष्ठः' इति महन्नामसु व्याख्यातम् (निघ० ३.३.२४) बहुभिः पदार्थैस्तद्वत्यौ। 'उर्वी पृथ्वी बहुले दूरेअन्ते' (ऋ० १.१८५.७) इति निगमः॥

(१३) गभीरे, (१४) गम्भीरे–व्याख्याते वाङ्नामसु (निघ० १.११.७,८)। गम्यते सत्पुरुषैः, प्रतितिष्ठन्त्यनयोर्देवमनुष्यादयः। निगमावन्वेषणीयौ॥

(१५) ओण्यौ–'ओणृ अपनयने' (भ्वा० प० ३०५)। 'इन् सर्वधातुभ्यः' (उ० ४.११९)। 'कृदिकारादक्तिनः' (अ० ४.१.४५ ग०सू०) इति ङीष्। अपनयतः स्वाश्रितानां क्लेशान्। यद्वा अवतेर्ल्युटि, छान्दसत्वात् सम्प्रसारणं गुणश्च, टित्त्वाद् ङीप्। 'अभि त्यं देवꣳसवितारमोण्योः' (मा० सं० ४.२५) इति निगमः॥

(१६) चम्वौ–'चमु अदने' (भ्वा० प० ३१७)। 'कृषिचमितनिधनिसर्जिखर्जिभ्य ऊः स्त्रियाम्' (उ० १.८०) इति ऊप्रत्ययः। चमन्त्यनयोः। 'उत्तानयोश्चम्वोर्योनिरन्तः' (ऋ० १.१६४.३३) इति निगमः॥

(१७) पार्श्वौ–'स्पृश संस्पर्शने' (तु० प० १३१)। 'स्पृशे श्वण्शुनौ पृ च' (उ० ५.२७) इति श्वण्प्रत्ययो धातोः पृभावश्च। णित्त्वाद् वृद्धिः व्यत्ययेन पुँल्लिङ्गता। 'पार्श्वे' इति पाठान्तरम्। संस्पृशतो व्याप्नुतः सर्वान् पदार्थान्। निगमोऽन्वेषणीयः॥

(१८) मही–एतदादीनि चत्वारि पृथिवीनामसु व्याख्यातानि (निघ० १.१.१२, १०, ११, १४)। महत्यौ पूजनीये वा। 'वेपैते भियसा मही' (ऋ० १.८०.११) इति निगमः॥

(१९) उर्वी–विस्तीर्णे, आच्छादयित्र्यौ वा स्वर्गाधःस्थितलोकस्य। निगमोऽन्वेषणीयः॥

(२०) पृथ्वी–प्रथिता विस्तारिता ब्रह्मणा सृष्टिकाले। निगमोऽन्वेषणीयः॥

(२१) अदिती–देवमनुष्यादिसकलप्रपञ्चधारणेऽप्यदीने इत्यर्थः। निगमोऽन्वेषणीयः॥

---

१. मृग्यम्।

(२२) अही–मेघनामसु गोनामसु च व्याख्यातम् (निघ० १.१०.२१, २.११.४)। गम्यते प्राणिभिः। निगमोऽन्वेषणीयः॥

(२३) दूरेअन्ते–दुःशब्दोपपदाद् एतेः 'दुरीणो लोपश्च' (उ० २.२०) इति रक्प्रत्ययो धातोर्लोपश्च। 'रो रि' (अ० ८.३.१४) इति रेफलोपः, 'ढ्रलोपे पूर्वस्य दीर्घः०' (अ० ६.३.११०)। 'अन्तोऽततेः' (निरु० ४.२५) इति भाष्यम्। तत्र बाहुलकात्तन् मकारश्चान्तादेशः। 'दुःखेन गम्यते दूरमतोऽह्याद्-देर्मध्याच्च सततगतौ भवति, न कदाचिदादौ मध्ये वास्ति'[1] इति स्कन्दस्वामी। दूरे अन्तमवसानं गतिर्ययोः। 'तत्पुरुषे कृति बहुलम्' (अ० ६.३.१३) इत्यलुक्। 'स॒मा॒न्या वियु॑ते दू॒रेअ॑न्ते' (ऋ० ३.५४.७) इति निगमः॥

(२४) अपारे–'पार तीर कर्मसमाप्तौ' चुरादिरदन्तः (३३२)। घञ्। समाप्तिरिति वा समाप्यतेऽनेनेति वा पारः। 'अपारे दूरपारे' (निरु० ६.१) इति भाष्ये। 'अविद्यमानं पारमन्तं ययोस्त अपारे। दूरत्वेन पराभावं दर्शयति, परा दृष्ट्या वा लोकपर्य्यन्तताम्'[2] इति स्कन्दस्वामी। निगमोऽन्वेषणीयः॥

अध्यायपरिसमाप्तिसूचकद्विर्वचनमिति सिद्धम्॥

इति चतुर्विंशतिर्द्यावापृथिवीनामानि॥ ३०॥

इति देवराजयज्वविरचिते

नैघण्टुककाण्डनिर्वचने तृतीयोऽध्यायः॥ ३॥

इति नैघण्टुकं नामाद्यं काण्डं समाप्तम्॥

—०—

१. स्कन्दटीका (निरु० ४.२५)।

२. स्कन्दटीका (निरु० ६.१)।

[नैघण्टुक-टीका-परिशिष्टम्]

स्वरादीनीति पूर्वमुक्तस्य प्रकरणत्रयस्य (निघ० १.४, ३.१३, ३.२९) निगमदेवताकाण्डयोश्च निर्वचनं भाष्यस्कन्दस्वामिभ्यां प्रदर्शितं तदत्र क्रमेण लिख्यते। तत्र, निगमव्याख्यानादि यदत्राननुसंहितम्, तत् तत्रैव द्रष्टव्यम्॥

(१) स्वः–सुपूर्वादर्त्तेरीरयतेर्वा 'अन्येभ्योऽपि दृश्यन्ते' (अ० ३.२.७५) इति विचि दृशिग्रहणस्य प्रयोगानुसरणार्थत्वादकर्त्तर्यपि भवति। ईरयतेरिकारस्याकारो व्यत्ययेन, गुणः[1]। 'स्वरादिनिपातमव्ययम्' (अ० १.१.३६), सुपो लुक् (अ० २.४.७१), रेफस्य विसर्जनीयः (अ० ८.३.१५)। शोभनमरणं गमनं सुखाय हिताय वा यस्य, शोभनं वा प्रेरणं तमसां यस्य, सुष्ठु वा ऋतो [गतो] रश्मिभिः रसानादातुम्, भासं वा ज्योतिषां नक्षत्रादीनाम्, भासा सुष्ठु ऋतः प्राप्त इति वा, स्वरादित्यो द्यौश्च। सु सुष्ठु शोभनमरणमस्यां शोभनैर्वा पुण्यकृद्भिरर्यतेऽस्याम्, सुष्ठु वा पुण्यकृत ईरयति। स्वृतो रसैः, स्वृता भाभिर्ज्योतिषा, स्वयमेव वा दीप्ता। 'भूर्भुवः स्वः' (मा० सं ३.३७) इति दिव उदाहरणम्। 'एभिर्नो अर्कैर्भवा नो अर्वाङ् स्व१र्ण ज्योतिः' (ऋ० ४.१०.३) इत्यादित्यस्य॥

(२) पृश्निः–प्रपूर्वादश्नोतेः स्पृशतेर्वा 'घृणिपृश्निपार्ष्णिचूर्णिभूर्णयः' (उ० ४.५३) इति निप्रत्ययः, प्राशेः स्पृशेश्च पृशभावो निपात्यते। प्राश्नुत एनं शुक्लो वर्णः, संस्प्रष्टा रसान्। कृतव्याख्यानमन्यत् पूर्वेण। संस्प्रष्टा भासं ज्योतिषाम्, संस्पृष्टो भासेति वा पृश्निरादित्यः। द्यौस्तु संस्पृष्टा ज्योतिर्भिः पुण्यकृद्भिश्च 'सुकृतां वा एतानि ज्योतींꣳषि यन्नक्षत्राणि'[4] इति श्रुतेः। 'पृश्नेः पुत्रा उपमासो रभिष्ठाः' (ऋ० ५.५८.५), इति निगमो दिवः। 'अयं वेनश्चोदयत् पृश्निगर्भाः' (ऋ० १०.१२३.१) इत्यादित्यस्य॥

(३) नाकः–नयतेः 'पिनाकादयश्च' (उ० ४.१६) इत्याकप्रत्ययष्टिलोपश्च निपात्यते। नेता रसानाम्, नेता भासामात्मीयानाम्, ज्योतिषां प्रणाशक[3]श्चादित्यः। द्यौस्तु कमिति सुखनाम, न कम् अकम् असुखम्, न अकं यत्र स नाकः। 'नभ्राणनपान्नवेदा०' (अ० ६.३.७४) इत्यादिना नञः प्रकृतिभावः। 'न वा अमुं लोकं जग्मुषे किञ्च नाकम्'[2] (निरु० २.१४) इति ब्राह्मणम्। अत्यन्तसुखमित्यर्थः। 'नाकस्य पृष्ठे अधितिष्ठति श्रितः' (ऋ० १.१२५.५) इति दिवः। 'तत्रे अधि नाके अस्मिन्' (ऋ० १०.१३०.२) इति निगम आदित्यस्य॥

(४) गौः–व्याख्यातं पृथिवीनामसु (निघ० १.१.१)। गमिरत्रान्तर्णीत-

---

१. अर्त्तेरिति शेषः।
२. तै०सं० ५.४.१.३।
३. 'प्रणायकः' इति कोशेषु। स्कन्दटीकामनुसृत्य शोधः।
४. तु०–काठ० सं० २१.२, तै० सं० ५.३.७.१, मै० सं० ३.३.१।

ण्यर्थः। गमयति रसान् मण्डलं प्रति रश्मिभिः, गच्छति वान्तरिक्ष इति गौरादित्यः। यत् पृथिव्या उपरि दूरं गता, यद्वास्यां ज्योतींषि गच्छन्तीति गौः द्यौः। 'गवामसि गोपतिरेक इन्द्र' (ऋ० ७.९८.६) इति दिवः। 'उतादः परुषे गवि' (ऋ० ६.५६.३) इत्यादित्यस्य॥

(५) विष्टप्—'ष्टभि प्रतिबन्धे' (भ्वा० आ० २७१)। विपूर्वात् क्विपि भकारस्य पकारो व्यत्ययेन। विष्टम्भिराविशतेरर्थे वर्त्तते। यद्वा विशेरेव बाहुलकाद्रूपसिद्धिः। पृथिवीतो रसानादातुमाविष्टोऽभिनिविष्ट इत्यर्थः। एवमेव भासं ज्योतिषां भासा वाविष्टो व्याप्त आदित्यः। द्यौराविष्टा ज्योतिर्भिः पुण्यकृद्भिश्च। 'उद्यद्ब्रध्नस्य विष्टपम्' (ऋ० ८.६९.७) इत्याद्युदाहरणम्॥

(६) नभः—नयतेरसुनि गुणे 'नयः' इति स्थिते बाहुलकाद् यकारस्य भकारः। नाकशब्देन समानोऽर्थः। अथवा भासनशब्दस्य ह्रस्वत्वम्, सकारलोपः, नकारभकारयोश्च स्थानविपर्य्ययः, सान्तत्वञ्च। सर्वत्र सूत्रप्राप्त्यनुक्तौ पृषोदरादित्वाद् द्रष्टव्यम्। यद्वा न न भाति [इति नकारलोपे] 'नभः'। असुनि भातेष्टिलोपश्च। एतेन द्यौर्व्याख्याता। 'ज्योतिष्मती प्रतिमुञ्चते नभः' (तै० सं० ४.३.११.३), 'स्वर्जज्ञानो नभसा' (ऋ० ९.८६.१४) इत्युदाहरणम्॥

इति षट् साधारणानि दिवश्चादित्यस्य॥ १.४॥

इदमाद्युपमानामानि। भाष्यकारेण स्कन्दस्वामिना च विस्तरेण व्याख्यातानि (निरु० ३.१३-१८)। निपातप्रायत्वात् शब्दनिर्वचनस्यावक्तव्यत्वाद् उदाहरणमात्रमत्र प्रदर्श्यते।

(१) इदमिव, (२) इदं यथा—अत्र इदंशब्द उपमानशब्दसन्निधानाय प्रयुक्तः। इवादयश्च निपाताः पराश्रयस्योपमानत्वस्य धर्मस्य प्रतिपादनार्थाः। 'इन्द्र इवेह ध्रुवस्तिष्ठ' (ऋ० १०.१७३.२), 'यथा वातो यथा वनम्' (ऋ० ५.७८.८)॥

(३) अग्निर्न ये—अत्र नशब्द उपमानार्थः। 'अग्निर्न ये भ्राजसा रुक्मवक्षसः' (ऋ० १०.७८.२)॥

(४) 'चतुरश्चिद्ददमानात्' (ऋ० १.४१.९)। अत्र चिच्छब्दः॥

(५) 'ब्राह्मणा व्रतचारिणः' (ऋ० ७.१०३.१)। उपमाप्रतिपादनेनादिलोपाल्लुप्तोपमः॥

(६) 'वृक्षस्य नु ते पुरुहूत वयाः' (ऋ० ६.२४.३)। अत्र नुशब्दः॥

(७) जार आ भगम्—'उदीरय पितरा जार आ भगम्' (ऋ० १०.११.६)। अत्र आकारः॥

(८) 'मेषो भूतो३ भि यन्नयः' (ऋ० ८.२.४०)। अत्र भूतशब्देनोपमोच्यते॥

(९) तद्रूपः, (१०) तद्वर्णः—रूपशब्देन वर्णशब्देन चोत्तरपदेन समासादुपमा प्रतीयते॥

(११) तद्वत्[१]–पूर्ववत्तच्छब्दस्यार्थः। 'प्रियमेधवदत्रिवत्' (ऋ० १.४५.३)। 'तेन तुल्यं क्रिया चेद् वतिः' (अ० ५.१.११४)॥

(१२) तथा[२]–'तम्प्रत्नथा पूर्वथा विश्वथेमथा' (ऋ० ५.४४.१)। 'प्रत्नपूर्वविश्वेमात् थाल् छन्दसि' (अ० ५.३.१११) इति इवार्थेऽयं थाल् विहितः॥

'तथा' इत्यस्यानन्तरं 'सिंहः' इति केषुचित् कोशेषु दृश्यते, तन्न पठनीयम्, अथ लुप्तोपमानि' (निरु० ३.१८) इत्यादिभाष्यस्य तु 'ब्राह्मणा व्रतचारिणः' (५) इति पूर्वमुक्तस्य लुप्तोपमस्य प्रपञ्चत्वात्॥

इति द्वादशोपमानामानि॥ ३.१३॥

(१) प्रपित्वे, (२) अभीके–इत्यासन्नस्य। प्रपूर्वादाप्नोतेर्निष्ठायां प्राप्तशब्दस्य प्रपित्वभावः। यद्वा इत्वनादयोः 'अन्येभ्योऽपि दृश्यन्ते' (उ० ४.१०६) इतीत्वन्प्रत्यये बाहुलकादाप्नोतेराकारलोपः। पित्वशब्द आसन्नार्थः। प्रकृष्टदेशकालयोः प्राप्तिः प्रपित्वे इति। अभिपूर्वादञ्चतेः 'अलीकादयश्च' (उ० ४.२६) इतीकन्प्रत्ययो धातुलोपश्च निपात्यते। अभ्यक्ते आसन्ने इत्यर्थः। सोपसर्गौ सप्तम्यन्तौ यथादृष्टाविति पठितौ। 'आपित्वे नः प्रपित्वे तूयमागहि' (ऋ० ८.४.३), 'अभीके चिदु लोककृत्' (ऋ० १०.१३३.१) इत्यपि निगमौ॥

(३) दभ्रम्, (४) अर्भकम्–इत्यल्पस्य। दभ्रमिति दभ्नोतेर्वधकर्मणः 'स्फायितञ्चि०' (उ० २.१३) इत्यादिना रक्, 'अनिदिताम्०' (अ० ६.४.२४) इति नलोपः। सुदम्भं सुच्छेदम् अल्पत्वात्। हरतेः 'अर्भकञ्च पृथुकपाका वयसि'[३] इति कप्रत्यये, हकारस्य भकारे गुणे रपरत्व अकारे चोपजने च अर्भकमिति निपात्यते। अवहृतमूनपरिमाणम् इत्यर्थः। 'मा मे दभ्राणि मन्यथाः' (ऋ० १.१२६.७), 'नमो महद्भ्यो नमो अर्भकेभ्यः' (ऋ० १.२७.१३)॥

(५) तिरः, (६) सतः–इति प्राप्तस्य। अप्राप्तस्येत्यपरः पाठः[४]। तरतेरसुनि बाहुलकादकारस्येकारः। तीर्णं प्राप्तमागतम्। सर्त्तेरसुनि रेफस्य तकारः। सतः संसृतम्। अप्राप्तस्येति पाठे पराजितं तरणं सरणं च द्रष्टव्यम्॥ 'तिरश्चिदर्यया परि' (ऋ० ५.७५.७), 'पात्रेव भिन्दन्त्सत एति रक्षसः' (ऋ० ७.१०४.२१)॥

(७) त्वः, (८) नेमः–इत्यर्द्धस्य। अर्द्धशब्दोऽत्र सम्प्रविभागवचनः, अर्द्धं हरतेः (निरु० ३.२०) इति नपुंसकनिर्देशात्। त्वः–अपगतः, अपेत्य समुदायाद् गतः पृथग्भूतः। तनोतेरुपधायाः पूर्व उकारः, यणादेशः, नकारस्य

---

१. वदिति सिद्धोपमा (निरु० ३.१७)। (सु०)।

२. था इति च (निरु० ३.१६)। (सु०)।

३. मृग्यम्। ४. दुर्गोऽपि तथाह।

विसर्जनीय[१] इति स्कन्दस्वामी। तनोतेः 'सर्वनिघृष्वरिष्वलष्व०' (उ० १.१५३) इति वन्प्रत्ययष्टिलोपो निपात्यते॥

नेमशब्दोऽन्ननामसु व्याख्यातः (निघ० २.७.२०)। सर्वादिरयम्। समुदायादवनीतः पृथग्भूत इत्यर्थः। 'पीयति त्वो अनु त्वो गृणाति' (ऋ० १.१४७.२), 'प्र नेमस्मिन् ददृशे सोमो अन्तः' (ऋ० १०.४८.१०)॥

(९) ऋक्षाः, (१०) स्तृभिः–इति नक्षत्राणाम्। 'ऋषी गतौ' (तु० प० ७)। ऋषेः 'स्नुव्रश्चिकृत्यृषिभ्यः कित्' (उ० ३.६६) इति कित् सप्रत्ययः[२]। ऋषिरत्र उदर्थविशिष्टः। उद्गतानि ऊर्ध्वमीरितानीव प्रकाशन्ते। 'स्तृञ् आच्छादने' (क्र्या० उभ० १३)। कर्मण्यौणादिकः क्विप्, बाहुलकात्तुग्[३] न भवति। तीर्णानि प्रसारितानि विस्तीर्णानि च प्रकाशन्ते हि। तस्य पाठो यथादृष्टम्। 'अमी य ऋक्षा निहितास उच्चा' (ऋ० १.२४.१०), 'पश्यन्तो द्यामिव स्तृभिः' (ऋ० ४.७.३)॥

(११) वम्रीभिः, (१२) उपजिह्विका–इति सीमिकानाम्। वम्रशब्दो ह्रस्वनामसु व्याख्यातः (निघ० ३.२.७)। 'जातेरस्त्रीविषयाद०' (अ० ४.१.६३) इति ङीष्। जातिशब्दश्चायं स्त्रीपुंसयोर्दृष्टो लोके स्त्रीलिङ्गो प्रसिद्ध इति स पठितः। वमन्ति हि ता[४] मृदम्[५]। उपजिह्विकाः 'शेवयह्वजिह्वा०' (उ० १.१५४) इति जिघ्रतेर्जिघर्त्तेर्वा वप्रत्ययान्तं निपात्यते जिह्वा, 'सञ्ज्ञायां कन्' (अ० ५.३.८७), 'प्रत्ययस्थात्०' (अ० ७.३.४४) इतीत्वम्। उपजिघ्रन्ति काष्ठम्, उपक्षरणाद्वोदकस्य उपजिह्विकाः। 'यदत्त्युपजिह्विका यद्वम्रो अतिसर्पति' (ऋ० ८.१०२.२१) वम्रशब्दस्यायमेव निगमः, 'वम्रीभिः पुत्रमग्रुवो अदानम्' (ऋ० ४.१९.९) इति स्त्रीलिङ्गस्य॥

(१३) ऊर्दरम्, (१४) कृदरम्–इत्यावपनस्य। ऊर्दरम्–उत्पूर्वाद् 'दॄ विदारणे' (क्र्या० प० २२) इत्यस्माद् 'ईर गतौ' (अदा० आ० ८) इत्यस्माद्वा 'ऋदोरप्' (अ० ३.३.५७), घञि चोद्दरमुदीरं वा सदूर्दरम्। ऊर्ध्वञ्च तद्दीर्णञ्च मध्यतः, ऊर्ध्वमीर्णं गतं वा। दीर्णमिति ल्वादित्वान्निष्ठानत्वम् (अ० ८.२.४४)। कृदरम्–गृहनामसु व्याख्यातम् (निघ० ३.४.२)। कृतदरम्। 'तमूर्दरं न पृणता यवेन' (ऋ० २.१४.११), 'समिद्धोऽअञ्जन् कृदरं मतीनाम्' (मा० सं० २९.१)॥

(१५) रम्भः, (१६) पिनाकम्–इति दण्डस्य। 'रभ राभस्ये' (भ्वा०

---

१. स्कन्दटीकात्र (निरु० ३.२०) नोपलभ्यते।

२. 'इगुपधात् किद् इति किदिनप्रत्ययः' इत्यपपाठो मुद्रितेषु।

३. वस्तुतस्तु दीर्घत्वात् तुगभावः।

४. 'वसन्ति हि ते' इत्यपपाठो मुद्रितेषु।

५. वमन्ति हि ता मृदम्, वल्मीकनिर्माणाय वमनपूर्वकनिर्मितत्वादेव तासां गृहं वम्रीकम्। पश्चाच्च लत्वभावेन वर्णविपर्यासेन च वल्मीकं प्रोच्यते। (सु०)।

आ० ७०१) अत्रालम्भने वर्त्तते। कर्मणि घञ्। 'रभेरशब्लिटोः' (अ० ७.१.६३) इति नुम्। आरभन्त आश्रयन्ते ह्यवष्टम्भाय दण्डम्। 'आ त्वा॑ र॒म्भं न जिव्र॑यः' (ऋ० ८.४५.२०)। पिनाकम्-'पिष सञ्चूर्णने' (रु० प० १५)। 'पिनाकादयश्च' (उ० ४.१६) इति आकप्रत्ययः, षकारस्य नकारो गुणाभावश्च निपात्यते। प्रतिपिनष्टि हिनस्त्यनेन शत्रून्, दण्डाकारं धनुरुच्यते, तच्च रूढितो महादेवीयमेव सामान्येन। 'अव॑ततधन्वा॒ पिना॑कावसः॒ कृत्ति॑वासाः॒' (मा० सं० ३.६१)॥

(१७) मेना, (१८) ग्नाः-इति स्त्रीणाम्। उभावपि शब्दौ व्याख्यातौ वाङ्नामसु (निघ० १.११.१९, १.११.४०)। मानयन्ति हि ताः पतिश्वशुर-मातुलादयः पूज्या भूषयितव्याश्चेति स्मरणात्। गच्छन्त्येना अपत्यार्थिनः। 'अ॒मे॒नांश्चि॒ज्जनि॑वतश्चकर्थ' (ऋ० ५.३१.२), 'ग्नास्त्वा॒कृन्त॑न्न॒प॑सो॒ऽतन्वत॒' (मै० सं० १.९.४)॥

(१९) शेपः, (२०) वैतसः-इति पुंस्प्रजननस्य। शेपः-सपतेरसुनि बाहुलकात् सशब्दस्य शेभावः। स्पृशत्यनेन स्त्रीन्द्रियम्। तद्धेतुतश्च विशिष्टा-नन्दलक्षणं स्त्रीसुखं स्पर्शशब्देनोच्यते। त्वगिन्द्रियस्पर्शमात्रकं शेपमित्युदा-हरणेऽकारान्तत्वेन दर्शनात् करणे घञन्त इति केचित्, सकारलोपो वा तत्र द्रष्टव्यः। यद्यपि 'वृङ्शीभ्यां रूपस्वाङ्गयोः पुट् च' (उ० ४.२०२) इति शीङ असुना प्रत्ययेन[१] कथञ्चिच्छेपः सिध्यति, तथापि तत्रार्थानौचित्याद् 'मुष्कयोरदधात् सपम्' (तै० ब्रा० २.४.६.५), 'मुष्कयोर्निहिता सपः' (तै० ब्रा० २.४.६.६), 'मा नो॑ म॒घेव॑ निष्ष॒पी' (ऋ० १.१०४.५) इत्यादौ सपशब्देन मेहनस्याभिधानादर्थौचित्याच्च सशब्दस्य शेभावेन कथञ्चिन्निर्वोढुं युक्तमिति सपतेरित्युक्तम्। तथा चोक्तम्-'अर्थनित्यः परीक्षेत न संस्कारमाद्रियेत' (निरु० २.१) इति। विपूर्वात् 'तसु उपक्षये' (दि०प० १०२) इत्यस्मात् पचाद्यचि (अ० ३.१.१३४) वितसः। वितस एव वैतसः। प्रज्ञादित्वादण् (अ० ५.४.३८)। विशेषेण तस्यति क्षीणीभवति प्राक् सम्भोगकालात्। यद्वा विमक्षिकमितिवत् विशब्दः प्रतिषेधार्थीयः। न तस्यति अक्षीणं सेक-सामर्थ्यस्यानुपक्षीणत्वात्। 'यस्या॑मु॒शन्तः॑ प्र॒हरा॑म॒ शेप॑म्' (ऋ० १०.८५.३७), 'त्रिः स्म॒ माह्नः॑ श्नथयो वैत॒सेन॒' (ऋ० १०.९५.५)॥

(२१) अया, (२२) एना-इत्युपदेशस्य। प्रत्यक्षाभिधानमिहोप-देशोऽभिमतः। सामान्येन चैते त्रिष्वपि लिङ्गेषु। अनयेति पदस्य नशब्दलोपेन अया। 'अ॒या ते॑ अग्ने स॒मिधा॑ विधेम॒' (ऋ० ४.४.१५) इति स्त्रिया समिधा

---

१. 'असुनागमेन' इत्यपपाठो मुद्रितेषु।

सामानाधिकरण्यात्। एना-'द्वितीयाटौस्स्वेनः' (अ० २.४.३४) इति इदमेतदोरन्वादेशविषय एनादेशः तृतीयैकवचनस्याकारः। 'एना वो अग्निन्नमसा' (ऋ० ७.१६.१) इति नपुंसकस्य मनसः सामानाधिकरण्यात्। 'एना पत्या तन्वं संसृजस्व' (ऋ० १०.८५.२७) इति पुंसः पत्युः सामानाधिकरण्यात्॥

(२३) सिषक्तु, (२४) सचते-इति। सिषक्त्विति कर्त्तुरभिधानम्। तस्य प्रत्ययार्थत्वेन प्राधान्यादत आह सेवमानस्येति। वैयाकरणसिद्धान्तप्रसिद्ध्यर्थमेवमवोचत्, परमार्थतस्तु धात्वर्थप्रतिपादनपरतयैवाख्यातपदोपादानमर्थाभिगमत्वञ्च। अतश्चैतदुक्तं भवति-सिषक्तु सचत इति सेवार्थौ धातू इति। तथाहि-'भावप्रधानमाख्यातम्' (निरु० १.१) इति हि स्वसिद्धान्तः। सिषक्तु सचतेः। 'षच समवाये' भूवादिः स्वरितेत् (७२३), अत्र सेवार्थः। सिषक्त्विति लोटि तिपि शप्। तस्य 'बहुलं छन्दसि' (अ० २.४.७६) इति श्लुः। 'अर्त्तिपिपर्त्योश्च' (अ० ७.४.७७)। 'बहुलं छन्दसि' (अ० ७.४.७८) इत्यभ्यासस्येत्वम्। 'स नः सिषक्तु यस्तुरः' (ऋ० १.१८.२), 'सचस्वा नः स्वस्तये' (ऋ० १.१.९) इति तु यथानिगममुदाहरणम्॥

(२५) भ्यसते, (२६) रेजते-इति। भयवेपनयोर्धातुः भ्यसत इति। रेजत इति नैरुक्तो धातुः। उभावप्युभयोरर्थयोः। 'यस्य शुष्माद्रोदसी अभ्यसेताम्' (ऋ० २.१२.१), 'रेजते अग्ने पृथिवी मखेभ्यः' (ऋ० ६.६६.९) इति॥

इति षड्विंशतिर्द्विशनामानि॥ ३.२९॥

[इति नैघण्टुकटीकापरिशिष्टं समाप्तम्]

—०—

चतुर्थोऽध्यायः

अथ नैगमं नाम द्वितीयं काण्डं व्याख्यायते–

जहा (१)। निधा (२)। शितोम (३)। मेहना (४)। दमूनाः (५)। मूषः (६)। इषिरेण (७)। कुरुतन (८)। जठरे (९)। तितउ (१०)। शिप्रे (११)। मध्या (१२)। मन्दू (१३)। ईर्मान्तासः (१४)। कायमानः (१५)। लोधम् (१६)। शीरम् (१७)। विद्रधे (१८)। द्रुपदे (१९)। तुग्वनि (२०)। नंसन्ते (२१)। नसन्त (२२)। आहनसः (२३)। अद्मसत् (२४)। इष्मिणः (२५)। वाहः (२६)। परितक्म्या (२७)। सुविते (२८)। दयते (२९)। नूचित् (३०)। नूच (३१)। दावने (३२)। अकूपारस्य (३३)। शिशीते (३४)। सुतुकः (३५)। सुप्रायणाः (३६)। अप्रायुवः (३७)। च्यवनः (३८)। रजः (३९)। हरः (४०)। जुहुरे (४१)। व्यन्तः (४२)। क्राणाः (४३)। वाशी (४४)। विषुणः (४५)। जामिः (४६)। पिता (४७)। शंयोः (४८)। अदितिः (४९)। एरिरे (५०)। जसुरिः (५१)। जरते (५२)। मन्दिने (५३)। गौः (५४)। गातुः (५५)। दंसयः (५६)। तूताव (५७)। चयसे (५८)। वियुते (५९)। ऋधक् (६०)। अस्याः (६१)। अस्य (६२)। इति द्विषष्टिः पदानि॥ १ ॥

(१) जहा–हन्तेर्लिडुत्तमैकवचने णलि, द्विवचने, अभ्यासजश्त्वे, घत्वाभावो नकारलोपश्छान्दसत्वात्। जघानेत्यर्थः। 'जहा को अस्मदीषते' (ऋ० ८.४५.३७)॥

(२) निधा–निपूर्वाद्दधातेः 'आतश्चोपसर्गे' (अ० ३.३.१०६) इति

अङ्[1]। निधीयते स्थाप्यते मृगपक्षिग्रहणाय निधा पाशसमूहः। 'मुमुग्ध्य१्स्मान्निधयेव बद्धान्' (ऋ० १०.७३.११)॥

(३) शिताम—श्रितशब्दस्य रेफलोपोऽतो दीर्घत्वं मशब्दश्चोपजनः। अङ्गे श्रितत्वाद् दोः शिताम। सितशब्दस्य वा सकारस्य शकारः, अन्यत् पूर्ववत्। योनिः शिताम। योनिर्गुदम्। विषितः—विविधं सितो बद्धो भवति, पुरीषोत्सर्गवेलायां विकसति, सङ्कोचत्यन्यदा[2]। 'पार्श्वतः श्रोणितः शितामतः' (मा० सं० २१.४३)॥

(४) मेहना—मंहतेर्दानकर्मणो ल्युट्, बाहुलकादकारस्यैकारो नकारलोपश्च। 'सुपां सुलुग्०' (अ० ७.१.३९) इत्यादिना सोराकारादेशः। मंहनीयं धनादि। छन्दोगानां 'म इह ना' इत्येवंरूपं पाठः[3]। प्रसङ्गेन च वेदान्तराधीतस्य व्याख्यानं भाष्यकारेण कृतम् (निरु० ४.४)। 'यदिन्द्र चित्र मेहना' (ऋ० ५.३९.१)॥

(५) दमूनाः—'दम उपशमे दाने वा' (दिवा० प० ९३)। दान्ते पुरुषे वा दमे यज्ञगृहे वा मनो यस्य स दमूनाः। दनिशब्दस्य[4] नलोपः। दमदान्तशब्दयोर्दभावः, मनःशब्दे मकारात् परस्याकारस्य ऊकारादेशः। दमशब्दो व्याख्यातो गृहनामसु (निघ० ३.४.१२)। ददातेर्ल्युटि दानम्, दमेर्निष्ठायां सुपि दान्तम्[5]। 'दमेरूनसिः' (उ० ४.२३६) इति वैयाकरणाः। 'जुष्टो दमूना अतिथिर्दुरोणे' (ऋ० ५.४.५)॥

(६) मूषः—'मुष स्तेये' (क्र्या० प० ६०)। 'क्विब् वचिप्रच्छि०' (द० उ० १०.२) इत्यत्र 'प्राक् प्रत्ययनिर्देशादिष्टसिद्धिः'[6] इति क्विब् दीर्घश्च। जस्। मूषिकाः। सुगुप्तमपि मुष्णन्ति हरन्ति। 'मूषो न शिश्ना व्यदन्ति माध्यः' (ऋ० १.१०५.८)॥

(७) इषिरेण—'इषु इच्छायाम्' (तु० प० ६१)। 'इषिमदिमुदि०' (उ० १.५१) इत्यादिना किरच्प्रत्ययः। यद्वा ईषतेर्गतिकर्मण ऋषेर्दर्शनार्थस्य वा बाहुलकात् किरच् इषभावश्च। मनोविशेषणमेतत्। 'इषिरेण ते मनसा सुतस्य' (ऋ० ८.४८.७)॥

---

१. 'कः' इति मुद्रितेषु।
२. देवराजः स्कन्दटीकाम् अनुवदत इति तामाश्रित्यात्र बहुकृत्वः शोधः। प्रकृते 'सङ्कोचः' इति पाठो मुद्रितेषु।
३. गार्ग्यकृतः पदपाठः।
४. 'दन्तमशब्दस्य' इति मुद्रितेषु।
५. 'मतुपि दन्तमः' इति मुद्रितेषु।
६. द्र०—माणिक्यदेववृत्तिः।

(८) कुरुतन–करोतेर्लोण्मध्यमपुरुषबहुवचनस्य तशब्दस्य 'तप्तनप्तनथनाश्च' (अ० ७.१.४५) इति छान्दसस्तनादेशः। तत्र तशब्द एवार्थवान् नशब्दस्तूपजनोऽनर्थकः। कुरुतनेत्यस्य प्रतिपादनार्थमाह भाष्यकारः–'कर्त्तन हन्तन यातनेत्यनर्थका उपजना भवन्ति' (निरु० ४.७) इति। अत्र बहुवचनमन्येऽप्येवंरूपा उपजनाः सन्तीति प्रतिपादनार्थम्। 'क्त्वो यक्' (अ० ७.१.४७) 'आज्जसेरसुक्' (अ० ७.१.५०) इत्येवमादयः। 'रिप्रेण तपसा कुरुतन'[1], 'अध्वर्यवः कर्त्तना श्रुष्टिमस्मै' (ऋ० २.१४.९), 'तपिष्ठेन हन्मना हन्तना तम्' (ऋ० ७.५९.८), 'प्रयातन सखीँरच्छा सखायः' (ऋ० १.१६५.१३), 'हत्वाय शत्रून् विभजस्व वेदः' (ऋ० १०.८४.२), 'ब्राह्मणासः पितरः सोम्यासः' (ऋ० ६.७५.१०)॥

(९) जठरम्–जग्धशब्दोपपदाद् धृङो दधातेर्वा 'कृदरादयश्च' (उ० ५.४१) इत्यरल्प्रत्ययो जग्धशब्दस्य जभावो धकारस्य ठकारश्च निपात्यते। जग्धं भक्षितमन्नमस्मिन् ध्रियते तिष्ठति, धीयते प्रक्षिप्यत इत्यर्थः। 'आसिञ्चस्व जठरे मध्व ऊर्मिम्' (ऋ० ३.४७.१)॥

(१०) तितउ–तनोतेस्तुदेश्च निष्ठायां मतुप्यपधाया इत्वं दकारलोपो वकारस्य सम्प्रसारणं तलोपश्च। तिलमात्रं तुन्नं वा। तिलशब्दात् तिः, तुन्नशब्दाद् उकारतकारौ। मत्वर्थे बहुव्रीहिः। ततेन मध्ये तुन्नैश्छिद्रैः, तिलमात्रैश्च तैस्तद्वत्। तनोतेः क्तान्ताद्वतिर्वैयाकरणाः[2]। ततं तितउ[3]। 'सक्तुमिव तितउना पुनन्तः' (ऋ० १०.७१.२)॥

(११) शिप्रे–'सृप्लृ गतौ' (भ्वा० प० ७०९)। 'स्फायितञ्चिवञ्चिशकिक्षिपिक्षुदिसृपितृपि०' (उ० २.१३) इति रक्, बाहुलकात् सृशब्दस्य शिभावः। अन्नं गन्धनं प्रति सृप्ते भवतः। 'विष्यस्व शिप्रे विसृजस्व धेने' (ऋ० १.१०१.१०)॥

(१२) मध्या–मध्यशब्दात् सप्तम्येकवचनस्य 'सुपां सुलुक्०' (अ० ७.१.३९) इत्यादिना आकारः। मध्ये इत्यर्थः। 'मध्या कर्त्तोर्विततं संजभार' (ऋ० १.११५.४)॥

(१३) मन्दू–मन्देस्तृप्त्यर्थाद् 'भृमृशीङ्तृचरि०' (उ० १.७) इत्यादिना बाहुलकादुप्रत्ययः। मदेर्वा उप्रत्ययो नुम् च। प्रथमाद्विवचनम्। तृतीयैकवचनस्य वा 'सुपां सुलुक्०' (अ० ७.१.३९) इत्यादिना पूर्वसवर्णः। मदिष्णू मदिष्णुना

---

१. मृग्यम्।
२. 'तितउ परिपवनं भवति, ततवद्वा तुन्नवद्वा' इति पस्पशाह्निके महाभाष्यम्। (सु०)।
३. 'तनोतेर्डउः सन्वच्च' (उ० ५.५२)।

वा। 'मन्दू समानवर्चसा' (ऋ० १.६.७)॥

(१४) ईर्मान्तासः–'ईर प्रेरणे' (चु० प० २३४)। 'अर्त्तिस्तुसुहुसृधृक्षि०' (उ० १.१४०) इति मन्प्रत्ययः। अन्तशब्दो व्याख्यातः (नि० २.१६.९)। आदित्याश्वा उच्यन्ते। ते च सप्त। तेषां ये अन्तास्ते[1] ईरिताः प्रेरिता विरला इत्यर्थः। अथवा अश्वस्य अन्तो जघनं स येषामीर्मः पृथुरित्यर्थः। 'ईर्मान्तासः सिलिकमध्यमासः' (ऋ० १.१६३.१०)॥

(१५) कायमानः–'चायृ पूजानिशामनयोः' भूवादिः, स्वरितेत् ६२०। चायमानः। चकारस्य ककारः। यद्वा कमेर्णिङ् (अ० ३.१.३०), ततो लटः शानच्। कामयमान इत्यस्य मकारलोपः। 'कायमानो वना त्वम्' (ऋ० ३.९.२)॥

(१६) लोधम्–'लुभ गाध्यें' (दिवा० प० १२५) क्तः। लुब्धशब्दस्य बलोप उकारस्यौत्वञ्च। लुब्धमित्यर्थः। 'लोधं नयन्ति पशु मन्यमानाः' (ऋ० ३.५३.२३)॥

(१७) शीरम्–शीङः 'स्फायितञ्चिवञ्चिशकि०' (उ० २.१३) इत्यादिना बाहुलकाद्रक्। अश्नोतेर्वा पूर्ववद्रक्धातोः शीभावश्च। अयमग्निरुच्यते। अनुशायिनमाशिनं वा। अनुगम्य[2] भूतानि जङ्गमानि जाठरात्मना, स्थावराणि च सूक्ष्मेण अनभिव्यक्तशक्त्यात्मना यः शेते व्यवतिष्ठते, अश्नुते[3] वा। एवंशीलः। 'शीरं पावकशोचिषम्' (ऋ० ३.९.८)॥

(१८) विद्रधे–विपूर्वाद् 'दृभी भये' (चुरा० २४६) इत्यस्माद् अनेकार्थत्वेन हिंसार्थात् क्तः। विदृब्धा[4] इति स्थिते ऋकारस्य रादेशो बकारलोपश्च। बहुवचनस्य स्थान एकवचनम्। विविधं हिंसितेषु कुपितेषु इत्यर्थः। 'कनीनकेव विद्रधे' (ऋ० ४.३२.२३)॥

(१९) द्रुपदे–द्रुशब्दो द्रुमपर्यायः। द्रुममयेषु पदेषु पादुकाख्येषु इत्यर्थः। वचनव्यत्ययः पूर्ववत्। 'नवे द्रुपदे अर्भके' (ऋ० ४.३२.२३)॥

(२०) तुग्वनि–तूर्णशब्दोपपदाद् गमेः 'अन्येभ्योऽपि दृश्यन्ते' (अ० ३.२.७५) इति वनिपि तूर्णशब्दस्य तुभावो गमेष्टिलोपश्च। तुग्व तीर्थमित्यर्थः[5]। तद् विपानायावगाहनाय वा क्षिप्रमागच्छन्ति। सप्तम्येकवचनम्। 'सुवास्त्वा अधि तुग्वनि' (ऋ० ८.१९.३७)॥

---

१. 'अन्तान् ईर्त्ते' इति मुद्रितेषु।
२. 'अनुगम्यन्ते' इत्यपपाठो मुद्रितेषु।
३. 'अश्नोति' इत्यपपाठो मद्रितेषु।
४. णिजभावपक्षे।
५. 'लुठतीत्यर्थः' इत्यपपाठो मुद्रितेषु।

(२१) नंसन्ते–नमेर्मकारात् परः सुगागमः, व्यत्ययेनात्मनेपदम्। नमन्ति इत्यर्थः 'कुविन्नंसन्ते मरुतः पुनर्नः' (ऋ० ७.५८.५)॥

(२२) नसन्त–'णस कौटिल्ये' भूवादिरात्मनेपदी (४१७), अत्राप्नोतेर्नमतेर्वार्थे वर्त्तते। 'छन्दसि लुङ्लङ्लिटः' (अ० ३.४.६) इति वर्त्तमाने लङ्। 'बहुलं छन्दस्यमाङ्योगेऽपि' (अ० ६.४.७५) इत्यडभावः। प्राप्नुवन्ति नमन्ति वा। 'घृतस्य धाराः समिधो नसन्त' (ऋ० ४.५८.८)॥

(२३) आहनसः–आहन्तेरसुन्, मत्वर्थीयस्य लुक्। 'सूत्र इदमाहतम्' 'ब्राह्मणा इदमाहतम्' इत्यादिप्रयोगदर्शनाद् आहन्तिर्वचनार्थः। आहननवन्तो वचनवन्त इत्यर्थः। 'ये ते मदा आहनसो विहायसः' (ऋ० ९.७५.५)॥

(२४) अद्मसत्–अदेः 'मनिन्' (द० उ० ६.७३, श्वेत० ५८१) इति मनिन्। अद्यत इत्यद्म अन्नम्। तस्मिन् सीदति सनोति वा तत्। अद्मन्युपपदे सदेः सनोतेर्वा 'अन्येभ्योऽपि दृश्यन्ते' (अ० ३.२.७५), 'क्विप् च' (अ० ३.२.७६) इति क्विपि रूपम्। सनोतेर्नकारलोपे ह्रस्वत्वे पिति तुक्। 'अद्मसन्न ससतो बोधयन्ती' (ऋ० १.१२४.४)॥

(२५) इष्मिणः–इषेरिच्छार्थाद् (तु० प० ६१) 'इषियुधीन्धि०' (उ० १.१४५) इति मक्प्रत्ययः। ईषतेर्ऋषतेर्वा बाहुलकाद् मकिधातोरिष्भावः। इच्छा, गमनम्, दर्शनं वा इष्म। 'अत इनिठनौ' (अ० ५.२.११५)। यद्वा औणादिको मिन्प्रत्ययः। एषितारो हविषां स्तुतीनाञ्च, गन्तारः, द्रष्टारो वा सर्वार्थानाम्। 'ते वाशीमन्त इष्मिणो अभीरवः' (ऋ० १.८७.६)॥

(२६) वाहः–वहतेः 'वहश्च'[1] इति णिदसुन्। देवताः प्रत्युह्यमानत्वाद् वाहः स्तुतिः[2]। अथवा यदेतत् कूपसमीपे तदुदकस्योद्धृतस्य स्थानमावाह[3] इति लोके प्रसिद्धम्, तत्सदृशत्वात् सोमरसस्य पूर्णमधिषवणं चर्म वाह इत्युच्यते। 'इन्द्राय वाहः कृणवाव जुष्टम्' (ऋ० ३.५३.३)॥

(२७) परितक्म्या–परिपूर्वात् तकतेर्गतिकर्मणो मनिन्। परितः सर्वतो गच्छति, सर्वस्मिन् देशे रात्रिरस्ति। अथवा तक्मोष्णं तत् परित उभयत एनां परिगृह्यते वर्त्तत इति। तदुक्तम्। 'तक्मेत्युष्णनाम, तकत इति सतः' (निरु० ११.२५) इति। तेन परितक्मा सति यकारोपजनेन परितक्म्या। 'कास्मेहितिः का परितक्म्यासीत्' (ऋ० १०.१०८.१)॥

---

१. मृग्यम्।

२. देवता वाहः प्रत्युह्यमानत्वात्। अत्र तु स्तुतिरुच्यत इत्यभिप्रायः। तथैवाग्रेऽपि।

३. 'निपानमाहावः' (अ० ३.३.७४) इति व्याकरणे।

(२८) सुविते–सुपूर्वादितेः क्तप्रत्ययः। 'षूङ् प्राणिगर्भविमोचने' (अदा० आ० २४) इत्यस्माद्वा क्ते छान्दसत्वादिडागमः, उवङ्[1] च। सप्तम्येकवचनम्। शोभनं गम्यते यत्र स्वर्गादौ तत्, प्रसूते प्रजायां वा। 'सुविते मा धाः' (मै० सं० १.२.७)॥

(२९) दयते–'दय दानगतिरक्षणहिंसादानेषु' (भ्वा० आ० ३२२) अनेकार्थत्वाद् विभागदहनगमनेष्वपि वर्त्तते। 'महो धनानि दयमानः' (ऋ० १.१३०.७) इति दाने। 'नवेन पूर्वं दयमानाः स्याम' (मै० सं० ४.१३.८) इति रक्षणे। 'य एक इद्विदयते' (ऋ० १.८४.७) इति दाने विभागे वा। 'दुर्वर्त्तुर्भीमो दयते वनानि' (ऋ० ६.६.५) इति दहने। 'विदद्वसुर्दयमानो वि शत्रून्' (ऋ० ३.३४.१) इति हिंसायाम्। 'मां वायसो दोषा दयमानो अबूबुधत्' (निरु० ४.१७) इति गतिकर्मा॥

(३०) नूचित्, (३१) नूच–अनयोः पदद्वययोः[2]। 'अद्या चिन्नू चित्तदपो नदीनाम्' (ऋ० ६.३०.३), 'नू च पुरा च सदनं रयीणाम्' (ऋ० १.९६.७)॥

(३२) दावने–ददातेः 'आतो मनिन्क्वनिब्वनिपश्च' (अ० ३.२.७४) इति व्यत्ययेन कर्मणि वनिप्। ततः षष्ठ्यर्थे द्वितीयार्थे वा चतुर्थी (अ० २.३.६२ वा०), अल्लोपाभावश्छान्दसः (अ० ६.४.१३४)। देवस्य देवं वेत्यर्थः॥

(३३) अकूपारस्य–'पृ पालनपूरणयोः' (जु० प० ४)। घञ्। पारः पालनं पूरणं वा। अकुत्सितं पालनं पूरणं वा यस्य, तदकुपारं सत् कोर्दीर्घत्वेनाकूपारम्। तस्य दावन इति सम्बन्धः। 'अकूपारस्य दावने' (ऋ० ५.३९.२)। आदित्यसमुद्रावप्यकूपारौ। पूर्ववत्। कच्छपोऽप्यकूपारः। कूपशब्दे कर्मण्युपपद अर्त्तेः 'कर्मण्यण्' (अ० ३.२.१)। न कूपारः, अकूपारः। कच्छपो हि सति सम्भवे ह्रदं गच्छति न कूपमल्पोदकत्वात्। त्रयाणां निगमाः पर्य्येष्याः॥

(३४) शिशीते–'शो तनूकरणे' दिवादिः परस्मैपदी (३६)। व्यत्ययेन शपः श्लौ ओकारस्येत्वमात्मनेपदञ्च। श्यतीत्यर्थः। 'शिशीते शृङ्गे रक्षसे विनिक्षे' (ऋ० ५.२.९)॥

(३५) सुतुकः–सुपूर्वात्तकतेर्गतिकर्मणः 'गेहे कः' (अ० ३.१.१४४) इति बाहुलकात् कप्रत्ययोऽकारस्योकारश्च। सुपूर्वाद्वा तुच्छब्दस्याकार उपजनः,

---

१. पूर्वस्यां व्युत्पत्तौ।

२. नू इति निपातः पुराणनवयोरर्थयोर्वर्तत इति शेषः।

चकारस्य जकारस्य वा ककारभावश्च। सुगमनः सुप्रजा वा। 'अग्निः सुतुकः सुतुकेभिरश्वैः' (ऋ० १०.३.७)॥

(३६) सुप्रायणाः—सुप्रपूर्वाद्दयतेर्ल्युट्। 'उपसर्गस्यायतौ' (अ० ८.२.१९) इति लत्वाभावश्छान्दसः। सुप्रगमना इत्यर्थः। 'सुप्रायणाऽअस्मिन् यज्ञे विश्रयन्तामृतावृधः' (मा० सं० २८.५)॥

(३७) अप्रायुवः—प्र-आ-इत्युपसर्गद्वयपूर्वाद् 'यु मिश्रणे' (अदा० प० २६) इत्यस्माद् 'गेहे कः' (अ० ३.१.१४४) इति बाहुलकात् कप्रत्ययः, उवङि कृतेऽन्त्यस्याकारस्य लोपे च जसि रूपम्। [अथवा] 'सुपां सुलुक्०' (अ० ७.१.३९) इति जसः स्थाने सुः[1]। न प्रायुवोऽप्रायुवः। अप्रगतमनस्काः, न प्रमाद्यन्त इति। 'अप्रायुवो रक्षितारो दिवेदिवे' (ऋ० १.८९.१)॥

(३८) च्यवानः—अन्तर्णीतण्यर्थात् च्यवतेः 'युज् बहुलम्' (उ० २.७९) इति युचि पूर्वत्र[2] बाहुलकाद्दीर्घः। देवान् प्रति स्तोमानां च्यावयिता गमयिता स्तोतेत्यर्थः। रूढित्वादतिप्रसङ्गनिवृत्तिः। 'युवं च्यवानं सनयं यथा रथम्' (ऋ० १०.३९.४)। च्यवनस्य तु 'च्यवनो भार्गवः शार्यातं मानवमभिषिषेच' (ऐ० ब्रा० ८.२१) 'अप्रवानवच् च्यवनवद् भृगुवत्'[3] इत्यादिर्निगमः प्रसिद्धः॥

(३९) रजः—व्याख्यातं द्यावापृथिवीनामसु (निघ० ३.३०.८)॥

(४०) हरः—ज्वलन्नामसु (निघ० १.१७.९) व्याख्यातम्। रजस्तु ज्योतिरुदकलोकासृगृदिनवाचकम्। अनुरञ्जयति ह्येतत् सर्वं स्वेन स्वेन व्यापारेण सर्वप्राणिनः। 'या तेऽअग्ने रजःशया' (मा० सं० ५.८), 'भुवो यज्ञस्य रजसश्च नेता' (ऋ० १०.८.६), 'त्वया दृळ्हानि सुक्रतो रजांसि' (ऋ० ६.३०.३), 'त्रिरात्रेण रजस्वला शुचिर्भवति'[3], 'विवर्त्तेते रजसी वेद्याभिः' (ऋ० ६.९.१) इति क्रमेण निगमाः। हरो ज्योतिरुदकलोकवाचकम्। ज्योतिर्हरति तमः, उदकं वहद् हरति सर्वम्, लोकेषु ह्रियन्ते सर्वाणि, त एव वा कालेन मृत्युनाह्रियन्ते। 'प्रत्यग्ने हरसा हरः शृणीहि' (ऋ० १०.८७.२५) इति ज्योतिषाम्। उदकलोकवाचिनिगमौ पर्येष्यौ॥

(४१) जुहुरे—जुहोतेः 'छन्दसि लुङ्लङ्लिटः' (३.४.६) इति लिट्, 'इरयो रे' (अ० ६.४.७६) इति रे, जुह्वति। यद्वा यथाप्राप्तो लिट्। जुह्विरे

---

१. अस्मिन् पक्षे अकारलोपाभावः।

२. अनस्य पूर्वाकारस्येत्यर्थः।

३. मृग्यम्।

हुतवन्तः। 'जुहुरे वि चितयन्तः' (ऋ० ५.१९.२)॥

(४२) व्यन्तः—व्यन्त इत्येषोऽनेककर्मा (निरु० ४.१९)। व्यन्त इत्यत्र य एष धातुः स दयतिवदनेकार्थ इत्यर्थः। 'वी गतिव्याप्तिप्रजनकान्त्यसनखादनेषु' (अदा० प० ४१)। अनेकार्थत्वात् पश्यत्यर्थोऽपि॥

(४३) क्राणाः—करोतेर्लटः शानचि विकरणव्यत्ययेन लुक्। 'गोभिः क्राणा अनूषत' (निरु० ४.१९)॥

(४४) वाशी—व्याख्यातं वाङ्नामसु (निघ० १.११.११)। यद्वा वासीशब्दश्छेदनद्रव्यविशेषवचनः, तस्य सकारस्य शकारेण व्युत्पत्तिः। 'वाशीभिस्तक्षताश्मन्मयीभिः' (ऋ० १०.१०१.१०)॥

(४५) विषुणः—विषमशब्दस्याकारस्योकारो मकारस्य णकारश्च। विषमः। 'स शर्धदुर्यो विषुणस्य जन्तोः' (ऋ० ७.२१.५)॥

(४६) जामिः—व्याख्यातमङ्गुलिनामसु (निघ० २.५.१४)। अतिरेकवालिशसमानजातीयानां वाचको जामिशब्दः। अतिरेकः पुनरुक्तमुच्यते, पुनर्जायमानत्वात्। 'जामि वा एतद् यज्ञे क्रियते' (ऐ० ब्रा० ३.४७)। वालिशो मूर्खः। स हि न कस्मैचित् पुरुषार्थायालम्। अत्र निगमः पर्येष्यः। समानजातीयो भगिनीलक्षणोऽर्थः, समानाभ्यां मातापितृभ्यां जातत्वात्। जाशब्देनैवाभिधातुं शक्यमिति मिशब्द उपजनः। 'यत्र जामयः कृणवन्नजामि' (ऋ० १०.१०.१०)॥

(४७) पिता—'नप्तृनेष्टृत्वष्टृहोतृपोतृभ्रातृजामातृमातृपितृदुहितृ' (उ० २.९७) इत्यादिना पातेः केवलकात् ण्यन्ताद्वा तृच्प्रत्ययान्तो निपात्यते। पतिशब्दत्वेन च नामार्थो व्याख्यातः (निघ० २.२२.३)। 'द्यौर्मे पिता जनिता नाभिरत्र' (ऋ० १.१६४.३३)॥

(४८) शंयोः—शाम्यतेः क्विप् शम्। 'यु पृथग्भावे' (अदा० प० २६) इत्यस्माद् विच्। अन्ये पदद्वयमिति वर्णयन्ति। 'शमनं रोगाणां यावनं च भयानाम्' (निरु० ४.२१)। 'अथा नः शंयोररपो दधात' (ऋ० १०.१५.४)। प्रसङ्गेन श्रुतिसारूप्याद् भाष्ये 'अथापि शंयुर्बार्हस्पत्यः'[१] (निरु० ४.२१) इत्युक्तम्॥

(४९) अदितिः—पृथिवीनामसु व्याख्यातम् (निघ० १.१.१४)। ऐतिहासिकानां मते देवमाता, नैरुक्तानां मते अदीनादिगुणः। अध्यात्मपक्षे प्रकृतिः। 'अदितिर्द्यौरदितिरन्तरिक्षम्' (ऋ० १.८९.१०)॥

---

१. तु०—शत० ब्रा० १.९.१.२४।

(५०) एरिरे–प्रोपसर्गार्थवृत्त्याङ्पूर्वाद् 'ईर गतौ' (अदा० आ० ८) इत्यस्माल्लिटि झस्येरेच्। प्रेरितवन्त इत्यर्थः। 'यमैरिरे भृगवो विश्ववेदसम्' (ऋ० १.१४३.४)॥

(५१) जसुरिः–'जसु ताडने' (चु० प० १८७)। 'जसिसहोरुरिन्' (उ० २.७४) इत्युरिन्प्रत्ययः। यद्वा अस्यतेर्बाहुलकादुरिन्प्रत्यये जुडागमश्च धातोः। ताडितो बद्धमुक्तो हतवेगः श्रान्तो जसुरिः। 'नीचायमानं जसुरिं न श्येनम्' (ऋ० ४.३८.५)॥

(५२) जरते–नैरुक्तधातुः। यद्वा 'गॄ स्तुतौ' (क्र्या० प० २९) इत्यस्य गकारस्य जकार[1] इति स्कन्दस्वामी। 'इन्धान एनं जरते स्वाधीः' (ऋ० १०.४५.१)॥

(५३) मन्दिने–मन्दतेः स्तुतिकर्मणो घञि मन्दः स्तुतिः तद्वान् मन्दी, छान्दसत्वात्। 'अत इनिठनौ' (अ० ५.२.११५)। नेष्यते हि–'एकाक्षरात् कृतो जातेः, ससम्याञ्च [न तौ स्मृतौ[2] इति]'। 'प्र मन्दिने पितुमदर्चता वचः' (ऋ० १.१०१.१)॥

(५४) गौः–व्याख्यातं रश्मिनामसु (निघ० १.५.४)। 'अत्राह गोरमन्वत' (ऋ० १.८४.१५)॥

(५५) गातुः–व्याख्यातं पृथिवीनामसु (निघ० १.१.२०)। अत्र भावे तुन् गमनमित्यर्थः। 'गातुंयज्ञाय गातुंयज्ञपतये' (मै० सं० ४.१३.१०)॥

(५६) दंसयः–दंस इति कर्मनामसु व्याख्यातम् (निघ० २.१.३)। अत्र तु 'अच इः' (उ० ४.१४०)। जस्। दंसयः कर्माणि, दंसयन्त्येनानि। 'कुत्साय मन्मन्नह्यश्च दंसयः' (ऋ० १०.१३८.१)॥

(५७) तूताव–तवतेर्वृद्धिकर्मणो लिटि णलि 'तुजादीनां दीर्घोऽभ्यासस्य' (अ० ६.१.७)। 'स तूताव नैनमश्नोत्यंहतिः' (ऋ० १.९४.२)॥

(५८) चयसे–'चय गतौ' भूवादिरात्मनेपदी (३२०)। अत्र चातयतेर्नाशनार्थस्यार्थे वर्त्तते। यद्वा चातयतेरेव विकृतं रूपम्। 'बृहस्पते चयस इत् पियारुम्' (ऋ० १.१९०.५)॥

(५९) वियुते–यौतिरेव पृथग्भावार्थो विपूर्वः। 'समान्या वियुते दूरेअन्ते' (ऋ० ३.५४.७)॥

(६०) ऋधक्–अव्ययमिदं पृथग्भावस्य वाचकम्। 'यदिन्द्र दिवि पार्ये यदृधक्' (ऋ० ६.४०.५)। अथाप्यृध्नोत्यर्थे दृश्यते, तदा 'ऋधु वृद्धौ'

---

१. स्कन्दटीका (निरु० ४.२४)। २. महाभाष्यम् (५.२.११५)।

(स्वा० प० २४) अस्मात् 'प्रथेः कित्०' (उ० १.१३७) इति बाहुलकादजि-प्रत्ययः किच्च। ऋध्नुवन् ऋद्धं कुर्वन्। 'ऋधंगयाड् ऋधंगुताशमिष्ठाः' (तै० सं० १.४.४४.२)॥

(६१) अस्याः, (६२) अस्य—शब्दान्तरेणानादिष्टस्य सन्निधिविशिष्ट-पदार्थलक्षणस्याभिधेयस्योच्चारणं प्रथममादेशः। आदिष्टतमस्य तस्योच्चारण-मन्वादेशः। तत्र प्रथमादेशविषयत्वादुदात्तं पदद्वयं तीव्रार्थतरमतिस्फुटप्रयोजनम्, अन्यानादिष्टस्वार्थत्वात्। अन्वादेशविषयतामत्त्वादनुदात्तं पदद्वयमल्पीयोऽर्थतर-मतिशयेनास्फुटप्रयोजनम्, अन्यादिष्टस्वार्थत्वात्। 'अस्या ऊ षु ण उप सातये भुवः' (ऋ० १.१३८.४), 'दीर्घायुरस्या यः पतिः' (ऋ० १०.८५.३९)। 'अस्य वामस्य पलितस्य होतुः', 'तृतीयो भ्राता घृतपृष्ठो अस्य' (ऋ० १.१६४.१)॥

इति द्विषष्टिः पदानि॥ १॥

सस्निम् (१)। वाहिष्ठः (२)। दूतः (३)। वावशानः (४)। वार्य्यम् (५)। अन्धः (६)। असश्चन्ती (७)। वनुष्यति (८)। तरुष्यति (९)। भन्दनाः (१०)। आहनः (११)। नदः (१२)। सोमो अक्षाः (१३)। श्वात्रम् (१४)। ऊतिः (१५)। हासमाने (१६)। पड्भिः (१७)। ससम् (१८)। द्विता (१९)। व्राः (२०)। वराहः (२१)। स्वसराणि (२२)। शर्य्याः (२३)। अर्कः (२४)। पविः (२५)। वक्षः (२६)। धन्व (२७)। सिनम् (२८)। इत्था (२९)। सचा (३०)। चित् (३१)। आ (३२)। द्युम्नम् (३३)। पवित्रम् (३४)। तोदः (३५)। स्वञ्चाः (३६)। शिपिविष्टः (३७)। विष्णुः (३८)। आघृणिः (३९)। पृथुज्रयाः (४०)। अथर्युम् (४१)। काणुका (४२)। अध्रिगुः (४३)। आङ्गूषः (४४)। आपान्तमन्युः (४५)। श्मशा (४६)। उर्वशी (४७)। वयुनम् (४८)। वाजपस्त्यम् (४९)। वाजगन्ध्यम् (५०)। गध्यम् (५१)। गधिता (५२)। कौरयाणः (५३)। तौरयाणः

(५४)। अह्रयाणः (५५)। हरयाणः (५६)। आरितः (५७)। व्रन्दी (५८)। निष्षपी (५९)। तूर्णाशम् (६०)। क्षुम्पम् (६१)। निचुम्पुणः (६२)। पदिम् (६३)। पादुः (६४)। वृकः (६५)। जोषवाकम् (६६)। कृत्तिः (६७)। श्वघ्नी (६८)। समस्य (६९)। कुटस्य (७०)। चर्षणिः (७१)। शम्बः (७२)। केपयः (७३)। तूतुमाकृषे (७४)। अंसत्रम् (७५)। काकुदम् (७६)। बीरिटे (७७)। अच्छ (७८)। परि (७९)। ईम् (८०)। सीम् (८१)। एनम् (८२)। एनाम् (८३)। सृणिः (८४)। इति चतुरुत्तरमशीतिः पदानि॥ २॥

(१) सस्निम्–'ष्णै वेष्टने' (भ्वा० प० ६५७), 'ष्णा शौचे' (अदा० प० ४५)। 'आदृगमहनजनः किकिनौ लिट् च' (अ० ३.२.१७१) इति किन्प्रत्ययः। लिड्वद्भावाद् द्विर्वचनादिः। 'आतो लोप इटि च' (अ० ६.४.६४)। अववेष्टयितादभिरन्तःप्रविष्टाभिः शोचितो[1] वा मेघः सस्निः। 'सस्निमविन्दच्चरणे नदीनाम्' (ऋ० १०.१३९.६)॥

(२) वाहिष्ठः–वोढृशब्दात् 'तुश्छन्दसि' (अ० ५.३.५९) इतीष्ठनि 'तुरिष्ठेमेयःसु' (अ० ६.४.१५४) इति तृचो लोपः। वाहिष्ठ इति उपधादीर्घश्छान्दसः। अतिशयेन वोढा वाहिष्ठः। 'वाहिष्ठो वां हवानाम्' (ऋ० ८.२६.१६)॥

(३) दूतः॥ (४) वावशानः–'वश कान्तौ' (अदा० प० ७२), 'वाशृ शब्दे' (दि० आ० ५२)। 'लिटः कानज् वा' (अ० ३.२.१०६)। द्विर्वचनादिः। 'तुजादीनां दीर्घोऽभ्यासस्य' (अ० ६.१.७)। 'न वशः' (अ० ६.१.२०) इति यङि ङिति[2] सम्प्रसारणनिषेधाद् भिन्नप्रत्यये[3] कानच्यपि [सम्प्रसारणं] न भवति। वाश्यतेरुपधाह्रस्वत्वञ्च व्यत्ययेनैव। यङ्लुकि शानचि रूपमिति[4] श्रीनिवासः। 'सप्त स्वसृररुषीर्वावशानः' (ऋ० १०.५.५)॥

(५) वार्यम्–'वृञ् वरणे' (स्वा० उभ० ८)। 'एतिस्तुशास्वृदृजुषः

---

१. 'अववेष्टयिताभिरन्तःप्रविष्टाभिः शोषितः' इति मुद्रितेषु।

२. 'लिटि' इति मुद्रितेषु।

३. 'विन्प्रत्यये' इति कोशेषु। अस्य वाक्यस्य पाठः प्रायेण भ्रष्टः। ४. मृग्यम्।

क्यप्' (अ० ३.१.१०९) इति क्यपि प्राप्ते 'कृत्यल्युटो बहुलम्' (अ० ३.३.११३) इति ण्यत्। 'क्यब्विधौ वृग्रहणे वृञो ग्रहणमिष्यते न वृङः'[1] इति वैयाकरणाः। अथवावश्यकार्थो ण्यत्प्रत्ययो द्रष्टव्यः। वार्यं वरणीयम्, अतिशयेन वरं श्रेष्ठं वा। 'तद् वार्यं वृणीमहे' (ऋ० ८.२५.१३)॥

(६) अन्धः–व्याख्यातमन्ननामसु (निघ० २.७.१)। 'आमत्रेभिः सिञ्चता मद्यमन्धः' (ऋ० २.१४.१)॥ तमोऽचक्षुष्वप्यन्धः। अत्र ध्यायतिर्नञ्पूर्वः, अविद्यमानं ध्यानं दर्शनमस्मिन् आलोकाभावात्। चक्षुर्हीने अकारान्तमिदम्। 'पश्यदक्षण्वान्न विचेतदन्धः' (ऋ० १.१६४.१६) इति चक्षुर्हीनस्य॥

(७) असश्चन्ती–सश्चतिर्गतिकर्मा, अत्र सश्चतिरस्यतेर्वार्थे वर्त्तते। शतरि ङीपा नञ्समासः। परस्परेणासम्मिश्रीभवन्त्यौ। अविक्षिपन्त्यावाश्रितान् वा द्यावापृथिव्या उच्येते। 'असश्चन्ती भूरिधारे पयस्वती' (ऋ० ६.७०.२)॥

(८) वनुष्यति–व्याख्यातं क्रुध्यतिनामसु (निघ० २.१२.८)। अत्र तु हन्त्यर्थः। 'वनुयाम वनुष्यतः' (ऋ० १.१३२.१)॥

(९) तरुष्यति–नैरुक्तधातुर्गत्यर्थः[2]। 'मृत्युं तरति' 'ब्रह्महत्यामुत्तरति'–विनाशयति व्यपोहतीति हन्त्यर्थे तरतेः प्रयोगदर्शनात् तरतेरुकारषकारावुपजनावित्याहुः[3]। 'इन्द्रेण युजा तरुषेम वृत्रम्' (ऋ० ७.४८.२)॥

(१०) भन्दनाः–भदन्तेः स्तुतिकर्मणः 'युज् बहुलम्' (उ० २.७९) इति युच्, टाप्, शस्। भन्दना स्तुतिरित्यर्थः। 'स भन्दना उदियर्त्ति प्रजावतीः' (ऋ० ९.८६.४१)॥

(११) आहनः–आहन्तेरसुनि आहन्ति आहनाः, सम्बुद्धौ आहनः। असह्यवचनादाहन्तुः। 'अन्येन मदाहनो याहि तूयम्' (ऋ० १०.१०.८)॥

(१२) नदः–व्याख्यातं स्तोतृनामसु (निघ० ३.१६.४)। 'नदस्य मा रुधतः काम आगन्' (ऋ० १.१७९.४)॥

(१३) सोमो अक्षाः–अश्नोतेर्लुङि सिचि 'ऊदितो वा' (अ० ७.२.४४) इति अनिट्पक्ष आडागमे च आष्टेति, इट्पक्ष आशिष्टेति प्राप्ते व्यत्ययेन तस्य स्थाने सिपि षस्य कादेश आकार इतश्चविसर्जनीयौ[4]। क्षियतेर्वा अक्षैषीदिति प्राप्ते व्यत्ययेन वर्तमाने लुङ्, तिपः स्थाने सिप्, च्लेरङ्

---

१. काशिका (अ० ३.१.१०९)। २. निरु० ५.२।

३. द्र०–स्कन्दटीका (निरु० ५.२)।

४. सिप इकारस्य 'इतश्च' (३.४.१००) इति लोपः सकारस्य च विसर्जनीय इत्यर्थः।

धातोष्टिलोपः, दीर्घश्च, इतश्चविसर्जनीयौ[१]। क्षियतीत्यर्थः। 'अनूपे गोमान् गोभिरक्षाः' (ऋ० ९.१०७.९)। 'क्षर सञ्चलने' (भ्वा० प० ५९०) अक्षारी-दिति प्राप्ते तिपि सिचि वृद्धौ 'बहुलञ्छन्दसि' (अ० ७.३.९६) इतीडभावे इतश्च लोपे संयोगान्तस्य लोपे 'रात्सस्य' (अ० ८.२.२४) इति सलोपे रेफस्य विसर्जनीयः, अडागमः। क्षरतीत्यर्थः। 'सोमो दुग्धाभिरक्षाः' (ऋ० ९.१०७.९)। 'सर्वे क्षियतिनिगमाः' इति शाकपूणिर्निराह[२]॥

(१४) **श्वात्रम्**–व्याख्यातं धननामसु (निघ० २.१०.६)। इह क्षिप्रनाम। 'श्वात्रमग्निरकृणोज्जातवेदाः' (ऋ० १०.८८.४)॥

(१५) **ऊतिः**–अवतेः 'ऊतियूतिजूतिसातिहेति०' (अ० ३.३.९७) क्तिन्नुदात्तो निपात्यते। 'ज्वरत्वर०' (अ० ६.४.२०) इत्यूठ्। अत्रावनं रक्षणं तर्पणं वा। 'आ त्वा रथं यथोतये' (ऋ० ८.६८.१)॥

(१६) **हासमाने**–हासतिः स्पर्द्धायां हर्षणे वा वर्त्तते। स्पर्द्धमानौ परस्परं हृष्यन्तौ वा। 'अश्वे इव विषिते हासमाने' (ऋ० ३.३३.१)॥

(१७) **पड्भिः**–पिबतेः स्पाशयतेर्वा बन्धनार्थात् स्पृशतेर्वा 'सर्त्तेरटिः' (उ० १.१३४) इति बाहुलकादटिप्रत्ययो धातूनां पकारभावश्च। पानैः सोमस्य[३]। यद्वा स्पाशनैर्बन्धनैः स्पर्शनैः स्तुतिलक्षणैर्गुणानाम्। 'वम्रकः पड्भिरुपसर्पदिन्द्रम्' (ऋ० १०.९९.१२)॥

(१८) **ससम्**–'षस स्वप्ने' (अदा० प० ७१)। पचाद्यच् (अ० ३.१.१३४)। स्वपितीति ससम्, माध्यमिकं ज्योतिरुच्यते, वर्षाव्यतिरिक्तकालेऽ-दर्शनात् स्वापव्यपदेशः। 'ससं न पक्वमविदच्छुचन्तम्' (ऋ० १०.७९.३)॥

(१९) **द्विता**–द्विशब्दात् 'सङ्ख्याया विधार्थे धा' (अ० ५.३.४२)। धकारस्य तकारेण व्युत्पत्तिः। द्विधेत्यर्थः। 'द्विता च सत्ता स्वधया च शम्भुः' (ऋ० ३.१७.५)॥

(२०) **व्राः**–'वृञ् वरणे' (स्वा० उभ० ८)। 'गेहे कः' (अ० ३.१.१४४) इति बाहुलकात् कः, यणादेशः, जस्। वरितारोऽन्वेष्टारो मृगादी-नाम्। व्रात्यस्थानीया लुब्धकादयः। 'मृगं न व्रा मृगयन्ते' (ऋ० ८.२.६)॥

(२१) **वराहः**–व्याख्यातो मेघनामसु (निघ० १.१०.१३)। निगमोऽपि तत्रैव दर्शितः॥

---

१. सिप इकारस्य 'इतश्च' (३.४.१००) इति लोपः सकारस्य च विसर्जनीय इत्यर्थः।

२. 'शाकपूणिर्निवाह उक्तः' इति मुद्रितेषु।

३. सायणमहीधरौ तु सर्वत्र 'पड्भिः पादैः' इत्येवं व्याचक्षाते। (सु०)।

(२२) स्वसराणि–अहर्नामसु व्याख्यातोऽयं शब्दः (निघ० १.९.५) निगमोऽपि तत्रैव दर्शितः॥

(२३) शर्य्याः–अङ्गुलिनामसु व्याख्यातः (निघ० २.५.५)। अत्र इषव उच्यन्ते। 'शर्य्याभिर्न भरमाणो गभस्त्योः' (ऋ० ९.११०.५)॥

(२४) अर्कः–अर्चतेः 'कृदाधारार्चिकलिभ्यः कः' (उ० ३.४०) इति कः। [अर्चन्ति तमिति देवः, तेन वेति मन्त्रः] अर्चति जीवयतीत्यन्नम्[१] इति अन्ये। मृग्यमुदाहरणम्[२]। अत एव केचिन्न पठन्त्यत्र अर्कम्। वृक्षेऽप्यर्चति। 'अर्कपर्णे जुहोति'[३]॥

(२५) पविः–व्याख्यातो वाङ्नामसु (निघ० १.११.१५)। रथनेमिर्यज्ञश्च पविः। 'उत पव्या रथानाम्' (ऋ० ५.५२.९)। यज्ञस्य दर्शितः॥

(२६) वक्षः–वहतेः 'वहेः सुट् च' (स० क०२.१.३२६) इत्यसुन्। अध्यूढं[४] काये, उपरि कायस्य प्राप्तं प्रापितं वेत्यर्थः। उर इत्युच्यते। 'उपो अदर्शि शुन्ध्युवो न वक्षः' (ऋ० १.१२४.४)॥

(२७) धन्व–व्याख्यातमन्तरिक्षनामसु (निघ० १.३.५)। स एव निगमः॥

(२८) सिनम्–व्याख्यातमन्नामसु (निघ० २.७.८)। स एव निगमः॥

(२९) इत्था–इदंशब्दात् 'था हेतौ चच्छन्दसि' (अ० ५.३.२६) इति हेतौ प्रकारवचने च थाल्प्रत्ययः। इतेर्वा[५] थाल् 'प्रत्नपूर्वविश्वेमात्थाल् छन्दसि' (अ० ५.३.१११) इति इवार्थे थाल् विहितो व्यत्ययेन प्रकृतिभूतादिदंशब्दादपि भवति। अनेन हेतुना, अनेन प्रकारेण, अयमिवेति वार्थः। 'इत्था चन्द्रमसो गृहे' (ऋ० १.८४.१५)। 'अमुथा' (निरु० ५.५) इत्यर्थकथनम्। कथमिति निरूपणीयम्, इत्थाविति स्कन्दस्वामिग्रन्थश्च[६] निरूपणीयः॥

(३०) सचा–सहार्थोऽयं निपातः। 'आदित्यै रुद्रैर्वसुभिः सचाभुवा' (ऋ० ८.३५.१)॥

(३१) चित्–निपातो नाम च। निपातोऽनुदात्तः। 'चिदित्येषोऽनेककर्मा'

१. 'जीवयतीत्यत्र मन्त्रम्' इति मुद्रितेषु। २. अन्नार्थकमिति शेषः।
३. मृग्यम्।
४. 'मध्यम्' इति कोशेषु। द्र०–निरु० ४.१६ (स्कन्दटीका च तत्र)।
५. इदम इदादेशः (अ० ५.३.४) निर्दिश्यते। 'एतेर्वा' इति मुद्रितेषु।
६. स्कन्दस्वामिटीकात्र (निरु० ५.५) विपर्यासबहुला दुर्बोधा च।

(निरु० १.४) इत्यादिना व्याख्यातः। 'चतुरश्चिद्ददमानात्' (ऋ० १.४१.९) इत्युपमायाम्। अवकुत्सनादिष्वपि निगमा अन्वेष्याः। नाम तु चिनोतेश्चेतयतेर्वा क्विपि चिदिति भवति। चिता भोगैः क्षीरादिभिः, चिद्रूपा वा सोमक्रयण्युच्यते। 'चिदसि मनासि धीरसि' (मा० सं० ४.१९)॥

(३२) आ–'आ इत्यर्वागर्थे' इत्युपसर्गो व्याख्यातः (निरु० १.३)। 'परा याहि मघवन्ना च याहि' (ऋ० ३.५३.५) इत्युपसर्गस्य। 'जार आ भगम्' (ऋ० १०.११.६) इत्युपमायाः। 'आमेन्यस्य रजसो यदभ्र आँ अपः' (ऋ० ५.४८.१) इत्यध्यर्थस्य॥

(३३) द्युम्नम्–व्याख्यातं धननामसु (निघ० २.१०.१३)। अत्र यशोऽत्रं वाभिधीयते। 'अस्मे द्युम्नमधिरत्नं च धेहि' (ऋ० ७.२५.३)॥

(३४) पवित्रम्–पुनातेः 'पुवः सञ्ज्ञायाम्' (अ० ३.२.१८५), 'कर्त्तरि चर्षिदेवतयोः' (अ० ३.२.१८६) इतीत्रप्रत्ययः। मन्त्ररश्म्यापोऽग्निवायुसोमसूर्य्येन्द्राश्चाभिधेयाः। मन्त्रादिषु करणसाधनः, अग्न्यादिषु कर्मसाधनः। 'येन देवाः पवित्रेण' (सा० उ० ५.२.८.५) इति मन्त्रस्य। 'गभस्तिपूतो नृभिरद्रिभिः सुतः' (ऋ० ९.८६.३४), 'पवित्रवन्तः परि वाचमासते' (ऋ० ९.७३.३) इति च रश्मीनाम्। 'शतपवित्राः स्वधया मदन्तीः' (ऋ० ७.४७.३) इत्यपाम्। 'अग्निः पवित्रं स मा पुनातु वायुः सोमः सूर्य इन्द्रः पवित्रन्ते मा पुनन्तु' (निरु० ५.६) इत्यग्न्यादीनाम्॥

(३५) तोदः–तुद्यते पुत्रपौत्रादिभिः स्वसमीहितसाधनाय। तुदेर्घञ्। यद्वा 'देवसेवमेवादयः पचादौ द्रष्टव्याः'[1] इति पचाद्यच्। तुदति प्रेरयति कार्येषु कर्मकरानिति तोदो गृहस्थः। 'तोदस्येव शरण आ महस्य' (ऋ० १.१५०.१)॥

(३६) स्वञ्चाः–सुपूर्वादञ्चतेरसुन्। सुगमन इत्यर्थः। 'आ जुह्वानो घृतपृष्ठः स्वञ्चाः' (ऋ० ५.३७.१)॥

(३७) शिपिविष्टः, (३८) विष्णुः–एते विष्णोरादित्यस्य नामनी। शिपिविष्टशब्दोऽत्र सामर्थ्यादन्तर्णीतोपमानार्थः–यादृशः शेपो निर्वेष्टितः तादृश इति। 'शेप इव वेष्टनत्वग्विवर्जितः'[2] इति श्रीभोजनिवासः। उदितमात्रत्वादप्रतिपन्नरश्मिः। अपिवा 'उपमानयोगात् कुत्सितार्थीयमिदम्' इत्यौपमन्यवः[3]। पृषोदरादित्वाद्रूपसिद्धिरर्थसिद्धिश्च। 'प्रशंसानाम' इत्याचार्य्यः[4]। शिपिभिः रश्मिभिराविष्टः शिपिविष्ट उपात्तरश्मिः। विष्णुशब्दो व्याख्यातो यज्ञनामसु

---

१. काशिका (अ० ३.१.१३४)। २. मृग्यम्।

३. निरु० ५.८। ४. द्र०–स्कन्दटीका (निरु० ५.८)।

(निघ० ३.१७.१२)। अर्थोऽनुगुणः। 'किमित्ते विष्णो परि चक्ष्यं भूत् प्रयद् ववक्षे शिपिविष्टो अस्मि' (ऋ० ७.१००.६) इत्युभयोर्निगमः॥

(३९) आघृणिः–घृणिशब्दो ज्वलन्नामसु (निघ० १.१७.१०), क्रोधनामसु (निघ० २.१३.३) च व्याख्यातः। आगतदीप्तिरागतक्रोधो वा। 'आघृणे संसचावहै' (ऋ० ६.५५.१) इति दीप्तिनामत्वे निगमः। क्रोधवचने त्वन्यद्[1] उदाहरणं कर्त्तव्यम्।

(४०) पृथुज्रयाः–'ज्रि अभिभवे' (भ्वा० प० ६७८)। असुनि[2]। ज्रयो वेगः। पृथुर्ज्रयो यस्य सः। वेगेनान्यानभिभविता महाजव इत्यर्थः। 'पृथुज्रया अमिनादायुर्दस्योः' (ऋ० ३.४९.२)॥

(४१) अथर्युम्–अततेः। 'जनिमनियजिशुन्धिदसिभ्यः०' (स० क० २.१.८७) इति बाहुलकाद् युस्प्रत्ययो धातोरथरादेशश्च सकार इत्सञ्ज्ञकः। अतनं गमनमथर्युशब्देनोच्यते। मत्वर्थीयस्य लुक्। गमनवन्तमित्यर्थः। 'दूरे दृशं गृहपतिमथर्युम्' (ऋ० ७.१.१)॥

(४२) काणुका–कान्तक्रान्तकृतशब्दानां काणुभावः। तत्र स्वार्थे कः। शसि 'शेश्छन्दसि बहुलम्' (अ० ६.१.६८) इति शेर्लुक्। कान्तकानि प्रियाणि, क्रान्तकानि आहवनीयं प्रति गतानि, कृतकानि[3] ऋत्विग्भिः संस्कृतानि। सरांसि विशिष्यन्ते। यद्वा काणुकेति इन्द्रविशेषणम्। सोमस्य कान्तो वल्लभः। यद्वा कणेशब्दः 'कणेमनसी श्रद्धाप्रतीघाते' (अ० १.४.६५) इति, तस्य काणुकेति रूपं क्रियाविशेषणञ्च। 'इन्द्रः सोमस्य काणुका' (ऋ० ८.७७.४)॥

(४३) अध्रिगुः–अधिकृतो गौर्यस्मिन् मन्त्रे सोऽध्रिगुः। अधिकृतशब्दस्याध्रिभावः, गोशब्दश्चात्र पशुमात्रोपलक्षकः। छागादिष्वधिकृतत्वात्। यद्वा अधिग्वादिशब्दवत्त्वादध्रिगुः। अध्रिग्वावापप्रभृतीनां मध्येऽध्रिगोर्मुख्यत्वादध्रिगुशब्देनाभिधानम्। अग्निरिन्द्रश्चाध्रिगुशब्देनोच्यते। अधृतगमनः सर्वत्राप्रतिहतगतिरित्यर्थः। अत्राधृतशब्दस्याध्रिभावः। गमनं गौः। 'अध्रिगो शमीध्वम्' (मै० सं० ४.१३.४), तुभ्यं श्चोतन्त्यध्रिगो शचीवः' (ऋ० ३.२१.४), 'ऋचीषमायाध्रिगव ओहम्' (ऋ० १.६१.१) इति क्रमेण निगमाः॥

(४४) आङ्गूषः–आङ्पूर्वाद् घुषेर्घञ्। आघुष्यत आघोषः। घोकारस्य ङ्गूकारभावः 'आङोऽनुनासिकश्छन्दसि' (अ० ६.१.१२२) इत्यनुनासिको

---

१. 'त्वेभ्य' इत्यपपाठो मुद्रितेषु।

२. 'बाहुलकात् ककारस्य रेफः' इत्यसम्बद्धः पाठोऽधिको मुद्रितेषु।

३. इतः पूर्वं 'ऋत्विक् प्रति' इति मुद्रितेषु।

व्यत्ययेन। स्तोमोऽभिधेयः। 'एनाङ्गूषेण वयमिन्द्रवन्तः' (ऋ० १.१०५.१९)॥

(४५) आपान्तमन्युः—आपादितमुत्पादितं संस्कारेण मन्युर्दीप्तिर्यस्य। आपादितशब्दस्यापान्तभावः, मन्युशब्दो व्याख्यातः क्रोधनामसु (निघ० २.१३.१०)। सोम उच्यते। इन्द्रश्चापान्तमन्युः। उत्पादितदीप्तिर्यस्य उत्पादित-क्रोधो वा। 'आपान्तमन्युस्तृपलप्रभर्मा' (ऋ० १०.८९.५)॥

(४६) श्मशा—श्म शरीरमश्नुते व्याप्नोति। श्मशब्दोपपदाद् अश्नोतेः पचाद्यच्। उदकवाहिनी कुल्या नाडी वान्नरसवाहिनी वा श्मशोच्यते। श्म अश्नुत इति निर्वचनं स्कन्दस्वामिग्रन्थे नास्ति[१]। श्रीनिवासमते[२] तु स्वशब्दोपपदाद् अश्नोतेः पूर्ववदच्[३]। स्वं शासती श्मशा, वकारस्य मकारः[४]। 'आवं श्मशा रुधद्वाः' (ऋ० १०.१०५.१)॥

(४७) उर्वशी—उरुशब्दोपपदाद् अश्नोतेर्वष्टेर्वा 'इन् सर्वधातुभ्यः' (उ० ४.११९) इतीन्प्रत्यये 'कृदिकारात्०' (अ० ४.१.४५ ग० सू०) ङीष्, वश्युत्तरपद उरुशब्दस्य उलोपश्च। उरु महत् स्थानं यशो वा व्याप्नोति। ऊरुभ्यां वा अश्नुते सम्भोगकाले कामिनं वशीकरोति, शिल्पोपचारकुशलेत्यर्थः। उरुर्वा वशः कामो यस्या महेच्छेत्यर्थः। व्यधिकरणो बहुव्रीहिः—बहुषु कामो यस्याः, बहूनां वा कामो यस्याः। 'उर्वश्या ब्रह्मन् मनसोऽधिजातः' (ऋ० ७.३३.११)॥

(४८) वयुनम्—व्याख्यातं प्रज्ञानामसु[५] (निघ० ३.९.१०)। कान्तिः प्रज्ञा वाभिधेया। 'स इत्तमोऽवयुनं ततन्वत् सूर्येण वयुनवच्चकार' (ऋ० ६.२१.३)॥

(४९) वाजपस्त्यम्—वाजशब्दो व्याख्यातोऽन्ननामसु (निघ० २.७.२), पस्त्यशब्दो गृहनामसु (निघ० ३.४.६)। वाजञ्च पस्त्यञ्च। परममे-तदन्नाद्यमस्माकमिति मन्यमाना यस्मिन् देवाः पतन्ति तम्। सोम उच्यते। 'सनेम वाजपस्त्यम्' (ऋ० ९.९८.१२)॥

(५०) वाजगन्ध्यम्—'गन्ध अर्दने' चुरादिरात्मनेपदी (१५२)। अत्र मिश्रणार्थः। 'अचो यत्' (अ० ३.१.९७)। गृह्यतेर्गन्ध्यादेशो ण्यच्चेति केचित्[६]। गृह्यमाणस्य मिश्रीभावाद् गन्ध्यं मिश्रयितव्यमित्यर्थः। 'अश्याम वाजगन्ध्यम्' (ऋ० ९.९८.१२)॥

---

१. द्र०—स्कन्दटीका (निरु० ५.१२)। २. मृग्यम्।

३. अग्रिमवाक्येन संवादार्थमत्र 'शास्तेः पूर्ववड्डः' इति पाठः स्यात्।

४. सकारस्य शकार इत्यपि।

५. प्रशस्यनामसु (निघ० ३.८.१०) व्याख्यातम्।

६. द्र०—स्कन्दटीका (निरु० ५.१५)।

(५१) गध्यम्–गृह्णातेरघ्न्यादित्वाद् (उ० ४.११३) यत्प्रत्ययो धातोर्गध्यादेशश्च। ग्राह्यं गृह्यमाणस्य मिश्रीभावात्। आत्मना मिश्रयितव्यं भक्षयितव्यमित्यर्थः। सोम उच्यते। 'ऋज्रा वाजं न गध्यं युयूषन्' (ऋ० ४.१६.११)॥

(५२) गधिता–ग्रहेः क्ते ग्रहस्य गधादेशः। 'आगधिता परिगधिता' (ऋ० १.१२६.६)। आगृहीता अवयवैर्गाढं परिष्वक्ता सतीत्यर्थः। परिगधिता सर्वतोऽन्तर्बहिश्च मिश्रितः, आलिङ्गनचुम्बनपुरःसरं प्रक्षिप्तप्रजनना सती सानुरागं सम्भोगाय परिगृहीता च सतीत्यर्थः॥

(५३) कौरयाणः–कौरशब्दः कृतशब्दपर्यायः। शत्रून् प्रति कृतमेव यानं येन नित्यम्, कृतगमनः। यद्वा, हस्त्यश्वरथेत्यादि साङ्ग्रामिकं कृतमाकल्पितं प्रयाणाभिमुखं यानं वाहनं यस्य स कौरयाणः। 'पार्कस्थामा कौरयाणः' (ऋ० ८.३.२१)॥

(५४) तौरयाणः–तूर्णशब्दस्य तौरभावः। तूर्णयानः क्षिप्रगमन इत्यर्थः। 'स तौरयाण उप याहि यज्ञम्' (निरु० ५.१५)॥

(५५) अह्रयाणः–ह्रीतशब्दस्य ह्रभावः। अह्रीतयानोऽलज्जितयानः। यो ह्यर्थिभ्यो दातुं न शक्नोति, स ह्रीतो गच्छति, तदस्य नास्ति, अतः श्लाघ्यगमन इत्यर्थः। 'अनुष्टुया कृणुह्यह्रयाण' (ऋ० ४.४.१४)॥

(५६) हरयाणः–हरतेः पचाद्यचि हरः। शत्रूणां जीवितैश्वर्यादिहन्तृ यानं यस्य सः। शत्रुजीवितादीनां हर्तेत्यर्थः। 'रजतं हरयाणे' (ऋ० ८.२५.२२)॥

(५७) आरितः–'ऋ गतौ' (भ्वा० प० ६७०)। 'सूचिसूत्रिमूत्र्यट्यर्त्यशूर्णोतीनाम्०' (अ० ३.१.२२ वा०) इति विहितस्य यङः 'यङोऽचि च' (अ० २.४.७४) इत्यत्र बहुलानुवृत्तेरनैमित्तिके लुकि, प्रत्ययलक्षणेऽत्र 'सन्यङोः' (अ० ६.१.९) इति ऋ इत्यस्य द्विर्वचने उरदत्त्वादभ्यासस्य ऋकारस्यात्वे 'रुग्रिकौ च लुकि' (अ० ७.४.९१) इति रुकि निष्ठायां छान्दसत्वादिट्, ऋकारस्य यणादेशः 'रो रि' (अ० ८.३.१४) इत्यभ्यासरेफलोपे, ढ्रलोपे पूर्वस्य (अ० ६.३.११०) दीर्घत्वे च आरित इति। ण्यन्तस्य वा लुगभावश्छान्दसत्वात्। स्तोमान् प्रति गतः, यज्ञं प्रति गत इत्यर्थः। 'य आरितः कर्मणिकर्मणि स्थिरः' (ऋ० १.१०१.४)॥

(५८) व्रन्दी–व्रन्दति नैरुक्तधातुः। 'गमेरिनिः' (उ० ४.६) इति बाहुलकादिनिः। 'शुष्णस्य चिद् व्रन्दिनो रोरुवद् वना' (ऋ० १.५४.५)॥

(५९) निष्षपी–'षप समवाये' (भ्वा० प० २८४) इत्यस्मात् स्पृशत्यर्थे वर्त्तमानाद् असुनि सकारपकारविपर्ययः। स्पर्शश्चात्र सुरतद्वारकः

सुखातिशयोऽभिप्रेतः। सपति स्पृशति सुखयतीति सपः, निःपूर्वः, निष्षपा इति प्राप्ते निष्षपी। 'मा नो मघेव निष्षपी परा दाः' (ऋ० १.१०४.५)। यदा विनिर्गतपसा इति पठन्ति[1], तदा सपेरपि विपर्यस्ताक्षरात् 'पुंसि सञ्ज्ञायां घः०' (अ० ३.३.११८)। अर्थः स एव। अन्यत् सर्वं पूर्ववत्। अथापि विनिर्गतपसा इति पाठस्य प्राचुर्यात् तमाश्रित्य स्कन्दस्वामिना[2] व्याख्यातम्॥

(६०) **तूर्णाशम्**–'तूर्णाशमुदकं भवति। तूर्णमश्नुते' (निरु० ५.१६) इति भाष्यम्। तूर्णाशमित्यनवगतं शब्दतश्चार्थतश्च उदकमभिधेयम्। तूर्णमश्नुते, अत्यर्थं व्याप्नोति एवं निर्वचनात् तूर्णशब्दस्य क्रियाविशेषणत्वेनाकर्मत्वात् कर्मोपपदाभावाद् अण्[3] न स्यादिति चेत्, अश्नुत इत्यशं तूर्णञ्च तदशञ्च तूर्णाशम्। 'तूर्णाशं न गिरेरधि' (ऋ० ८.३२.४)॥

(६१) **क्षुम्पम्**–'क्षुभ सञ्चलने' (दि० प० १२६)। 'शकि लिङ् च' (अ० ३.३.१७२) इति शक्यार्थे ण्यत्। क्षोभ्यमिति प्राप्ते ओकारस्य ह्रस्वत्वम्, भकारस्य पकारो यकारलोपो मकारश्चोपजनः। अयत्नेनैव क्षोभयितुं शक्यम्। अहिच्छत्रकमुच्यते। 'पदा क्षुम्पमिव स्फुरत्' (ऋ० १.८४.८)॥

(६२) **निचुम्पुणः**–'वीणास्थूणाहूणभ्रूणक्षूणतूणतृणघृणादयः' (स० क० २.२.१२३) इति निचान्तनियमनीचैःशब्दोपपदेभ्यः प्रीणातिपृणातिपृणोतिभ्यो णक्प्रत्ययो धातूनां पुभाव उपपदानां निचुम्भावश्च निपात्यते। नीचैरुपपदाद् दधातेर्वा पूर्ववन्निपातनम्। 'चमु अदने' (भ्वा० प० ३१७)। निचान्तो भक्षितः प्रीणातीति निचुम्पुणः सोमः। 'अपां जग्मिर्निचुम्पुणः' (ऋ० ८.९३.२२)। नियमेन चम्यत इति निचमनमुदकम्, तेन पूर्य्यत इति समुद्रः। निगमः पर्येष्यः। नीचैरस्मिन् क्वणन्ति नीचैःशब्देनात्र कर्म कुर्वन्ति इत्यवभृथो निचुम्पुणः। 'अवभृथ निचुम्पुण' (मा० सं० ८.२७)॥

(६३) **पदिम्**–'पद गतौ' (दिवा० आ० ५८)। 'इन् सर्वधातुभ्यः' (उ० ४.११९)। पदिः पक्षी। आकाशे ह्यसौ नित्यं पद्यते गच्छति। 'मुक्षीजयेव पदिमुत्सिनाति' (ऋ० १.१२५.२)॥

(६४) **पादुः**–पद्यतेः 'छन्दसीणः' (उ० १.२) इति बाहुलकादुण्, वृद्धिः। पदनं पादुः। 'स पादुरस्य निर्णिजो न मुच्यते' (ऋ० १०.२७.२४)॥

(६५) **वृकः**–व्युपसर्गार्थविशिष्टाद् वृणोतेः 'सृवृभूशुषिमुषिभ्यः कित्'

---

१. अस्य पाठस्य समर्थनाय उद्ध्रियतेऽसौ मन्त्रः सामश्रमिणा–'यथा पर्सस्तायादरम्' –अथर्व० ६.७२.२। (सु०)। २. द्र०–स्कन्दटीका (निरु० ५.१६)।

३. 'क्तः' इति मुद्रितेषु। स्कन्दटीकापाठोऽप्यत्र सन्दिग्धः (निरु० ५.१६)।

(द० उ० ३.१९) इति कप्रत्ययः। वृकश्चन्द्रमाः। विवृतं [स्पष्टं ज्योतिरस्य] स्पष्टज्योतिष्मत्त्वाद् विवृत इत्युच्यते, न हि नक्षत्राणामिवाव्यक्तमस्य ज्योतिः। विकृतविक्रान्तशब्दयोर्वृकभावः। विकृतत्वं ज्योतिषः शीतत्वाद् ह्रासवृद्धिभ्यां वा। विक्रान्तत्वं ज्योतिषो दिगन्तरगमनात्। 'अरुणो मा सकृद्वृकः' (ऋ० १.१०५.१८)। यद्वा 'वृजि[1] वर्जने' अदादिः (आ० २२)। अनेकार्थत्वादावृणोत्यर्थः। पूर्वसूत्रेण बाहुलकात् को नकारजकारलोपश्च। आदित्य उच्यते। आवृङ्क्ते आवृणोति जगत् प्रकाशेन, आवृणोति चोदकानि रश्मिभिः सम्भजत इत्यर्थः। यद्वा वृणक्तेर्वधकर्मणः पूर्ववद्रूपम्। विनाशयति तमांसि। 'आस्नो यत्सीममुञ्चतं वृकस्य' (ऋ० १.११७.१६)। विविधं कृन्तति उरणादीनि विकर्त्ता सन् वृकश्च। विपूर्वात् कृन्ततेः पूर्ववद्रूपसिद्धिरुन्नेया। 'वृकश्चिदस्य वारण उरामथिः' (ऋ० ८.६६.८)। अपि वा शृगाली शिवेति प्रसिद्धा, सा वृक्युच्यते। 'शतं मेषान् वृक्यै चक्षदानम्' (ऋ० १.११६.१६)॥

(६६) जोषवाकम्–'जुषी प्रीतिसेवनयोः' (तु० आ० ८) कर्मणि घञ्, वचेर्भावे। जोषयितव्यं वचनम्। विस्पष्टाय सेवितव्यं वचनम्। अविस्पष्टं वचनमित्यर्थः। 'जोषवाकं वदतः पज्रहोषिणा' (ऋ० ६.५९.४)॥

(६७) कृत्तिः–कृन्तते रूपम्। यशोऽन्नं वा। यशो हि द्विषतः कृन्तति, दुर्भुक्तं वान्नं माषादि भोक्तारम्। 'महीव कृत्तिः शरणा त इन्द्र' (ऋ० ८.९०.६)। शरीरात् कृत्तेति चर्ममय्यपि कृत्तिः। सूत्रमय्यपि कृत्तिः जरद्वस्त्रखण्डग्रथितत्वात् कर्त्तनसामान्यात्। कृत्तिरिव कृत्तिः कन्थोच्यते। 'कृत्तिं वसान आचर' (मा० सं० १६.५१)॥

(६८) श्वघ्नी–स्वशब्दे कर्मण्युपपदे भूतेऽर्थे 'कर्मणि हनः' (अ० ३.२.८६) इति णिनिप्रत्ययः। स्वं धनं हतवान् स्वघाती सन् श्वघ्नी कितवः। स्वशब्दः स्वधेत्यत्र (निघ० १.१२.९७) व्याख्यातः। 'कृतं न श्वघ्नी विचिनोति देवने' (ऋ० १०.४३.५)॥

(६९) समस्य–समशब्दः सर्वपर्यायः सर्वनामसु पठ्यते 'त्वत्त्वसमसिमनेमेत्यनुच्चानि' (फि० ९४) इति सर्वानुदात्तः। 'मा नः समस्य दूढ्यः' (ऋ० ८.७५.९)। 'उरुष्या णो अघायतः समस्मात्' (मा० सं० ३.२६)। 'उतो समस्मिन्नाशिशीहि नो वसो' (ऋ० ८.२१.८)। 'नभन्तामन्यके समे' (ऋ० ८.३९.१)॥

(७०) कुटस्य, (७१) चर्षणिः–कृतशब्दस्य कुटभावः। कृञर्थात्

१. इदितोऽयं धातुरभिमन्यतेऽनेन ग्रन्थकृता।

कुटेः कप्रत्यय इत्यन्ये[१]। चर्षणिशब्दो व्याख्यातः पश्यतिकर्मसु (निघ० ३.११.७)। 'पिता कुटस्य चर्षणिः' (ऋ० १.४६.४)॥

(७२) शम्बः–व्याख्यातं शम्बर इति मेघनामसु (निघ० १.१.१४) 'उग्रो यः शम्बः पुरुहूत तेन' (ऋ० १०.४२.७)॥

(७३) केपयः–कुशब्दोपपदात् पुनातेः 'जनिपुणिकृतिभ्यः क्यप्' (स० क० २.३.३) इति बाहुलकात् क्यप्, कोः कादेशः। कपूयः दुष्पूयः, दुःशोध्यः, दुष्कर्मेत्यर्थः। कपूयेन तद्वन्तोऽपि कपूयाः, अकारो (अ० ५.२.१२७) मत्वर्थीयः। कुत्सितकर्माण उत्थापितपापकर्माणो वोच्यन्ते। कपूयाः सन्तः केपयः। 'ईर्मैव ते न्यविशन्त केपयः' (ऋ० १०.४४.६)॥

(७४) तूतुमाकृषे–'तूतुमेत्यस्य शीघ्रगत्यर्थस्य तूर्णमित्यवगमः[२] इति स्कन्दस्वामी। निर्वाहो निरूपणीयः। करोतेर्लेटि 'थासः से' (अ० ३.४.८०) उप्रत्ययस्य 'बहुलं छन्दसि' (अ० २.४.७३) इति लुक्। कुरुष इत्यर्थः। 'एता विश्वा सवना तूतुमाकृषे' (ऋ० १०.५०.६)॥

(७५) अंसत्रम्–आङ्पूर्वाद्धन्तेरसुनि टिलोप आकारस्य ह्रस्वत्वं च[३]। आहन्तीत्यंहः पापम्। पापेन वात्र तत्फलभूतप्रहारादिकं लक्ष्यते। अंहसस्त्रायते। 'आतोऽनुपसर्गे कः' (अ० ३.२.३) इत्यंहसस्त्रं सदंसत्रम्। 'धनुर्वा कवचं वा' (निरु० ५.२५)। 'अंसत्रकोशं सिञ्चता नृपाणम्' (ऋ० १०.१०१.७)॥

(७६) काकुदम्–कौतेः शब्दकर्मणो यङि, पचाद्यचि, 'यङोऽचि च' (अ० २.४.७४) इति यङ्लुकि, द्विर्वचनादौ, 'न धातुलोप आर्द्धधातुके' (अ० १.१.४) इति गुणनिषेधः। कोकूयते पुनःपुनः शब्दं करोतीति काकुर्जिह्वा। कोकुवाधानं सद् वर्णव्यापत्त्यादिना काकुदं तालु। कोकूयमाना नुदतीति वा। कोकूयतेर्नुदेश्च काकुदम्[४]। 'अनुक्षरन्ति काकुदम्' (ऋ० ८.६९.१२)॥

(७७) बीरिटे–भियो वा नक्षत्रादीनां वा भासस्ततिस्तननं यस्मिन् तद् भीस्तननं भास्तननं वा सत् बीरिटमन्तरिक्षम्, मनुष्यगणो वा।

अनालम्बेऽन्तरिक्षे हि भीतिः कस्य न जायते।
बृहन्नरेन्द्राय ते[५] हि तस्मात्तत्रापि तद् भयम्॥

'आ विश्पतीव बीरिट इयाते' (ऋ० ७.३९.२)॥

---

१. विकटशब्दोऽपि कुटधातोर्व्याख्यायते–निरु० ६.३०। (सु०)।

२. स्कन्दटीका (निरु० ५.२५)। ३. 'मुगागमः' इति शेषः।

४. 'काकुर्जिह्वा सास्मिन्नुद्यते इति काकुदम्' इति पस्पशाह्निके महाभाष्यम्। (सु०)।

५. 'वन्दनं नरेन्द्राय ते हि' इति स्कन्दटीकायाम् (निरु० ५.२७)।

(७८) अच्छ–निपातः। अभेरर्थे। आभिमुख्यार्थे वर्त्तते। आप्तुमित्यस्यार्थे इति शाकपूणिः[१]॥

(७९) परि, (८०) ईम्, (८१) सीम्–इति व्याख्यातानि प्राथमिके निपातप्रकरणे (निरु० १.३) अनेकार्थत्वादिहोपन्यासः, एषामुदाहरणानि प्रसिद्धानि॥

(८२) एनम्, (८३) एनाम्–एतत् पदद्वयमस्या अस्येत्यनेन पद-द्वयेन 'उदात्तं प्रथमादेशे, अनुदात्तमन्वादेशे' (निरु० ४.२५) इत्येवं व्याख्यातम् अनेकार्थत्वादुपन्यासः। 'त्रित एनमायुनग्'[२] इत्येवमादीन्युदाहरणानि॥

(८४) सृणिः–'सृ गतौ' (भ्वा० प० ६६९)। 'घृसृधुवृषिप्रच्छिज्वरित्व-रिभ्यः कित्' (स० क० २.१.२०९) इति णिप्रत्ययः। लवितव्यं प्रति सरणात् सृणिशब्देनात्र दात्रमभिप्रेतम्। 'नेदीय इत्सृण्यः पक्वमेयात्' (मा० सं० १२.६८)॥

इति चतुरशीतिः पदानि॥ २॥

आशुशुक्षणिः (१)। आशाभ्यः (२)। काशिः (३)। कुणारुम् (४)। अलातृणः (५)। सलल्लूकम् (६)। कत्पयम् (७)। विस्रुहः (८)। वीरुधः (९)। नक्षद्दाभम् (१०)। अस्कृधोयुः (११)। निशृम्भाः (१२)। बृबदुक्थम् (१३)। ऋदूदरः (१४)। ऋदूपे (१५)। पुलुकामः (१६)। असिन्वती (१७)। कपना (१८)। भार्ऋजीकः (१९)। रुजानाः (२०)। जूर्णिः (२१)। ओमना (२२)। उपलप्रक्षिणी (२३)। उपसि (२४)। प्रकलवित् (२५)। अभ्यर्धयज्वा (२६)। ईक्षे (२७)। क्षोणस्य (२८)। अस्मे (२९)। पाथः (३०)। सवीमनि (३१)। सप्रथाः (३२)। विदथानि (३३)। श्रायन्तः (३४)। आशीः (३५)। अजीगः (३६)। अमूरः (३७)। शशमानः (३८)। देवो देवाच्या कृपा

---

१. द्र०–निरु ५.२८।

२. वेदे नोपलभ्यते। अथर्ववेदे ६.११३.१ मध्ये तु 'त्रित एनं मनुष्येषु ममृजे' इति पाठः। (सु०)।

(३९)। विजामातुः (४०)। ओमासः (४१)। सोमानम् (४२)। अनवायम् (४३)। किमीदिने (४४)। अमवान् (४५)। अमीवा (४६)। दुरितम् (४७)। अप्वे (४८)। अमतिः (४९)। श्रुष्टी (५०)। पुरन्धिः (५१)। रुशत् (५२)। रिशादसः (५३)। सुदत्रः (५४)। सुविदत्रः (५५)। आनुषक् (५६)। तुर्वणिः (५७)। गिर्वणाः (५८)। असूर्ते सूर्ते (५९)। अम्यक् (६०)। यादृश्मिन् (६१)। जारयायि (६२)। अग्रिया (६३)। चनः (६४)। पचता (६५)। शुरुधः (६६)। अमिनः (६७)। जज्झतीः (६८)। अप्रतिष्कुतः (६९)। शाशदानः (७०)। सूप्रः (७१)। सुशिप्रः (७२)। रंसु (७३)। द्विबर्हाः (७४)। अक्रः (७५)। उराणः (७६)। स्तियानाम् (७७)। स्तिपाः (७८)। जबारु (७९)। जरूथम् (८०)। कुलिशः (८१)। तुञ्जः (८२)। बर्हणा (८३)। ततनुष्टिम् (८४)। इळीबिशः (८५)। कियेधाः (८६)। भृमिः (८७)। विष्पितः (८८)। तुरीपम् (८९)। रास्पिनः (९०)। ऋञ्जतिः (९१)। ऋजुनीती (९२)। प्रतद्वसू (९३)। हिनोत (९४)। चोष्कूयमाणः (९५)। चोष्कूयते (९६)। सुमत् (९७)। दिविष्टिषु (९८)। दूतः (९९)। जिन्वति (१००)। अमत्रः (१०१)। ऋचीषमः (१०२)। अनर्शरातिम् (१०३)। अनर्वा (१०४)। असामि (१०५)। गल्दया (१०६)। जल्हवः (१०७)। बकुरः (१०८)। बेकनाटान् (१०९)। अभिधेतन (११०)। अंहुरः (१११)। बतः (११२)। वाताप्यम् (११३)। चाकन् (११४)। रथर्यति (११५)। असक्राम् (११६)। आधवः (११७)। अनवब्रवः (११८)। सदान्वे (११९)। शिरिम्बिठः

(१२०)। पराशरः (१२१)। क्रिविर्दती (१२२)। करूळती (१२३)। दनः (१२४)। शरारुः (१२५)। इदंयुः (१२६)। कीकटेषु (१२७)। बुन्दः (१२८)। वृन्दम् (१२९)। किः (१३०)। उल्बम् (१३१)। ऋबीसम् (१३२)। ऋबीसमिति द्वात्रिंशच्छतं पदानि ॥ ३ ॥

जहासस्त्रिमाशुशुक्षणिस्त्रीणि ॥

इति निघण्टौ चतुर्थोऽध्यायः समाप्तः ॥ ४ ॥

(१) आशुशुक्षणिः–शुचेर्ज्वलतिकर्मणः क्विपि शुक् दीप्तिः, क्षणिर्हिंसार्थः, 'इन् सर्वधातुभ्यः' (उ० ४.११९) इतीन्, सनोतेर्वा इन्। आशु शुचा दीप्त्या क्षणिता हिंसिता तमसां सनिता सम्भक्ता वा पाकदाहप्रकाशनादेः स्वव्यापारस्य। अग्निरुच्यते। यद्वा आङ्पूर्वाच्छुचेरन्तर्णीतण्यर्थात् सनि आशुशुक्ष इति स्थिते 'आङि शुषेः सनः' (स० क० २.१.२१४) इति विहितोऽअनि-प्रत्ययो बाहुलकाच्छुचेरपि भवति। 'आङि शुचेः'[1] इत्येव वा तत्र पाठः। आशुशोचयिषा आदीपयितुमिच्छा, तस्याः कर्त्ता आशुशुक्षणिः आदीपयिषुरित्यर्थः। 'त्वमग्ने द्युभिस्त्वमाशुशुक्षणिः' (ऋ० २.१.१)॥

(२) आशाभ्यः–व्याख्यातं दिङ्नामसु (निघ० १.६.२)। स एव निगमः (ऋ० २.४१.१२)॥

(३) काशिः–काशतेः 'इन् सर्वधातुभ्यः' (उ० ४.११९) इतीन्प्रत्ययः। प्रकाश्यत इति काशिर्मुष्टिः। 'यत् संगृभ्णा मघवन् काशिरित्ते' (ऋ० ३.३०.५)॥

(४) कुणारुम्–क्वणतेः शब्दकर्मणः 'क्वणेरारुः' (स०क० २.१.१००) इति बाहुलकाद् आरुप्रत्ययस्ताच्छीलिकः, वकारस्य सम्प्रसारणञ्च। शब्दनशीलः कुणारुः, तन्मेघ उच्यते। 'अहस्तमिन्द्र सम्पिणक् कुणारुम्' (मा० सं० १८.६९)॥

(५) अलातृणः–अलंशब्दोपपदाद् [आङ्पूर्वात्] तृदेर्हिंसार्थात् 'वीणा-स्थूणाहूणभ्रूणक्षूणतूणतृणघृणादयः'[2] (स० क०-२.२.१२३) इति णप्रत्ययो दकारलोपो गुणाभावोऽलमो मकारस्याकारश्च निपात्यते। यद्वा ल्युटि दकारस्य लोपो गुणाभावश्च पृषोदरादित्वात्। अलं पर्याप्तमातर्दनं हिंसा यस्य, बहूदकत्वाद् मेघो विशिष्यते। 'अलातृणो वल इन्द्र व्रजो गोः' (ऋ० ३.३०.१०)॥

---

१. स० क० मद्रासससंस्करणे न संगृह्यते। २. 'वीणस्थूणव्रणभूण०' इति मुद्रितेषु।

(६) सलल्लूकम्–सम्पूर्वाल्लुभेर्निष्ठायां 'लुभो विमोहने' (अ० ७.२.५४) इतीडागमः [संलुभितम्]। यद्वा सर्त्तेः 'मधूकोलूकोरुबूकशम्बूकवरूकादयः'[१] (स० क० २.२.२९) इत्यूकप्रत्यये गुणे रपरे कृते अरित्यस्य द्विर्वचनं रेफयोर्लत्वापत्तिश्च निपात्यते। सरणशीलमत्यन्तदूरं नष्टमित्यर्थः। रक्षो विशिष्यते। 'आ कीवतः सलल्लूकं चकर्थ' (ऋ० ३.३०.१७)॥

(७) कत्पयम्–कमिति सुखनाम। तस्य मकारस्य तकारः पयसश्च सलोपः। कम्पयसं सुखपयसमित्यर्थः। मेघोऽभिधेयः। 'त्यञ्चिदित्था कत्पयं शयानम्' (ऋ० ५.३२.६)॥

(८) विस्रुहः–विपूर्वात् स्रवतेः क्विपि। विविधं स्रवन्तीति विस्रुह आपः। 'वया इव रुरुहुः सप्त विस्रुहः' (ऋ० ६.७.६)॥

(९) वीरुधः–विपूर्वाद् रुहेः क्विपि वेर्दीर्घो हकारस्य धकारश्च। मूलविभुजादित्वात् (अ० ३.२.५ वा०) के विरुहाः सत्यो वीरुधः। विविधं रोहन्तीति ओषधय उच्यन्ते। 'वीरुधः पारयिष्ण्वः' (ऋ० १०.९७.३)॥

(१०) नक्षद्दाभम्–नक्षतेर्गतिकर्मणो व्याप्तिकर्मणो वा शतरि नक्षत्। [नक्षतो] दभ्नोतीति [नक्षदुपपदे] दभ्नोतेर्वधकर्मणः कर्मण्यणि नकारलोपश्छान्दसः, वृद्धिः। युद्धार्थमभिगच्छतां व्याप्नुवताञ्च शत्रूणां हन्तारमित्यर्थः। 'नक्षद्दाभं ततुरिं पर्वतेष्ठाम्' (ऋ० ६.२२.२)॥

(११) अस्कृधोयुः–दीर्घायुरित्यर्थः, चिरस्थायी पुत्रपौत्रान्वित इति यावत्। कृध्विति ह्रस्वनामसु व्याख्यातम् (निघ० ३.२.६)। नञ्पूर्वस्य धातोः सकार उपजनः, धुशब्दस्य धोभावः। यद्वा नञ्पूर्वात् करोतेर्निष्ठायामकृतशब्दस्यास्कृभावः, दधातेर्धयतेर्वा 'इणो णित्' (स० क० २.१.३१६) इति बाहुलकाद् उसिप्रत्ययः, णित्त्वाद् युगागमः, धकारस्य धोभावः। अकृतदानो यादृशो न कस्मैचित्त्वया दत्तपूर्व इत्यर्थः। अकृतपानो वा अभुक्तपूर्वः केनचिदित्यर्थः। धनविशेष उच्यते। 'यो अस्कृधोयुरजरः स्वर्वान्' (ऋ० ६.२२.३)॥

(१२) निशृम्भाः–निपूर्वात् 'श्रथि शैथिल्ये' (भ्वा० आ० २८) इत्यस्माद् घञ्। निर्गतः श्रथः शैथिल्यं यस्याः सा निश्रथा गतिः, अशिथिलया गत्या हरन्तीति 'अन्येष्वपि दृश्यते' (अ० ३.२.१०१) इति डः। श्रथशब्दस्य शृम्भावः। अशिथिलया गत्या हरणशीला अविश्रामहरणा इत्यर्थः। 'निशृम्भास्ते जनश्रियम्' (ऋ० ६.५५.६)। भाष्ये शृथ्यशब्दः श्रथशब्दपर्य्यायः (निरु० ६.३)॥

(१३) बृबदुक्थम्–बृहच्छब्दो व्याख्यातो महन्नामसु (निघ० ३.३.४)।

---

१. 'मण्डूकोलूकोरूकशूकशम्बूकयूकवरूकादयः' इति मुद्रितेषु।

तत्र हकारस्य बः। यद्वा 'संश्चत्तृपद्वेहत्' (उ० २.८६) इति बृधातोरतिप्रत्यये बृबच्छब्दो निपात्यते, उक्थशब्द उक्थ्य इत्यत्र व्याख्यातः (निघ० ३.८.६)। बृहद् वक्तव्यं वा उक्थं स्तुतिर्यस्य स बृहदुक्थः, तम्, स्तुत्यर्हमित्यर्थः। 'बृबदुक्थं हवामहे' (ऋ० ८.३२.१०)॥

(१४) ऋदूदरः–मृदु उदरमस्य। मृदुर्वा वमनविरेचनयोरकर्त्ता उदरेऽस्तु इत्येवं य आशास्यते यजमानैः स मृदूदरः सोमः, आदेर्मकारस्य लोपः। 'ऋदूदरेण सख्या सचेय' (ऋ० ८.४८.१०)। सोमपायिनः प्रायश्चित्तेष्टौ याज्यैषा॥

(१५) ऋदूपे–'अर्द अर्दने' (चुरा० २५५) हिंसार्थः। 'छन्दसीणः' (उ० १.२) इति बाहुलकादुण्, धातोर्ऋदादेशः। ऋदुशब्दोपपदे[1] पतेरन्तर्णीतण्यर्थाद् 'अन्येष्वपि दृश्यते' (अ० ३.२.१०१) इति डः, 'अन्येषामपि दृश्यते' (अ० ६.३.१३६) इति दीर्घः। बाहुविशेषणमेतत्। शत्रूणामर्दनेन पातयितारौ। 'ऋदूपे चिदृदूवृधा' (ऋ० ८.७७.११)॥

(१६) पुलुकामः–पुरुर्बहुः कामो यस्य सः। कपिलकादित्वाल्लत्वम् (अ० ८.२.१८ वा०)। 'पुलुकामो हि मर्त्यः' (ऋ० १.१७९.५)॥

(१७) असिन्वती–'षिञ् बन्धने' (स्वा० उभ० २)। अनेकार्थत्वाद्धातूनामत्र सङ्खादनार्थः। लटः शतरि श्नुः। 'उगितश्च' (अ० ४.१.६) इति ङीप्, पूर्वसवर्णदीर्घः। असङ्खादन्त्यावित्यर्थः। हनू विशेष्यते। 'असिन्वती बप्सती भूर्यत्तः' (ऋ० १०.७९.१)॥

(१८) कपना–'कपि चलने' (भ्वा० आ० २६१) इत्यस्माद् 'युज् बहुलम्' (उ० २.७९) इति युचि बाहुलकादागमानित्यत्वान्नुम् न क्रियते। घुणाः क्रिमय उच्यन्ते। 'मोषथा वृक्षङ्कपनेव वेधसः' (ऋ० ५.५४.६)॥

(१९) भाऋजीकः–ऋजुका अकुटिला अप्रतिहता प्रसिद्धा भा दीप्तिर्यस्य स ऋजुकभाः सन् भाऋजीकः। अग्निरुच्यते। 'धूमकेतुः समिधा भाऋजीकः' (ऋ० १०.१२.२)॥

(२०) रुजानाः–व्याख्यातं नदीनामसु (निघ० १.१३.८)। स एव निगमः (ऋ० १.३२.६)॥

(२१) जूर्णिः–व्याख्यातं क्रोधनामसु (निघ० २.१३.९)। अत्र सेनाभिधेया। 'क्षिप्ता जूर्णिर्न वक्षति' (ऋ० १.१२९.८)॥

(२२) ओमना[2]–अवनशब्दस्याकारवकारयोरोकारमकारौ विभक्तेरा-

---

१. ऋदुवृधा इतिवत् –निरु० ६.३३। (सु०)।

२. ओमः, ओमासः शब्दोऽप्यवधातोः –निरु० १२.४०। (सु०)।

कारः। अवनाय अवनेन वा। 'परिंम्रंसमोमना वां वयो गात्' (ऋ० ७.६९.४)॥

(२३) उपलप्रक्षिणी—उपलशब्दोपपदात् क्षिणोतेः क्षिपतेर्वा 'सुप्य-जातौ०' (अ० ३.२.७८) इति णिनिप्रत्यये व्यत्ययेन टिलोपः। उपलेषु श्लक्ष्णेषु वालुकासु यवान् क्षिणोति हिनस्ति भृज्जतीत्यर्थः, उपलेषु यवान् प्रक्षिपति चूर्णयतीत्यर्थः। सक्तुकारिकाभिधेया। 'उपलप्रक्षिणी नना' (ऋ० ९.११२.३)॥

(२४) उपसि—उपस्थशब्दस्य। 'आसीन ऊर्ध्वामुपसि क्षिणाति' (ऋ० १०.२७.१३)॥

(२५) प्रकलवित्—प्रकर्षेण कला मानोन्मानप्रतिमानादिविषयाः प्रकलाश्च गणितरत्नपरीक्षादिका वेद विजानाति। 'सत्सूद्विष०' (अ० ३.२.६१) इत्यादिना क्विपि 'ङ्यापोः सञ्ज्ञाच्छन्दसोर्बहुलम्' (अ० ६.३.६२) इति ह्रस्वः। प्रकलविद् वणिग् भवति। 'दुर्मित्रासः प्रकलविन्मिमानाः' (ऋ० ७.१८.१५)॥

(२६) अभ्यर्धयज्वा—'ऋधु वृद्धौ' (दि० प० १३१)। णिजन्तात् पचाद्यचि णिलोपे अभ्यर्धः, यजेर्दानार्थात् 'सुयजोर्ङ्वनिप्' (अ० ३.२.१०३)। अल्पानपि रसान् अभ्यर्धयन् मरुद्भ्यो ददाति, धनं वा स्तोतृभ्यो यो ददाति सः। पूषा विशिष्यते। 'सिषक्ति पूषा अभ्यर्धयज्वा' (ऋ० ६.५०.५)॥

(२७) ईक्षे—'ईश ऐश्वर्य्ये' (अदा० आ० १०)। 'थासः से' (अ० ३.४.८०)। व्यत्ययेन 'ईशः से' (अ० ७.२.७७) [इतीट्] न भवति। 'ईक्षे हि वस्व उभयस्य राजन्' (ऋ० ६.१९.१०)॥

(२८) क्षोणस्य—'क्षि निवासगत्योः'[१] (तु० प० १.१६)। 'कृत्यल्युटो बहुलम्' (अ० ३.३.११३) इति कर्त्तरि ल्युट्। क्षयणस्येत्यत्र यकारस्योकारे 'आद् गुणः' (अ० ६.१.८४)। निवसितुरित्यर्थः। 'महः क्षोणस्याश्विना कण्वाय' (ऋ० १.११७.८)॥

(२९) अस्मे—अस्मदः। जसादीनां शे प्रगृह्यम्, लुबेव[२] टेः। जसादिषु सुबन्तेषु क्रमेणोदाहरणानि—'अस्मे ते बन्धुः' (मा० सं० ४.२२), 'अस्मे यातं नासत्या सजोषाः' (ऋ० १.११८.११), 'अस्मे समानेभिर्वृषभ पौंस्येभिः' (ऋ० १.१६५.७), 'अस्मे प्रयन्धि मघवन्नृजीषिन्' (ऋ० ३.३६.१०), 'अस्मे

---

१. पृथिव्यर्थकः क्षोणिशब्दोऽपि (निघ० १.१.७) अस्मादेव धातोः शक्यते साधितुम्। (सु०)।

२. अस्मदः टेर्लोप इत्यर्थः।

आराच्चिद्द्वेषः सनुतर्युयोतु' (ऋ० ६.४७.१३), 'ऊर्ध्व इव पप्रथे कामो अस्मे' (ऋ० ३.३०.१९), 'अस्मे धत्त वसवो वसूनि' (मा० सं० ८.१८)॥

(३०) पाथः–[पततेः पद्यतेः] पथतेः पन्थतेर्वा गत्यर्थादसुनि धातूनां पाथ इत्ययमादेशः। पथ्यते गम्यते पक्ष्यादिभिरन्तरिक्षवासिभिर्वा पाथः, अन्तरिक्षम्।'श्येनो न दीयन्नन्वेति पाथः' (ऋ० ७.६३.५)।उदकमपि पाथः। 'पातेस्थुट् च' (स० क० २.१.३३४) इत्यसुन्। पीयते ह्युदकम्। अन्ने पिबतिरभ्यवहारार्थः। 'आचष्ट आसां पाथो नदीनाम्' (ऋ० ७.३४.१०) इत्युदकस्य। 'देवानां पाथ उप प्रविद्वान्' (ऋ० १०.७०.९) इत्यन्नस्य॥

(३१) सवीमनि–'षु प्रसवैश्वर्य्ययोः' (भ्वा० प० ६७४)।'हृभृधृसृस्तृसूभ्य ईमनिन्' (द०उ० ६.७६) इति ईमनिन्। प्रसवशब्दस्य एव वर्णव्यत्ययादिना।प्रसवेऽभ्यनुज्ञाने।'देवस्य वयं सवितुः सवीमनि' (ऋ० ६.७१.२)॥

(३२) सप्रथाः–प्रथतेरसुन्। सर्वतःशब्दस्य सभावः। सर्वतः पृथुः। 'त्वमग्ने सप्रथा असि' (ऋ० ५.१३.४)॥

(३३) विदथानि–विदेरथक्[1] (द०उ० ६.४१)।वेदनानि विज्ञानानीत्यर्थः। 'विदथानि प्रचोदयन्' (ऋ० ३.२७.७)॥

(३४) श्रायन्तः–'श्रिञ् सेवायाम्' (भ्वा० आ० ६३८)। शतरि शपि गुणे प्राप्ते व्यत्ययेन वृद्धिः। समाश्रयन्तः। यद्वा भूते लट्[2] समाश्रिताः।'श्रायन्त इव सूर्य्यम्' (ऋ० ८.९९.३)॥

(३५) आशीः–आङ्पूर्वात् श्रयतेः श्रीणातेर्वा 'क्विब् वचिप्रच्छि०' (द० उ० १०.२) इत्यत्र 'प्राक् प्रत्ययनिर्देशादिष्टसिद्धिः'[3] इत्युक्ते क्विपि प्रकृतेः शीरादेशः।यद्वा एतयोरर्थे वर्त्तमानात् शृणातेः क्विपि शीरशब्दे निर्वाहः। आङ् ईषदर्थद्योतकः। आश्रपणाद् होमार्थस्य सोमस्य श्रपणं दध्युच्यते। 'इन्द्राय गाव आशिरम्' (ऋ० ८.६९.६)।'आङः शासु इच्छायाम्' (अदा० आ० १२) इत्यस्मात् क्विपि। 'सा मे सत्याशीर्देवान् गम्यात्' (मै० सं० १.४.१) रेफान्तसकारान्तयोरपि साधारणः पाठः समाम्नाये॥

(३६) अजीगः–जिगर्त्तिर्नैरुक्तधातुर्निगरणार्थो वा ग्रहणार्थो वा। लङि, सिपि, इतश्चलोपे, 'रात्सस्य' (अ० ८.२.२४) इति सलोपः, रेफस्य विसर्जनीयः। अवगिरति, गृह्णाति वा। भक्षयतीत्यर्थः। 'आदिद् ग्रसिष्ठ

---

१. तु०–'विदेः कित्' (स० क० २.२.१६०)।

२. 'ल्युट्' इत्यपपाठो मुद्रितेषु।

३. द्र०–माणिक्यदेवकृतद०उ०वृत्तिः (१०.२)।

ओषधीरजीगः' (ऋ० १.१६३.७)॥

(३७) अमूरः–'मुह वैचित्ये' (दि० प० ८७)। निष्ठायाम् ढत्वम्[1], ष्टुत्वढलोपदीर्घाः, ढकारस्य रेफः, नञ्पूर्वः सम्बुद्धौ अमूर। अमूढ इत्यर्थः। 'मूरा अमूर न वयं चिकित्वः' (ऋ० १०.४.४)॥

(३८) शशमानः–व्याख्यातोऽर्चतिकर्मसु (निघ० ३.१४.२२)। स एव निगमः (ऋ० १.१५१.७)॥

(३९) देवो देवाच्या कृपा–देवशब्दोपपदाद् अञ्चतेः 'ऋत्विग्०' (अ० ३.२.५९) इत्यादिना क्विन्, 'अनिदिताम्०' (अ० ६.४.२४) इति नलोपः, 'अचः' (अ० ६.४.१३८) इत्यकारलोपः, 'चौ' (अ० ६.३.१३७) इति दीर्घे, 'अञ्चतेश्चोपसङ्ख्यानम्' (अ० ४.१.६ वा०) इति ङीपि, 'विष्वग्देवयोश्च टेरद्र्यञ्चतौ वप्रत्यये' (अ० ६.३.९१) न भवति। 'कृपू सामर्थ्ये' (भ्वा० आ० ५१२) क्विपि। देवान् प्रति गतया स्तुत्येत्यर्थः। 'देवो देवाच्या कृपा' (ऋ० १.१२७.१)॥

(४०) विजामातुः–धनादन्ये कुलीनत्वादयो विगता जामातृगुणा यस्मात्, सोऽयमप्राप्तगुणो विजामाता क्रीतापतिरुच्यते[2]। ततः पञ्चमी। 'विजामातुरुत वा घा स्यालात्' (ऋ० १.१०९.२)॥

(४१) ओमासः–अवतेः पालनार्थस्य तर्पणार्थस्य वा कर्त्तरि कर्मणि वा 'अविसिविसिशुषिभ्यः कित्' (उ० १.१४४) इति मन्प्रत्यये, 'ज्वरत्वर०' (अ० ६.४.२०) इत्यादिना ऊठि ऊमास इति प्राप्ते व्यत्ययेन गुणः। जस्। 'आज्जसेरसुक्' (अ० ७.१.५०)। रक्षितारस्तर्पयितारस्तर्पणीया [वा]। 'ओमासश्चर्षणीधृतः' (ऋ० १.३.७)॥

(४२) सोमानम्–सुनोतेर्मनिन्प्रत्ययः। अमि सोमानम्। सोतारम्। अभिषोतारं सोमानाम्। 'सोमानं स्वरणम्' (ऋ० १.१८.१)॥

(४३) अनवायम्, (४४) किमीदिने–अनवयवशब्दस्यानवायभावः। अनवयवं सकलमित्यर्थः। किमिदानीं कस्य किंछिद्रमिति[3] चरति, किमिदं वर्त्तत इति वा चरति। साधुजनवैरी सदा विरुद्धबुद्धिः पिशुनोऽभिधेयः। किमिदंशब्दस्य वाक्यस्य वा किमीदिनभावः। 'द्वेषो धत्तमनवायं किमीदिने' (ऋ० ७.१०४.२)॥

---

१. 'उत्वम्' इत्यपपाठो मुद्रितेषु।

२. 'कन्यापति०' इति कोशेषु। द्र०–स्कन्दटीका (निरु० ६.९)।

३. 'किञ्चिदिति' इति मुद्रितेषु।

(४५) अमवान्– अमा सहार्थाव्ययम्। तस्य मतुपि ह्रस्वः ससहायः। यद्वा 'अम रोगे' (चु० प० १८९)। 'पुंसि सञ्ज्ञायां घः०' (अ० ३.३.११८)। अमो रोगः कर्त्तव्यः शत्रूणाम्, रोगैस्तद्वान्, दस्यूनां रोगभूत इत्यर्थः। आत्मशब्दस्य वा अमभावः। यत्नवान् 'आत्मा जीवे यत्ने कलौ मनौ चातपि'[१] इति निघण्टुः। 'याहि राजेवामवाँ इभेन' (ऋ० ४.४.१)॥

(४६) अमीवा–'अम रोगे' (चु० प० १८९)। 'अमेरीवः' (स० क० २.३.१३७) इति ईवप्रत्ययः। टाप्। अमीवा रोगो हिंसिता वा। यद्वा 'शेवयह्वजिह्वाग्रीवाप्वामीवाः' (उ० १.१५४) इति वन्प्रत्ययान्तो निपात्यते। 'यस्ते गर्भममीवा' (ऋ० १०.१६२.२)॥

(४७) दुरितम्–दुर्गतिप्रापकं कारणभूतम्। 'पापकं कर्म दुरितमुच्यते। 'अतिक्रामन्तो दुरितानि विश्वा' (निरु० ६.१२)[२]। दुःशब्दोऽत्र दुर्गतौ वर्त्तते। 'अञ्चिघृसिभ्यः क्तः' (उ० ३.८९) इति बाहुलकात् करणे क्तः। दुर्गतिर्गम्यते येन तद् दुरितम्॥

(४८) अप्वे–अपपूर्वाद् वेतेर्धातोरन्तर्णीतण्यर्थाद्[३] 'अन्येष्वपि दृश्यते' (अ० ३.२.१०१) इति डप्रत्यये अपेत्यस्यान्त्यलोपश्छान्दसः। टाप्। अपवाययति[४] अपगमयति सुखं प्राणांश्चेत्यर्थः। 'शेवयह्वजिह्वाग्रीवाप्वामीवाः' (उ० १.१५४) इति वन्प्रत्यये वेतेर्लोपोऽपशब्दस्यान्तलोपश्च[५] निपात्यते। व्याधिर्वा भयं वा अप्वा। 'गृहाणाङ्गान्यप्वे परेहि' (ऋ० १०.१०३.१२)॥

(४९) अमतिः–अमाशब्द आत्मवचनः। आत्ममयी ततिर्मतिर्वा अमतिः। तन्यत इति ततिर्दीप्तिः। मतिरपि प्रकाशरूपत्वाद् दीप्तिः। आत्मप्रकाशमयी ततिर्मतिर्वा अमतिः। दीप्तिरभिधेया। अमाततिशब्दस्य आत्ममतिशब्दस्य वा अमतिभावः। सवितृविशेषणत्वादात्मप्रकाशमयी ततिर्मतिर्वा अमतिरित्युपपद्यते। 'ऊर्ध्वा यस्यामतिर्भा अदिद्युतत्' (सा०पू० ५.२.३.८)॥

(५०) श्रुष्टी, (५१) पुरन्धिः–अश्नोतेः 'दृकॄषिरिषिविषिमुषिशाच्यशिभ्यः[६] क्तिन्' (स० क० २.१.१८९)। 'कृदिकारादक्तिनः' (अ० ४.१.४५ ग० सू०) इत्यत्र स्त्रियां विहितस्य ग्रहणाद् विकल्पो ङीष्। श्रु अष्टिर्व्याप्तिरत्र श्रुष्टी। पुरुशब्दो बहुनाम। धीरिति कर्मनाम, प्रज्ञानाम वा।

---

१. मृग्यम्।

२. तु०–'अतिक्रामन्तो दुरिता पदानि' –अथर्व० १२.२.२८। (सु०)।

३. 'वेञ्धातो०' इति मुद्रितेषु।

४. 'अपवयति' इति मुद्रितेषु।

५. 'वेञो लोपो०' इति मुद्रितेषु।

६. मुद्रितेषु पाठोऽशुद्धः।

बहुकर्मा बहुप्रज्ञो वा पुरुधिः सन् पुरन्धिः। पुराणि दारयतीति वा पुरन्धिः। 'वेञो डित्' (स० क० २.१.१७९) इति बाहुलकाद् डिदिच्प्रत्ययः, दकारस्य धकारः, नकार उपजनः। भगो वरुण इन्द्रश्च पुरन्धिः। 'श्रुष्टी भगं नासत्या पुरन्धिम्' (ऋ० ७.३९.४)। श्रुष्टीशब्दः सुखस्याभिधायको धान्यशलाकायाश्च। 'श्रुष्टीवरीर्भूतनास्मभ्यमापः' (ऋ० १०.३०.११) इति सुखस्याभिधायकः। 'श्रुष्टी सहरा असह्यः'[1] इति धान्यशलाकायाः॥

(५२) रुशत्–'रुच दीप्तौ' (भ्वा० आ० ४९८)। 'संश्चत्तृपद्वेहत्' (उ० २.८६) इत्यतिप्रत्ययो गुणाभावश्च, चकारस्य शकारश्च निपात्यते। रोचते रुशद् वर्णविशेषो ज्वलनाविर्भूतप्रकाशरूपोऽभिधीयते। यद्वा रुशेर्हिंसार्थात्तुदादे रोचत्यर्थे वर्त्तमानाल्लट् शतरि। 'समिद्धस्य रुशददर्शि पाजः' (ऋ० ५.१.२)॥

(५३) रिशादसः–'रिश हिंसायाम्' तुदादिः (प० १२९)। अन्तर्णीतण्यर्थः। लटः शतरि छान्दसो दीर्घः। अस्यतेर्विच्। रिशतां शत्रूणां वा असितारः क्षेप्तारो नाशयितार इत्यर्थः। 'अस्ति हि वः सजात्यं रिशादसः' (ऋ० ८.२७.१०)॥

(५४) सुदत्रः–सुपूर्वाद् ददातेः ष्ट्रन्, ष्ट्रनि बाहुलकाद् ह्रस्वत्वम्। सुदानः। 'त्वष्टा सुदत्रो विदधातु रायः' (ऋ० ७.३४.२२)॥

(५५) सुविदत्रः–सुपूर्वाद् 'विद ज्ञाने' (अदा० प० ५७) इत्यस्माद् 'अमियजिवधिपतिकलिनक्षिभ्योऽत्रन्' (स० क० २.३.८५) इति बाहुलकादत्रन्प्रत्ययो गुणाभावश्च। सुविद्यत इत्यर्थः। 'आग्ने याहि सुविदत्रेभिरर्वाङ्' (ऋ० १०.१५.९)॥

(५६) आनुषक्–अनुपूर्वात् 'षञ्ज सङ्गे' (भ्वा० प० ७१३) इत्यस्मात् क्विपि 'अनिदिताम्०' (अ० ६.४.२४) इति नलोपः, अनोरकारस्य दीर्घश्छान्दसः। अनुषक्तमुपर्युपरि लग्नमित्यर्थः। 'स्तृणन्ति बर्हिरानुषक्' (ऋ० ८.४५.१)॥

(५७) तुर्वणिः–तूर्णशब्दोपपदाद् वनोतेः 'इन् सर्वधातुभ्यः' (उ० ४.११९) इतीन्। तूर्णं वनोति सम्भजते। तूर्णवनिः [इति प्राप्ते तुर्वणिः]। 'स तुर्वणिर्महाँ अरेणु पौंस्ये' (ऋ० १.५६.३)॥

(५८) गिर्वणाः–गीःशब्दोपपदाद् वनोतेर्ण्यन्तादसुनि वनेर्घटादित्वेन मित्सञ्ज्ञकत्वाद् (भ्वा० ५५९) ह्रस्वत्वम् (अ० ६.४.९२)। गीर्वण इति

१. मृग्यम्।

प्राप्ते दीर्घाभावश्छान्दसः। निघण्टुकारपठितगीर्वाणशब्देन[१] समानार्थः। अतो देवोऽभिधेयः। स्तोतुरभिमतप्रदानादात्मानं स्तोतृभिः सम्भाजयति। भाष्ये तु (निरु० ६.१४) 'गीर्भिरिनं वनयन्ति' इत्यर्थनिर्वचनमिति स्कन्दस्वामी[२]। श्रीनिवासस्तु स्वार्थे णिच्। गीर्भिरिनं वनयन्ति। 'जुष्टं गिर्वणसे बृहत्' (ऋ० ८.८९.७)॥

(५९) **असूर्ते सूर्ते**–असुशब्दपूर्वस्य सुशब्दपूर्वस्य च 'ईर गतौ' (अदा० आ० ८) इत्यस्य निष्ठायां छान्दसत्वादिडभाव ईकारस्य पूर्वसवर्णे पूर्वत्र दीर्घश्छान्दसत्वात्। सप्तम्येकवचनम्[३]। असुः प्राणः। प्राणश्च वातः। वातसमीरिता मरुदादयोऽभिधेयाः[४]। सूर्त इति रजसीत्यस्य विशेषणम्। सुसमीरिते सुष्ठु प्रेरिते विस्तीर्णे रजसि अन्तरिक्षलोकेऽपीत्यर्थः। 'असूर्ते सूर्ते रजसि निषत्ते' (ऋ० १०.८२.४)॥

(६०) **अम्यक्**[५]–माशब्दद्वितीयैकवचन उपपदे अञ्चतेः क्विप् नकारलोपे माशब्दस्य इदादेशो[६] द्रष्टव्योऽकारोपजनेन च भाव्यम्। आयुधाख्या शक्तिरभिधेया। क्षिप्ता सती मां प्रति इव गता। यद्वा अभिपूर्वादञ्चतेः क्विनि अभ्यक् सती भकारस्य मकारापत्त्या अम्यक्। शत्रून् प्रत्यभिगता। यद्वा अमाशब्दः सहार्थे निपातः। अमाक् सती अम्यक् सहभूता। 'अम्यक् सा त इन्द्र ऋष्टिरस्मे' (ऋ० १.१६९.३)॥

(६१) **यादृश्मिन्**–यादृश इत्यर्थः। 'यादृश्मिन् धायि तमपस्यया विदत्' (ऋ० ५.४४.८)॥

(६२) **जारयायि**–उस्रविशेषणम्। तेन व्यत्ययेन नपुंसकत्वावगमः। ततश्चेदं नाख्यातम्, [जनेः] जार इत्यस्य वा धातोरेवम्भूतस्याख्यातस्यासम्भवात्, निघातप्रसङ्गतश्च। 'अन्ये तु जनेरत्यन्तानवगतमाख्यातमेतदिति मन्यन्ते। ततश्च जारयायि अजायतेत्यवगमः'[७] इत्युक्त्वा मन्त्रव्याख्याने निघातप्रसङ्गस्य भिन्नवाक्यत्वेन वाक्यादित्वादुदात्तप्रतिपादनेन परिहृतत्वाद् अजायतेत्येव स्कन्दस्वामिनोऽप्यवगमः। उस्रविशेषणवादिनां जारश्चासौ यायीति जारयायि। गवां यौवनस्य जरयितृत्वाज्जारत्वम्। गवामभिगमनाद्

---

१. निघण्टुकारो मृग्यः। 'अभिधानकोशकारः पठति–गीर्वाणाः स्युर्दिवौकसः' इति स्कन्दः (निरु० ६.१४)। २. स्कन्दटीका (निरु० ६.१४)।

३. आधेयत्वात् प्रथमैकान्तता युक्ता। द्र०–स्कन्दटीका (निरु० ६.१४)।

४. 'हि सेव्याः' इति मुद्रितेषु।

५. निघ० २.१४.३३ मध्ये पठितेऽपि सति म्यक्षधातौ, न तेन 'अम्यक्'शब्दो निर्मीयत इत्यत्र कारणं न विद्मः। (सु०)।

६. 'इददो' इति मुद्रितेषु। ७. स्कन्दटीका (निरु० ६.१५)।

यायित्वम्। 'उस्रः पितेव जारयायि यज्ञैः' (ऋ० ६.१२.४)॥

(६३) अग्रिया–अग्रशब्दोपपदाद् यातेः 'गेहेः कः' (अ० ३.१.१४४) इति बाहुलकात् कः। ग्राकारस्येकारः। तृतीयैकवचनस्याकारः। यद्वा अग्रमर्हति 'छन्दसि च' (अ० ५.१.६६) इति यप्रत्यय इकार उपजनः। अर्हार्थो वा घनि घस्य इयादेशो विभक्तेराकारः। अग्रार्हा। यद्वा अग्रा एवाग्रिया। अग्रभूताग्र्या। 'विश्वै अग्रियोत वाजाः' (ऋ० ४.३४.३)॥

(६४) चनः, (६५) पचता–पचतेर्ल्युट् 'कृत्यल्युटो बहुलम्' (अ० ३.३.११३) इति कर्मणि ल्युटि, पच्यत इति पचनम्। पचनशब्दस्य पकार-लोपेनान्ते सकारोपजनेन चनः। अन्नम्। यद्वा पचेरसुनि बाहुलकाद् नोऽन्तादेशः। पचतेः 'भृञ्दृशियजिपर्विपच्यमि०' (श्वेत० ३७४, उ० ३.१०३) [इत्यतच्] 'भूतेऽपि दृश्यन्ते' (अ० ३.३.२) इति वचनाद् भूते द्रष्टव्यः। विभक्तेराकारः। पक्वः पक्वौ पक्वा इति वावगमः। पदान्तरस्य बहुलसामर्थ्याद्[1] विशेषनिश्चयः। 'चनौ दधिष्व पचतोत सोमम्' (ऋ० १०.११६.८) इति बहुवचनस्य। 'तम्मेदस्तः प्रतिपचताग्रभीष्टाम्' (मै० सं० ४.१३.९) इति द्विवचनस्य। 'पुरोळा अग्ने पचतः' (ऋ० ३.२८.२) इत्येकवचनस्य॥

(६६) शुरुधः–शुचं दीप्तिं तापं वा रुधत्यः। 'अन्येभ्योऽपि दृश्यन्ते' (अ० ३.२.७५) इति क्विप्। शुग्रुधः शुरुधः। 'ऋतस्य हि शुरुधः सन्ति पूर्वीः' (ऋ० ४.२३.८)॥

(६७) अमिनः–'मा माने' (अदा० प० ५५)। निष्ठा क्तः। 'द्यतिस्यतिमास्थाम्०' (अ० ७.४.४०) इति इत्त्वम्। मितः परिच्छिन्नः। न मितोऽमितः सन्नमिनोऽपरिमाण इत्यर्थः, अपरिगणितकालो वा। यद्वा मिनोतेर्वधकर्मणः 'इण्सिञ्जिदीङुष्यविभ्यो नक्' (उ० ३.२) इति बाहुलकान्नक्। नञ्समासः। अमिनोऽहिंसितः केनचित्। यद्वा क्त एव प्रत्ययः। अमितोऽभ्यमितो वा सन् अमिनः। 'उत द्विबर्हा अमिनः सहोभिः' (ऋ० ६.१९.१)॥

(६८) जज्झतीः[2]–जज्झतीरापो भवन्ति शब्दकारिण्य इति। जस्। पूर्वसवर्णः। 'मरुतो जज्झतीरिव' (ऋ० ५.५२.६)॥

(६९) अप्रतिष्कुतः[3]–'स्कुञ् आप्रवणे' (क्र्या० उभ० ६)।

---

१. 'पदान्तरसम्बन्धसामर्थ्यात्' इति स्कन्दटीका (निरु० ६.१६)।

२. अनुकरणशब्द एष इति सामश्रमी। (सु०)।

३. तु०–चोष्कूयमाणः, चोष्कूयते। (निरु० ४.३)। (सु०)।

आप्रवणमागमनम्, प्रवतेर्गत्यर्थाद्[१] निष्ठा। अषोपदेशत्वाद् व्यत्ययेन षत्वम्। अन्येनाप्रतिगतोऽप्रतिष्कुतः। युद्धे अन्येनाप्रतिहतपूर्व इत्यर्थः, अप्रतिस्खलितपूर्वो वा। अत्र पक्षे स्खलितशब्दस्य ष्कुतभावः। 'अस्मभ्यमप्रतिष्कुतः' (ऋ० १.७.६)॥

(७०) शाशदानः—'शद्लृ शातने' (भ्वा० प० ५९४)। अस्माद् यङ्लुगन्ताद् व्यत्ययेन शानच्। पुनः पुनरसुरांस्तत्पुराणि वा शातयन्[२] 'प्र स्वां मतिर्मतिरच्छाशदानः' (ऋ० १.३३.१३)॥

(७१) सृप्रः—शिप्र इत्यत्र (निघ० ४.१.११) सृप्रशब्दो व्याख्यातः। 'सृप्रकरस्नमूतये' (ऋ० ८.३२.१०)। सृप्रौ करस्नौ बाहू यस्य सोमेन तर्पणाय, पालनाय वात्मनः। सर्पिस्तैलमपि सृप्रं सर्पणात्। निगमः पर्येष्यः॥

(७२) सुशिप्रः। शिप्रे व्याख्याते (निघ० ४.१.११)। शोभनत्वविशिष्टत्वमत्र विशेषः। सुहनुः सुनासो वा सुशिप्रः। 'वाजे सुशिप्र गोमति' (ऋ० ८.२१.८)। क्वचिच्छिप्रशब्देन शिरस्त्राणमुच्यते—'शिप्राः शीर्षसु वितता हिरण्ययीः'[३] इति। सुशिप्रः सुशिरस्त्राण इत्यर्थः सम्भवति॥

(७३) रंसु—रमतेर्विच्। सप्तमीबहुवचनम्। रमणीयेष्वित्यर्थः। रमणीयशब्दस्य रम्भावः। 'स चित्रेण चिकिते रंसु भासा' (ऋ० २.४.५)॥

(७४) द्विबर्हाः—द्विशब्दे सप्तम्यन्त उपपदे 'बृहु वृद्धौ' (भ्वा० प० ४८८) इत्यस्मादसुन्। द्वयोः स्थानयोर्वीर्य्येण परिवृढ इन्द्रः। न ह्यन्योऽन्तरिक्षे वीर्य्येण परिवृद्धः शक्नोति वर्षितुम्, नापि दिवि आदित्याद्रसान् परिग्रहीतुम्। दिवः सर्वदेवतासाधारणत्वाद् देवराजत्वेन च प्रसिद्धेरितिहासेषु [इन्द्रः] द्विबर्हा उच्यते। 'उत द्विबर्हा अमिनः सहोभिः' (ऋ० ६.१९.१)॥

(७५) अक्रः—आङ्पूर्वात् क्रमेः 'अन्येष्वपि दृश्यते' (अ० ३.२.१०१) इति डः, आङो ह्रस्वत्वम्। आक्रामति सर्वमित्यक्रः प्राकारः[४], आक्रम्यते वा। 'अक्रो न बभ्रिः समिथे महीनाम्' (ऋ० ३.१.१२)॥

(७६) उराणः—उरु कुर्वाण इति प्राप्ते नैकवर्णलोपादिना वाक्यार्थ उराण इति पदवचनम्। 'दूत ईयसे प्रदिव उराणः' (ऋ० ४.७.८)। स्वल्पमपि हविः उरु बहु कुर्वाणः। तथा च श्रुतिः—'यद् वै देवोऽजोषत हविस्तदतिमात्रं वर्द्धते अथोऽयमपरिमितः'[३] इति॥

(७७) स्तियानाम्—स्त्यायतेः संहननार्थाद् 'अन्येभ्योऽपि दृश्यन्ते'

---

१. 'स्कवतेर्गत्यर्थाद्वा' इति मुद्रितेषु। २. 'शातयन्तः' इति मुद्रितेषु।

३. मृग्यम्। ४. 'सर्वमित्यक्रमाकाशम्' इति मुद्रितेषु। तत्तु स्कन्ददुर्गाभ्यां न संवदते।

(अ० ३.२.७५) इति विच्। दृशिग्रहणस्य प्रयोगानुसरणार्थत्वान्निरुपपदादपि भवति। इकार उपजनः। षष्ठीबहुवचनम्। हिमभावेन संहता आप उच्यन्ते। 'वृषा सिन्धूनां वृषभः स्तियानाम्' (ऋ० ६.४४.२१)॥

(७८) स्तिपाः—स्तियाः पातीति विच्। स्तियापाः सन् स्तिपाः। यद्वा उपस्थितपाः सन् अनेकवर्णलोपादिना स्तिपाः। अग्निरुच्यते। स ह्याहुतिद्वारेण पालयिता, अङ्गभावौपगमनेन चोपस्थितानां कर्त्तव्यतया ज्योतिष्टोमादीनाम्। 'स नः स्तिपा उत भवा तनूपाः' (ऋ० १०.६९.४)॥

(७९) जबारु—जववद्भिर्जरवद्भिर्गरवद्भिर्वा रश्मिभिर्यदारोहति नभस्तदादित्यमण्डलमुच्यते। जववज्जरवद्गरवच्छब्दानां जबभावः, आङ्पूर्वाद्रुहेश्च डुप्रत्ययो निपात्यते। 'अग्रे रुप आरुपितं जबारु' (ऋ० ४.५.७)॥

(८०) जरूथम्—गृणातेः स्तुतिकर्मणो जरतेर्वार्चतिकर्मणः 'जॄवृञ्भ्यामूथन्' (उ० २.६) इति भावे करणे वा ऊथन्। बाहुलकाद् गकारस्य जकारः। स्तवनं स्तूयतेऽनेनेति वा जरूथं स्तोत्रम्। 'जरूथं हन्यक्षि राये पुरन्धिम्' (ऋ० ७.९.६)॥

(८१) कुलिशः—वज्रनामसु व्याख्यातम् (निघ० २.२०.१२)। स एव निगमः (ऋ० १.३२.५)॥

(८२) तुञ्जः—तुञ्जतेर्दानकर्मणो भावे घञ्। दानमित्यर्थः। 'तुञ्जेतुञ्जे य उत्तरे' (ऋ० १.७.७)। वज्रोऽपि तुञ्जस्तत्रैव व्याख्यातः[1]॥

(८३) बर्हणा—बृहेर्वृद्ध्यर्थस्य 'कृत्यल्युटो बहुलम्' (अ० ३.३.११३) इति भूते कर्त्तरि ल्युट्। परिवृद्धः। हिंसाकर्मणो वा भावे। हिंसा बर्हणा। तृतीयैकवचनस्थाने डादेशः। 'बृहच्छ्रवा असुरो बर्हणा कृतः' (ऋ० १.५४.३)॥

(८४) ततनुष्टिम्—'तनिमृङ्भ्यां किच्च' (उ० ३.८८) इति तनोतेः तन्प्रत्ययः, नुदेर्निष्ठायां नुन्नं नुष्टिभावः। यद्वा ततशब्दस्य ततन्भावः, वशेर्बाहुलकात्[2] कर्त्तरि क्तिचि सम्प्रसारण उष्टिः। तद्धर्मसन्तानादग्निहोत्रादेः कर्मणो नुन्नः प्रेरितः, ततनं भोगसन्तानं वष्टि ततनुष्टिः, नलोपाभावः। ततनुष्टिम्। 'अपाप शक्रस्ततनुष्टिमूहति' (ऋ० ५.३४.३)॥

(८५) इळीबिशः—इळाशब्द उदकशब्दपर्यायः। इळा अन्नम्, अत्रान्नहेतुभूत उदके वर्त्तते। बिले दरे शेत इति 'अधिकरणे शेतेः' (अ० ३.२.१५) इत्यच्। इळाबिले शयो यस्य। निपातश्छान्दसः[3]। मेघ उच्यते। इळाबिलशयः

---

१. द्र०—निघ० २.२०.१३। तत्र मुद्रितेषु तुजो व्याख्यात उपलभ्यते।

२. 'वशेर्वाः बाहुलकात्' इति मुद्रितेषु। ३. इळाशब्दस्य पूर्वनिपातश्छान्दस इत्यभिप्रायः।

सन् इळीबिशः। 'न्याविध्यदिळीबिशस्य दृळ्हा' (ऋ० १.३३.१२)॥

(८६) कियेधाः—कियच्छब्दे क्रममाणशब्दे वोपपदे दधातेर्विच्। कियदप्यविज्ञायमानपरिमाणं स्वबलं धारयति, क्रममाणं वाभिमुखं परबलं धारयति निरुणद्धीति। कियद्धा क्रममाणधा वा सन् कियेधाः। इन्द्रो विशेष्यः। 'वृत्राय वज्रमीशानः कियेधाः' (ऋ० १.६१.१२)॥

(८७) भृमिः—'भ्रमेः सम्प्रसारणञ्च' (उ० ४.१२२) इतीन्प्रत्ययः। अग्निरुच्यते। भ्रमिता। स्वयं त्रिष्वपि लोकेष्वप्रतिहतगतिरित्यर्थः। अन्तर्णीतण्यर्थो वा भ्रमिः। भ्रमयिता। 'भृमिरस्यृषिकृन्मर्त्यानाम्' (ऋ० १.३१.१६)॥

(८८) विष्पितः—विप्राप्तशब्दस्य विष्पितभावः। यद्वा विषेर्व्याप्त्यर्थात् क्तः, इकारपकारावुपजनौ। विस्तीर्ण इत्यर्थः। 'पारं नो अस्य विष्पितस्य पर्षन्' (ऋ० ७.६०.७)॥

(८९) तुरीपम्—तूर्णं व्याप्तुं शीलमस्य णिनिः। तुर्णापि सत् तुरीपम्। उदकमभिधेयम्। 'तन्नस्तुरीपमद्भुतम्' (ऋ० १.१४२.१०)॥

(९०) रास्पिनः—रपतेर्वा रसतेर्वा कर्मणि भावे वा घञ्। रापो रासो वा शब्दः, स यस्य तद्रापि रासि वा सत् सकारपकारोपजनेन रास्पिशब्दः। बहूदकं स्तोत्रं वोच्यते। तदस्यास्तीत्यर्शआदित्वाद् (अ० ५.२.१२७) अच् प्रकृतिभावश्च द्रष्टव्यः, दण्डिमती शालेति यथा। अतश्च शब्दवदुदकं तद्वान्मेघोऽभिधेयः। उच्चार्यमाणेन स्तोत्रेण स्तोता वा। 'प्रमातरा रास्पिनस्यायोः' (ऋ० १.१२२.४)॥

(९१) ऋञ्जतिः—धातुनिर्देशाद् 'ऋजि भर्जने' (भ्वा० आ० १०८) भूवादिरत्र प्रसाधनकर्मा। विषमस्य समीकरणं प्रसाधनम्। आत्मसात्करणं तदर्थ इत्यर्थः। 'यजिष्ठमृञ्जसे गिरा' (ऋ० ४.८.१)॥

(९२) ऋजुनीती—'ऋजुनीती नो वरुणः' (ऋ० १.९०.१)॥

(९३) प्रतद्वसू—प्रात्तवसू प्रात्तधनौ[1]। पकारलोपह्रस्वत्वतकारोपजनैः प्रतद्वसू। हरी विशेष्यौ। 'हरी इन्द्र प्रतद्वसू अभि स्वर' (ऋ० ८.१३.२७)॥

(९४) हिनोत—'हि गतौ' (स्वा० प० ११)। लोटि थस्य तः 'छन्दस्युभयथा' (अ० ३.४.११७) इत्यार्द्धधातुकत्वाद् ङित्वाभावे गुणः प्रहिणुतेत्यर्थः। 'हिनोता नो अध्वरं देवयज्या' (ऋ० १०.३०.११)॥

(९५) चोष्कूयमाणः, (९६) चोष्कूयते—'स्कुञ् आप्रवणे' (क्र्या० उभ० ६) इह दानार्थः, क्वचिद् व्युदसनार्थश्च। यङि पूर्वत्र लट् शानच्,

---

१. 'प्रात्तवसुनौ' इति मुद्रितेषु।

उत्तरत्र लट्। व्यत्ययेन षत्वम्। 'चोष्कूयमाण इन्द्र भूरि वामम्' (ऋ० १.३३.३)। अत्यर्थं दददित्यर्थः। 'चोष्कूयते विश इन्द्रो मनुष्यान्' (ऋ० ६.४७.१६)। अत्यर्थं व्युदस्यति॥

(९७) **सुमत्**–स्वयमित्यर्थे वर्त्तमानो निपातः। 'उपप्रागात् सुमन्मेऽधायि मन्म' (ऋ० १.१६२.७)॥

(९८) **दिविष्टिषु**–दिविशब्दोपपदाद् इषेर्गत्यर्थादिच्छार्थाद्वा करणे क्तिन्। द्यौर्गम्यते प्रार्थ्यते वा याभिस्ताः। 'कुरुङ्गस्य दिविष्टिषु' (ऋ० ८.४.१९)॥

(९९) **दूतः**–जवतेर्द्रवतेर्वारयतेर्वा 'दुतनिभ्याम्०' (उ० ३.९०) इति बाहुलकात् क्तप्रत्ययो धातूनां दूभावश्च। गच्छति हि सः, द्रवते वा शैघ्र्यात्, वारयति हि स्वसामर्थ्यादिभिरपरम्। 'स्तोमो दूतो हुवन्नरा' (ऋ० ८.२६.१६)॥

(१००) **जिन्वति**–जिविः प्रीणात्यर्थः भूवादिः (प० ३९२) इदित्त्वान्नुम्। 'भूमिं पर्जन्या जिन्वन्ति' (ऋ० १.१६४.५१)॥

(१०१) **अमत्रः**–अमात्रशब्दस्य ह्रस्वः। मात्रा परिमाणम्। अपरिमाणोऽभ्यमितो वा अहिंसितः। मितशब्दस्य मत्रभावः। 'महाँ अमत्रो वृजने विरप्शी' (ऋ० ३.३६.४)॥

(१०२) **ऋचीषमः**–'ऋच स्तुतौ' (तु० प० १९)। इप्रत्ययः। 'कृदिकारात्०' (अ० ४.१.४५ ग० सू०) इति ङीष्। ऋची स्तुतिः। तया समः। अधिकगुणाध्यारोपेणापि कृता स्तुतिर्नातिरिच्यत इत्यर्थः। 'स्तवै वज्र्यृचीषमः' (ऋ० १०.२२.२)॥

(१०३) **अनर्शरातिम्**–अर्शशब्दोऽश्लीलवाची। रातेः क्तिनि रातिर्दानम्। अश्लीलविषया रातिर्दानं यस्य सोऽर्शरातिः पापकदानस्तद्विपरीतोऽनर्शरातिः। उत्कृष्टस्य दातेत्यर्थः। 'अनर्शरातिं वसुदामुप स्तुहि' (ऋ० ८.९९.४)॥

(१०४) **अनर्वा**–अर्त्तेः 'अन्येभ्योऽपि दृश्यन्ते' (अ० ३.२.७५) इति वनिप्। नञ्समासः। 'अर्वणस्त्रसावनञः' (अ० ६.४.१२७) इति तृभावाभावः[१]। अप्रत्यृतोऽप्रतिगतोऽन्यस्मिन्, अन्यमनाश्रितः, स्वतन्त्र इत्यर्थः। 'अनर्वाणं वृषभं मन्द्रजिह्वम्' (ऋ० १.१९०.१)। अनर्वाणमप्रतिगतमन्यं प्रत्याश्रिततया अपराश्रितमित्यर्थः[२]॥

(१०५) **असामि**–असामीत्यनवगतम्। अत्र च सामिशब्द एवानवगतः, यत आह–'सामि प्रतिषिद्धम् असामि' (निरु० ६.२३) इति। सामि कस्मात्? स्यतेः समाप्त्यर्थस्येति केचित्। तेन सामि समाप्तमसमाप्तं चोच्यते।

---

१. 'शतृवद्भावाभावः' इत्यपपाठो मुद्रितेषु। २. स्कन्दटीका (निरु० ६.२३)।

तस्य नञ्प्रतिषेधः। ततश्च असामि असमाप्तमित्यर्थः। अथवा न सामीति। किन्तर्हि? असुसमाप्तमिति पाठान्तरेणार्थमाह। उदाहरणम्–'असाम्योजो बिभृथा सुदानवः' (ऋ० १.३९.१०)। असामि असमाप्तमनन्तमित्यर्थः। सुष्ठु वा असमाप्तं महदित्यर्थः[१]। 'स्यतेः कित्'[२] इति बाहुलकाद् मिन्प्रत्ययः। साम्यर्थोऽर्धमसामि समग्रमित्यस्य[३] भाष्ये द्रष्टव्यम्॥

(१०६) **गल्दया**–गल्दाशब्दो गालनपर्यायः। गल्दया गालनेन क्षारणेन प्रदानेन पूरणेन तृप्तेनेत्यर्थः। 'मा त्वा सोमस्य गल्दया' (ऋ० ८.१.२०)॥

(१०७) **जलहवः**–ज्वलतेः क्विपि ज्वलनं ज्वल्, ज्वलं जहातीति 'मृगय्वादयश्च' (उ० १.३७) इति कुप्रत्ययः पूर्वपदस्य जलभावश्च निपात्यते। ज्वलनेनाग्निना हीना इत्यर्थः। 'नारायासो न जलहवः' (ऋ० ८.६१.११)॥

(१०८) **बकुरः**–भास्करशब्दस्य भासमानद्रवणशब्दस्य[४] वा बकुरभावः। 'अभि दस्युं बकुरेणाधमन्त' (ऋ० १.११७.२१)। बकुरेण भास्करेण दीप्तेन भयङ्करेण वा भासमानगमनेन वा सामर्थ्यात् स्वेनायुधेन ज्योतिषा वा॥

(१०९) **बेकनाटान्**–बेक इति द्विशब्दस्यार्थे बहुशो दृष्टः। एकं कार्षापणमापणिकाय[५] प्रयच्छन् द्वौ मह्यं प्रदातव्यावित्येवमभिधेयेन दर्शयति। ततो द्विशब्दादेकशब्दान्नाटयतेश्च बेकनाटा=एतत्। एतेनाह–'द्विगुणकारिणो वा द्विगुणदायिनो वा द्विगुणं कामयन्त इति वा' (निरु० ६.२६) इति। द्व्येकयोर्नाटो नटनम्, तद्वन्तो बेकनाटाः। मत्वर्थीयस्य लुक्। नटेर्घञि नाटः। द्व्येकशब्दस्य बेकभावः। वार्द्धुषिका अभिधेयाः। 'इन्द्रो विश्वान् बेकनाटाँ अहर्दृशः' (ऋ० ८.६६.१०)॥

(११०) **अभिधेतन**–धावतेर्लोण्मध्यमपुरुषबहुवचनस्य 'तप्तनप्तनथनाश्च' (अ० ७.१.४५) इति तनबादेशः। धावशब्दस्य धेभावः। अभिधावत। 'जीवान्नो अभिधेतन' (ऋ० ८.६७.५)॥

(१११) **अंहुरः**–आङ्पूर्वाद्धन्तेर्मृगय्वादित्वात् (उ० १.३७) कुप्रत्ययः। आङो ह्रस्वत्वं मुगागमश्च निपात्यते[६]। आहन्ति श्रेयसो विनाशयतीति[७]

---

१. अयं सम्पूर्णः सन्दर्भः स्कन्दटीकात (निरु० ६.२३) उद्धृतः।

२. मृग्यम्। ३. 'साम्यर्थधर्मसामिसमग्रमित्यस्य' इति मुद्रितेषु।

४. '०द्रविण०' इति मुद्रितेषु।

५. 'कार्षापणमृणिकाय' इति स्कन्दटीका (निरु० ६.२६)।

६. तु०–निरु० ४.२५। ७. 'विनश्यन्तीति' इति मुद्रितेषु।

अंहुः पापम्, रो मत्वर्थीयः, अंहुरः। अंहस्वान्। 'तासामेकामिदभ्यंहुरो गात्' (ऋ० १०.५.६)॥

(११२) बतः–सत्त्ववाची प्रथमान्तः। बलादतीत इति वाक्यस्यार्थे पदम्। बलशब्दादततेर्निष्ठायां च बलातीतः सन् बतः, दुर्बल इत्यर्थः। बत निपातोऽसत्त्ववचनोऽव्ययम्, खेदो दुःखं मानसम्, अनुकम्पा दया, तयोर्वर्त्तते। 'बतो बतासि यम नैव ते मनः' (ऋ० १०.१०.१३)॥

(११३) वाताप्यम्–आङ्पूर्वादाप्यायतेरन्तर्णीतण्यर्थाद् 'अन्येष्वपि दृश्यते' (अ० ३.२.१०१) इत्यपिशब्दस्य सर्वोपाधिव्यभिचारार्थत्वात्[1] कर्मणि डः। उदकं वृष्टिलक्षणमभिधेयम्। वातः पुरोवात एतद् वृष्ट्युदकमाप्याययति, वातेनाप्याय्यत इत्यर्थः। अथवा वातो यदाप्याययतीति कर्मोपपदात् कर्त्तरि प्रत्ययः। वातमाप्याययति वाताप्यम्। 'पुनानो वाताप्यं विश्वश्चन्द्रम्' (ऋ० ९.९३.५)॥

(११४) चाकन्[2]–चायतेः स्वरितेत्त्वाल्लटः शतरि यकारस्य ककारो बाहुलकात्। अनेकार्थत्वादिच्छार्थोऽपि। चायन् कामयमानो वा। 'वने न वायो न्यधायि चाकन्' (ऋ० १०.२९.१)। शाकल्यपक्षे चाकन्नित्याख्यातम्। तत्र लङि[3] झिर्यस्य कत्वं 'बहुलं छन्दस्यमाङ्योगेऽपि' (अ० ६.४.७५)। कामयत इत्यर्थः॥

(११५) रथर्यति–रथमात्मन इच्छतीति क्यचि रथीयतीति प्राप्ते रेफ उपजनो व्यवधानादीत्वाभावः। 'एष देवो रथर्यति' (ऋ० ९.३.५)॥

(११६) असक्राम्–सम्पूर्वात् समानपूर्वाद्वा क्रमेः 'जनसनखनक्रमगमो विट्' (अ० ३.२.६७)। छन्दस्युपसर्गेऽपि इति हि तत्रानुवर्त्तते। 'विड्वनोरनुनासिकस्यात्' (अ० ६.४.४१)। मकारस्य[4] लोपश्छान्दसः। 'समानस्य छन्दस्यमूर्द्ध०' (अ० ६.३.८३) इति समानशब्दस्य सभावः। न सक्रा असक्रा तां यावज्जीवमनपायिनीमस्मत्सजातैरप्राप्तपूर्वामित्यर्थः। 'धेनुं न इषं पिन्वतमसक्राम्' (ऋ० ६.६३.८)॥

(११७) आधवः–'धूञ् कम्पने' (क्र्या० प० १६)। पचाद्यच् (अ० ३.१.१३४)। अन्तर्णीतण्यर्थोऽत्र धूञ्। आधावकः। कम्पयितेत्यर्थः। 'विप्राणाञ्चाधवम्' (ऋ० १०.२६.४)॥

---

१. द्र०–काशिका (अ० ३.२.१०१)।

२. तु०–कनति, कानिषद् निरु० ४.१५। (सु०)।

३. 'लटि' इत्यपपाठो मुद्रितेषु। ४. 'आतो' इति मुद्रितेषु। समो मलोपोऽभिप्रेयते।

(११८) अनवब्रवः–ब्रूञः 'ऋदोरप्' (अ० ३.३.५७)। 'छन्दस्युभयथा' (अ० ३.४.११७) इत्यपः सार्वधातुकत्वाद् वच्यादेशो न भवति। ब्रवः वचनम्। अनवक्षिप्तवचनः। 'प्रादिभ्यो धातुजस्योत्तर०' (अ० २.२.२४ वा०) इति समासादिः। अप्रतिहतशासन इत्यर्थः। 'विजेषकृदिन्द्र इवानवब्रवः' (ऋ० १०.८४.५)॥

(११९) सदान्वे–सदानोनुवाशब्दात् सम्बुद्धौ, नोनुवाशब्दस्य न्वाभावः। दुर्भिक्षाधिदेवता अलक्ष्मीर्वाभिधेया। सदाकणनलक्षणशब्दकारिणीत्यर्थः[१]। 'गिरिङ्गच्छ सदान्वे' (ऋ० १०.१५५.१)॥

(१२०) शिरिम्बिठः–'शिरिम्बिठस्य सत्त्वभिः' (ऋ० १०.१५५.१)॥

(१२१) पराशरः–परापूर्वस्य शृणातेर्विशरणार्थस्य हिंसार्थस्य वा 'ऋदोरप्' (अ० ३.३.५७) इति रूपम्। पराशीर्णः पराशर ऋषिः[२]। पराशीर्णस्य स्थविरस्य वसिष्ठस्य[३] नप्ता, चिरमृते शक्तौ जात इत्यर्थः। 'पराशरः शतयातुर्वसिष्ठः' (ऋ० ७.१८.२१)। रक्षसां पराशातयिता पराशर इन्द्रः। 'इन्द्रो यातूनामभवत् पराशरः' (ऋ० ७.१०४.२१)॥

(१२२) क्रिविर्दती[४]–'कृविघृष्विच्छविस्थविकिकीदिवि' (उ० ४.५६) इति विन्प्रत्ययो रिङादेशश्च निपात्यते। ददातेः शतरि 'बहुलं छन्दसि' (अ० २.४.७३) इति शपो लुक्। 'उगितश्च' (अ० ४.१.६) इति ङीप्। क्रिवेर्विकर्त्तनस्य दती। रेफ उपजनः। शतघ्न्यामायुधविशेषे वर्त्तते। 'यत्रा वो दिद्युद्रदति क्रिविर्दती' (ऋ० १.१६६.६)॥

(१२३) करूळती–कृत्तदन्तशब्दस्य करूळतीभावः। 'सुपां सुलुक्०' (अ० ७.१.३९) इति सोर्लुक्। स्त्रीलिङ्गप्रतिरूपकमेतत्। 'तत्कः' (निरु० ६.३१) इति पुंल्लिङ्गनिर्देशात् पूषोच्यत इति निश्चयः। भग इति पूर्वः पक्षः। तस्मात् 'अदन्तकः पूषा' (श० ब्रा० १.७.४.७) इति च श्रुतिः। 'वामं देवः करूळती' (ऋ० ४.३०.२४)॥

(१२४) दनः–दानमनस इत्यस्य दनस्भावः। दानमनस इत्यर्थः। 'दनो विश इन्द्र मृध्रवाचः' (ऋ० १.१७४.२)॥

(१२५) शरारुः[५]–समुपसर्गार्थविशिष्टात् शृणातेः 'शृवन्द्योरारुः' (अ०

---

१. 'सदाकरणनलक्षण०' इति मुद्रितेषु।

२. 'कृषिः' इत्यपपाठो मुद्रितेषु।

३. 'लघिष्ठस्य' इत्यपपाठो मुद्रितेषु।

४. तु०–क्रिविशब्देन–निघ० ३.२३.८। (सु०)।

५. तु०–'शरुमान्'–निरु० ५.१२। (सु०)।

३.२.१७३) इति ताच्छील्यादिषु विहित आरुर्व्यत्ययेन इच्छायां भवति। 'शारुरभिर्मन्यते' (ऋ० १०.८६.९)। संशिशरिषुः संशिशयिषुर्वा दीर्घनिद्रया हि मन्यते। दुष्टेनातिशयेनाभिभवति[१]॥

(१२६) **इदंयुः**—इत्यनवगतं क्यचि मान्ताव्ययप्रतिषेधात्[२]। इदं कामयमान उच्यते। कर्म इदंसामान्येन प्रदर्शितं यथाभिलषितं धनादि। तद् य इच्छति स इदंयुः। [तेन चेदं] शंयुः किंयुः विप्रयुः इत्याद्यवगतानवगतक्यजन्तमात्रोपसङ्ग्रहार्थं निगमेषु पठितम्, न विशेषार्थमिति निरुक्तकाराभिप्रायः। अत एव च सामान्यविशेषयोरुदाहरणमिदम्। तेषाञ्च 'वसूयवो वसुकामाः' (निरु० ६.६) इत्यादिषु बहुधा गतत्वाद् विशेषेण नेह किञ्चिद् भाष्यकार उदाजहार। अनेकार्थतां दर्शयन्नाह—'अथापि तद्वदर्थे भाष्यते' (निरु० ६.३१) प्रयुज्यत इत्यर्थः। तद्वदिति मतुप्प्रकृतिः सामान्येन निर्दिश्यते। तेन तद्वदर्थे मत्वर्थ इत्यर्थः[३]। 'अश्वयुर्गव्यू रथयुर्वसूयुरिन्द्रः' (ऋ० १.५१.१४)॥

(१२७) **कीकटेषु**—मन्त्रे सप्तम्यन्त इति तथैव निगमेषु पठ्यते। किंकृताः, किंक्रिया वा सन्तः कीकटाः। किं कृताः किमर्थमुत्पादिता असदाचाराः। अथवा यागदानादिभिः क्रियाभिः कृताभिः [किम्] पिबतखादतेत्येवमभिप्राया प्रेप्सा प्रेक्षा[४] येषां ते किंक्रियाः। 'किन्ते कृण्वन्ति कीकटेषु गावः' (ऋ० ३.५३.१४)। कीकटनाम्न्यनार्यनिवासे देशे। कृपणा वा कीकटाः॥

(१२८) **बुन्दः**, (१२९) **वृन्दम्**—भिन्द इति वा भयद इति वा भासमानो द्रवतीति वा वाक्यार्थे पदवचनं विदारणभयदानभासमानद्रवणलक्षणानामर्थेषु सम्भवात्। अक्षरवर्णसामान्याच्चेदमुक्तम्[५]। 'वृङ् सम्भक्तौ' (क्र्या० आ० ४२)। 'वृतुसुकुभ्यो नुं च' (स० क० २.२.१६६) इति दन्प्रत्ययः [नुमागमश्च]। वबयोरभेदः। बाहुलकाद् उकारो गुणाभावश्च[६]। अनेकार्थत्वात् पूर्वोक्तार्थवृत्तित्वं बोद्धव्यम्। बुन्दो वज्रम्। 'साधुर्बुन्दो हिरण्ययः' (ऋ० ८.७७.११)। 'इन्द्रो बुन्दं स्वाततम्' (ऋ० ८.७७.६)॥

वृन्देषु शत्रुविदारणभयदानभासमानद्रवणरूपा[७] अर्थाः सम्भवन्ति। प्रसिद्धत्वान्निगमो न प्रदर्शितः॥

---

१. '०शयेन हि भवति' इति कोशेषु। २. द्र०—काशिका (अ० ३.१.८ वा०)।
३. सम्पूर्णमिदं विवरणं स्कन्दटीकात (निरु० ६.३१) उद्धृतम्।
४. 'नेह' इति मुद्रितेषु।
५. 'पदलक्षणवर्ण०' इति मुद्रितेषु।
६. 'लुगभावश्च' इति मुद्रितेषु।
७. 'शत्रुविदारणभयदारणभयदान०' इति मुद्रितेषु।

(१३०) किः–करोतेः 'वेञो डित्'[1] (श्वेत० ५६९, द०उ० १.६२) इति बाहुलकाद् इण्प्रत्ययः। कर्त्तेत्यर्थः। 'अ॒यं यो होता॒ कि॒रु स य॒मस्य॒' (ऋ० १०.५२.३)॥

(१३१) उल्बम्–ऊर्णोतेर्वृणोतेर्वा। 'अलिशलोरत उच्च' (स० क० २.२.२२१) इति विधीयमानो बप्रत्ययो बाहुलकाद् भवति, प्रकृतेरुल्भावश्च। गर्भस्याच्छादनमभिधेयम्। 'म॒हत्तदुल्ब॒ं स्थवि॑र॒ं तदा॑सी॒त्' (ऋ० १०.५१.१)। जरायोरन्तर्गर्भवेष्टनं श्रुतम्॥

(१३२) ऋबीसम्–पृथ्व्यभिधेया। अपगतभासमित्येवमाद्याः (निरु० ६.३५) शब्दसमाधय उपपद्यन्ते। धात्वन्यत्वकृतो विशेषः। अपगतापचितापह्रुतान्तर्हितशब्दानामन्यतमत् पूर्वपदं भासशब्द उत्तरपदम्। पूर्वस्य ऋभावः, भकारस्य बकार आकारस्य ईकारश्च। 'ऋ॒बीसे॒ अत्रि॑मश्वि॒नाव॑नीतम्' (ऋ० १.११६.८)॥

अध्यायपरिसमाप्तिकं द्विर्वचनम्॥

इति द्वात्रिंशच्छतं पदानि॥ ३॥

इति देवराजयज्वविरचिते
नैगमकाण्डनिर्वचने चतुर्थोऽध्यायः॥ ४॥
इति नैगमं नाम द्वितीयं काण्डं समाप्तम्॥

—०—

---

१. 'वयिः' इति मुद्रितेषु।

पञ्चमोऽध्यायः

अपि देवताकाण्डनिर्वचनं व्याख्यायते–

अ॒ग्निः (१)। जा॒तवे॑दाः (२)। वै॒श्वा॒न॒रः (३)। इति त्रीणि पदानि ॥ १ ॥

(१) अग्निः–अग्राद्युपपदाद् नयतेः 'सत्सूद्विष०' (अ० ३.२.६१) इत्यादिना क्विप्। पृषोदरादित्वाद् (अ० ६.३.१०९) अग्निः। यद्वा 'वेञो डित्'[१] (श्वेत० ५६९, द० उ० १.६२) इति बाहुलकादिण्प्रत्ययोऽग्रशब्दस्य रेफाकारयोर्लोपश्च। अग्रणीः। मुख्यत्वञ्च 'अग्निर्हि देवानां सेनानीः'[२] इति श्रुतेः। अग्रं प्रथमं यज्ञेषु कर्त्तव्येषु तादर्थ्येन प्रणीयते। अङ्गोपपदाद् वा समर्थविशिष्टाद् नयतेः पूर्ववदिकारः [प्रत्ययो] लोपश्च। अङ्गं शरीरं यज्ञस्य, तत् सन्नममानः स्वयमेव प्रह्वीभवन् हविषां पाककरणत्वेन साधनभावं प्रतिपाद्यमानो नयति। नञ्पूर्वात् क्नोपयतेः स्नेहनार्थात् किन्प्रत्यये ककारनकारव्यतिरिक्तं लुप्यते, ककारस्य गकारापत्तिश्च। नञ्विशिष्टेन स्नेहनेन च तद्विपरीतं विरूक्षणं लक्ष्यते, विरूक्षयतीत्यर्थः। दग्धव्यस्य एधादेः शोषणाद् [अक्नोपनो] विरूक्षण इत्यर्थः। यद्वा एतेरयनमित्यादौ दर्शनादकारः, अञ्जेर्जकारस्य दहेर्हकारस्य च निष्ठायां गकारापत्तिर्दृष्टेति[३] तयोरन्यतरस्माद् गकारः, नयतेः पूर्ववन्निः। इतश्च अञ्जनमभिव्यक्तं च सुप्रकाशकत्वाद्दाहात्मकत्वेन वा नयति हविर्देवान् प्रतीत्यग्निः[४]। 'अ॒ग्निमी॑ळे पु॒रोहि॑तम्' (ऋ० १.१.१)॥

(२) जातवेदाः–जातशब्दोपपदाद् वित्तेर्विदेर्विचारार्थाद्वा असुन्, जातानि सर्वाणि भूतानि वेद, लोकपालत्वात्। जाते जाते सर्वस्मिन् भूतजाते विद्यते। जातं वेदो हविर्लक्षणं धनमैश्वर्यादि इतरद् वा यस्य सः। जातं वेदो विचारणं यस्य, वैश्वानरविद्यायामिह[५] च कृतविचार इत्यर्थः। जातमात्र एव विद्योतते प्रज्ञानस्वभावत्वात्, जातं वेदः प्रज्ञानं वा अस्य। 'प्रनूनं जा॒तवे॑दस॒म्' (ऋ० १०.१८८.१)॥

---

१. 'वयिः' इति मुद्रितेषु।
२. तु०–ऋ० १०.११०.११।
३. '०द्रष्टव्येति' इति मुद्रितेषु।
४. 'हविर्देवान् प्रति' इति नास्ति मुद्रितेषु।
५. 'वैश्वानरविद्ययापि' इति मुद्रितेषु।

(३) **वैश्वानरः**—विश्वान् नरान् इतो लोकाद् लोकान्तरं नयति। इदमर्थेऽण्[१], विश्वानराणां नेतृत्वेन सम्बन्धी[२] ते वा कर्मार्थं प्रणेतृत्वेन सम्बन्धिनोऽस्य वैश्वानरः। 'अन्येषामपि दृश्यते' (अ० ६.३.१३६) इति दीर्घः। अपि वा विश्वान् जन्तून् अरः। 'ऋ गतौ' (जु० प० १६) इत्यस्य छान्दसत्वाद् भूते पचाद्यच्, उपपदविभक्तेश्चालुक्। सर्वाणि भूतान्यरः प्रत्यृतः प्रतिगतः प्रविष्ट इति विश्वानरः प्राणः। तेन जन्यमानत्वात्तस्यापत्यं वैश्वानरः। 'प्राणाद्धि बलान्मथ्यमानो हि जायते'[३] इति ब्राह्मणम्। 'वै॒श्वा॒न॒रस्य॑ सु॒म॒तौ स्या॑म॒' (ऋ० १.९८.१)॥

इति त्रीणि पदानि॥ १॥

द्र॒वि॒णो॒दाः (१)। इ॒ध्मः (२)। तनू॒नपा॑त् (३)। नरा॒शंसः॑ (४)। इ॒ळः (५)। ब॒र्हिः (६)। द्वारः॑ (७)। उ॒षासा॒नक्ता॑ (८)। दैव्या॒होता॑रा (९)। ति॒स्रो दे॒वीः (१०)। त्वष्टा॑ (११)। वन॒स्पतिः॑ (१२)। स्वाहाकृतयः (१३)। इति त्रयोदश पदानि॥ २॥

(१) **द्रविणोदाः**—द्रविणशब्दो व्याख्यातो धननामत्वेन (निघ० २.१०.२५)। तस्य सकार उपजनः। ददातेरसुनि बाहुलकादाकारलोपः। धनस्य बलस्य वा दाता द्रविणोदाः। 'द्र॒वि॒णो॒दा द्रवि॑णसः' (ऋ० १.९६.८)। ऋतुयाजप्रैषेषु सकारलोपो द्रष्टव्यः[४]॥

(२) **इध्मः**—'ञिइन्धी दीप्तौ' (रुधा० आ० ११)। इध्यतेऽनेनाग्निरिति इध्मो यज्ञेध्म। समिध्यत इत्यस्ति अग्नेः समिन्धत्वम्। ज्वलन्नाम वेध्मः। 'समि॑द्धो अ॒द्य मनु॑षो दुरो॒णे' (ऋ० १०.११०.१)॥

(३) **तनूनपात्**—नपाच्छब्दोऽपत्यनामसु व्याख्यातः (निघ० २.२.१३)। इह पौत्रे वर्त्तते। यद्वा नतशब्दस्य[५] नपाद्भावः। पुत्रापेक्षया नीचैः सुतरां नतो[५] हि पौत्रः। तनोतेः 'भृमृशीतृचरित्सरितनिधनिमिमस्जिभ्य उः'[६] (उ० १.७)। तन्वन्त्यस्यां पयआदिभोगाः इति तनूः गोनाम। अस्याः पयो जायते। पयस

---

१. 'तस्येदम्' (अ० ४.३.१२०)। २. 'सम्पद्यन्ते' इति मुद्रितेषु। ३. मृग्यम्।

४. द्र०—'देवं द्रविणोदाम्' (कुन्तापाध्यायः प्रैषाः ४८-५१)।

५. 'नुत०' इत्यपपाठो मुद्रितेषु।

६. वस्तुतस्तु 'कृषिचमितनिधनिसर्जिखर्जिभ्य ऊः' (द० उ० १.१६४) इति पाठोऽत्र युज्यते।

आज्यमिति। आज्यं तनूनपात्। अथवा तता अन्तरिक्ष इति तन्व आपः। ताभ्य ओषधिवनस्पतयो जायन्ते। ओषधिवनस्पतिभ्योऽग्निर्जायत इति अग्निस्तनूनपात्। 'तनूनपात्पथ ऋतस्य यानात्' (ऋ० १०.११०.२)॥

(४) नराशंसः—नरैर्ऋत्विग्भिः शस्यतेऽस्मिन्। 'अन्येषामपि दृश्यते' (अ० ६.३.१३६) इति दीर्घः। यज्ञ उच्यते। नरैः प्रशस्यते स्तूयत इत्यग्निः। 'नराशंसस्य महिमानमेषाम्' (ऋ० ७.२.२)॥

(५) इळः—इळाशब्दो व्याख्यातः पृथिवीनामसु (निघ० १.१.१५) 'आजुह्वान ईड्यो वन्द्यश्च' (ऋ० १०.११०.३)। 'होतारमिळः प्रथमं यजध्यै' (ऋ० ३.४.३)॥

(६) बर्हिः—व्याख्यातं महन्नामसु (निघ० ३.३.२५)। बर्हिरेवोक्तं दर्भमयम्। यद्वा 'वृहू उद्यमने' (तु० प० ५८) इत्यस्मादिसिः। वबयोरभेदादुक्तम्। अग्निपक्षे परिवृद्धत्वाद् बर्हिः। 'प्राचीनं बर्हिः प्रदिशा पृथिव्या' (ऋ० १०.११०.४)॥

(७) द्वारः—जवतेर्द्रवतेर्वा गतिकर्मणो वारयतेर्वा स्यात्। जवतेर्जकारस्य दकारः, द्रवते रेफलोपः, वारयतेर्दिडागमश्च[१] निपातनात्। गम्यन्ते ह्याभिर्यज्ञ-गृहम्, अनभिमतो हि तास्वेव निवार्यते। अग्निपक्षे ज्वाला। आगम्यन्त आभिः, शीतादिनिवारणम्। 'देवीर्द्वारो बृहतीर्विश्वमिन्वा' (ऋ० १०.११०.५)।

(८) उषासानक्ता—'उछी विवासे' (भ्वा० प० १३१) 'वश कान्तौ' (अदा० प० ७२) 'उषिरञ्जिशृभूभ्यः कित्' (स० क० २.१.३२३) इति बाहुलकाच्छकारस्य शकारस्य वा षकारः। 'ग्रहिज्या०' (अ० ६.१.१६) इति सम्प्रसारणम्। उच्छति कान्ता वा उषाः। नक्तशब्दो रात्रिवचनः। 'उषासोषसः' (अ० ६.३.३०) इति उषासादेशः। द्विवचनस्याकारः[२]। अग्निपक्ष उषा दीप्तिः, तमसो विवासनात्। आहुतिर्नक्ता[३] अनक्त्यग्निमिति। 'उषासानक्ता सदतां नियोनौ' (ऋ० १०.११०.६)॥

(९) दैव्या होतारा—उभयत्राकारो द्विवचनस्य। आह्वातारौ देवानाम्। पार्थिवमध्यमावग्नी उच्येते। 'दैव्या होतारा प्रथमा सुवाचा' (ऋ० १०.११०.७)॥

(१०) तिस्रो देवीः—प्रथमार्थे द्वितीया। भारतीळासरस्वत्यः। अग्नायी पृथिवीळेति स्त्रियः (निरु० ७.८) इति प्रत्यक्षेण पठिताया अपि तिस्रो देव्य इति सामान्येन पाठात् पृथिवीस्थानं भाष्यकारेण ज्ञापितम्। सरस्वती मध्यम-

---

१. 'वारयतेरिडागमश्च' इत्यपपाठो मुद्रितेषु।
२. 'सुपां सुलुक्०' (अ० ७.१.३९)। ३. 'आहुतिस्तद्युक्ता' इति मुद्रितेषु।

स्थाना। 'आ नो यज्ञं भारती' (ऋ० १०.११०.८) इति निगमः॥

(११) त्वष्टा–तूर्णशब्दोपपदादश्नोतेस्तृन्निपात्यते। त्वष्टा मध्यमस्थानः। आप्रीत्वादिह समाम्नातः। तूर्णमश्नुते वायुरूपत्वात्। 'त्विषेर्देवतायामकारश्चोपधाया अनिट्त्वं च' (अ० ३.२.१३५ वा०) इति वा, दीप्तो ह्यसौ वैद्युतत्वात्। [लक्षतेर्वा करोत्यर्थस्य] त्वष्टा पूर्ववन्निपातनम्। अग्निपक्षेऽप्युपपद्यन्ते निर्वचनानि। 'देवं त्वष्टारमिह यक्षि विद्वान्' (ऋ० १०.११०.९)। 'उभे त्वष्टुर्बिभ्यतुर्जायमानात्' (ऋ० १.९५.५)॥

(१२) वनस्पतिः–वनानां पाता। वन्यते सेव्यत इति वनम्। 'पुंसि सञ्ज्ञायां घः प्रायेण' (अ० ३.३.११८)। पतिशब्दो व्याख्यात ईश्वरनामसु (निघ० २.२२.३)। अग्निरन्तरनुप्रविष्टोऽपि यतो न दहति, अतः पातेति व्यपदिश्यते। पिबतेर्वैतद्रूपम्। यूपपक्षे वनस्पतिविकारत्वाद् वनस्पतिः। पारस्करादित्वात् सुट् (अ० ६.१.१५१)। 'वनस्पतिः शमिता देवो अग्निः' (ऋ० १०.११०.१०)। 'वनस्पते मधुना दैव्येन' (ऋ० ३.८.१)॥

(१३) स्वाहाकृतयः–स्वाहाशब्दो व्याख्यातो वाङ्नामसु (निघ० १.११.२४)। अत्र स्मरणार्थमुक्तमस्य प्रयाजस्य वक्ष्यमाणदेवतासङ्कीर्त्तनपरत्वात्, स्वाहास्वाहेत्येवंपूर्वा कृतिः करणमुच्चारणं[1] वा समीक्ष्य वक्ष्यमाणदेवतानां[2] ताः स्वाहाकृतय उच्यन्ते। 'स्वाहाकृतं हविरदन्तु देवाः' (ऋ० १०.११०.११), 'स्वाहाकृतीषु रोचते' (ऋ० १.१८८.११)॥

इति त्रयोदश पदानि॥ २॥

अश्वः (१)। शकुनिः (२)। मण्डूकाः (३)। अक्षाः (४)। ग्रावाणः (५)। नाराशंसः (६)। रथः (७)। दुन्दुभिः (८)। इषुधिः (९)। हस्तघ्नः (१०)। अभीशवः (११)। धनुः (१२)। ज्या (१३)। इषुः (१४)। अश्वाजनी (१५)। उलूखलम् (१६)। वृषभः (१७)। द्रुघणः (१८)। पितुः (१९)। नद्यः (२०)। आपः (२१)। ओषधयः (२२)। रात्रिः (२३)। अरण्यानी (२४)। श्रद्धा (२५)। पृथिवी

१. '०हेत्येवं पूर्व कतिवारमुच्चारणं' इति मुद्रितेषु।
२. 'समीक्ष्यमाणदेवतानां' इति मुद्रितेषु।

(२६)। अपूर्वा (२७)। अग्रायी (२८)। उलूखलमुसले (२९)। हविर्धाने (३०)। द्यावापृथिवी (३१)। विपाट्छुतुद्री (३२)। आर्त्नी (३३)। शुनासीरौ (३४)। देवीजोष्ट्री (३५)। देवीऊर्जाहुती (३६)। इति षट्त्रिंशत् पदानि ॥ ३ ॥

(१) अश्वः—व्याख्यातोऽश्वनामसु (निघ० १.१४.२६)। 'यद्वाजिनो देवजातस्य सप्तेः' (ऋ० १.१६२.१)। 'सूरादश्वं वसवो निरतष्ट' (ऋ० १.१६३.२)॥

(२) शकुनिः—शकेः क्विपि शक्। उन्नयतेः 'वेञो डित्' (श्वेत० ५६९, द० उ० १.६२) इति बाहुलकाद् डिदिण्प्रत्यय उदो दलोपः[1]। शक्नोत्युन्नेतुमात्मानं शकुनिः ककारस्य जश्त्वाभावः। शक्नोत्युन्नयनादिक्रियाः कर्त्तुम्। 'सुमङ्गलश्च शकुने भवासि' (ऋ० २.४२.१)॥

(३) मण्डूकाः—मस्जेः 'शलिमण्डिभ्यामूकण्' (उ० ४.४३) इति बाहुलकादूकणि जश्त्वश्चुत्वाभ्यां मज्जूका इति प्राप्ते छान्दसत्वाज् जकारस्य डकारापत्त्या अन्त्यात् पूर्वस्य नुमि ष्टुत्वम्। निमज्जन्ति हि ते जले। मदतेस्तृप्त्यर्थाद् मन्दतेर्वा मोदत्यर्थात् पूर्ववदूकण् रूपसिद्धिश्च। नित्यमदत्वात्, नित्यतृप्तत्वात्, नित्यहृष्टत्वाद्वा मण्डूकाः। मण्डतेर्वा यथाप्राप्ते ऊकणि मण्डूकाः। यद्वा मण्डो मदतेः। 'गेहे कः' (अ० ३.१.१४४) इति बाहुलकात् कप्रत्ययो रूपसिद्धिश्च। मण्ड उदकम्। हृष्यन्ति हि तत्र स्नानपानावगाहार्थिनः। मण्ड ओको निवास एषां मण्डशब्दादोकशब्दाच्च मण्डूकाः। 'प्र मण्डूका अवादिषुः' (ऋ० ७.१०३.१)॥

(४) अक्षाः—अश्नोतेः 'अशेर्देवने' (उ० ३.६५) इति सप्रत्ययः। अश्नुवते व्याप्नुवन्ति गृह्णन्त्येनान् देवितारः। अतिव्याप्नुवन्त्येभिः परस्परमिति वा। 'अक्षैर्मा दीव्यः कृषिमित् कृषस्व' (ऋ० १०.३४.१३)॥

(५) ग्रावाणः—व्याख्यातः पर्वतनामसु (निघ० १.१०.२)। 'ग्रावभ्यो वाचं वदता वदद्भ्यः' (ऋ० १०.९४.१)॥

(६) नाराशंसः—नरान् शंसतीति कर्मोपपदेऽण्, 'अन्येषामपि दृश्यते' (अ० ६.३.१३६) [इत्यौत्तरपदिकं दीर्घत्वम्]। ततः प्रज्ञादित्वात् (अ० ५.४.३८) स्वार्थिकोऽण्। नराशंस एव नाराशंसः। मन्त्रोऽत्राभिधेयः। 'अमन्दान्त्स्तोमान् प्र भरे मनीषा' (ऋ० १.१२६.१)॥

---

१. 'उदस्तलोपः' इति मुद्रितेषु।

(७) रथः—रंहतेर्गतिकर्मणः। 'हनिकुषिनीरमिकाशिभ्यः क्थन्' (उ० २.२) इति क्थन्, बाहुलकान्नकारहकारलोपश्च। गच्छत्यनेन। स्थिरतिर्नैरुक्त-धातुः। विपरीताक्षरः। 'पुंसि सञ्ज्ञायां घः प्रायेण' (अ० ३.३.११८)। सकारेकारयोर्लोपः। दृढग्रन्थित्वात् स्थिरो हि सः। यद्वा रमतेस्तिष्ठतेश्च द्विधातुजं रूपम्। रममाणो विस्रब्धोऽस्मिंस्तिष्ठति रथी। यद्वा रमतेरेव यथाप्राप्तः क्थन्। रमणीयो हि रथः। रसतेर्वा शब्दार्थात् पूर्वसूत्रेण बाहुलकात् क्थनि सकारलोपः। भवति हि तस्यागच्छत उपलब्धिः। 'तत्रा रथमुप शग्मं सदेम' (ऋ० ६.७५.८)॥

(८) दुन्दुभिः—शब्दानुकरणनिमित्तकमेतन्नाम। द्रुमशब्दस्य वा रेफान्तलोपः, भिदेश्चाद्यन्तविपर्यय उकारश्चोपजनः। दुन्दुभ्यतेर्वा नैरुक्त-धातोर्वधकर्मण इन्। ताड्यते ह्यसौ युद्धसमये। 'स दुन्दुभे सजूरिन्द्रेण देवैः' (ऋ० ६.४७.२९)॥

(९) इषुधिः—इषवो निधीयन्तेऽस्मिन्। 'कर्मण्यधिकरणे च' (अ० ३.३.९३) इति किः। 'इषुधिः सङ्काः पृतनाश्च सर्वाः' (ऋ० ६.७५.५)॥

(१०) हस्तघ्नः[१]—हस्ते हस्तसमीपे स्थितो हन्यते ज्यया शरपुङ्खेन वा। 'घञर्थे कविधानम्०' (अ० ३.३.५८ वा०) इति कः। 'हस्तघ्नो विश्वा वयुनानि विद्वान्' (ऋ० ६.७५.१४)॥

(११) अभीशवः—व्याख्याता रश्मिनामसु (निघ० १.५.५)। निगमश्च दर्शितः॥

(१२) धनुः—धन्वतेर्गत्यर्थाद् वधार्थाद् वा 'अर्तिपृवपियजितनिधनि-तपिभ्यो नित्' (उ० २.११९) इति बाहुलकादुसिः प्रत्ययो वकारलोपश्च। धनिर्मारणार्थ इति क्षीरस्वामी[२]। यथाप्राप्त उसिः। धन्वन्त्यपनयन्त्यस्मादिषवः, घ्नन्ति वा। 'धनुः शत्रोरपकामं कृणोति' (ऋ० ६.७५.२)॥

(१३) ज्या—जयतेर्जिनातेर्वान्तर्णीतण्यर्थाद् जवतेर्वा[३] 'मध्यविन्ध्य-शिक्य०' (स० क० २.३.४) इत्यादिना क्यप्प्रत्ययो[४] धातोर्जकारभावश्च निपात्यते। 'अघ्न्यादयश्च' (उ० ४.११३) इति निपातनम्। जयसाधनं हि ज्या। 'धन्वञ्ज्या इयं समने पारयन्ती' (ऋ० ६.७५.३)॥

(१४) इषुः—इषतेर्गतिकर्मणो वधार्थाद् वा 'इषेः किच्च' (उ० १.१३) इति उप्रत्ययः। गच्छति शत्रून्, हन्ति वा तान्। 'तत्रास्मभ्यमिषवः शर्म यंसन्'

---

१. तु०—'दस्ताना' इत्यनेन पर्शियनभाषायाः शब्देन। (सु०)। २. मृगयम्।
३. 'जवतेः' इति नास्ति मुद्रितेषु। ४. 'यक्प्रत्ययः' इत्यपपाठो मुद्रितेषु।

(ऋ० ६.७५.११)॥

(१५) अश्वाजनी–अश्वा अज्यन्ते क्षिप्यन्ते प्रेर्यन्तेऽनया। ल्युट्, 'वा यौ' (अ० २.४.५७) इति वीभावविकल्पः, टित्त्वाद् ङीप्। अश्वानामजनी अश्वाजनी कशोच्यते। 'अश्वाजनि प्रचेतसः' (ऋ० ६.७५.१३)॥

(१६) उलूखलम्–उरु विस्तीर्णं खं[१] सुषिरमस्य[२], ऊद्ध्वं वा उपरिभागे खं[१] मुखमस्य। ऊर्क् अन्नं तत् करोति। किरतेर्वा उत्कीर्णं तत्। शब्दानुकरणनिमित्तं वा नामैतत्, यतो मुसलाघातजनितध्वनिम् 'उरु मे कुर्वित्येवमब्रवीत्'[३]। सर्वनिर्वचनेषु[४] वर्णव्यत्ययादि वाच्यम्। 'उलूखलक युज्यसे' (ऋ० १.२८.५)॥

(१७) वृषभः–'वृषु सेचने' (भ्वा० प० ४६८)। 'ऋषिवृषिभ्यां कित्' (उ० ३.१२३) इत्यभच्प्रत्ययः। प्रजाहेतुभूतं बीजं वर्षति सिञ्चति। वृहेर्वा बाहुलकाद् अभचि हकारस्य षकारः। अतिशयेन रेतः सेक्तुं वृहति उद्यच्छति आत्मानम्। 'अमेहयन् वृषभं मध्य आजेः' (ऋ० १०.१०२.५)॥

(१८) द्रुघणः–द्रुशब्दो द्रुमशब्दपर्यायः। द्रुमविकारः काष्ठखण्डोऽत्र द्रुशब्देनोच्यते। द्रुर्हन्यतेऽनेन। 'करणेऽयोविद्रुषु' (अ० ३.३.८२) इति हन्तेरप् घनादेशश्च। क्षुभ्नादिषु (अ० ८.४.३८) पाठाण्णत्वम्, 'पूर्वपदात् सञ्ज्ञायामगः' (अ० ८.४.३) इति वा। 'काष्ठाया मध्ये द्रुघणं शयानम्' (ऋ० १०.१०२.९)॥

(१९) पितुः–अन्ननामसु व्याख्यातम् (निघ० २.७.६)। स निगमः (ऋ० १.१८७.१)॥

(२०) नद्यः, (२१) आपः–व्याख्याताः (निघ० १.१३.३७, निघ० १.१२.८१)। निगमौ च दर्शितौ सामान्येन। 'इमं मे गङ्गे यमुने सरस्वति' (ऋ० १०.७५.५) इति विशेषेण। 'आपो हि ष्ठा मयोभुवः' (ऋ० १०.९.१)॥

(२२) ओषधयः–ओषशब्दे दोषशब्दे वोपपदे धयतेः 'कर्मण्यधिकरणे च' (अ० ३.३.९३) इति किप्रत्ययः, 'कृत्यल्युटो बहुलम्' (अ० ३.३.११३) इति कर्त्तरि वा। ओषं दाहं धयन्ति पिबन्ति विनाशयन्तीत्यर्थः, दोषं वातपित्तादिकं वा। दकारलोपो द्रष्टव्यः। 'या ओषधीः पूर्वा जाता' (ऋ० १०.९७.१)॥

(२३) रात्रिः–प्रोपसर्गार्थविशिष्टाद् अन्तर्णीतण्यर्थाद् रमतेः 'राशदिभ्यां

---

१. 'खलम्' इति मुद्रितेषु।
२. 'मुखमस्य' इति मुद्रितेषु।
३. तु०–शत० ब्रा० ७.५.१.२२।
४. 'सर्वथैव तेषु' इति मुद्रितेषु।

त्रिप्' (उ० ४.६८) इति बाहुलकात् त्रिप्प्रत्ययो मकारस्याकारश्च, रातेर्वा त्रिप्प्रत्ययो यथाप्राप्तः। प्ररमयति भूतानि नक्तञ्चारीणि, उपरमयति दिवाचराणि स्वव्यापारेभ्यः, प्रदीयन्तेऽस्यामवश्याया[1] मध्यमेन। 'आ रात्रि पार्थिवं रजः' (मा० सं० ३४.३२)॥

(२४) अरण्यानी–अपपूर्वाद् अर्णोतेर्गतिकर्मणो[2] नञ्पूर्वाद्रमतेर्वा अघ्न्यादित्वाद् (उ० ४.११३) यत्प्रत्यये रूपसिद्धिर्निपात्यते। अपार्णमपगतं ग्रामाद्धि। अरमणं वा, न हि तद्रमयति। अरण्यं वनम्। अरण्यपालयित्री अधिदेवता काचिदिति नैरुक्ताः। महदरण्यमिति वैयाकरणाः। 'हिमारण्ययोर्महत्त्वे' (अ० ४.१.४९ वा०) इति विधीयते। 'अरण्यान्यरण्यानि' (ऋ० १०.१४६.१)॥

(२५) श्रद्धा–श्रत् सत्यम्, तस्मिन् धीयते। तथा च मन्त्रः– 'अश्रद्धामनृतेऽदधात् श्रद्धां सत्ये प्रजापतिः' (मा० सं० १९.७७) इति। 'आतश्चोपसर्गे' (अ० ३.३.१०६) इत्यङ्। 'श्रच्छब्दस्योपसङ्ख्यानम्' (अ० १.४.५९ वा०) इत्युपसर्गसञ्ज्ञा। धर्मार्थसुखापवर्गेषु यथाशास्त्रमधिकृतस्य पुरुषस्य कर्मानुष्ठानहेतुभावप्रख्याना[3] बुद्ध्यधिदेवता श्रद्धा। 'श्रद्धयाग्निः समिध्यते' (ऋ० १०.१५१.१)॥

(२६) पृथिवी–'प्रथ प्रख्याने' (भ्वा० आ० ५१६)। 'प्रथेः षिवन्षवन्ष्वनः सम्प्रसारणञ्च' (उ० १.१५०)। 'षिद्गौरादिभ्यश्च' (अ० ४.१.४१)। पृथ्वीत्यर्थः। 'स्योना पृथिवि भव' (ऋ० १.२२.१५)॥

(२७) अप्वा–व्याख्यातं (निघ० ४.३.४८) नैगमे[4] सनिगमम्॥

(२८) अग्नायी–अग्नेः पत्नी। 'वृषाकप्यग्निकुसितकुसीदानामुदात्तः' (अ० ४.१.३७) इत्यैकारादेशः, पुंयोगलक्षणो ङीप्। 'अग्नायीं सोमपीतये' (ऋ० १.२२.१२)॥

(२९) उलूखलमुसले–उलूखलं व्याख्यातम् (निघ० ५.३.१६)। मुहुःशब्दोपपदात् सर्तेः 'मुरलोरलमुसलकुवल०' (स० क० २.३.९८) इत्यादिना अल्प्रत्ययो टिलोपो मुहुःशब्दस्य मुभावश्च[5] निपात्यते। उत्क्षिप्योत्क्षिप्य निपातनाद् मुहुः सरणं मुसलम्। द्विवचनम्[6]। 'आयजी वाजसातमा' (ऋ० १.२८.७)। अत्रेध्मवत् श्रुतिरसत्यपि लिङ्गयोगे॥

---

१. तु०—निरु० २.१८।

२. 'रिणतेर्गति०' इति मुद्रितेषु।

३. '०भावप्रख्यानात्' इति मुद्रितेषु। '०भावप्रदा' '०भावप्रस्था' इति। स्कन्दटीका (निरु० ९.३०)।

४. निरु० ६.१२।

५. 'मुसभावश्च' इति मुद्रितेषु।

६. 'द्विर्वचनम्' इति मुद्रितेषु।

(३०) हविर्द्धाने–[शकटे।] सोमलक्षणानि हवींषि निधीयन्ते[१] ययोः। 'आ वा॑मु॒पस्थ॑मद्रुहा॑' (ऋ० २.४१.२१)। पूर्ववदुदाहरणत्वम्॥

(३१) द्यावापृथिवी–दिवो द्युत्यर्थाद् 'दिवेर्डिविः' (स० क० २.१.३०५) इति डिविप्रत्ययः। द्योतत इति द्यौः। पृथिवी व्याख्याता (निघ० ५.३.२६)। द्यौश्च पृथिवी च 'दिवो द्यावा' (अ० ६.३.२८) इति द्यावादेशः। 'वाच्छन्दसि' (अ० ६.१.१०२) इति पूर्वसवर्णः। 'द्यावा॑ नः पृथि॒वी इ॒मम्' (ऋ० २.४१.२०)॥

(३२) विपाट्छुतुद्री–'पद गतौ' (दि० आ० ५८) 'स्पश बाधनस्पर्शनयोः' (भ्वा० उभ० ६३७) विपूर्वः। 'आप्लृ व्याप्तौ' (स्वा० प० १५) विप्रपूर्वः। णिजन्तात् 'क्विब् वचि०' (द० उ० १०.२) इत्यत्र 'प्राक्प्रत्ययनिर्देशादिष्टसिद्धिः'[२] इत्युक्ते क्विपि प्रशब्दस्य रेफलोपादि। विविधं कूलपाटनात् [वा], विपाशनात् [वा]। [व्यपाश्यन्त व्यपास्ता विक्षिप्ता] हतपुत्रस्योद्भूततमोवृत्तेर्मुमूर्षोर्वसिष्ठस्य कण्ठे शिलाबन्धने साधनभूताः पाशा अस्याम्। विविधदेशप्रापणाद्वोदकस्योत्तानत्वाद्[३] विपाट्। शुतुद्री शुद्राविणीत्यर्थः। आशुतुन्नद्राविणीशब्देभ्यो वा। आशु तुन्नेव प्रतोदेव[४] द्रवतीति शुतुद्री[५]। विपाट् च शुतुद्री च विपाट्छुतुद्री पूर्वसवर्णः। 'विपा॑ट्छु॒तुद्री॒ पय॑सा जवेते' (ऋ० ३.३३.१)॥

(३३) आर्त्नी–अर्त्ते रिषतेर्वा 'वहिश्रिश्रुयुद्रुग्लाहात्वरिभ्यो नित्' (उ० ४.५२) इति बाहुलकाद् नित्प्रत्ययो धातोरार्त्तभावश्च। 'कृदिकारात्०' (अ० ४.१.४५ ग० सू०) इति ङीष्। [धनुषः कोटी]। ते ज्ययाकृष्यमाणे[६] सङ्गच्छेते, हिंसासाधने वा भवतः। 'आर्त्नी॑ इ॒मे वि॒स्फुर॑न्ती अ॒मित्रा॑न्' (ऋ० ६.७५.४)॥

(३४) शुनासीरौ–शुशब्दार्थविशिष्टात्[७] 'शुन गतौ' (तु० प० ४८) इत्यस्माद् इगुपधलक्षणः कः (अ० ३.१.१३५)। क्षिप्रं गच्छत्यन्तरिक्ष इति[८] शुनो वायुः। यद्वा शुशब्दोपपदान्नयतेर्गतिकर्मणः 'अन्येष्वपि दृश्यते' (अ० ३.२.१०१) इति डः। भाष्ये तु–शु-एतदर्थतो निर्वचनं प्रायेण। सर्त्तेः 'डिण्डीरवानीरगभीरगम्भीरकुम्भीरशीरकाश्मीरजम्बीरकीरतीरादयः'[९] (स० क०

---

१. 'विधीयन्ते' इत्यपपाठो मुद्रितेषु।
२. द्र०–माणिक्यदेववृत्तिः (द० उ० १०.२)।
३. '०दकस्यापनत्वात्' इति मुद्रितेषु।
४. 'तुन्ने प्रतोदे' इति मुद्रितेषु।
५. द्र०–स्कन्दटीका (निरु० ९.२६)।
६. 'गते ज्यया ऋष्यमाणे' इति मुद्रितेषु।
७. शुशब्दः क्षिप्रार्थे निरु० ६.१। (सु०)।
८. '०रिक्षमिति' इति मुद्रितेषु।
९. मुद्रितसंस्करणयोः पाठभेदः।

२.३.५०) इति ईरन्प्रत्ययष्टिलोपश्च निपात्यते। सदा सरणात् सीर आदित्यः। शुनश्च सीरश्च 'देवताद्वन्द्वे च' (अ० ६.३.२५) इत्यानङ्। 'शुनासीराविमां वाचं जुषेथाम्' (ऋ० ४.५७.५)॥

(३५) **देवीजोष्ट्री**—देवशब्दः पचाद्यजन्तः। देवडिति[१] पाठात् 'टिड्ढाणञ्०' (अ० ४.१.१५) इति ङीप्। जुषतेः ष्ट्रन् प्रत्ययः (उ० ४.१६०)। षित्त्वाद् ङीष् (अ० ४.१.४१)। देव्यौ जोषयित्र्यौ। पूर्वसवर्णः। द्यावापृथिव्यौ, अहोरात्रे वाभिधेये। सस्यसम इति कात्थक्यः। सस्यं व्रीहिः, समा संवत्सरः। 'देवी जोष्ट्री वसुधिती ययोः' (तै०ब्रा० ३.६.१३.१)॥

(३६) **देवी ऊर्जाहुती**—ऊर्क्शब्दो व्याख्यातोऽन्ननामसु (निघ० २.७.१५)। आह्वयतेः क्तिनि[२] 'वचिस्वपि०' (अ० ६.१.१५) इति सम्प्रसारणम्, 'हलः' (अ० ६.४.२) इति दीर्घाभावो व्यत्ययेन। ऊर्क्शब्दाद् हेतौ तृतीया। ऊर्जा हेतुभूतया आह्वातव्ये। ऊर्क् इत्यत्र 'सावेकाचः०' (अ० ६.१.१६२) इति विभक्तेरुदात्तत्वम्, आहुतिशब्दोऽपि 'तादौ च निति कृत्यतौ' (अ० ६.२.५०) इति आद्युदात्तः, 'एकादेश उदात्तेनोदात्तः' (अ० ८.२.५)। 'देवी ऊर्जाहुती इषमूर्जमन्या वक्षत्' (मै०सं० ४.१३.८)॥

इति षट्त्रिंशत् पदानि॥ ३॥

इति पृथिवीस्थानदेवताः॥ १॥

वायुः (१)। वरुणः (२)। रुद्रः (३)। इन्द्रः (४)। पर्जन्यः (५)। बृहस्पतिः (६)। ब्रह्मणस्पतिः (७)। क्षेत्रस्य पतिः (८)। वास्तोष्पतिः (९)। वाचस्पतिः (१०)। अपांनपात् (११)। यमः (१२)। मित्रः (१३)। कः (१४)। सरस्वान् (१५)। विश्वकर्मा (१६)। तार्क्ष्यः (१७)। मन्युः (१८)। दधिक्राः (१९)। सविता (२०)। त्वष्टा (२१)। वातः (२२)। अग्निः (२३)। वेनः (२४)। असुनीतिः (२५)। ऋतः (२६)। इन्दुः (२७)। प्रजापतिः

१. पचादिषु (अ० ३.१.१३४) 'देवट्' इति पठ्यते।
२. 'क्तिचि' इति मुद्रितेषु।

(२८)। अहिः (२९)। अहिर्बुध्न्यः (३०)। सुपर्णः (३१)। पुरूरवाः (३२)। इति द्वात्रिंशत् पदानि॥ ४॥

(१) वायुः–'वा गतिगन्धनयोः' (अदा० प० ४३)। 'कृवापाजिमिस्वदिसाध्यशूभ्य उण्' (उ० १.१)। 'आतो युक् चिण्कृतोः' (अ० ७.३.३३)। यद्वा वेतेर्गतिकर्मणो बाहुलकादुण्। यद्वा 'छन्दसीणः' (उ० १.२) इत्युणि वकारोपजनः। गच्छत्यन्तरिक्षे। 'वायवा याहि दर्शतेमे' (ऋ० १.२.१)॥

(२) वरुणः–'वृञ् वरणे' (स्वा० उभ० ८)। 'कृवृदारिभ्य उनन्' (उ० ३.५३)। अन्तरिक्ष उदकमावृणोति। 'नीचीनबारं वरुणः कवन्धम्' (ऋ० ५.८५.३)॥

(३) रुद्रः–रौतेः क्विपि। रुच्छब्दं [राति ददाति] करोति। 'आतोऽनुपसर्गे कः' (अ० ३.२.३)। यो रुतं राति[१], रौतीति वक्तुं शक्यते। रोरूयमाणोऽत्यर्थं शब्दं कुर्वन् मेघोदरस्थो द्रवतीति, रोरूयमाणशब्दपूर्वाद् द्रवतेर्वा। 'रोदेर्णिलुक् च' (उ० २.२२) इति रक्। स हि शत्रुकलत्राणि रोदयति। रुदेरेव वाणिजन्ताद् बाहुलकाद्रक्। 'रुद्रः किल पितरं प्रजापतिमिषुणा चिच्छेद। तमनुशोचन्नरुदद्। यदरुदत्तद्रुद्रस्य रुद्रत्वम्'[२] इति काठकम्। 'यदरोदीत् तद्रुद्रस्य रुद्रत्वम्'[३] इति हारिद्रवकम्। 'इमा रुद्राय स्थिरधन्वने गिरः' (ऋ० ७.४६.१)॥

(४) इन्द्रः–इराशब्द उपपदे दृणातेर्ददातेर्दधातेर्दारयतेर्वा 'ऋज्रेन्द्राग्रवज्रविप्र०' (उ० २.२९) इति रन्प्रत्ययान्तो[४] निपात्यते। निपातनाद्रूपसिद्धिरुन्नेया। इरा अन्नमनेन सम्बन्धाद्वा तद्धेतुभूतं जलं[५] लक्ष्यते। तेन लक्षितलक्षणया[६] तदाधारभूतो मेघः। इरां मेघं धारात्मना दृणाति विदारयति। बीजं व्रीह्यादि, तदसौ वृष्टिप्रदानेन विदारयति। अङ्कुरोद्भेदनाभिप्रायश्च[७] विदारणम्। इरामन्नं तद्ददाति वा। इरां दधाति धारयति वा। इन्दावुपपदे द्रवते रमतेर्वा निपातनम्। इन्दवे द्रवति गच्छति सोमं पातुमित्यर्थः। इन्दौ रमतेऽतिप्रियत्वाद् नान्यत्र। इन्धेर्वा निपातनम्। इन्धे दीपयति शरीरमध्यवर्त्ती पञ्चवृत्तिः प्राणो वायुः शरीरभूतानि। इध्यते वा प्राणैः शरीरमध्यवर्त्ती प्राणभावेन क्षेत्रज्ञसञ्ज्ञकः।

---

१. 'रुवन् एति' इति मुद्रितेषु।
२. तु०–मै० सं० ४.२.१२। का० सं० २५.१।
३. तु०–तै० सं० १.५.१.१।
४. 'रक्प्रत्ययान्तः' इति मुद्रितेषु।
५. 'बलम्' इति मुद्रितेषु।
६. 'बललक्षित०' इति मुद्रितेषु।
७. '०द्भेदेनाभिकाशश्च' इति मुद्रितेषु।

प्राणैर्वागादिभिर्योगबलेन वा सम्यगाभिमुख्येन दीपयन्ति आत्मोपासका:[१]। इदमुत्पादीकरोति पश्यति वा इन्द्रः। इदं कृत्स्नं जगद् वृष्टिप्रदानद्वारेण करोति लोकपालत्वात्, अस्य सर्वस्य शुभाशुभकर्मणो द्रष्टा वा। इन्दुपपदे दारयतेर्द्रावयतेर्वा इन्द्रपदम्। यद्वा इनश्च[२] शत्रूणां दारयिता द्रावयिता च। यद्वा इनश्च[२] यज्वनामादरयिता च। सर्वत्र निपातनाद्रूपसिद्धिः। 'महान्तमिन्द्र पर्वतं वियद्वः' (ऋ० ५.३२.१)॥

(५) पर्जन्यः–तृपेरन्तर्णीतण्यर्थात् क्विपि तर्पयतीति तृप्। जनाय हितो जन्यः, हितार्थे यत्। तृप् चासौ जन्यश्चेति, तृप्शब्दस्य पर्भावः। परशब्दोपपदाद् जयतेर्जनयतेर्वा अघ्न्यादित्वाद् यत्, नुम्, परशब्दातो लोपश्च निपात्यते। परः प्रकृष्टो जेता जनयिता वा। प्रशब्दोपपदादर्जयतेर्वा[३] अघ्न्यादित्वान्निपातनं तेन पर्जन्यः। प्रकर्षेणोपार्जयिता सङ्ग्रहीता रसानाम्। 'यत् पुर्जन्यस्तुनयन् हन्ति दुष्कृतः' (ऋ० ५.८३.२)॥

(६) बृहस्पतिः–बृहच्छब्दो व्याख्यातो महन्नामसु (निघ० ३.३.४), पतिशब्दस्तु ईश्वरनामसु (निघ० २.२२.३)। अत्र पिबतेरपि बाहुलकात् पतिः। बृहतो भौमरसस्य[४] वाय्वात्मना पाता [शोषयिता] पालयिता रक्षिता वा। पाता[५] रक्षिता महतो जगतो वा। 'बृहस्पतिर्विरवेणा विकृत्य' (ऋ० १०.६८.८)॥

(७) ब्रह्मणस्पतिः॥ (८) क्षेत्रस्य पतिः–'क्षि निवासगत्योः' (तु० प० ११६)। 'गुधृवीपचिवचियमिमनितनिसदिक्षदिभ्यस्त्रन्'[६] (द० उ० ८.८९, श्वेत० ६०१) इति त्रन्प्रत्ययः। निवसन्ति हि तेन[७] हेतुभूतेन, तस्य पाता। 'क्षेत्रस्य पतिना वयम्' (ऋ० ४.५७.१)॥

(९) वास्तोष्पतिः–'वस निवासे' (भ्वा० प० ७३१) 'वसेस्तुन्', '[अगारे] णिच्च'[८] (द० उ० १.१२८, १२९) इति। सामर्थ्यात्तच्च वास्त्वन्तरिक्षम्[९], तस्य पाता विभुत्वेन। 'अमीवहा वास्तोष्पते' (ऋ० ७.५५.१)॥

---

१. स्कन्दटीका (निरु० १०.८) अत्रानुसन्धेया।
२. 'इताञ्च' इति मुद्रितेषु।
३. 'प्रसशब्दोपपदादर्जयते वा' इति मुद्रितेषु।
४. 'सोमरसस्य' इति मुद्रितेषु।
५. 'पिता' इति मुद्रितेषु।
६. पञ्चपाद्यां पाठभेदः।
७. 'येन च' इति मुद्रितेषु।
८. 'वसेरगारे णिच्च' (उ० १.७०)।
९. वास्तुशब्दो गृहार्थको व्याख्यायते सनिगमम्–निरु० २.७। विस्तृतेऽर्थेऽत्रान्तरिक्षार्थकोऽपि। लौकिकसंस्कृते तु ऐकान्तिकतया गृहार्थक एवैष शब्दः। तथा च 'अगारे णिच्च' इति १.७० उणादिसूत्रम्। (सु०)।

(१०) वाचस्पतिः—प्राणात्मनेन्द्रः[१]। अतः प्राणस्य वाग्रूपतयाप्यवस्थानात् प्राणो वाचस्पतिरिति व्यपदिश्यते। 'पुनरेहि वाचस्पते' (शौ० सं० १.१.२)॥

(११) अपान्नपात्—तनूनप्त्रा व्याख्यातः (निघ० ५.२.३)। 'अपान्नपान्मधुमतीरपो दाः' (ऋ० १०.३०.४)॥

(१२) यमः—मध्यस्थानो वायुः। यच्छति प्रयच्छति स्तोतृभ्यः कामानिति[२]। पचाद्यच्। 'यमं राजानं हविषा दुवस्य' (ऋ० १०.१४.१)॥

(१३) मित्रः—प्रमीताद् मरणात् त्रायते। 'सुपि स्थः' (अ० ३.२.४) इत्यत्र सुपीति योगविभागात् प्रमीतशब्दस्य मिद्भावः। यद्वा 'डुमिञ् प्रक्षेपणे' (स्वा० उभ० ४), यद्वा 'पिवि मिवि सेचने' (भ्वा० प० ३९१)। सम्मिन्वानः सम्यक् वृष्टिं प्रक्षिपन् सम्यक् सिञ्चन् वा द्रवत्यन्तरिक्षे। मिन्वानशब्दस्य मिद्भावः, द्रवतेः डप्रत्ययान्तस्य त्रभावः। 'ञिमिदा स्नेहने' (भ्वा० आ० ४९५) अन्तर्णीतण्यर्थः। 'अमिचिमिदिशंसिभ्यः कित्' (श्वेत० ५९८, द०उ० ८.८६) इति त्रन्प्रत्ययः[३]। णिजन्ताद् वा बाहुलकाद्रूपसिद्धिः। सर्वसस्यान्युदकेन स्नेहयति। 'मित्रो जनान्यातयति ब्रुवाणः' (ऋ० ३.५९.१)॥[४]

(१४) कः—कमेः क्रमेर्वा 'अन्येष्वपि दृश्यते' (अ० ३.२.१०१) इति डप्रत्यये क्रमते रेफलोपो बाहुलकात्, 'प्रजापतिरकामयत' (ता० ब्रा० ६.१.१) इति बहुकामत्वात् कः प्रजापतिः। क्रमणो वा क्रामत्यन्तरिक्षे[५]। कमिति सुखनाम, सुखो वा वृष्टिप्रदानादिना। 'कस्मै देवाय हविषा विधेम' (ऋ० १०.१२१.१)॥

(१५) सरस्वान्—सर इत्युदकम्, तेन तद्वान्। 'ये ते सरस्व ऊर्मयः' (ऋ० ७.९६.५)॥

(१६) विश्वकर्मा—करोतेः कर्त्तरि मनिन्। मध्यमस्थानो वायुः। वृष्टिद्वारेण सर्वस्य कर्त्ता सर्वचेष्टानां तदधीनत्वात्। 'विश्वकर्मा विमना आदिद्विहायाः' (ऋ० १०.८२.२)॥

(१७) तार्क्ष्यः—तीर्णशब्दे[६] तूर्णशब्दे चोपपदे क्षियतिक्षरतिरक्षत्यश्नातिभ्योऽघ्न्यादित्वाद् (उ० ४.११३) यक्प्रत्ययादि निपात्यते। तीर्णे[६] विस्ती-

---

१. 'प्राणात्मेन्द्रः' इति मुद्रितेषु। इतोऽग्रे ग्रन्थपातः। अत्र स्कन्दटीका (निरु० १०.१७) द्रष्टव्या।

२. 'कामानि' इति मुद्रितेषु।

३. क्त्रप्रत्ययो युक्तः स्वरानुरोधात्।

४. 'ञिमिदा स्नेहनेऽन्तर्णीतण्यर्थः' इत्यधिकं मुद्रितेषु।

५. 'क्रमयत्यन्तरिक्षे' इति मुद्रितेष।

६. 'स्तीर्ण०' इति मुद्रितेषु।

र्णेऽन्तरिक्षे क्षियति क्षरति रक्षत्यश्नाति, तूर्णं वार्थमुदकाख्यं क्षियति क्षरति वा, अश्नुते वा तमः। 'स्वस्तये ताक्ष्यैमिहा हुवेम' (ऋ० १०.१७८.१)॥

(१८) मन्युः—व्याख्यातः क्रोधनामसु (निघ० २.१३.१०)। दीप्तः क्रुद्धो वा। 'त्वया मन्यो सरथमारुजन्तो' (ऋ० १०.८४.१)॥

(१९) दधिक्राः—व्याख्यातोऽश्वनामसु (निघ० १.१४.७)। दधद्धारयद् वृष्ट्युदकमन्तरिक्षे क्रामति गच्छति, क्रन्दति स्तनयित्नुलक्षणं शब्दं करोति। 'आ दधिक्राः शवसा पञ्च कृष्टीः' (ऋ० ४.३८.१०)॥

(२०) सविता—'षु प्रसवैश्वर्ययोः' (भ्वा० प० ६७४)। तृचि 'स्वरतिसूतिसूयतिधूञूदितो वा' (अ० ७.२.४४)। सर्वकर्मणां वृष्टिप्रदानादिना सविता अभ्यनुज्ञाता। 'सविता यन्त्रैः पृथिवीमरम्णात्' (ऋ० १०.१४९.१)॥

(२१) त्वष्टा—व्याख्यातः (निघ० ५.२.११)। 'देवस्त्वष्टा सविता विश्वरूपः' (ऋ० ३.५५.१९)॥

(२२) वातः—वातेः 'हसिमृग्रिण्वामिदमिलूपूधूर्विभ्यस्तन्' (उ० ३.८६)। वातीति वातः। 'वात आवातु भेषजम्' (ऋ० १०.१८६.१)॥

(२३) अग्निः—व्याख्यातः (निघ० ५.१.१)। इह मध्यमोऽभिधेयः। 'मरुद्भिरग्न आ गहि' (ऋ० १.१९.१)॥

(२४) वेनः—वेनतेः कान्तिकर्मणः पचाद्यच् (अ० ३.१.१३४)। कान्तो दीप्तो मध्यमस्थानः। 'अयं वेनश्चोदयत् पृश्निगर्भाः' (ऋ० १०.१२३.१)॥

(२५) असुनीतिः—असुशब्द उपपदे नयतेः 'कृत्यल्युटो बहुलम्' (अ० ३.३.११३) इति क्तिन्। असून् नयतीति असुनीतिः। स च मध्यमः प्राणः। प्राणश्च वायुः। स हि शरीरादुत्क्रामन्नन्यानसून् नयति। विज्ञायते हि—'प्राणमनूत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्ति'[1]। 'असुनीते मनो अस्मासु धारय' (ऋ० १०.५९.५)॥

(२६) ऋतः—'ऋ गतौ' (भ्वा० प० ६७०)। गत्यर्थात् कर्त्तरि क्तः। अर्त्ता गन्ता अन्तरिक्षे। 'ऋतस्य हि शुरुधः सन्ति पूर्वीः' (ऋ० ४.२३.८)॥

(२७) इन्दुः—इन्धेः 'भृमृशीतृचरित्सरितनि०' (उ० १.७) इत्यादिना बाहुलकादुप्रत्ययो धकारस्य दकारश्च। उनत्तेर्वा 'उन्देरिच्चादेः' (उ० १.१२) इत्युप्रत्ययः। दीप्यते, उनत्ति वा वर्षेण। 'प्र तद्वोचेयम्भव्यायेन्दवे' (ऋ० १.१२९.६)॥

(२८) प्रजापतिः—प्रजानां पाता। 'प्रजापते न त्वदेतान्यन्यः' (ऋ०

१. बृ० उ० ४.४.२।

१०.१२१.१०)॥

(२९) अहिः–व्याख्यातो मेघनामसु (निघ० १.१०.२१)। इह त्विन्द्रोऽभिधेयः। 'अब्जामुक्थैरहिंङ्गृणीषे' (ऋ० ७.३४.१६)॥

(३०) अहिर्बुध्न्यः–योऽहिः स एव बुध्न्यश्चेति समानाधिकरणावहिर्बुध्न्यशब्दावसमस्तौ[१]। तथा च 'अहिना बुध्न्येन' (ऐ० ब्रा० ३.३६) इति श्रुतौ लिङ्गम्। 'मा नोऽहिर्बुध्न्यो रिषे धात्' (ऋ० ७.३४.१७)॥

(३१) सुपर्णः–व्याख्यातो रश्मिनामसु (निघ० १.५.१५)। इह शोभनगमनत्वान्मध्यम उच्यते। 'एकः सुपर्णः स समुद्रमाविवेश' (ऋ० १०.११४.४)॥

(३२) पुरूरवाः–पुरुशब्दोपपदाद् भृशार्थविशिष्टाद् रौतेरसुनि 'अन्येषामपि दृश्यते' (अ० ६.३.१३६) इति पूर्वपदस्य दीर्घः। अनेकविधमत्यर्थं[२] स्तनयित्नुलक्षणं शब्दं करोतीति पुरूरवाः। विज्ञायते हि–'वाताः प्राणा एव पुरूरवाः'[३] इति। 'महे यत्त्वा पुरूरवो रणाय' (ऋ० १०.९५.७)॥

इति द्वात्रिंशत् पदानि॥४॥

श्येनः (१)। सोमः (२)। चन्द्रमाः (३)। मृत्युः (४)। विश्वानरः (५)। धाता (६)। विधाता (७)। मरुतः (८)। रुद्राः (९)। ऋभवः (१०)। अङ्गिरसः (११)। पितरः (१२)। अथर्वाणः (१३)। भृगवः (१४)। आप्त्याः (१५)। अदितिः (१६)। सरमा (१७)। सरस्वती (१८)। वाक् (१९)। अनुमतिः (२०)। राका (२१)। सिनीवाली (२२)। कुहूः (२३)। यमी (२४)। उर्वशी (२५)। पृथिवी (२६)। इन्द्राणी (२७)। गौरी (२८)। गौः (२९)। धेनुः (३०)। अघ्न्या (३१)। पथ्या (३२)। स्वस्तिः (३३)। उषाः (३४)। इळा (३५)। रोदसी (३६)। इति षट्त्रिंशत् पदानि॥५॥

---

१. '०करणश्चाहिर्बुध्न्यशब्दोऽसमस्तः' इति मुद्रितेषु।

२. 'अनेकविधमित्यर्थः' इत्यपपाठो मुद्रितेषु। ३. मृग्यम्। तु०–मै० ३.९.५।

(१) **श्येनः**—श्येनोऽश्वनामसु व्याख्यातः (निघ० १.१४.२०)। इह मध्यमोऽभिधेयः। 'आदाय श्येनो अभरत् सोमम्' (ऋ० ४.२६.७)॥

(२) **सोमः**—'षुञ् अभिषवे' (स्वा० उभ० १)।'अर्त्तिस्तुसुहुसृधृक्षि०' (उ० १.१४०) इति मन्। सूयते सोमः। 'पवस्व सोम धारया' (ऋ० ९.१.१)॥

(३) **चन्द्रमाः**—चायनाद् द्रमतेरसुन्। चायन्शब्दस्य चन्भावः। चायन् पश्यन् लोकपालत्वाद् द्रमति गच्छति। यद्वा चन्द्रशब्द उपपदे मातेश्च 'चन्द्रे मो डित्' (उ० ४.२२९) इत्यसिः। चन्द्रश्चासौ निर्माता। चन्द्रं मानं निर्माणमात्मनः कर्मणां वास्य। यद्वा [पाठान्तरं] चान्द्रं चन्द्रसम्बन्धि मानमस्य चान्द्रमाः सन् ह्रस्वत्वेन चन्द्रमाः। यद्वा चारुशब्द उपपदे द्रवतेरसुनि बाहुलकाद्रूपसिद्धिः। चारु शोभनं द्रवति गच्छति। मन्दगतित्वाद् वा चिरं द्रवति। [चमेः] वा [पूर्वम्]। 'प्र चन्द्रमास्तिरते दीर्घमायुः' (ऋ० १०.८५.१९)॥

(४) **मृत्युः**—म्रियतेरन्तर्णीतण्यर्थात् 'भुजिमृङ्भ्यां युक्त्युकौ' (उ० ३.२१) इति त्युक्प्रत्ययः। मारयति प्राणिनः। मृतं च्यावयतीति वा। मृतमिति वर्त्तमानसामीप्ये। आसन्नमृत्युं चरमोच्छ्वासकाले शरीरात् च्यावयति। अथवा मृतः क्षीणायुःसंस्कार उच्यते, तं मृतं मध्यमः प्राणः शरीरात् च्यावयतीति मृत्युः। मृतशब्दोपपदात् च्यावयतेः 'मृगय्वादयश्च' (उ० १.३७) इति कुप्रत्ययः[1], मृतान्त्यलोपः, च्यावयतेस्त्यभावश्च[2] निपात्यते। 'परं मृत्यो अनु परेहि पन्थाम्' (ऋ० १०.१८.१)॥

(५) **विश्वानरः**—'अपि वा विश्वानर एव' (निरु० ७.२१) इति व्याख्यातम्[3]। 'अर्चा विश्वानराय विश्वाभुवे' (ऋ० १०.५०.१)॥

(६) **धाता**, (७) **विधाता**—व्युपसर्गार्थविशिष्टात्तदुपपदाच्च धाञस्तृच्। वर्षकर्मणा सर्वं स हि दधाति। 'धाता दधातु दाशुषे' (शौ० सं० ७.१७.२)। 'धातुर्विधातः कुलशाँ अभक्षयम्' (ऋ० १०.१६७.३)॥

(८) **मरुतः**—व्याख्याताः (निघ० ३.१८.६, निघ० १.२.१३)। मितं रुवन्ति स्तनयित्नुलक्षणं शब्दं कुर्वन्ति। अमितं वा बहुप्रकारं रुवन्ति। महदुच्चैर्द्रवन्ति, महदन्तरिक्षं द्रवन्तीति वा मरुतः। 'आ विद्युन्मद्भिर्मरुतः स्वर्कैः' (ऋ० १.८८.१)॥

---

१. 'अघ्न्यादयश्च इति उप्रत्ययः' इति मुद्रितेषु।

२. '०तेस्त्युभावश्च' इति मुद्रितेषु।

३. निघ० ५.१.३।

(९) रुद्राः—रुद्रशब्दो व्याख्यातः (निघ० ५.४.३)। अत्र बहुवचनम्। 'आ रुद्रास इन्द्रवन्तः सजोषसः' (ऋ० ५.५७.१)॥

(१०) ऋभवः—ऋभुशब्दो व्याख्यातो मेधाविनामसु (निघ० ३.१५.८)। विद्युत्प्रकाशनम्। उरु विस्तीर्णं भान्ति, ऋतेन वोदकेन दीप्यन्ते, ऋतेन सत्येन चान्तःसहाया भवन्ति[१]। 'सौधन्वना ऋभवः सूरचक्षसः' (ऋ० १.११०.४)॥

(११) अङ्गिरसः—

'देवस्य वितते यज्ञे महतो वरुणस्य च।
ब्रह्मणोऽप्सरसं दृष्ट्वा रेतश्चस्कन्द कर्हिचित्॥
तत् प्रतीक्ष्य समर्थेन स जुहाव विभावसौ॥....अङ्गारतोऽङ्गिराः'[२]... ॥

जस्। 'ते अङ्गिरसः सूनवस्ते अग्नेः परिजज्ञिरे' (ऋ० १०.६२.५)॥

(१२) पितरः—'पिता पाता वा' (निरु० ४.२१) इत्यादिना व्याख्याताः (निघ० ४.१.४७)। जस्। 'उन्मध्यमाः पितरः सोम्यासः' (ऋ० १०.१५.१)॥

(१३) अथर्वाणः, (१४) भृगवः—थर्वतिश्चरत्यर्थो नैरुक्तधातुः। न थर्वणमथर्वणमगमनं ततो जसि अथर्वणाः सन्तोऽथर्वाणः। यद्वा थर्वतेः 'श्वन्नुक्षन्पूषन्०' (उ० १.१५९) इत्यादिना कनिन्प्रत्ययान्तो निपात्यते। अथर्वाणोऽगन्तारः। भृगवः। भृज्यमाना महातेजस्वित्वात्। 'भ्रस्ज पाके' (तु० उभ० ४)। 'प्रथिम्रदिभ्रस्जां सम्प्रसारणं सलोपश्च' (उ० १.२८) इत्युप्रत्ययः, न्यङ्क्वादित्वात् (अ० ७.३.५३) कुत्वम्। 'अथर्वाणो भृगवः सोम्यासः' (ऋ० १०.१४.६)॥

(१५) आप्त्याः—आप्नोतेः अघ्न्यादित्वात् (उ० ४.११३) यक्प्रत्ययः तुगागमश्च निपात्यते। आप्नुवन्ति सर्वमाप्त्या मध्यमस्थाना इन्द्रसहचारिदेवगणाः। 'इनतममाप्त्यमाप्त्यानाम्' (ऋ० १०.१२०.६)॥

(१६) अदितिः—

'सर्वाः स्त्रियो मध्यमस्थाना पुमान् वायुश्च सर्वशः।
गणाश्च सर्वे मरुत इति वृद्धानुशासनम्'[३]॥

अदितिर्व्याख्याता नैगमे (निघ० १.१.१४)। 'दक्षस्य वादिते जन्मनि व्रते' (ऋ० १०.६४.५)॥

(१७) सरमा—'सृ गतौ' (भ्वा० प० ६६९)। 'कलिकर्द्योरमः' (उ०

१. तु०—निरु० ११.१५ स्कन्दटीका।
२. द्र०—स्कन्दटीका (निरु० ३.१७)। बृ० दे० ५.९९।
३. मृग्यम्।

४.८५) इति **बाहुलकादमप्रत्ययः**। पणिभिरसुरैर्निगूढा[१] गा अन्वेष्टुं प्रहिता इन्द्रेण सरमा देवशुनी। 'किमिच्छन्ती सरमा प्रेदमानड्' (ऋ० १०.१०८.१)॥

(१८) सरस्वती—व्याख्याता वाङ्नामसु (निघ० १.११.२२)। 'पावका नः सरस्वती' (ऋ० १.३.१०)॥

(१९) वाक्—व्याख्याता स्वनामसु (निघ० १.११.५०)। 'यद्वाग् वदन्त्यविचेतनानि' (ऋ० ८.१००.१०)॥

(२०) अनुमतिः, (२१) राका—अनुपूर्वान्मन्यतेर्बाहुलकात् कर्त्तरि क्तिन्। अनुमन्यते यदनुमन्तव्यम्। 'रा दाने' (अदा० प० ५०) 'कृदाधारार्चिकलिभ्यः कः' (उ० ३.४०) इति कप्रत्ययः। दीयते हि तस्यां देवेभ्यो हविः। मध्यमस्थाने 'देवपत्न्यौ' (निरु० ११.२८) इति नैरुक्ताः। पौर्णमास्याविति धार्मिकाः[२]। 'अन्विदनुमते त्वम्' (मा० सं० ३४.८)। 'राकामहं सुहवाँ सुष्टुती हुवे' (ऋ० २.३२.४)॥

(२२) सिनीवाली—देवपत्न्यावमावास्ये वा। सिनमन्ननामसु व्याख्यातम् (निघ० २.७.८)। वालं पर्व। 'सिनीवालि पृथुष्टुके' (ऋ० २.३२.६)॥

(२३) कुहूः—'गुहू संवरणे' (भ्वा० उभ० ६३७) अस्मात्, क्वशब्दोपपदाद् भवतेर्हूयतेर्वा 'नृतिशृध्योः कूः' (उ० १.९१) इति बाहुलकात् कूप्रत्ययो गकारस्य ककारादि च। गूढः, दृश्यश्चन्द्रमा[३] न भवति तस्याप्रत्यक्षत्वात्। क्व पुनरसाविति वितर्क्यश्च चन्द्रमा भवति। 'कुहूमहं सुवृतं विद्मनापसम्' (तै० ब्रा० ३.३.११)॥

(२४) यमी—यमेन व्याख्याता (निघ० ५.४.१२)। 'इन् सर्वधातुभ्यः' (उ० ४.११९) इतीन्। 'कृदिकारात्०' (अ० ४.१.४५ ग०सू०) इति ङीष्। 'अन्यमूषु त्वं यम्यन्य उ त्वाम्' (ऋ० १०.१०.१४)॥

(२५) उर्वशी—व्याख्याता (निघ० ४.२.४७)। उर्वश्नुत इत्यादि यथानुसन्धानं योज्यम्। 'प्रोर्वशी तिरत दीर्घमायुः' (ऋ० १०.९५.१०)॥

(२६) पृथिवी—व्याख्याता (निघ० १.३.९)। इह मध्यमाभिधेया। 'खिद्रं बिभर्षि पृथिवि' (ऋ० ५.८४.१)॥

(२७) इन्द्राणी—'इन्द्रवरुण०' (अ० ४.१.४९) इति ङीषानुक् च। मध्यमस्थाना, इन्द्रस्य पत्नी वा। 'इन्द्राणीमासु नारिषु' (ऋ० १०.८६.११)॥

---

१. 'गूढानि' इति मुद्रितेषु।

२. 'याज्ञिकाः' इति निरुक्ते (११.२८) पाठः।

३. 'गुह्यः, दृशश्चन्द्रमा' इति मुद्रितेषु।

(२८) गौरी, (२९) गौः, (३०) धेनुः–व्याख्याता वाङ्नामसु (निघ० १.११.५, ४, ५२)। 'गौरीर्मिमाय सलिलानि तक्षति' (ऋ० १.१६४.४१)। 'गौरमीमेदनु वत्सं मिषन्तम्' (ऋ० १.१६४.२८)। 'उपह्वये सुदुघां धेनुमेताम्' (ऋ० १.१६४.२६)॥

(३१) अघ्न्या–व्याख्याता गोनामसु (निघ० २.११.१)। 'अद्धि तृणमघ्न्ये विश्वदानीम्' (ऋ० १.१६४.४०)॥

(३२) पथ्या, (३३) स्वस्तिः–'पन्थाः पततेः' (निरु० २.२८) इत्यादिना पथिन्शब्दो व्याख्यातः। पद्यते तत्स्थानिभिरिति पन्था अन्तरिक्षम्। तत्र भवा पथ्या 'भवे छन्दसि' (अ० ४.४.११०) इति यत्, 'नस्तद्धिते' (अ० ६.४.१४४) इति टिलोपः। सुपूर्वादस्तेः क्तिन्, 'छन्दस्युभयथा' (अ० ३.४.११७) इति सार्वधातुकत्वाद्[1] भूभावाभावः, आर्द्धधातुकत्वाच्छ्नसोरल्लोपो[2] (अ० ६.४.१११) न भवति। शोभना अस्तिः रसवत्तया[3] यस्याः स्वस्तिः। शोभनत्वञ्चाविनाशित्वात्। 'पथ्यां स्वस्तिं प्रथमां प्रायणीये यजति'[4] इति दृष्टत्वाद् द्विपदमेव समाम्नातम्। 'स्वस्तिरिद्धि प्रपथे श्रेष्ठा' (ऋ० १०.६३.१६)॥

(३४) उषाः–उच्छतीति (निरु० २.१८) व्याख्याता। सा ह्युदकादि विवासयति विवास्यते वा मेघान्[5]। 'अपोषा अनसः सरत्' (ऋ० ४.३०.१०)॥

(३५) इळा–व्याख्याता वाङ्नामसु (निघ० १.११.३)। 'अभि न इळा यूथस्य माता' (ऋ० ५.४१.१९)॥

(३६) रोदसी–व्याख्याता द्यावापृथिवीनामसु (निघ० ३.३०.४)। अत्र पुंयोगलक्षणो ङीष् (अ० ४.१.४८)। रुद्रस्य मध्यमस्थानस्य पत्नी माध्यमिका वाक्। 'सचा मरुत्सु रोदसी' (ऋ० ५.५६.८)॥

इति षट्त्रिंशत् पदानि॥५॥

इति मध्यस्थानदेवताः॥२॥

अश्विनौ (१)। उषाः (२)। सूर्या (३)। वृषाकपायी (४)। सरण्यूः (५)। त्वष्टा (६)। सविता। (७)। भगः (८)। सूर्य्यः (९)। पूषा (१०)। विष्णुः (११)। विश्वानरः

---

१. 'इत्यसार्व०' इति मुद्रितेषु।
२. '०कत्वच्छ्सोरग्लोपः' इति मुद्रितेषु।
३. यथाकोशम्।
४. शाङ्खा० ब्रा० ७.८।
५. 'मेघात्' इति मुद्रितेषु।

(१२)। वरु॑णः (१३)। के॒शी (१४)। के॒शिनः (१५)। वृ॒षाक॑पिः (१६)। य॒मः (१७)। अ॒ज एक॑पात् (१८)। पृ॒थि॒वी (१९)। स॒मु॒द्रः (२०)। द॒ध्यङ् (२१)। अथर्वा (२२)। मनुः (२३)। आ॒दि॒त्याः (२४)। स॒प्त ऋष॑यः (२५)। दे॒वाः (२६)। विश्वे॑देवाः (२७)। सा॒ध्याः (२८)। वस॑वः (२९)। वा॒जिनः (३०)। देवपत्न्यः (३१)। देवपत्न्य इत्येकत्रिंशत्पदानि ॥ ६ ॥

अग्निर्द्रविणोदाअश्वोवायुःश्येनाश्विनौ षट्।

इति निघण्टौ पञ्चमोऽध्यायः समाप्तः ॥ ५ ॥

इति निघण्टुः समाप्तः ॥

—०—

(१) अश्विनौ—अश्वशब्दो व्याख्यातोऽश्वनामसु (निघ० १.१४.२६)। भासा सर्वं जगद् व्याप्नुतः—अवश्यायरसेन मध्यमः, तेजसोत्तमः। द्यावापृथिव्यावहोरात्रे सूर्याचन्द्रमसौ वाश्विशब्दाभिधेयौ। द्यौः ज्योतिषाश्नुते, पृथिवी रसेनान्नलक्षणेन। अहर्ज्योतिषा, रात्रिरवश्यायेन। सूर्यो ज्योतिषा, चन्द्रमा रसेनाह्लादादिना वा। अश्वैस्तुरङ्गैस्तद्वन्तौ राजानौ पुण्यकृताविन्यौर्णवाभः। 'कु॒देद॑मश्विना यु॒वम्' (निरु० १२.२)॥ तयोः काल ऊर्ध्वमर्द्धरात्रात् सूर्योदयपर्यन्तः। तस्मिन्नान्या देवता उपास्ते॥

(२) उषाः—वष्टेर्वोच्छतेर्वा। 'उ॒षस्तच्चि॒त्रमा भ॑र' (ऋ० १.९२.१३)॥

(३) सूर्या—व्याख्याता वाङ्नामसु (निघ० १.११.२१)। एषैवोषाः सूर्या सम्पद्यते। 'आरो॑ह सूर्ये अ॒मृत॑स्य लो॒कम्' (ऋ० १०.८५.२०)॥

(४) वृषाकपायी—वृषाकपेरादित्यस्य पत्नी। 'वृषाकप्यग्निकुसितकुसीद०' (अ० ४.१.३७) इत्यैकारङीपौ। 'वृषा॑कपायि॒ रेव॑ति॒' (ऋ० १०.८६.१३)॥

(५) सरण्यूः—सैवोषा प्रभातकृदुदयावस्था [यदा] सूर्यं प्रत्यात्मानं सरणेन नयति, तदा सरण्यूरुच्यते। सर्त्तेः 'पुंसि सञ्ज्ञायां घः प्रायेण' (अ० ३.३.११८)। सरेण सरणेन नयति 'नृतिशृधिकुहिभ्यः[१] कूः' (स० क० २.१.१२५) इति बाहुलकान्नयतेः कूप्रत्ययः, 'एरनेकाचोऽसंयोगपूर्वस्य'

---

१. 'मृतिमृदिकुदिभ्यः' इत्यपपाठो मुद्रितेषु।

(अ० ६.४.८२)। 'अजहादु द्वा मिथुना सरण्यूः' (ऋ० १०.१७.२)॥

(६) त्वष्टा, (७) सविता–व्याख्यातौ (निघ० ५.२.११, ५.४.२०) तस्य कालो यदा द्यौरपहततमस्काकीर्णरश्मिर्भवति (निरु० १२.१२)। 'वि नाकमख्यत् सविता वरेण्यः' (ऋ० ५.८१.२)॥

(८) भगः–व्याख्यातो धननामसु (निघ० २.१०.१०)। भजनीयो भूतानां स्वकार्यप्रयुक्तानाम्। सावित्रकालानन्तर्वर्त्तिज्योतिर्विशेषो[1] भगाख्यः [अत्यन्तभास्वरः प्रकाशः] प्रागुत्सर्पणादनाविर्भूतमण्डल इत्यर्थः। 'प्रातर्जितं भगमुग्रं हुवेम' (ऋ० ७.४१.२)॥

(९) सूर्यः–व्याख्यातः सूर्याशब्देन (निघ० १.११.२१) प्रागवस्थानः। सरति, कर्मसु जगत् प्रेरयति, वायुना ह्ययं[2] सुष्ठु सर्वदैवोदयास्तमयौ प्रति ईर्यते। 'दृशे विश्वाय सूर्यम्' (ऋ० १.५०.१)॥

(१०) पूषा–'पुष पुष्टौ' (क्र्या० प० ५९)। 'श्वन्नुक्षन्०' (उ० १.१५९) इति कनिन्प्रत्यय उपधादीर्घत्वं निपात्यते। यदा रश्मिभिः परिपुष्टो भवति तदा पूषा। 'भद्रा ते पूषन्निह रातिरस्तु' (ऋ० ६.५८.१)॥

(११) विष्णुः–व्याख्यातो यज्ञनामसु (निघ० ३.१७.१२) तीव्ररश्मिद्वारेण सर्वत्र व्याविशति। विशेर्बाहुलकान्नुप्रत्ययादि। विश्वं रश्मिभिर्व्यश्नुते वा। 'इदं विष्णुर्विचक्रमे' (ऋ० १.२२.१७)॥

(१२) विश्वानरः–व्याख्यातः (निघ० ५.१.३)। इह उत्तमोऽभिधेयः। 'विश्वानरस्य वस्पतिम्' (ऋ० ८.६८.४)॥

(१३) वरुणः–व्याख्यातः (निघ० ५.४.२)। 'त्वं वरुण पश्यसि' (ऋ० १.५०.६)॥

(१४) केशी, (१५) केशिनः–केशा रश्मयः। प्रशंसायामिनिः[3]। प्रकृष्टैः केशैस्तद्वान्। 'काशृ दीप्तौ' (भ्वा० आ० ४३०) काशनं काशः, तद्वान् काशी सन् केशी। नभसो[4] मध्यगत आदित्य उच्यते। 'केश्यग्निं केशी विषम्' (ऋ० १०.१३६.१)॥

(१६) वृषाकपिः–'वृषु सेचने' (भ्वा० प० ४६८)। 'कनिन्युवृषि०' (उ० १.१५६) इत्यादिना कनिन्। 'कपि चलने' (भ्वा० आ० २६९)। 'कुण्ठिकम्प्योर्नलोपश्च' (उ० ४.१४५) इतीप्रत्ययः णिजन्तो वा। अयञ्च

---

१. 'त्वष्टृकाला०' इति मुद्रितेषु। २. 'घटाम्' इति मुद्रितेषु।

३. 'भूमनिन्दाप्रशंसासु०' (महाभाष्य ५.२.९४) इति वचनात्।

४. 'तमसो' इत्यपपाठः मुद्रितेषु।

सेचयिता अवश्यायादीनाम्[१], कम्पयंश्च चरति, दिवाचारीणि भूतानि भयात् कम्पयतीति वा। 'तत्पुरुषे कृति बहुलम्' (अ० ६.३.१३) इति बहुलवचनादलुक्। 'पुन॒रेहि॑ वृषाकपे' (ऋ० १०.८६.२१)॥

(१७) यमः—व्याख्यातः (निघ० ५.४.१२)। संयच्छति[२] रश्मिभिरिति अस्तमयावस्थ आदित्य उच्यते। 'दे॒वैः स॒म्पिब॑ते य॒मः' (ऋ० १०.१३५.१)॥

(१८) अजएकपात्—अस्तमितावस्थ[३] आदित्य उच्यते। द्विपदं चैतत्। अजतेः पचाद्यचि बाहुलकाद् वीभावाभावः। एकश्च पादः। कस्य ? ब्रह्मणः। कुत एतत् ? विज्ञायते हि—'अग्निः पादो वायुः पाद आदित्यः पादो दिशः पादः'[४] इति। तेनाजश्चासावेकपाच्चेति। 'संख्यासुपूर्वस्य' (अ० ५.४.१४०), इत्यबहुव्रीहावपि पादस्याकारलोपः। एकेन पादेनांशेन सर्वमिदं जगद् ज्योतिरात्मनानुप्रविश्याश्नन्[५] पाति, एकेनांशेन उदकं सर्वस्य जगतः पिबति। क्विपि तकारोपजनः। एकोऽस्य पाद इति यथाप्राप्तः[६] पादान्त्यलोपः। 'पावी॑रवी त॒न्य॒तुरेक॑पाद॒जः' (ऋ० १०.६५.१३)॥

(१९) पृथिवी—व्याख्याता (निघ० १.३.९)। इह द्यौरुच्यते। 'यदि॑न्द्राग्नी॒ प॒र॒मस्यां॑ पृथि॒व्याम्' (ऋ० १.१०८.१०)॥

(२०) समुद्रः—व्याख्यातोऽन्तरिक्षनामसु (१.३.१५)। निर्वचनेषु योज्यम्। उत्तमोऽभिधेयः। 'म॒हः स॑मु॒द्रं वरु॑णस्ति॒रोद॑धे' (ऋ० ९.७३.३)॥

(२१) दध्यङ्—ध्यानं ज्ञानं लोककृत्याकृत्यविषयं लोकपालत्वात्। ध्यानं [प्रत्यक्तः] प्रतिगतः। प्रत्यक्तमस्मिन् ध्यानमिति वा। ध्यानशब्दोपपदाद् अञ्चतेः क्विनि[७] पृषोदरादित्वाद् ध्यानशब्दस्य दधिभावः, 'क्विन्प्रत्ययस्य कुः' (अ० ८.२.६२)॥

(२२) अथर्वा—व्याख्यातोऽथर्वाण इत्यत्र (निघ० ५.५.१३)। इह तु उत्तमो वाच्यः। न ह्ययं स्वाधिकारं व्यभिचरति रसादानादिकम्। नित्यमनुतिष्ठतीत्यर्थः॥

(२३) मनुः—मन्यतेर्मननार्थादर्च्चतिकर्मणो वा 'शृस्वृस्निहित्रप्यसिवसिहनिक्लिदिबन्धिमनिभ्यश्च' (उ० १.१०) इत्युप्रत्ययः। मननात् स्वाधिकारादेः, अर्च्यत इति वा मनुरादित्यः। 'यामथर्वा॒ मनु॑ष्पि॒ता द॒ध्यङ् धिय॒मत्न॑त' (ऋ० १.८०.१६)॥

---

१. 'अवश्यायादीन्' इति मुद्रितेषु।
२. 'संगच्छते' इति मुद्रितेषु।
३. 'अस्तभावस्थ' इति मुद्रितेषु।
४. छा० उप० ३.१८.२।
५. '०त्मना प्रविशन्' इति मुद्रितेषु।
६. 'इत्यथाप्राप्तः' इत्यपपाठो मुद्रितेषु।
७. अ० ३.२.५९।

(२४) आदित्याः–आङ्पूर्वाद् दातेर्दीप्यतेर्वा अघ्न्यादित्वाद् (उ० ४.११३) यक्प्रत्ययः। आकारेकारयोरिकारः, दात्रस्तुक् दीप्यतेः पकारस्य तकारश्च निपात्यते। भुवो रसान् रश्मिभिरादत्ते। ज्योतिषां चन्द्रनक्षत्रग्रहादीनां भासमादत्ते वा, तदुदयेऽतद्भानादानव्यपदेशः। आदीप्तो ज्योतिरन्तरापेक्षया हि स्वभासा। अदितेः पुत्रा वा आदित्याः 'दित्यदित्यादित्य०' (अ० ४.१.८५) इति ण्यः। तथा च 'अदितिः पुत्रकामा'[1] इत्यादि ब्राह्मणम्। जसि आदित्याः मित्रादयः। 'इ॒मा गिर॑ आदि॒त्येभ्यो॑ घृ॒तस्नूः॑' (ऋ० २.२७.१)॥

(२५) सप्त ऋषयः–व्याख्याताः (निघ० १.५.१३)। रश्मयः। इन्द्रियाणि[2] वा मनःषष्ठानि विद्यासप्तमानि[3]। 'स॒प्त ऋष॑यः॒ प्रति॑हिता॒ः शरी॑रे' (मा० सं० ३४.५५)॥

(२६) देवाः–दीव्यतिर्दानार्थो दीप्त्यर्थो वा। पचाद्यच् (अ० ३.१.१३४)। दातारोऽभिमतानां भक्तेभ्यः। तैजसत्वाद् दीप्ता वा। द्युतेर्वापि बाहुलकाद्रूपसिद्धिः। अर्थः समानः। दिवः सम्बन्धिनो वा देवाः। 'तस्येदम्' (अ० ४.३.१२०) इत्यणि वृद्ध्यभावश्छान्दसः। 'द्युप्रागपागुदक्प्रतीचो यत्' (अ० ४.२.१००) इति यत्प्रत्ययो नात्र भवति। द्युस्थाना इत्यर्थः। देवा रश्मय उच्यन्ते। 'दे॒वानां॑ भ॒द्रा सु॑म॒तिर्ऋ॑जूय॒ताम्' (ऋ० १.८९.२)॥

(२७) विश्वेदेवाः–सर्वे देवाः। 'विश्वे॑देवास॒ आग॑त' (ऋ० १.३.७)॥

(२८) साध्याः–व्याख्याता रश्मिनामसु (निघ० १.५.१४)। नैरुक्तपक्षे रश्मयः। ऐतिहासिकानान्तु कर्मभिरात्मसाधनात् पूर्वो देवसमूहः। ते[4] च किल विश्वसृजो नाम ऋषयः[5]। 'यत्र॒ पूर्वे॑ सा॒ध्याः सन्ति॑ दे॒वाः' (ऋ० १.१६४.५०)॥

(२९) वसवः–व्याख्याता रश्मिनामसु (निघ० १.५.१०)। विभागेनावस्थितमिदं[6] सर्वमाच्छादयन्ति। अतस्त्रिस्थानेष्वाछादकत्वात् [त्रिस्थाना] वसवः। यावत् किञ्चित् पृथिवीस्थानमग्निभक्ति तत् सर्वं वसुत्वेनाभिप्रेत्यैतदुच्यते–'अग्निर्वसुभिर्वासव इति समाख्या तस्मात् पृथिवीस्थानाः' (निरु० १२.४१)। एवमिन्द्रो वासवः, मरुतो हि वासवाः समाख्याताः, तस्माद् मध्यमस्थानाः। [तथा] वसव आदित्यरश्मयो विवासनात्तमसाम्, तस्माद् द्युस्थानाः। 'अ॒स्मे ध॑त्त वसवो॒ वसू॑नि' (मा० सं० ८.१८), 'ज्मया

---

१. तै० सं० ६.५.६.१। २. 'षडिन्द्रियाणि' इति मुद्रितेषु।
३. विद्या विज्ञानम् इति स्कन्दः (स्कन्दटीका निरु० १२.३७)।
४. 'ये' इति कोशेषु।
५. स्कन्दटीका (निरु० १२.४०)।
६. 'त्रिभागेना०' इति मुद्रितेषु।

अत्र वसवो रन्त देवाः' (ऋ० ७.३९.३)॥

(३०) वाजिनः–वाजिशब्दश्चाश्वनामसु व्याख्यातः (निघ० १.१४.४) रश्मयोऽभिधेयाः। देवाश्वा[1] वाजिनः। 'शन्नो भवन्तु वाजिनो हवेषु' (ऋ० ७.३८.७)॥

(३१) देवपत्न्यः–देवानां पालयित्र्यः पालनीया वा। 'देवानां पत्नीरुशतीरवन्तु नः' (ऋ० ५.४६.७)॥

अध्यायपरिसमाप्तिद्विर्वचनम्, श्रुतिदर्शनात्॥

इत्येकत्रिंशत् पदानि॥ ६॥

इति द्युस्थानदेवताः॥ ३॥

इति अत्रिगोत्रश्रीदेवराजयज्वविरचिते निघण्टुनिर्वचने पञ्चमोऽध्यायः॥ ५॥

इति दैवतं नाम तृतीयं काण्डं समाप्तम्॥[2]

इति निघण्टुनिर्वचनं नाम ग्रन्थः समाप्तः॥

---

१. 'देवाश्च' इति मुद्रितेषु।

२. **इतोऽग्रे**– **आद्यं नैघण्टुकं काण्डं द्वितीयं नैगमन्तथा।**
तृतीयं दैवतञ्चेति समाम्नायस्त्रिधा स्थितः॥ १॥
गौराद्यपारपर्यन्तमाद्यं नैघण्टुकं मतम्।
जहाद्युल्बमृबीसान्तं नैगमं सम्प्रचक्षते।
अग्न्यादिदेवपत्न्यन्तं देवताकाण्डमुच्यते॥ २॥
तत्र च– **अग्न्यादिदेवीऊर्जाहुत्यन्तः क्षितिगतो गणः।**
वाय्वादयो भगान्ताः स्युरन्तरिक्षस्थदेवताः।
सूर्यादिदेवपत्न्यन्ता द्युस्थाना देवता इति॥ ३॥
गौरादिदेवपत्न्यन्तः समाम्नायोऽभिधीयते॥ ४॥

इत्यादयोऽर्धपञ्चमाः श्लोकाः–ऋक्सर्वानुक्रमण्याः षड्गुरुशिष्यकृतवेदार्थदीपिकातः (परि० १२) पूर्वमुद्रितसंस्करणेषूद्धृताः। सायणेन खल्वपीमे 'अनुक्रमणिकाभाष्ये दर्शितम्' इत्युक्त्वोल्लिलिखिरे (द्र०–सायणीय ऋग्वेदभाष्योपक्रमः)। अत्र च तुरीये श्लोके 'गवादिदेवपत्न्यन्तं समाम्नायमधीयते' इति सायणपाठः। नैते श्लोका ग्रन्थावयवा इति प्रस्तुतसंस्करणे मूले न सङ्गृहीताः।

अथ निरुक्त-(निघण्टु)-
पठितपदानामकारादिक्रमेण सूची

पदम्	अर्थः	पृष्ठे
	अ	
असंत्रम्	धनुः कवचञ्च	२८१
अंहुरः	पापी	२९८
अकूपारस्य	आदित्यस्य समुद्रस्य कच्छपस्य च	२६६
अक्तुः	रात्रिः	३१
अक्रः	आक्रामकः	२९४
अक्षरम्	वाक्	६५
अक्षरम्	उदकम्	७८
अक्षाः	क्षियति	२७२
अक्षाः	भूस्थानदेवताः	३०७
अक्षितम्	उदकम्	८७
अगन्	अगमत्	१७६
अग्नायी	भूस्थानदेवता	३१०
अग्निः	भूस्थानदेवता	३०३
अग्निः	मध्यस्थानदेवता	३१५
अग्रिया	अग्रार्हा	२९३
अग्रुवः	नद्यः	९६
अग्रुवः	अङ्गुलयः	१३५
अघशंसः	स्तेनः	२४७
अघ्न्या	गौः	१६०
अघ्न्या	मध्यस्थानदेवता	३२१
अङ्गिरसः	मध्यस्थानदेवताः	३१९
अच्छ	आप्तुम्	२८२
अजएकपाद्	द्युस्थानदेवता	३२४
अजगन्	अगमत्	१७६
अजाः	पूषवाहाः	१०९
अजिरम्	क्षिप्रम्	१७९
अजिराः	नद्यः	१००
अजीगः	भक्षयति	२८८
अज्म	संग्रामे	१९०
अज्म	गृहम्	२१३
अज्राः	क्षिप्राः	१८१
अण्व्यः	अङ्गुलयः	१३५
अतति	गच्छति	१६९
अत्यः	अश्वः	१०१
अथर्यः	अङ्गुलयः	१३६
अथर्यवः	अङ्गुलयः	१३६
अथर्युम्	गमनम्	२७६
अथर्वा	द्युस्थानदेवता	३२४
अथर्वाणः	मध्यस्थानदेवताः	३१९
अदितिः	पृथिवी	८
अदितिः	वाक्	६६
अदितिः	गौः	१६०
अदितिः	अदीना	२६८
अदितिः	मध्यस्थानदेवता	३१९
अदिती	द्यावापृथिव्यौ	२५३
अद्धा	सत्यम्	२२२
अद्धातयः	मेधाविनः	२३३
अद्‌भुतम्	महान्तम्	२०८
अद्मसत्	अन्नसत्	२६५
अद्रिः	मेघः	४२
अध्रिगुः	अधृतगमनः	२७६
अध्वरः	यज्ञः	२३५
अध्वरम्	अन्तरिक्षम्	२१
अध्वा	अन्तरिक्षम्	१९

पदम्	अर्थः	पृष्ठे	पदम्	अर्थः	पृष्ठे
अनभिशस्ताः	प्रशस्यः	२२०	अप्सः	रूपम्	२१७
अनर्वा	अनन्याश्रितः	२९७	अभिख्या	प्रज्ञा	२२२
अनर्शरातिम्	अनश्लीलदानम्	२९७	अभिधेतन	अभिधावत्	२९८
अनवः	मनुष्याः	१२८	अभीके	संग्रामे	१८५
अनवद्यः	प्रशस्यः	२२०	अभीके	आसन्ने	२५१,२५७
अनवब्रवः	अप्रतिहतशासनः	३००	अभीशवः	रश्मयः	२३
अनवायम्	अनवयवम्	२८९	अभीशवः	अङ्गुलयः	१३९
अनिति	गच्छति	१७६	अभीशवः	भूस्थानदेवताः	३०८
अनुमतिः	मध्यस्थानदेवता	३२०	अभीशू	बाहू	१३२
अनुष्टुप्	वाक्	६७	अभ्यर्द्धयज्वा	रसाहरणपूर्वक-वर्षयिता	२८७
अनेद्यः	प्रशस्यः	२१९			
अनेमा	प्रशस्यः	२१९	अभ्यर्ष	अध्येषणम्	२४२
अन्तमानाम्	अन्तिकतमानाम्	१८३	अभ्रम्	मेघः	५०
अन्तरिक्षम्	अन्तरिक्षम्	१८	अभ्वः	महान्	२०६
अन्धः	अन्नम्	१४२	अभ्वम्	उदकम्	९०
अन्धः	तमः	२७२	अमतिः	रूपम्	२१७
अन्नम्	उदकम्	८५	अमतिः	आत्ममयी मतिः	२९०
अपः	उदकानि	८८	अमत्रः	अहिंसितः	२९७
अपः	कर्म	११५	अमवान्	यत्नवान्	२९०
अपत्यम्	अपत्यम्	१२३	अमा	गृहम्	२११
अपान्नपात्	मध्यस्थानदेवता	३१५	अमिनः	अपरिमितः	२९३
अपारे	द्यावापृथिव्यौ	२५४	अमीवा	रोगो हिंसिता वा	२९०
अपीच्यम्	निर्गतमन्तर्हितं वा	२४८	अमूरः	अमूढः	२८९
अप्नवाना	बाहू	१३३	अमृतम्	हिरण्यम्	१४
अप्नः	कर्म	११५	अमृतम्	उदकम्	८८
अप्नः	अपत्यम्	१२२	अम्बरम्	अन्तरिक्षम्	१६
अप्नः	रूपम्	२१८	अम्बरम्	अन्तिकम्	१८३
अप्रतिष्कुतः	अप्रतिगतः	२९३	अम्बु	उदकम्	९०
अप्रायुवः	अप्रमादिनः	२६७	अम्भः	उदकम्	७१
अप्वा	भूस्थानदेवता	३१०	अम्भसी	द्यावापृथिव्यौ	२५२
अप्वे	व्याधिर्भयं वा	२९०	अम्भृणः	महान्	२०७

पदम्	अर्थः	पृष्ठे
अभ्यक्	सहभूता	२९२
अयः	हिरण्यम्	१,२
अयते	गच्छति	१६६
अयथुः	गच्छति	१७८
अया	अनया	२५१,२५९
अयथुः	गच्छति	१७७
अरण्यानी	भूस्थानदेवता	३१०
अररिन्दानि	उदकानि	७७
अरुषः	अश्वः	१०५
अरुषम्	रूपम्	२१९
अरुषति	गच्छति	१७२
अरुषी	उषः	३७
अर्कः	अन्नम्	१४६
अर्कः	वज्रः	१९७
अर्कः	मन्त्रो वृक्षश्च	२७४
अर्चति	अर्चति	२२५
अर्चिः	ज्वलत्	११३
अर्जुनम्	रूपम्	२१९
अर्जुनी	उषाः	३६
अर्णः	उदकम्	७०
अर्णाः	नद्यः	९७
अर्दति	गच्छति	१७३
अर्दयति	हन्ति	१९३
अर्भकः	ह्रस्वः	२०४
अर्भकम्	अल्पम्	२५१,२५७
अर्यः	ईश्वरः	१९९
अर्वा	अश्वः	१०२
अर्वाके	अन्तिके	१८२
अलातृणः	बहूदकमेघः	२८४
अल्पः	ह्रस्वः	२०४
अवः	अन्नम्	१४५

पदम्	अर्थः	पृष्ठे
अवचाकशत्	दद्दशत्	२२३
अवतः	कूपः	२४४
अवतिरति	हन्ति	१९४
अवति	गच्छति	१६६
अवनयः	नद्यः	९३
अवनयः	अङ्गुलयः	१३७
अवनिः	पृथिवी	७
अवमे	अन्तिके	१८३
अविष्यन्	अदन्	१४९
अव्यथयः	अश्वाः	१०५
अशत्	आप्नोत्	१९२
अश्नः	मेघः	४३
अश्नुते	व्याप्नोति	१९२
अश्मा	मेघः	४४
अश्वः	भूस्थानदेवता	३०७
अश्वाः	अश्वाः	१०७
अश्वाजनी	भूस्थानदेवता	३०९
अश्विनौ	द्युस्थानदेवता	३२२
असक्राम्	अप्राप्तपूर्वाम्	२९९
असश्चन्ती	परस्पराश्रिते	२७२
असामि	असुसमाप्तम्	२९७
असिक्नी	रात्रिः	३२
असिन्वती	असङ्खादन्त्यौ हनू	२८६
असुः	प्रज्ञा	२२१
असुनीतिः	मध्यस्थानदेवता	५१
असुरः	मेघः	३१६
असूर्त्ते	वातसमीरिताः	२९२
अस्कृधोयुः	दीर्घायुः	२८५
अस्तम्	गृहम्	२१०
अस्तमीके	अन्तिके	१८३
अस्मे	वयमादिः	२८७

पदम्	अर्थः	पृष्ठे
अस्य	एतस्य	२७०
अस्याः	एतस्याः	२७०
अस्रेमा	प्रशस्यः	२१९
अहना	उषाः	३७
अहिः	मेघः	४९
अहिः	उदकम्	७८
अहिः	मध्यस्थानदेवता	३१७
अहिर्बुध्न्यः	मध्यस्थानदेवताः	३१७
अही	गौः	१६०
अही	द्यावापृथिव्यौ	२५३
अह्नाय	पुरातनम्	२५०
अह्रयाणः	अह्रीयमाणः	२७८
आ		
आ	उपमा	२२४,२५६
आ	अर्वाक्	२७५
आकाशम्	अन्तरिक्षम्	१८
आकीम्	सर्वपदसमाम्नानाय	२२४
आकृतम्	सर्वपदसमाम्नानाय	२२४
आके	अन्तिके	१८२
आके	दूरे	२४८
आकेनिपः	मेधावी	२३२
आक्रन्दे	संग्रामे	१८५
आक्षाणः	व्यापमानः	१९१
आखण्डलः	हन्ता	१९४
आघृणिः	आगतदीप्तिः	२७६
आङ्गूषः	आघोषः	२७६
आचके	इच्छामि	१४०
आचक्ष्म	अपश्याम	२२३
आजौ	संग्रामे	१८५
आणौ	संग्रामे	१८९
आताः	दिशः	२८
आतिरत्	अहन्	१९४
आदित्याः	द्युस्थानदेवताः	३२५
आधवः	आधावकः	२९९
आनट्	व्यापत्	१९१
आनशे	व्याप	१९२
आनुषक्	अनुषक्तम्	२९१
आपः	अन्तरिक्षम्	१९
आपः	उदकानि	८३
आपः	भूस्थानदेवताः	३०९
आपानः	आप्नुवन्	१९१
आपान्तमन्युः	आपादितदीप्तिः	२७७
आप्त्याः	मध्यस्थानदेवताः	३१९
आयती	बाहू	१३२
आयवः	मनुष्याः	१२८
आयुः	अन्नम्	१४७
आयुधानि	उदकानि	७७
आरितः	मुहुर्भृशं वा गतः	२७८
आरे	दूरे	२४९
आर्त्नी	भूस्थानदेवता	३११
आर्यति	गच्छति	१७२
आवयति	अत्ति	१४८
आवयाः	उदकानि	८२
आशाः	दिशः	२८
आशाभ्यः	दिग्भ्यः	२८४
आशिषः	अध्येषणम्	२४२
आशीः	दधि	२८८
आशु	क्षिप्रम्	१८०
आशुः	अश्वः	१०५
आशुशुक्षणिः	अग्निः	२८४
आष्ट	व्यापत्	१९१
आष्टाः	दिशः	२८

पदम्	अर्थः	पृष्ठे
आसात्	अन्तिकात्	१८२
आहनः	हे आहन्तः	२७१
आहनसः	वचनवन्तः	२६५
आहवे	संग्रामे	१८५
आहिकम्	सर्वपदसमाम्नानाय	२२४
इ		
इत्था	सत्यम्	२२२
इत्था	अनेन हेतुना	२७४
इदम्	उदकम्	९२
इदंयुः	इदं कामयमानः	३०१
इदा	नूतनम्	२५०
इदानीम्	नूतनम्	२५०
इध्मः	भूस्थानदेवता	३०४
इनः	ईश्वरः	२००
इन्दुः	उदकम्	८८
इन्दुः	यज्ञः	३७
इन्दुः	मध्यस्थानदेवता	३१६
इन्द्रः	मध्यस्थानदेवता	३१३
इन्द्राणी	मध्यस्थानदेवता	३२०
इन्द्रियम्	धनम्	१५७
इन्वति	व्याप्नोति	१९१
इन्वति	गच्छति	१७६
इयक्षति	गच्छति	१६९
इयर्ति	गच्छति	१७३
इरज्यति	ईष्टे	१९९
इरज्यति	परिचरति	२१३
इरध्यति	परिचरति	२१३
इरा	अन्नम्	१४५
इरावत्यः	नद्यः	९९
इळः	भूस्थानदेवता	३०५
इळा	पृथिवी	९
इळा	वाक्	५४
इळा	मध्यस्थानदेवता	३२१
इळा	अन्नम्	१४५
इळा	गौः	१६०
इळीबिशः	इलाबिलशयोमेघः	२९५
इव	उपमा	२२४,२५६
इषति	गच्छति	१७५
इषम्	अन्नम्	१४५
इषिरेण	दर्शनेन	२६२
इषुः	भूस्थानदेवता	३०८
इषुधिः	भूस्थानदेवता	३०८
इषुध्यति	याचते	२४०
इष्टिः	यज्ञः	२३६
इष्मिणः	एषितारो गन्तारो द्रष्टारो वा	२६५
ई		
ईक्षे	इशसे	२८७
ईङ्खते	गच्छति	१७३
ईम्	उदकम्	८४
ईम्	पदपूरणाय	२८२
ईमहे	याचामहे	२३८
ईयर्त्ति	गच्छति	१७३
ईर्त्ते	गच्छति	१७३
ईर्मान्तासः	आदित्याश्वाः	२६४
ईषति	गच्छति	१७२
उ		
उक्थ्यः	प्रशस्यः	२२०
उक्षा	महान्	२०६
उक्षितः	महान्	२०५
उत्सः	कूपः	२४४
उदकम्	उदकम्	७९

पदम्	अर्थः	पृष्ठे
उपजिह्विका	सीमिका	२५१,२५८
उपब्दिः	वाक्	६०
उपमे	अन्तिके	१८३
उपरः	मेघः	४८
उपराः	दिशः	२८
उपलः	मेघः	४८
उपलप्रक्षिणी	सक्तुकारिका	२८७
उपसि	उपस्थः	२८७
उपाके	अन्तिके	१८२
उराणः	बहुकुर्वाणः	२९४
उरु	बहु	२०१
उर्वशी	बहुकामा	२७७
उर्वशी	मध्यस्थानदेवता	३२०
उर्वी	पृथिवी	७
उर्वी	द्यावापृथिव्यौ	२५३
उर्व्यः	नद्यः	९९
उलूखलम्	भूस्थानदेवता	३०९
उलूखलमुसले	भूस्थानदेवता	३१०
उल्बम्	अन्तर्गर्भवेष्टनम्	३०२
उश्मसि	इच्छसि	१४०
उशिक्	इच्छति	१४१
उशिजः	मेधाविनः	२३२
उषाः	मध्यस्थानदेवता	३२१
उषाः	द्युस्थानदेवता	३२२
उषासानक्ता	भूस्थानदेवता	३०५
उस्रा	गौः	१६०
उस्राः	रश्मयः	२५
उस्रिया	गौः	१६०
	ऊ	
ऊतिः	अवनम्	२७३
ऊधः	रात्रिः	३३
ऊर्क्	अन्नम्	१४६
ऊर्जस्वत्यः	नद्यः	९९
ऊर्जाहुती	भूस्थानदेवता	३१२
ऊर्दरम्	आवपनम्	२५१,२५८
ऊर्म्या	रात्रिः	३१
	ऋ	
ऋक्	वाक्	६२
ऋक्षाः	नक्षत्राणि	२५१,२५८
ऋचीषमः	स्तुतिसमानगुणः	२९७
ऋच्छति	गच्छति	१६९
ऋच्छति	परिचरति	२१४
ऋजुनीतिः	अकुटिलपथा	२९६
ऋञ्जति	प्रसाधयति	२९६
ऋणद्धि	परिचरति	२१४
ऋणोति	परिचरति	१७०
ऋण्वति	परिचरति	१७०
ऋतम्	उदकम्	८५
ऋतम्	सत्यम्	२२२
ऋतः	मध्यस्थानदेवता	३१६
ऋतस्य योनिः	उदकम्	८६
ऋतावर्यः	नद्यः	९९
ऋदूदरः	मृदूदरः	२८६
ऋदूपे	अर्दनेन पातयितारौ	२८६
ऋधक्	पृथक्	२६९
ऋध्नोति	परिचरति	२१४
ऋबीसम्	पृथिवीम्	३०२
ऋभवः	मध्यस्थानदेवताः	३१९
ऋभुः	मेधावी	२३०
ऋभुक्षाः	महान्	२०६
ऋश्यदात्	कूपात्	२४४
ऋष्वः	महान्	२०५

पदम्	अर्थः	पृष्ठे
ऋहन्	ह्रस्वः	२०२
	ए	
एजति	गच्छति	१७५
एतग्वा	अश्वः	१०३
एतशः	अश्वः	१०४
एति	गच्छति	१७७
एनम्	एनम्	२८२
एना	एनेन	२५१,२५९
एनाम्	एनाम्	२८२
एन्यः	नद्यः	९४
एरिरे	प्रेरितवन्तः	२६९
एहः	क्रोधः	१६४
	ओ	
ओजः	उदकम्	८०
ओजः	बलम्	१५०
ओण्यौ	द्यावापृथिव्यौ	२५३
ओदती	उषाः	३५
ओदनः	मेघः	५०
ओमना	अवनाय अवनेन वा	२८६
ओमासः	रक्षितारः	२८९
ओषम्	क्षिप्रम्	१७८
ओषधयः	भूस्थानदेवताः	३०९
	औ	
औच्चैःश्रवसः	अश्वः	१०५
	क	
कः	मध्यस्थानदेवता	३१५
ककुभः	दिशः	२९
ककुहः	महान्	२०७
कक्ष्याः	अङ्गुलयः	१३६

पदम्	अर्थः	पृष्ठे
कण्टति	गच्छति	१६७
कण्वः	मेधावी	२३०
कत्पयम्	सुखपयोमेघः	२८५
कनति	इच्छति	१४१
कनकम्	हिरण्यम्	१४
कपना	घुणाः	२८६
कबन्धम्	उदकम्	७१
कम्	उदकम्	८४
कम्	सुखम्	२१६
कम्पते	क्रुध्यति	१६२
करणानि	कर्माणि	११७
करन्ती	कुर्वन्ती	११८
करांसि	कर्माणि	११८
करस्नौ	बाहू	१३३
करिक्रत्	कर्म	११८
करुणम्	कर्म	११७
करूळती	कृत्तदती	३००
कर्त्तः	कूपः	२४३
कर्त्तवै	कर्म	११९
कर्तोः	कर्म	११८
कर्त्वम्	कर्म	११८
कर्वरम्	कर्म	११७
कल्मलीकीनम्	ज्वलत्	११२
कवते	गच्छति	१६८
कवन्धम्	उदकम्	७१
कविः	मेधावी	२३१
कशः	उदकम्	७४
कशा	वाक्	६४
कसति	गच्छति	१६६
काकुत्	वाक्	६१
काकुदम्	तालु	२८१

पदम्	अर्थः	पृष्ठे
काञ्चनम्	हिरण्यम्	१४
काटः	कूपः	२४३
काणुका	कान्तः	२७६
कातुः	कूपः	२४३
कानिषत्	इच्छेत्	१४१
कायमानः	कामयमानः	२६४
कारुः	स्तोता	२३४
कारोतरात्	कूपात्	२४४
कालयति	गच्छति	१६७
काशिः	मुष्टिः	२८४
काष्ठाः	दिशः	२८
किः	कर्त्ता	३०१
किमीदिने	पिशुनाय	२८९
कियेधाः	कियद्धा इन्द्रः	२९६
किरणाः	रश्मयः	२२
कीकटेषु	अनार्य्यदेशेषु	३०१
कीरिः	स्तोता	२३४
कीलालम्	अन्नम्	१४७
कीस्तासः	मेधाविनः	२३२
कुटस्य	कृतस्य	२८०
कुणारुम्	मेघम्	२८४
कुत्सः	वज्रः	१९७
कुरवः	ऋत्विजः	२३७
कुरुतन	कुरुत	२६३
कुलिशः	वज्रः	१९७
कुलिशः	कूलशातनः	२९५
कुल्याः	नद्यः	९८
कुवित्	बहु	२०२
कुशयः	कूपः	२४४
कुहूः	मध्यस्थानदेवता	३२०
कूपः	कूपः	२४३
कृण्वति	हन्ति	१९३
कृत्तिः	गृहम्	२१२
कृत्तिः	यशोऽन्नं वा	२८०
कृत्वी	कर्म	११९
कृदरः	गृहम्	२०९
कृदरम्	आवपनम्	२५१, २५८
कृधु	ह्रस्वः	२०३
कृन्तति	हन्ति	१९३
कृपण्यति	अर्च्चति	२२६
कृपण्युः	स्तोता	२३५
कृपायति	अर्च्चति	२२६
कृपीटम्	उदकम्	९०
कृशनम्	हिरण्यम्	१३
कृशनम्	रूपम्	२१८
कृष्टयः	मनुष्याः	१२६
केतः	प्रज्ञा	२२१
केतुः	प्रज्ञा	२२१
केपयः	दुष्कामाः	२८१
केवटः	कूपः	२४५
केशिनः	द्युस्थानदेवताः	३२३
केशी	द्युस्थानदेवता	३२३
कोशः	मेघः	५२
कौरयाणः	कृतप्रयाणः	२७८
क्रतुः	कर्म	११७
क्रतुः	प्रज्ञा	२२१
क्राणाः	कुर्वाणाः	२६८
क्रिविः	कूपः	२४४
क्रिविर्दती	विकर्त्तनदन्ती	३००
क्षत्रम्	उदकम्	८१
क्षत्रम्	धनम्	१५६
क्षद्म	उदकम्	७०

पदम्	अर्थः	पृष्ठे
क्षद्म	अन्नम्	१४६
क्षपः	उदकम्	७८
क्षपा	रात्रिः	३०
क्षमा	पृथिवी	६
क्षयति	ईष्टे	१९९
क्षा	पृथिवी	६
क्षितयः	मनुष्याः	१२५
क्षितिः	पृथिवी	६
क्षिपः	अङ्गुलयः	१३५
क्षिपस्ती	बाहू	१३४
क्षियति	गच्छति	१७०
क्षीरम्	उदकम्	७३
क्षु	अन्नम्	१४५
क्षुम्पति	गच्छति	१७५
क्षुम्पम्	अहिच्छत्रकम्	२७९
क्षुल्लकः	ह्रस्वः	२०४
क्षेत्रस्यपतिः	मध्यस्थानदेवता	३१४
क्षोणस्य	निवसितुः	२८७
क्षोणिः	पृथिवी	६
क्षोणी	द्यावापृथिव्यौ	२५२
क्षोदः	उदकम्	७०
क्षोदति	गच्छति	१६८
क्ष्मा	पृथिवी	५
	ख	
खजे	संग्रामे	१८९
खले	संग्रामे	१८९
खाः	नद्यः	९४
खातः	कूपः	२४३
खेदयः	रश्मयः	२२
	ग	
गणः	रश्मयः	६३

पदम्	अर्थः	पृष्ठे
गधिता	गृहीता	२७८
गध्यम्	मिश्रयितव्यम्	२७८
गन्ति	गच्छति	१७४
गनीगन्ति	गच्छति	१७४
गभस्तयः	रश्मयः	२४
गभस्तयः	अङ्गुलयः	१३९
गभस्ती	बाहू	१३३
गभीरः	महान्	२०७
गभीरम्	उदकम्	८४
गभीरा	वाक्	५५
गभीरे	द्यावापृथिव्यौ	२५३
गमति	गच्छति	१७४
गम्भरम्	उदकम्	८४
गम्भीरा	वाक्	५५
गम्भीरे	द्यावापृथिव्यौ	२५३
गयः	अपत्यम्	१२२
गयः	धनम्	१५७
गयः	गृहम्	२०९
गर्त्तः	गृहम्	२१०
गल्दया	गालनेन	२९८
गल्दा	वाक्	६७
गवते	गच्छति	१६८
गहनम्	उदकम्	८४
गाति	गच्छति	१६९
गातुः	पृथिवी	११
गातुः	गमनम्	२६९
गाथा	वाक्	६३
गान्धर्वी	वाक्	५५
गायति	अर्चति	२२५
गावः	उषोवाहाः	१०९
गावः	रश्मयः	२३

पदम्	अर्थः	पृष्ठे
गिरिः	मेघः	४५
गिर्वणाः	गोर्भिर्वननीयः	२९१
गीः	वाक्	६३
गूर्द्धयति	अर्चति	२२५
गृणाति	अर्चति	२२५
गृत्सः	मेधावी	२३०
गोत्रः	मेघः	४३
गोत्रा	पृथिवी	११
गौः	पृथिवी	४
गौः	द्यौरादित्यश्च	२१,२५५
गौः	वाक्	५४
गौः	स्तोता	२३४
गौः	रश्मिः	२६९
गौः	मध्यस्थानदेवता	३२१
गौरी	वाक्	५४
गौरी	मध्यस्थानदेवता	३२१
ग्नाः	वाचः	६४
ग्नाः	स्त्रियः	२५१,२५९
ग्मा	पृथिवी	५
ग्रावा	मेघः	४२
ग्रावाणः	भूस्थानदेवता	३०७
	घ	
घर्मः	अहः	४१
घर्मः	यज्ञः	२३७
घृणः	अहः	४१
घृणिः	ज्वलत्	११३
घृणिः	क्रोधः	१६३
घृतम्	उदकम्	७२
घृतवती	द्यावापृथिव्यौ	२५३
घृताची	रात्रिः	३२
घोषः	वाक्	६२

पदम्	अर्थः	पृष्ठे
घ्रंसः	अहः	४१
	च	
चकमानः	इच्छन्	१४१
चक्रत्	कर्म	११८
चक्रतुः	चक्रतुः	१४०
चतति	गच्छति	१६९
चनः	अन्नम्	२९३
चन्द्रम्	हिरण्यम्	१२
चन्द्रमाः	मध्यस्थानदेवता	३१८
चमसः	मेघः	४९
चम्वौ	द्यावापृथिव्यौ	२५३
चयसे	चातयति	२६९
चरुः	मेघः	४५
चर्कृत्यम्	कर्म	११८
चर्षणयः	मनुष्याः	१२६
चर्षणिः	द्रष्टा	२८०
चष्टे	पश्यति	२२३
चाकन्	चायन् कामयमानो वा	२९९
चाकनत्	मुहुर्भृशं वा ऐच्छत्	१४१
चाकनत्	ददृशत्	२२३
चिक्यत्	ददृशत्	२२३
चित्	उपमा	२२४,२५६
चित्	सोमक्रयणी गौः	२७४
चित्तम्	प्रज्ञा	२२१
चित्रामघा	उषाः	३५
चेतः	प्रज्ञा	२२१
चोष्कूयमाणः	अत्यर्थं ददत्	२९६
चोष्कूयते	अत्यर्थं ददाति	२९६
च्यवते	गच्छति	१६८

पदम्	अर्थः	पृष्ठे
च्यवानः	गमयिता	२६७
च्यवाना	बाहू	१३२
च्यौत्नम्	बलम्	१५३
	छ	
छद्रयते	अर्चति	२२७
छदिः	गृहम्	२१२
छन्त्सत्	ऐच्छत्	१४१
छन्दः	स्तोता	२३४
छन्दति	अर्चति	२२७
छन्दते	ज्वलति	१११
छर्दिः	गृहम्	२१२
छाया	गृहम्	२१२
	ज	
जगतः	मनुष्याः	१२९
जगती	गौः	१६१
जङ्गन्ति	मुहुर्भृशं वा गच्छति	१७४
जगायात्	गच्छेत्	१७७
जज्झतीः	आपः	२९३
जञ्जणाभवन्	ज्वलत्	११२
जठरम्	उदरम्	२६३
जन्तवः	मनुष्याः	१२५
जन्म	उदकम्	७४
जबारु	आदित्यमण्डलम्	२९५
जमत्	ज्वलत्	११२
जमति	गच्छति	१७५
जरते	अर्चति	२२५
जरते	स्तौति	२६९
जरयति	अर्चति	२२७
जरिता	स्तोता	२३३
जरूथम्	स्तोत्रम्	२९५
जलम्	उदकम्	९१
जलाषम्	सुखम्	२१६
जलाषम्	उदकम्	९२
जल्पति	अर्चति	२२९
जल्हवः	ज्वलनेन हीनाः	२९८
जवति	गच्छति	१७५
जसति	गच्छति	१७४
जसुरिः	बद्धमुक्तः	२६९
जहा	जघान	२६१
जाः	अपत्यम्	१२२
जातरूपम्	हिरण्यम्	१५
जातवेदाः	भूस्थानदेवता	३०३
जामयः	अङ्गुलयः	१३७
जामि	उदकम्	७७
जामिः	अतिरेकादयः	२६८
जारयायि	अजायत	२९२
जिगाति	गच्छति	१७६
जिन्वति	गच्छति	१७४
जिन्वति	प्रीणाति	२९७
जिह्वा	वाक्	६१
जीराः	क्षिप्राः	१७८
जुषते	इच्छति	१४०
जुहुरे	जुह्वति	२६७
जूर्णिः	क्रोधः	१९६
जूर्णिः	क्षिप्रम्	१७८
जूर्णिः	सेना	२८६
जेहते	गच्छति	१७५
जोषवाकम्	अविस्पष्टवचनम्	२८०
ज्मा	पृथिवी	५
ज्या	भूस्थानदेवता	३०८
ज्योतते	ज्वलति	१११
ज्रयति	गच्छति	१७३

त

पदम्	अर्थः	पृष्ठे
तकति	गच्छति	१७२
तक्म	अपत्यम्	१२२
तक्वा	स्तेनः	२४५
ततनुष्टिम्	तितनिषुम्	२९५
तथा	उपमा	२२४,२२६
तद्रूपः	उपमा	२२४,२५६
तद्वर्णः	उपमा	२२४,२५६
तद्वत्	उपमा	२२४,२५६
तनयः	अपत्यम्	१२१
तना	धनेन	१५८
तनूनपात्	भूस्थानदेवता	३०४
तपः	ज्वलत्	११३
तपुषी	क्रोधः	१६४
तमः	रात्रिः	३२
तमस्वती	रात्रिः	३२
तरणिः	क्षिप्रम्	१८१
तरः	बलम्	१५१
तरस्वत्यः	नद्यः	१००
तरुष्यति	गमिष्यति	२७२
तळित्	अन्तिकम्	१८२
तळित्	हन्ता	१९४
तवः	बलम्	१५१
तवसः	महान्	२०५
तविषः	महान्	२०५
तविषी	बलम्	१५२
तस्करः	स्तेनः	२४६
तस्थुषः	मनुष्याः	१२९
ताजत्	क्षिप्रम्	१८१
तासुः	स्तोता	२३४
ताम्रम्	रूपम्	२१९

पदम्	अर्थः	पृष्ठे
तायुः	स्तेनः	२४६
तार्क्ष्यः	अश्वः	१०५
तार्क्ष्यः	मध्यस्थानदेवता	३१५
ताळ्हि	हंसि	१९५
तिग्मम्	वज्रः	१९७
तितउ	चालनी	२६३
तिरः	प्राप्तम्	२५१,२५७
तिस्रो देवीः	भूस्थानदेवताः	३०५
तुग्र्या	उदकम्	७५
तुग्वनि	तूर्णगामिनि	२६४
तुक्	अपत्यम्	१२०
तुज्यमानासः	क्षिप्राः	१८०
तुञ्जः	दानम्	२९५
तुञ्जः	वज्रः	१९७
तुञ्जति	ददाति	२४१
तुरीपम्	उदकम्	२९६
तुरीयति	गच्छति	१६९
तुर्वणिः	तूर्णवनिः	२९१
तुर्वशाः	मनुष्याः	१२८
तुर्वशे	अन्तिके	१८२
तुवि	बहु	२०१
तूताव	ववृधे	२६९
तूतुजानः	क्षिप्रम्	१८०
तूतुजिः	क्षिप्रम्	१८०
तूतुमाकृषे	तूर्णं कुरुषे	२८१
तूयम्	उदकम्	९०
तूयम्	क्षिप्रम्	१७९
तूर्णाशम्	उदकम्	२७९
तूर्णिः	क्षिप्रम्	१७९
तृणेळ्हि	हन्ति	१९५
तृपुः	स्तेनः	२४५

पदम्	अर्थः	पृष्ठे
तृप्तिः	उदकम्	७८
तृषु	क्षिप्रम्	१७९
तेजः	उदकम्	९१
तेजः	ज्वलत्	११३
तोकम्	अपत्यम्	१२१
तोक्म	अपत्यम्	१२१
तोदः	गृहस्थः	२७५
तोयम्	उदकम्	९०
तौरयाणः	तूर्णगमनः	२७८
त्यजः	क्रोधः	१६३
त्वः	अर्द्धः	२५१, २५७
त्वक्षः	बलम्	१५१
त्वष्टा	भूस्थानदेवता	३०६
त्वष्टा	मध्यस्थानदेवता	३१६
त्वष्टा	द्युस्थानदेवता	३२३
त्सरति	गच्छति	१६९
	द	
दंसः	कर्म	११५
दंसयः	कर्माणि	२६९
दक्षः	बलम्	१५२
दघ्यति	गच्छति	१७१
दत्रम्	हिरण्यम्	१५
दद्धि	याचस्व	२३९
दधिक्राः	अश्वः	१०३
दधिक्राः	मध्यस्थानदेवता	३१६
दधिक्रावा	अश्वः	१०३
दध्यङ्	द्युस्थानदेवता	३२४
दनः	दानमानसः	३००
दभ्नोति	गच्छति	१७२
दभ्नोति	हन्ति	१९२
दभ्रम्	ह्रस्वः	२०३
दभ्रम्	अल्पम्	२५१, २५७
दमे	गृहे	२११
दमूनाः	दान्तः	२६२
दयते	ददाति	२६६
दाति	ददाति	२४१
दावने	देवस्य देवं वा	२६६
दाशति	ददाति	२४१
दासति	ददाति	२४१
दिद्युत्	वज्रः	१९६
दिनम्	अहः	४१
दिवा	अहः	४१
दिविष्टिषु	दिव एषणेषु	२९७
दिवेदिवे	अहन्यहनि	४१
दीदयति	ज्वलति	११०
दीधितयः	रश्मयः	२४
दीधितयः	अङ्गुलयः	१३९
दीयति	गच्छति	१७२
दुन्दुभिः	भूस्थानदेवता	३०८
दुरितम्	पापम्	२९०
दुरोणे	गृहे	२१०
दुर्याः	गृहाः	२११
दुवस्यति	परिचरति	२१३
दूतः	दूतः	२७१, २९७
दूरेअन्ते	द्यावापृथिव्यौ	२५४
दृतिः	मेघः	५०
देवताता	यज्ञः	२३६
देवपत्न्यः	द्युस्थानदेवताः	३२६
देवयवः	ऋत्विजः	२३८
देवाः	द्युस्थानदेवताः	३२५
देवाच्या	देवान् प्रति गतया	२८९
देवी ऊर्जाहुती	भूस्थानदेवता	३१२

पदम्	अर्थः	पृष्ठे
देवीजोष्ट्री	भूस्थानदेवता	३१२
दैव्याहोतारा	भूस्थानदेवता	३०५
दोधति	क्रुध्यति	१६२
दोषा	रात्रिः	३२
दौर्गहः	अश्वः	१०४
द्यविद्यवि	अहन्यहनि	४१
द्यावापृथिवी	भूस्थानदेवता	३११
द्युगत्	क्षिप्रम्	१८१
द्युमत्	ज्वलति	१११
द्युम्नम्	यशोऽन्नं वा	२७५
द्योतते	ज्वलति	१११
द्योतना	उषाः	३७
द्यौः	अहः	३९
द्रमति	गच्छति	१७६
द्रवत्	क्षिप्रम्	१७८
द्रवति	गच्छति	१७६
द्रविणम्	बलम्	१५४
द्रविणम्	धनम्	१५९
द्रविणोदाः	भूस्थानदेवता	३०४
द्राति	गच्छति	१७५
द्रुघणः	भूस्थानदेवता	३०९
द्रुपदे	काष्ठपादुकासु	२६४
द्रुह्यवः	मनुष्याः	१२८
द्रूणाति	हन्ति	१९४
द्रूळति	गच्छति	१७५
द्वारः	भूस्थानदेवता	३०५
द्विता	द्विधा	२७३
द्विबर्हाः	इन्द्रः	२९४
	ध	
धनुः	भूस्थानदेवता	३०८
धन्व	अन्तरिक्षम्	१८

पदम्	अर्थः	पृष्ठे
धन्व	अन्तरिक्षम्	२७४
धन्वति	गच्छति	१७२
धमति	गच्छति	१७०
धमति	हन्ति	१९५
धमति	अर्चति	२२६
धमनिः	वाक्	५७
धरुणम्	उदकम्	७६
धर्णसिः	बलम्	१५४
धवाः	मनुष्याः	१२५
धाता	मध्यस्थानदेवता	३१८
धारा	वाक्	५४
धासि	अन्नम्	१४५
धिषणा	वाक्	६५
धिषणे	द्यावापृथिव्यौ	२५२
धीः	कर्म	११९
धीः	प्रज्ञा	२२१
धीतयः	अङ्गुलयः	१३६
धीरः	मेधावी	२३०
धुनयः	नद्यः	९५
धुरः	अङ्गुलयः	१३८
धूर्वति	हन्ति	१९३
धेना	वाक्	६४
धेनुः	वाक्	६७
धेनुः	मध्यस्थानदेवता	३२१
ध्रजति	गच्छति	१७०
ध्रति	गच्छति	१७४
ध्रयति	गच्छति	१७४
ध्राति	गच्छति	१७४
ध्वंसति	गच्छति	१६७
ध्वरति	हन्ति	१९३
ध्वस्मन्वत्	उदकम्	७७

न

पदम्	अर्थः	पृष्ठे
न	उपमा	२२४,२५६
नंसन्ते	नमन्ति	२६५
नकिः	सर्वपदसमाम्नानाय	२२४
नकीम्	सर्वपदसमाम्नानाय	२२४
नक्ता	रात्रिः	३२
नक्षति	गच्छति	१६८
नक्षति	व्याप्नोति	१९१
नक्षद्दाभम्	शत्रुहन्तारम्	२८५
नम्रा	वाक्	६४
नदः	स्तोता	२३४
नदः	ऋषिः	२७२
नदति	अर्चति	२२५
नदनुः	सङ्ग्रामः	१८४
नद्यः	नद्यः	१०१
नद्यः	भूस्थानदेवताः	३०९
नपात्	अपत्यम्	१२३
नभः	द्यौरादित्यश्च	२५६
नभः	उदकम्	७०
नभते	हन्ति	१९३
नभन्वः	नद्यः	९६
नभसी	द्यावापृथिव्यौ	२५२
नमः	अन्नम्	१४७
नमः	वज्रः	१९६
नमस्यति	परिचरति	२१३
नम्या	रात्रिः	३२
नरः	अश्वाः	१०७
नरः	मनुष्याः	१२५
नराशंसः	भूस्थानदेवता	३०५
नवते	गच्छति	१६८
नवम्	नूतनम्	२५०

पदम्	अर्थः	पृष्ठे
नवेदाः	मेधावी	२३१
नव्यम्	नूतनम्	२५०
नशत्	व्याप्नुयात्	१९२
नसते	गच्छति	१७३
नसन्त	प्राप्नुवन्ति	
	नमन्ति वा	२६५
नहुषः	मनुष्याः	१२६
नाकः	द्यौरादित्यश्च	२१,२५५
नादः	स्तोता	३४
नाम	उदकम्	८७
नाराशंसः	भूस्थानदेवता	३०७
नार्यः	यज्ञः	२३६
नाळीः	वाक्	५८
निघृष्वः	ह्रस्वः	२०३
निचुम्पुणः	समुद्रः	२७९
निण्यम्	निर्गतमन्तर्हितं वा	२४७
नितोशते	हन्ति	१९५
निधा	पाशसमूहः	२६२
निबर्हयति	हन्ति	१९५
नियुतः	वायुवाहाः	१०९
नियुत्वान्	ईश्वरः	२००
निर्ऋतिः	पृथिवी	९
निर्णिक्	रूपम्	२१७
निवपन्तु	घ्नन्तु	१९४
निवित्	वाक्	५९
निशृम्भाः	अविश्रामहरणाः	२८५
निष्षपी	सुखस्पर्शा	२७८
नीरम्	उदकम्	८६
नीळम्	उदकम्	२११
नु	क्षिप्रम्	१७८
नु	उपमा	२२४,२५६

पदम्	अर्थः	पृष्ठे
नुकम्	सर्वपदसमाम्नानाय	२२४
नूच	सर्वपदसमाम्नानाय	२६६
नूचित्	सर्वपदसमाम्नानाय	२६६
नूतनम्	नूतनम्	२५०
नूत्नम्	नूतनम्	२५०
नृम्णम्	बलम्	१५१
नृम्णम्	धनम्	१५८
नेमः	अन्नम्	१४६
नेम	अर्द्धः	२५१,२५७
नेमधिता	सङ्ग्रामे	१८५
नेमा	अन्नम्	१४६
नेमिः	वज्रः	१९६
नौः	वाक्	६५
नौति	अर्चति	२२७
	प	
पचता	पक्वः	२९३
पञ्चजनाः	मनुष्याः	१३०
पड्भिः	पानैः	२७३
पणते	अर्चति	२२७
पणायति	अर्चति	२२७
पतङ्गाः	अश्वाः	१०६
पतति	गच्छति	१७६
पतिः	ईश्वरः	२००
पत्यते	ईष्टे	१९९
पथ्या	मध्यस्थानदेवता	३२१
पदिम्	पक्षिणम्	२७९
पनस्यति	अर्चति	२२६
पनायते	अर्चति	२२६
पपृक्षाः	अर्चति	२२८
पयः	रात्रिः	३४
पयः	अन्नम्	१४३
पयस्वती	रात्रिः	३२
पयस्वत्यः	नद्यः	१००
परशुः	वज्रः	१९८
पराके	दूरे	२४८
पराचैः	दूरम्	२४८
परावतः	दूरात्	२४९
पराशरः	इन्द्रः	३००
परि	सर्वतः	२८२
परितक्म्या	रात्रिः	२६५
परिस्रव	अध्येषणम्	२४२
परीणसा	बहु	२०१
पर्जन्यः	मध्यस्थानदेवता	३१४
पर्वतः	मेघः	४४
पवते	गच्छति	१७६
पवस्व	अध्येषणम्	२४२
पस्त्यम्	गृहम्	२१०
पविः	वाक्	५७
पविः	वज्रः	१९६
पविः	रथनेमिर्यज्ञश्च	२७४
पवित्रम्	उदकम्	८८
पवित्रम्	मन्त्रादिः	२७५
पाकः	प्रशस्यः	२२०
पाजः	बलम्	१५०
पाथः	अन्तरिक्षम्	२८८
पादुः	पदनम्	२७९
पार्वत्यः	नद्यः	९९
पार्श्वौ	द्यावापृथिव्यौ	२५३
पितरः	मध्यस्थानदेवताः	३१९
पिता	पाता	२६८
पितुः	अन्नम्	१४४
पितुः	भूस्थानदेवता	३०९

पदम्	अर्थः	पृष्ठे
पिनाकम्	दण्डः	२५१,२५८
पिप्पलम्	उदकम्	७३
पिष्टम्	रूपम्	२१८
पिस्यति	गच्छति	१६७
पीपरत्	अयाचत	२४०
पुरन्धिः	बहुधीः	२९०
पुरन्धी	द्यावापृथिव्यौ	२५२
पुरीषम्	उदकम्	७३
पुरु	बहु	२०१
पुरुभोजाः	मेघः	४४
पुरूरवाः	मध्यस्थानदेवता	३१७
पुलुकामः	बहुकामः	२८६
पुष्करम्	अन्तरिक्षम्	२०
पूजयति	अर्चति	२२८
पूरवः	मनुष्याः	१२९
पूर्णम्	उदकम्	८६
पूर्द्धि	याचस्व	२३९
पूर्व्यम्	पुरातनम्	२४९
पूषा	पृथिवी	१०
पूषा	द्युस्थानदेवता	३२३
पृक्षः	अन्नम्	१४४
पृक्षे	सङ्ग्रामे	१८८
पृच्छति	अर्चति	२२६
पृणक्षि	ददामि	२४१
पृणाति	ददाति	२४१
पृतनाः	मनुष्याः	१३२
पृतनाः	सङ्ग्रामाः	१८६
पृतनाज्यम्	सङ्ग्रामम्	१८५
पृत्सु	सङ्ग्रामेषु	१८७
पृथिवी	अन्तरिक्षम्	१९
पृथिवी	भूस्थानदेवता	३१०
पृथिवी	मध्यस्थानदेवता	३२०
पृथिवी	द्युस्थानदेवता	३२४
पृथुज्रयाः	बहुवेगाः	२७६
पृथ्वी	पृथिवी	७
पृथ्वी	द्यावापृथिव्यौ	२५३
पृश्निः	द्यौरादित्यश्च	२५,२५५
पृषत्यः	मरुद्वाहाः	१०९
पेलयति	गच्छति	१६७
पेशः	हिरण्यम्	१३
पेशः	रूपम्	२१८
पैद्वः	अश्वः	१०४
पौंस्यानि	बलानि	१५३
पौंस्ये	सङ्ग्रामे	१९०
प्रकलवित्	वणिग्	२८७
प्रजा	अपत्यम्	१२३
प्रजापतिः	यज्ञः	३३७
प्रजापतिः	मध्यस्थानदेवता	३१६
प्रतद्वसू	प्राप्तवसुनौ	२९६
प्रतिष्ठा	ह्रस्वः	२०३
प्रतीच्यम्	निर्गतमन्तर्हितं वा	२४८
प्रत्नम्	पुरातनम्	२४९
प्रदिवः	पुरातनम्	२४९
प्रपित्वे	अन्तिके	२५१,२५७
प्रयः	उदकम्	७९
प्रयः	अन्नम्	१४३
प्रवते	गच्छति	१६८
प्रवयाः	पुरातनम्	२४९
प्राशुः	क्षिप्रः	१८०
प्लवते	गच्छति	१६८
प्सरः	रूपम्	२१८
प्साति	गच्छति	१७५

पदम्	अर्थः	पृष्ठे
प्सुः	रूपम्	२१८
	फ	
फणति	गच्छति	१७३
फलिगः	मेघः	४७
	ब	
बंहिष्ठः	अतिमहान्	२०८
बकुरः	ज्योतिरुदकं वा	२९८
बट्	सत्यम्	२२२
बत	खेदः	२९९
बतः	बलातीतः	२९९
बन्धुः	धनम्	१५८
बप्सति	अदन्ति	१४९
बब्धाम्	अद्यताम्	१४९
बभस्ति	अत्ति	१४८
बर्हणा	परिवृढेन	२९५
बर्हिः	अन्तरिक्षम्	१८
बर्हिः	उदकम्	८७
बर्हिः	भूस्थानदेवता	३०५
बर्हिषद्	महान्	२०९
बहुले	द्यावापृथिव्यौ	२५३
बाधः	बलम्	१५१
बाहू	बाहू	१३३
बिस्यति	गच्छति	१६८
बीजम्	अपत्यम्	१२३
बीरिटे	अन्तरिक्षे	२८१
बुन्दः	इषुः	३०१
बुर्बुरम्	इषुः	७६
बुसम्	इषुः	७५
बृबदुक्थ्यम्	महत्स्तुत्यम्	२८५
बृबूकम्	उदकम्	७४
बृहत्	महत्	२०५
बृहस्पतिः	मध्यस्थानदेवता	३१४
बेकनाटान्	कुसीदिनः	२९८
बेकुरा	वाक्	६८
ब्रध्नः	अश्वः	१०५
ब्रध्नः	महान्	२०५
ब्रह्म	अन्नम्	१४७
ब्रह्म	धनम्	१५९
ब्रह्मणस्पतिः	मध्यस्थानदेवता	३१४
ब्राह्मणा व्रतचारिणः	उपमा	२२४,२५६
	भ	
भगः	धनम्	१५६
भनति	अर्चति	२२७
भन्दते	ज्वलति	११०
भन्दते	अर्चति	२२६
भन्दनाः	स्तुतीः	२७२
भरित्रे	बाहू	१३४
भरे	सङ्ग्रामे	१८४
भर्म	हिरण्यम्	१४
भर्वति	अत्ति	१४८
भविष्यत्	उदकम्	८२
भसथः	अत्थः	१४९
भाऋजीकः	अग्निः	२८६
भानुः	अहः	३९
भामते	क्रुध्यति	१६१
भामः	क्रोधः	१६३
भारताः	ऋत्विजः	२३७
भारती	वाक्	५७
भास्वती	उषाः	३५
भास्वत्यः	नद्यः	१००
भुरण्यति	गच्छति	१६७
भुरण्युः	क्षिप्रम्	१७९

पदम्	अर्थः	पृष्ठे
भूरिजौ	बाहू	१३४
भुवनम्	उदकम्	८२
भूः	पृथिवी	१०
भूः	अन्तरिक्षम्	१९
भूतः	उपमा	२२४,२५६
भूतम्	उदकम्	८२
भूमिः	पृथिवी	१०
भूरि	बहु	२०१
भृगवः	मध्यस्थानदेवताः	३१९
भृमिः	भ्रमिता	२९६
भेषजम्	उदकम्	७९
भेषजम्	सुखम्	२१६
भोजते	क्रुध्यति	१६२
भोजनम्	धनम्	१५८
भ्यसते	बिभेति	२५१,२६०
भ्रमति	गच्छति	१७०
भ्राजते	ज्वलति	११०
भ्राशते	ज्वलति	११०
भ्राश्यति	ज्वलति	११०
भ्रीणाति	क्रुध्यति	१६२
भ्रेषति	क्रुध्यति	१६२
	म	
मंहते	ददाति	२४१
मक्षु	क्षिप्रम्	१७८
मखः	यज्ञः	२३६
मघम्	धनम्	१५४
मज्मना	बलेन	१५३
मण्डूकाः	भूस्थानदेवताः	३०७
मतयः	मेधाविनः	२३३
मतुथाः	मेधाविनः	२३३
मदति	अर्चति	२२८

पदम्	अर्थः	पृष्ठे
मदेमहि	याचामहे	२४०
मधु	उदकम्	७२
मध्या	मध्ये	२६३
मनश्चित्	मेधावी	२३२
मनामहे	याचामहे	२४०
मनीषिणः	मेधाविनः	२३१
मनुः	द्युस्थानदेवता	३२४
मनुष्याः	मनुष्याः	१२४
मन्दते	ज्वलति	११०
मन्दते	अर्चति	२२६
मन्दिने	स्तुतिकारिणे	२६९
मन्दू	मदिष्णू	२६३
मन्द्रयते	अर्चति	२२९
मन्द्रा	वाक्	५६
मन्द्राजनी	वाक्	५६
मन्महे	याचामहे	२३९
मन्धाता	मेधावी	२३१
मन्यते	इच्छति	१४१
मन्यते	अर्चति	२२८
मन्युः	क्रोधः	१६४
मन्युः	मध्यस्थानदेवता	३१६
ममसत्यम्	संग्रामम्	१८५
मयः	सुखम्	२१५
मयूखाः	रश्मयः	२६
मरीचिपाः	रश्मयः	२६
मरुत्	हिरण्यम्	१५
मरुतः	ऋत्विजः	२३८
मरुतः	मध्यस्थानदेवताः	३१८
मर्ताः	मनुष्याः	१२७
मर्त्याः	मनुष्याः	१२७
मर्दति	गच्छति	१७३

पदम्	अर्थः	पृष्ठे
मर्याः	मनुष्याः	१२७
मलिम्लुचः	स्तेनः	२४७
मल्मलाभवन्	ज्वलत्	११२
महः	उदकम्	८३
महत्	उदकम्	८२
महत्	महत्	२०४
महयति	अर्चति	२२८
महाधने	संग्रामे	१९०
महिषः	महान्	२०७
मही	पृथिवी	८
मही	वाक्	६६
मही	गौः	१६०
मही	द्यावापृथिव्यौ	२५३
मांश्चत्वः	अश्वः	१०५
माकिः	सर्वपदसमाम्नानाय	२२४
मातरः	नद्यः	१००
मायते	याचते	२४०
माया	प्रज्ञा	२२२
मायुः	वाक्	६१
मायुकः	ह्रस्वः	२०३
मार्ष्टि	गच्छति	१६७
माहिनः	महान्	२०७
मित्रः	मध्यस्थानदेवता	३१५
मिनाति	गच्छति	१७०
मिनाति	हन्ति	१९५
मिनोति	हन्ति	१९५
मिमिड्ढि	याचस्व	२३९
मिमीहि	याचस्व	२३९
मिस्यति	गच्छति	१६८
मीळ्हुम्	धनम्	१५६
मीळ्हे	संग्रामे	१८६

पदम्	अर्थः	पृष्ठे
मुषीवान्	स्तेनः	२४७
मूषः	मूषिकाः	२६२
मृत्युः	मध्यस्थानदेवता	३१८
मृधः	संग्रामान्	१८७
मेघः	मेघः	५०
मेधः	यज्ञः	२३६
मेधा	धनम्	१५९
मेना	वाक्	५८
मेना	स्त्रीजातिः	२५१,२५८
मेनिः	वज्रः	१९८
मेळिः	वाक्	५८
मेहना	मंहनीयम्	२६२
मोकी	रात्रिः	३३
म्यक्षति	गच्छति	१६८
य		
यज्ञः	यज्ञः	२३५
यतते	गच्छति	१७०
यतस्रुचः	ऋत्विजः	२३८
यथा	उपमा	२२४,२५६
यदवः	मनुष्याः	१२८
यन्तारः	याचकाः	२४०
यन्धि	याचस्व	२४०
यमः	मध्यस्थानदेवता	३१५
यमः	द्युस्थानदेवता	३२४
यमी	मध्यस्थानदेवता	३२०
यम्या	रात्रिः	३२
यव्याः	नद्यः	९३
यशः	उदकम्	८३
यशः	अन्नम्	१४८
यशः	धनम्	१५९
यहः	उदकम्	८०

पदम्	अर्थः	पृष्ठे
यहः	बलम्	१५३
यहुः	अपत्यम्	१२३
यह्वः	महान्	२०६
यह्वयः	नद्यः	९३
यातयति	हन्ति	१९३
याति	गच्छति	१७५
यादुः	गच्छति	८२
यादृश्मिन्	यादृशे	२९२
यामि	याचे	२३९
युध्यति	गच्छति	१७२
योक्त्राणि	अङ्गुलयः	१३८
योजनानि	अङ्गुलयः	१३८
योनिः	उदकम्	८६
योनिः	गृहम्	२१२
योषिष्टि	गच्छति	१७१
यौति	अर्चति	२२७
	र	
रंसु	रमणीयेषु	२९४
रंहति	गच्छति	१७०
रजः	रात्रिः	३२
रजः	ज्योतिः	२६७
रजति	ज्योतिः	१७०
रजसी	द्यावापृथिव्यौ	२५२
रञ्जयति	अर्चति	२२७
रणः	संग्रामः	१८४
रत्नम्	धनम्	१५६
रथः	भूस्थानदेवता	३०८
रथर्यति	गच्छति	१७४
रथर्यति	रथीयति	२९९
रभसः	महान्	२०७
रम्णाति	हन्ति	१९४

पदम्	अर्थः	पृष्ठे
रम्भः	दण्डः	२५१,२५८
रयिः	उदकम्	८६
रयिः	धनम्	१५६
रशनाः	अङ्गुलयः	१३५
रश्मयः	रश्मयः	२३
रसः	उदकम्	७८
रसः	अन्नम्	१४६
रसति	अर्चति	२२८
राका	मध्यस्थानदेवता	३२०
राजति	ईष्टे	१९९
राति	ददाति	२४१
रात्रिः	भूस्थानदेवता	३०९
राधः	धनम्	१५८
राम्या	रात्रिः	३१
रायः	धनानि	१५८
राष्ट्री	ईश्वरी	१९९
रासति	ददाति	२४१
रासभौ	अन्विवाहौ	१०९
रास्पिनः	स्तोतारः	२९६
रिक्थम्	धनम्	१५५
रिक्वा	स्तेनः	२४५
रिणाति	गच्छति	१७१
रिपः	पृथिवी	८
रिपुः	स्तेनः	२४५
रिभ्वा	स्तेनः	२४५
रिरिड्ढि	याचस्व	२३९
रिरीहि	याचस्व	२४०
रिशादसः	नाशयितारः	२९१
रिहति	अर्चति	२२६
रिहायाः	स्तेनः	२४६
रीयते	गच्छति	१७१

पदम्	अर्थः	पृष्ठे
रुक्मम्	हिरण्यम्	१२
रुजानाः	नद्यः	९५
रुजानाः	भञ्जन्त्यः	२८६
रुद्रः	स्तोता	२३४
रुद्रः	मध्यस्थानदेवता	३१३
रुद्राः	मध्यस्थानदेवताः	३१९
रुशत्	रोचमानः	२९१
रेक्णः	धनम्	१५५
रेजति	गच्छति	१७१
रेजते	बिभेति	२५१,२६०
रेतः	उदकम्	७४
रेभति	अर्चति	२२५
रेभः	स्तोता	२३३
रेळते	क्रुध्यति	१६१
रेवत्यः	नद्यः	९९
रैवतः	मेघः	४७
रोचते	ज्वलति	१११
रोदसी	द्यावापृथिवी	२५२
रोदसी	मध्यस्थानदेवता	३२१
रोधचक्राः	नद्यः	९६
रौधस्वत्यः	नद्यः	१००
रोहितः	नद्यः	९७
रोहितः	अग्निवाहाः	१०८
रौति	अर्चति	२२७
रौहिणः	मेघः	४७

ल

पदम्	अर्थः	पृष्ठे
लजति	गच्छति	१७०
लोटते	गच्छति	१६६
लोठते	गच्छति	१६६
लोधम्	लुब्धम्	२६४
लोहम्	हिरण्यम्	१४

व

पदम्	अर्थः	पृष्ठे
वक्षः	उरः	२७४
वक्षणाः	नद्यः	९५
वग्नुः	वाक्	६०
वज्रः	वज्रः	१९७
वञ्चति	गच्छति	१७५
वधः	बलम्	१५३
वधः	वज्रः	१९६
वध्वः	नद्यः	९७
वनम्	रश्मिः	२५
वनम्	उदकम्	७२
वनर्गुः	स्तेनः	२४६
वनस्पतिः	भूस्थानदेवता	३०६
वनुष्यति	क्रुध्यति	१६२
वनुष्यति	हनिष्यति	२७२
वनोति	इच्छति	१४०
वपुः	उदकम्	९०
वपुः	रूपम्	२१७
वम्रकः	ह्रस्वः	२०३
वम्रीभिः	सीमिकाभिः	२५१,२५८
वयः	अन्नम्	१४४
वयुनम्	प्रशस्यः	२२०
वयुनम्	प्रज्ञा	२२२
वयुनम्	कान्तिः	२७७
वराहः	मेघः	४६,२७३
वरिवः	धनम्	१५५
वरुणः	मध्यस्थानदेवता	३१३
वरुणः	द्युस्थानदेवता	३२३
वरूथम्	गृहम्	२१२
वर्गः	बलम्	१५३
वर्चः	अन्नम्	१४७

पदम्	अर्थः	पृष्ठे
वर्त्तते	गच्छति	१६६
वर्पः	रूपम्	२१७
वर्म	गृहम्	२१२
वर्यः	नद्यः	९८
वलः	मेघः	४३
वलाहकः	मेघः	५०
वलिशानः	मेघः	४४
वल्गुः	वाक्	६७
वल्गूयति	अर्चति	२२६
ववक्षिथ	विवर्द्धिषसे	२०७
वव्रः	कूपः	२४३
वव्रिः	रूपम्	२१७
वश्मि	इच्छामि	१३९
वष्टि	इच्छति	१४०
वसु	धनम्	१५८
वसवः	रश्मयः	२५
वसवः	द्युस्थानदेवताः	३२५
वस्तोः	अहः	३९
वस्वी	रात्रिः	३४
वहते	गच्छति	१७४
वह्निः	अश्वः	१०३
वाः	उदकम्	७१
वाक्	वाक्	६६
वाक्	मध्यस्थानदेवता	३२०
वाघतः	मेधाविनः	२३३
वाघतः	ऋत्विजः	२३७
वाचस्पतिः	मध्यस्थानदेवता	३१५
वाजः	अन्नम्	१४२
वाजः	बलम्	१५०
वाजगन्ध्यम्	अन्नगृहम्	२७७
वाजपस्त्यम्	अन्नमिश्रम्	२७७
वाजयति	अर्चति	२२८
वाजसातौ	सङ्ग्रामे	१८९
वाजिनः	द्युस्थानदेवताः	३२६
वाजिनी	उषाः	३६
वाजिनीवती	उषाः	३६
वाजी	अश्वः	१०२
वाजे	सङ्ग्रामे	१९०
वाञ्छति	इच्छति	१४०
वाणः	वाक्	५७
वाणी	वाक्	५६
वाणीची	वाक्	५६
वातः	मध्यस्थानदेवता	३१६
वातरंहाः	क्षिप्रम्	१८१
वाताप्यम्	उदकम्	२९९
वाति	गच्छति	१७५
वामः	प्रशस्यः	२२०
वायुः	मध्यस्थानदेवता	३१३
वारि	उदकम्	९१
वार्यम्	वरणीयम्	२७१
वावशानः	मुहुर्भृशं वेयेष	२७१
वाशी	वाक्	५६
वाशी	तक्षणम्	२६८
वासरम्	अहः	३९
वास्तोष्पतिः	मध्यस्थानदेवता	३१४
वाहः	अधिषवणचर्म	२६५
वाहिष्ठः	अतिशयवोढा	२७१
विखादः	सङ्ग्रामः	१८४
विग्रः	मेधावी	२३०
विचष्टे	विपश्यति	२२३
विचर्षणिः	विद्रष्टा	२२३
विजामातुः	गुणिजामातुः	२८९

पदम्	अर्थः	पृष्ठे
वित्तम्	धनम्	१५९
विदथः	यज्ञः	२३६
विदथानि	विज्ञानानि	२८८
विद्रधे	विहिंसितेषु	२६४
विधाता	मेधावी	२३१
विधाता	मध्यस्थानदेवता	३१८
विधेम	परिचरेम	२१३
विनङ्गृसौ	बाहू	१३३
विपः	अङ्गुलयः	१३६
विपः	मेधावी	२३२
विपन्यवः	मेधाविनः	२३२
विपश्चित्	मेधावी	२३२
विपा	वाक्	६४
विपाट्छुतुद्री	भूस्थानदेवते	३११
विप्रः	मेधावी	२२९
विभावरी	उषाः	३५
वियत्	अन्तरिक्षम्	१७
वियातः	हन्तः	१९४
वियातयितः	हन्तः	१९४
वियुते	पृथग्भूते	२६९
विरप्शी	महान्	२०८
विवक्षसे	विवर्द्धिषसे	२०७
विवस्वन्तः	मनुष्याः	१३१
विवाक्	सङ्ग्रामः	१८४
विवासति	परिचरति	२१४
विशः	मनुष्याः	१२५
विश्वम्	बहु	२०१
विश्वकर्मा	मध्यस्थानदेवता	३१५
विश्वचर्षणिः	बहुद्रष्टा	२२३
विश्वरूपा	बृहस्पतिवाहाः	१०९
विश्वानरः	मध्यस्थानदेवता	३१८
विश्वानरः	द्युस्थानदेवता	३२३
विश्वेदेवाः	द्युस्थानदेवता	३२५
विषम्	उदकम्	७४
विषिष्टि	गच्छति	१७१
विषुणः	विषमः	२६८
विष्टप्	द्यौरादित्यश्च	२१,२५५
विष्ट्वी	कर्म	११६
विष्णुः	यज्ञः	२३७
विष्णुः	द्युस्थानदेवता	३२३
विष्णुः	आदित्यः	२७५
विष्पितः	विस्तीर्णः	२९६
विस्रुहः	आपः	२८५
विहायाः	महान्	२०६
वीरुधः	ओषधयः	२८५
वीळु	बलम्	१५२
वृक्	बलम्	१५३
वृकः	वज्रः	१९६
वृकः	स्तेनः	३४७
वृकः	चन्द्रः	२७९
वृक्तबर्हिषः	ऋत्विजः	२३८
वृजनम्	बलम्	१५३
वृणक्ति	हन्ति	१९३
वृतम्	धनम्	१५९
वृत्रः	मेघः	५१
वृत्रम्	धनम्	१५९
वृत्रतूर्ये	सङ्ग्रामे	१८८
वृन्दम्	आयुधम्	३०१
वृश्चति	हन्ति	१९३
वृषन्धिः	मेघः	५१
वृषभः	भूस्थानदेवता	३०९
वृषाकपिः	द्युस्थानदेवता	३२३

पदम्	अर्थः	पृष्ठे
वृषाकपायी	द्युस्थानदेवता	३२२
वेति	इच्छति	१४०
वेति	अत्ति	१४८
वेति	गच्छति	१७७
वेदः	धनम्	१५५
वेधाः	मेधावी	२३०
वेनः	मेधावी	२३०
वेनः	यज्ञः	२३५
वेनः	मध्यस्थानदेवता	३१६
वेनति	इच्छति	१४०
वेनति	गच्छति	१६७
वेनति	अर्चति	२२९
वेपः	कर्म	११६
वेविष्टि	गच्छति	२०५
वेवेष्टि	अत्ति	१४९
वेशति	इच्छति	१४०
वेषः	कर्म्म	११६
वेसति	इच्छति	१४०
वैतसः	पुंचिह्नम्	२५१, २५९
वैश्वानरः	भूस्थानदेवता	३०४
व्यथिः	क्रोधः	१६४
व्यन्तः	गच्छन्तः	२६८
व्यानशिः	बहुः	२०१
व्योम	अन्तरिक्षम्	१७
व्योम	दिक्	२९
व्योम	उदकम्	८४
व्रजः	मेघः	४५
व्रतम्	कर्म	११६
व्रन्दी	मृदुकारी	२७८
व्राः	लुब्धकादयः	२७३
व्राताः	मनुष्याः	१२७

पदम्	अर्थः	पृष्ठे
व्राधत्	महत्	२०८
व्रिशः	अङ्गुलयः	१३५
श		
शंयोः	शमनपूर्वयावनस्य	२६८
शंसति	अर्चति	२२७
शकुनिः	भूस्थानदेवता	३०७
शक्तिः	कर्म	१२०
शक्म	कर्म	११७
शक्वरी	बाहू	१३४
शक्वरी	गौः	१६१
शग्धि	याचस्व	२३९
शग्मम्	सुखम्	२१५
शची	वाक्	६६
शची	कर्म	११९
शची	प्रज्ञा	२२१
शतम्	बहु	२०२
शतरा	सुखदायिनी	२१४
शब्दः	वाक्	६२
शम्	सुखम्	२१६
शम्नाति	हन्ति	१९५
शमी	कर्म	११९
शम्बः	वज्रः	२८१
शम्बरः	मेघः	४६
शम्बरम्	उदकम्	८९
शम्बरम्	बलम्	१५४
शरणम्	गृहम्	२१२
शरारुः	संशयिषुः	३००
शर्द्धः	बलम्	१५१
शर्म	गृहम्	२१३
शर्म	सुखम्	२१५
शर्याः	अङ्गुलयः	१३५

पदम्	अर्थः	पृष्ठे
शर्याः	इषवः	२७४
शर्वरी	रात्रिः	३०
शवति	गच्छति	१६७
शवः	उदकम्	८०
शवः	बलम्	१५१
शशमानः	अर्चन्	२२७
शशमानः	शंसमानः	२८९
शश्वत्	बहु	२०१
शाखाः	अङ्गुलयः	१३८
शातपन्ता	सुखपातिनौ	२१४
शाशदानः	शाशाद्यमानः	२९४
शिक्षति	ददाति	२४१
शिताम	योनिः	२६२
शिपिविष्टः	उपात्तरश्मिः	२७५
शिप्रे	हनू	२६३
शिमी	कर्म	१२०
शिन्बाता	सुखगामिनौ	२१४
शिरिणा	रात्रिः	३३
शिरिम्बिठः	मेघः	३००
शिल्पम्	कर्म	१२०
शिल्पम्	रूपम्	२१९
शिवम्	सुखम्	२१६
शिशीते	श्यति	२६६
शीभम्	क्षिप्रम्	१७९
शीरम्	अग्निम्	२६४
शु	क्षिप्रम्	१८०
शुक्रम्	उदकम्	९०
शुनम्	सुखम्	२१५
शुनासीरौ	भूस्थानदेवते	३११
शुभम्	उदकम्	८२
शुरुधः	रुधत्यः	२९३
शुष्णम्	बलम्	१५२
शूघनासः	क्षिप्रगमनाः	१७९
शूरसातौ	सुङ्ग्रामे	१८९
शूर्त्ताः	क्षिप्राः	१७८
शूषम्	बलम्	१५२
शूषम्	सुखम्	२१५
शृङ्गाणि	ज्वलन्ति	११४
शृणाति	हन्ति	१९४
शेपः	पुंचिह्नम्	२५१,२५९
शेवम्	सुखम्	२१६
शेवृधम्	सुखम्	२१५
शेषः	अपत्यम्	१२२
शोकी	रात्रिः	३२
शोचति	ज्वलति	११०
शोचिः	ज्वलति	११३
श्चोतति	गच्छति	१६७
श्नथति	हन्ति	१९२
श्मशा	कुल्या	२७७
श्यावाः	सवितृवाहाः	१०९
श्यावी	रात्रिः	३०
श्येनः	मध्यस्थानदेवता	३१८
श्येनासः	अश्वाः	१०६
श्रत्	सत्यम्	२२२
श्रद्धा	भूस्थानदेवता	३१०
श्रवः	अन्नम्	१४३
श्रवः	धनम्	१५९
श्रायन्तः	आश्रयन्तः	२८८
श्रुष्टी	व्याप्तिः	२९०
श्लोकः	वाक्	५३
श्वघ्नी	कितवः	२८०
श्वसिति	हन्ति	१९३

पदम्	अर्थः	पृष्ठे
श्वात्रति	गच्छति	१७३
श्वात्रम्	धनम्	१५५
श्वात्रम्	क्षिप्रम्	२७३
श्वेत्या	उषाः	३७
	ष	
ष्व:कति	गच्छति	१७५
	स	
संयत्	सङ्ग्रामः	१९०
संयुगे	सङ्ग्रामे	१८८
संवतः	सङ्ग्रामाः	१९०
सक्षति	गच्छति	१६८
सगरः	अन्तरिक्षम्	२०
सङ्काः	सङ्ग्रामाः	१८६
सङ्खे	सङ्ग्रामे	१८८
सङ्गथे	सङ्ग्रामे	१८८
सङ्गमे	सङ्ग्रामे	१८८
सङ्गे	सङ्ग्रामे	१८८
सचति	गच्छति	१६९
सचते	सेवते	२५१,२६०
सचा	सह	२७४
सत्	उदकम्	८६
सतः	प्रासम्	२५१,२५७
सतीकम्	उदकम्	८४
सतीनम्	उदकम्	८४
सत्यम्	उदकम्	८६
सत्रा	सत्यम्	२२२
सदनम्	उदकम्	८५
सदसी	द्यावापृथिव्यौ	२५२
सदान्वे	दुर्भिक्षाधिदेवते	३००
सद्म	उदकम्	८५
सद्म	सङ्ग्रामः	१९०
सद्म	गृहम्	२१२
सद्मनी	द्यावापृथिव्यौ	२५३
सनाभयः	अङ्गुलयः	१३७
सनुतः	निर्गतमन्तर्हितं वा	२४८
सनेमि	पुरातनम्	२४९
सपति	परिचरति	२१४
सपति	अर्चति	२२७
सपर्यति	परिचरति	२१३
सप्तऋषयः	रश्मयः	२६
सप्तऋषयः	द्युस्थानदेवताः	३२५
सप्तिः	अश्वः	१०२
सप्रथाः	सर्वतः पृथुः	२८८
सबाधः	ऋत्विजः	२३८
समत्सु	सङ्ग्रामेषु	१८६
समनम्	सङ्ग्रामम्	१८६
समनीके	सङ्ग्रामे	१८९
समरणे	सङ्ग्रामे	१८७
समर्ये	सङ्ग्रामे	१८७
समस्य	सर्वस्य	२८०
समितिः	सङ्ग्रामः	१८६
समिथे	सङ्ग्रामे	१८८
समीके	सङ्ग्रामे	१८५
समुद्रः	अन्तरिक्षम्	२०
समुद्रः	द्युस्थानदेवता	३२४
समोहे	सङ्ग्रामे	१८७
सरण्यूः	द्युस्थानदेवता	३२२
सरमा	मध्यस्थानदेवता	३१९
सरः	वाक्	६८
सरः	उदकम्	७९
सरस्वान्	मध्यस्थानदेवता	३१५
सरस्वती	वाक्	५९

पदम्	अर्थः	पृष्ठे
सरस्वती	मध्यस्थानदेवता	३२०
सरस्वत्यः	नद्यः	१००
सरितः	नद्यः	९६
सर्गाः	उदकानि	८९
सर्णीकम्	उदकम्	८३
सर्पति	गच्छति	१६६
सर्पिः	उदकम्	८८
सर्वम्	उदकम्	८७
सर्सृते	गच्छति	१७३
सललूकम्	सरणशीलम्	२८५
सलिलम्	उदकम्	७१
सलिलम्	बहु	२०२
सवनम्	यज्ञः	२३६
सविता	मध्यस्थानदेवता	३१६
सविता	द्युस्थानदेवता	३२३
सवीमनि	प्रसवे	२८८
सश्चति	गच्छति	१६९
ससम्	अन्नम्	१४७
ससम्	माध्यमिकं ज्योतिः	२७३
सस्ति	स्वपिति	२४२
सस्निम्	मेघम्	२७१
सस्रुतः	नद्यः	९७
सस्रुतः	अङ्गुलयः	१३९
सस्वः	निर्गतमन्तर्हितं वा	२४८
सहः	उदकम्	७९
सहः	बलम्	१५३
सहस्रम्	बहु	२०२
साचीवित्	क्षिप्रम्	१८१
साध्याः	रश्मयः	२७
साध्याः	द्युस्थानदेवताः	३२५
सायकः	वज्रः	१९८

पदम्	अर्थः	पृष्ठे
सिनम्	अन्नम्	१४४
सिनम्	अन्नम्	२७४
सिनीवाली	मध्यस्थानदेवता	३२०
सिन्धवः	नद्यः	९८
सिरा	उदकम्	७६
सिषक्तु	सेवतात्	२५१,२६०
सिसर्त्ति	गच्छति	१७१
सीम्	परिग्रहणम्	२८२
सीयते	परिग्रहणम्	२७२
सीराः	नद्यः	९४
सुकम्	सर्वपदसमाम्नानाय	२२४
सुक्षेम	उदकम्	७६
सुखम्	उदकम्	८०
सुग्म्यम्	सुखम्	२१५
सुतः	अन्नम्	१४४
सुतुकः	सुगमनः	२६६
सुदत्रः	सुदानः	२९१
सुदिनम्	सुखम्	२१५
सुनीथः	प्रशस्यः	२२०
सुपर्णः	मध्यस्थानदेवता	३१७
सुपर्णाः	रश्मयः	२७
सुपर्णाः	अश्वाः	१०६
सुपर्णी	वाक्	६८
सुप्रायणाः	सुप्रगमनाः	२६७
सुमत्	स्वयम्	२९७
सुम्नम्	सुखम्	२१६
सुम्नावरी	उषाः	३७
सुबिते	सुगमने	२६६
सुविदत्रः	सुज्ञानः	२९१
सुशिप्रः	सुहनुः सुनसो वा	२९४
सुहस्त्याः	अङ्गुलयः	१३९

पदम्	अर्थः	पृष्ठे
सूदः	कूपः	२४४
सूनरी	उषाः	३५
सूनुः	अपत्यम्	१२३
सूनृता	उषाः	३८
सूनृता	अन्नम्	१४७
सूनृतावती	उषाः	३८
सूनृतावरी	उषाः	३८
सूरिः	स्तोता	२३४
सूर्त्ते	सुसमीरिते	२९२
सूर्यः	द्युस्थानदेवता	३२३
सूर्या	वाक्	५८
सूर्या	मध्यस्थानदेवता	३२२
सृकः	वज्रः	१९६
सृणिः	दात्रम्	२८२
सृप्रः	सृप्तः	२९४
सेधति	गच्छति	१७६
सीमः	मध्यस्थानदेवता	३१८
सीमानम्	अभिषोतारम्	२८९
स्तामुः	स्तोता	२३४
स्तिपाः	अग्निः	२९५
स्तियानाम्	हिमभावेन संहतानामपाम्	२९४
स्तुप्	स्तोता	२३४
स्तृणाति	हन्ति	१९३
स्तृभिः	नक्षत्रैः	२५१,२५८
स्तोभति	अर्चति	२२५
स्तौति	अर्चति	२२७
स्नेहयति	हन्ति	१९३
स्पृधः	सङ्ग्रामाः	१८६
स्फुरति	हन्ति	१९४
स्फुलति	हन्ति	१९४

पदम्	अर्थः	पृष्ठे
स्यन्दते	गच्छति	१६६
स्यन्द्रासः	बलानि	१५४
स्यमति	गच्छति	१६६
स्यूमकम्	सुखम्	२१५
स्योनम्	सुखम्	२१६
स्रंसते	गच्छति	१६६
स्रवति	गच्छति	१६६
स्रवन्त्यः	नद्यः	९९
स्रोतः	उदकम्	७८
स्रोत्याः	नद्यः	९४
स्वः	उदकम्	८९
स्वः	द्यौरादित्यश्च	२१,२५४
स्वञ्चाः	सुगमनः	२७५
स्वधा	उदकम्	९१
स्वधा	अन्नम्	१४६
स्वधितिः	वज्रः	१९८
स्वधे	द्यावापृथिव्यौ	२५१
स्वनः	वाक्	६२
स्वपिति	स्वपिति	२४२
स्वयम्भूः	अन्तरिक्षम्	१९
स्वरः	वाक्	६२
स्वरति	गच्छति	१७१
स्वरति	अर्चति	२२८
स्वसराणि	अहानि	४०,२७४
स्वसराणि	गृहाः	२११
स्वसारः	अङ्गुलयः	१३७
स्वस्तिः	मध्यस्थानदेवता	३२१
स्वादोअर्णाः	नद्यः	९५
स्वाहा	वाक्	५९
स्वाहाकृतयः	भूस्थानदेवताः	३०६
स्वृतीकम्	उदकम्	८३

ह

पदम्	अर्थः	पृष्ठे
हंसासः	अश्वाः	१०७
हनति	गच्छति	१७३
हन्तात्	गच्छतु	१७७
हन्ति	गच्छति	१७६
हयः	अश्वः	१०१
हरयाणः	हन्तृगमनः	२७८
हरः	ज्योतिः	२६७
हरः	ज्वलत्	११३
हरः	क्रोधः	१६३
हरयः	मनुष्याः	१२७
हरस्वत्यः	नद्यः	१००
हरितः	दिशः	२९
हरितः	नद्यः	९६
हरितः	आदित्यवाहाः	१०९
हरितः	अङ्गुलयः	१३७
हरी	इन्द्रवाहौ	१०८
हर्म्यम्	गृहम्	२१०
हर्यति	गच्छति	१७३
हर्यति	इच्छति	१४०
हविः	उदकम्	८५
हविर्धाने	भूस्थानदेवते	३११
हस्तघ्नः	भूस्थानदेवता	३०८
हासमाने	स्पर्द्धमानौ	२७३
हिकम्	सर्वपदसमाम्नानाय	२२४
हिनोत	हिनुत	२९६
हिमा	रात्रिः	३४
हिरण्यम्	हिरण्यम्	१३
हिरण्यवर्णाः	नद्यः	९७
हिरुक्	निर्गतमन्तर्हितं वा	२४८
हुरश्चित्	स्तेनः	२४६
हृणिः	ज्वलत्	११३
हृणीयते	क्रुध्यति	१६२
हेतिः	वज्रः	१९६
हेम	हिरण्यम्	१२
हेम	उदकम्	८८
हेळः	क्रोधः	१६३
हेळते	क्रुध्यति	१६१
होत्रा	वाक्	६३
होत्रा	यज्ञः	२३६
ह्रस्वः	ह्रस्वः	२०३
ह्वयते	अर्चति	२२५
ह्वरः	क्रोधः	१६४
ह्वरति	अत्ति	१४९
ह्वार्याणाम्	अश्वानाम्	१०७

॥ इति ॥

रामलाल कपूर ट्रस्ट द्वारा
प्रकाशित वा प्रसारित प्रामाणिक ग्रन्थ

१. **तैत्तिरीय-संहिता**—मूलमात्र, मन्त्रसूची सहित। १००.००

२. **तैत्तिरीयसंहिता-पदपाठ**—दाक्षिणात्यपाठानुसारी। बृहद् आकार में। पृष्ठ संख्या ६७० १५०.००

३. **अथर्ववेदभाष्य**—श्री पं० विश्वनाथ जी वेदोपाध्याय कृत। १-३ काण्ड ५०.००, ४-५ काण्ड ५०.००, ६ काण्ड ५०.००, ७-८ काण्ड ५०.००, ९-१० काण्ड ५०.००, ११-१३ काण्ड ५०.००, १४-१७ काण्ड ५०.००, १८-१९ काण्ड ५०.००, बीसवां काण्ड ५०.००।

४. **माध्यन्दिन (यजुर्वेद) पदपाठ**— १००.००

५. **गोपथ-ब्राह्मण (मूल)**—सम्पादक श्री डॉ० विजयपाल जी विद्यावारिधि। अब तक प्रकाशित सभी संस्करणों में अधिक शुद्ध और सुन्दर संस्करण। ८०.००

६. **वैदिक-सिद्धान्त-मीमांसा**—(प्रथम भाग) पं० युधिष्ठिर मीमांसक लिखित वेदविषयक १९ विशिष्ट निबन्धों का अपूर्व संग्रह। बढ़िया जिल्द नया संस्करण। ७५.००

७. **वैदिक-सिद्धान्त-मीमांसा**—(द्वितीय भाग) पं० युधिष्ठिर मीमांसक द्वारा विभिन्न समयों में लिखित वेदाङ्गादि विषयक निबन्धों का अपूर्व संग्रह। प्रथम संस्करण, सुन्दर छपाई बढ़िया जिल्द। १००.००

८. **कात्यायनीय ऋक्सर्वानुक्रमणी**—(ऋग्वेदीया)—षड् गुरुशिष्य विरचित संस्कृत टीका सहित। इसमें ऋग्वेद के प्रतिमन्त्र ऋषि देवता और छन्दों का संकलन है। इस संस्करण में टीका का पूरा पाठ प्रथम बार छापा गया है। विस्तृत भूमिका और अनेक परिशिष्टों से युक्त। बढ़िया छपाई, सुनहरी जिल्द। १५०.००

९. **ऋग्वेदानुक्रमणी**—वेङ्कट माधवकृत। इस ग्रन्थ में स्वर छन्द आदि आठ वैदिक विषयों पर गम्भीर विचार किया है। प्रत्येक वेदार्थ के जिज्ञासु के लिये यह ग्रन्थ परम उपयोगी है। व्याख्याकार—श्री डॉ० विजयपाल जी विद्यावारिधि। ५०.००

१०. **वैदिक-निघण्टु-संग्रह**—इसमें कौत्सव्य और यास्कीय निघण्टु के साथ भास्करराय विरचित वैदिक कोश, वेङ्कटमाधव कृत आख्यातानुक्रमणी और नामानुक्रमणी हैं। सम्पादक—ब्रह्मचारी डॉ० धर्मवीर विद्यावारिधि। १००.००

११. **वैदिक-छन्दोमीमांसा**—वैदिक छन्द:शास्त्र सम्बन्धी पाँच प्राचीन प्रामाणिक ग्रन्थों के आधार पर प्रत्येक छन्द के भेद-प्रभेद और उदाहरण दिये हैं। लेखक—पं० युधिष्ठिर मीमांसक। ५०.००

१२. **वैदिक-स्वर-मीमांसा**—वेद में प्रयुक्त उदात्तादि स्वरों का विस्तृत विवेचन किया गया है। स्वर-शास्त्र के अज्ञान के कारण होने वाली भूलों का निदर्शन एवं स्वरभेद से होनेवाले अर्थभेद को दर्शाया है। लेखक—पं० युधिष्ठिर मीमांसक। ५०.००

१३. **वैदिक वाङ्मय में प्रयुक्त विविध स्वराङ्कन प्रकार**—लेखक—पं० युधिष्ठिर मीमांसक। १०.००

१४. **यजुर्वेद का स्वाध्याय तथा पशुयज्ञ समीक्षा**—लेखक—पं० विश्वनाथ जी वेदोपाध्याय। २०.००

१५. **उरु-ज्योति**—डॉ० वासुदेवशरण अग्रवाल लिखित वेदविषयक स्वाध्याययोग्य निबन्धों का संग्रह। सुन्दर छपाई, पक्की जिल्द। २५.००

१६. **वेदों की प्रामाणिकता**—डॉ० श्रीनिवास शास्त्री। ४.००

१७. **ANTHOLOGY OF VEDIC HYMNS**—Swami Bhumananda Sarasvati. १००.००

१८. **बौधायन-श्रौत-सूत्रम्**—(दर्शपूर्णमास प्रकरण)—भवस्वामी तथा सायणकृत भाष्य सहित (संस्कृत)। ६०.००

१९. **बौधायन-श्रौत-सूत्रम्**—(आधान-प्रकरण)—सुबोधिनीवृत्ति और आधान प्रक्रियासहित (संस्कृत)। ६०.००

२०. **दर्शपूर्णमास-पद्धति**—दर्शपूर्णमास समस्त श्रौतयज्ञों की प्रकृति रूप है। इसके परिज्ञान से अन्य यज्ञों की प्रक्रिया जानने में सहायता मिलती है। पं० भीमसेन कृत भाषार्थ सहित। ३०.००

२१. **कात्यायन-गृह्यसूत्रम् (मूलमात्र)**—अनेक हस्तलेखों के आधार पर हमने इसे प्रथम बार छापा है। २५.००

२२. **श्रौतपदार्थ-निर्वचनम्**—(संस्कृत) अग्न्याधान से अग्निष्टोम पर्यन्त अध्वर्यु ऋत्विक् सम्बन्धी यज्ञ में क्रियमाण सभी पदार्थों का विवरणात्मक ग्रन्थ। ५०.००

13529

२३. **श्रौत-यज्ञ-मीमांसा**—(संस्कृत-हिन्दी) लेखक—पं० युधिष्ठिर जी मीमांसक। इसमें श्रौतयज्ञों की उत्पत्ति, प्रयोजन, उनमें परिवर्तन तथा पशुयज्ञों पर विस्तार से विवेचना की गयी है। ४०.००

२४. **अग्निहोत्र से लेकर अश्वमेध पर्यन्त श्रौतयज्ञों का संक्षिप्त परिचय**—इस ग्रन्थ में अग्न्याधान, अग्निहोत्र, दर्शपूर्णमास, सुपर्णचिति सहित सामयाग, चातुर्मास्य और वाजपेय आदि योगों का वर्णन है। (दोनों भाग एकत्र)। लेखक—युधिष्ठिर मीमांसक, डॉ० विजयपाल। कुछ संशोधन तथा सचित्र विवरण सहित। नया संस्करण। ३०.००

२५. **निरुक्त-श्लोकवार्त्तिकम्**—केरलदेशीय नीलकण्ठ गार्ग्य विरचित। एकमात्र मलयालम लिपि में ताडपत्र पर लिखित दुर्लभ प्रति के आधार पर मुद्रित। आरम्भ में उपोद्घातरूप में निरुक्त-शास्त्र विषयक संक्षिप्त ऐतिह्य दिया गया है (संस्कृत) सम्पादक—डॉ० विजयपाल विद्यावारिधि। उत्तम कागज, शुद्ध छपाई तथा सुन्दर जिल्द सहित। १५०.००

२६. **निरुक्त-समुच्चय**—आचार्य वररुचि विरचित (संस्कृत)। इसमें चार कल्पों में १०० मन्त्रों की नैरुक्तप्रक्रियानुसार व्याख्या की गई है। सम्पादक—युधिष्ठिर मीमांसक। ३०.००

२७. **अष्टाध्यायी-भाष्य**—(संस्कृत तथा हिन्दी)—श्री पं० ब्रह्मदत्त जिज्ञासु कृत। इसके संस्कृत भाग में प्रत्येक सूत्र का पदच्छेद, विभक्ति, समास और ऊपर से आनेवाली अनुवृत्ति का निर्देश करके सरल संस्कृत में सूत्र की वृत्ति और उदाहरण दिये हैं। प्रत्येक भाग के अन्त में उदाहरणों की सिद्धि की प्रक्रिया दर्शाई हैं। प्रथम भाग—८०.००, द्वितीय भाग ५०.००, तृतीय भाग ७०.००।

२८. **काशिका**—वामनजयादित्य-रचित प्रामाणिक अष्टाध्यायी-व्याख्या। नवीन संशोधित शुद्धतम संस्करण। ३००.००, ५००.००

२९. **धातु पाठ**—धात्वादिसूचि सहित, सुन्दर शुद्ध संस्करण। ८.००

३०. **क्षीरतरङ्गिणी**—क्षीरस्वामी कृत। पाणिनीय धातुपाठ की सबसे प्राचीन एवं प्रामाणिक व्याख्या। सजिल्द ८०.००

३१. **धातुप्रदीप**—मैत्रेयरक्षित विरचित पाणिनीय धातुपाठ की व्याख्या। सजिल्द ६०.००

३२. **वामनीयं लिङ्गानुशासनम्**—वामनदेव-स्वोपज्ञव्याख्यासहितम्। इसमें केवल पद्यों में संस्कृत भाषा के शब्दों का लिङ्ग बताया है। व्याख्या पाणिनीय व्याकरणानुसार है। १५.००

13529

३३. **संस्कृत पठन-पाठन की अनुभूत सरलतम विधि**—लेखक—पं० ब्रह्मदत्त जिज्ञासु। इस ग्रन्थ की सरलता का अनुभव करके इसके आधार पर उत्तरप्रदेश तथा अन्य प्रदेशों के नगरों में प्रतिवर्ष अनेक शिविरों का आयोजन किया जाता है।
प्रथम भाग ३०.००, द्वितीय भाग ५०.००

३४. **महाभाष्य**—हिन्दी व्याख्या (द्वितीय अध्याय पर्यन्त) व्याख्याकार—पं० युधिष्ठिर मीमांसक। प्रथम भाग-प्रथम खण्ड ६५.००, द्वितीय खण्ड ६०.००। द्वितीय भाग ७५.००, तृतीय भाग ७५.००।

३५. **उणादिकोष**—पञ्चपादी उणादिसूत्रों की ऋषि दयानन्द सरस्वती कृत व्याख्या तथा पं० युधिष्ठिर मीमांसक कृत टिप्पणियों एवं ११ सूचियों सहित। २५.००

३६. **दशपाद्युणादिवृत्ति संग्रह**—प्रथम भाग में अतिप्राचीन माणिक्य देव विरचित वृत्ति है। इस पर व्याकरणादि शास्त्रों से सम्बद्ध शतशः टिप्पणियाँ तथा अन्त में सूत्र, प्रत्यय तथा शब्द सूची दी है। सम्पादक—पं० युधिष्ठिर मीमांसक, चन्द्रदत्त शर्मा। ६०.००

३७. **दशपाद्युणादिवृत्ति संग्रह**—द्वितीय भाग में दो अज्ञातनामा वृत्तिकारों की वृत्तियाँ तथा विट्ठलाचार्यकृत वृत्ति दी गई है। सम्पादक—श्री चन्द्रदत्त शर्मा। ६०.००

३८. **भागवृत्तिसंकलनम्**—अष्टाध्यायी की प्राचीन अनुपलब्धवृत्ति के ग्रन्थान्तरों में उद्धृत २०० उद्धरणों का संकलन किया गया है। काशिका के अनन्तर यही वृत्ति प्रामाणिक मानी गई है।२०.००

३९. **काशकृत्स्न-व्याकरणम्**—पाणिनि से प्राचीन काशकृत्स्न-व्याकरण के उपलब्ध १४३ सूत्रों की संस्कृत में विस्तृत व्याख्या। सम्पादक एवं व्याख्याता—पं० युधिष्ठिर मीमांसक। २०.००

४०. **गणरत्नावली**—(संस्कृत) यज्ञेश्वरभट्टकृत पाणिनीय गणपाठ की व्याख्या। सम्पादक—चन्द्रदत्त शर्मा। ७५.००

पुस्तक प्राप्ति स्थान—

रामलाल कपूर ट्रस्ट

बहालगढ़ [सोनीपत हरियाणा] १३१०२१

रामलाल कपूर एण्ड सन्स, २५९६, नई सड़क, दिल्ली

13529 पुस्तकालय ग्रंथ परि०सं०